half). — $G_{1.3.4}$ om. the ref. — (L. 76) M_{1-3} गृह्णाति (for गृह्णीयात्). — (L. 77) D_{10} अथ ते विहिता गर्भास्तासु कन्यासु नारद. — (L. 78) D_{10} तासां (for तस्य). D_{10} भवतीह (for भवेदेतत्). — (L. 79) T_1 धर्माभावेन (for °चारेषु). D_{10} G_3 ये (for ते). G_2 -शोभनाः (for -शोधनाः). D_{10} वर्जितास्त्वतिदूषिताः; T_1 दूषिताः कृतशोभनाः; M दूषिता धर्मदूषणाः (for the post. half). — (L. 80) D_{10} मोघं कर्म फलत्यपि (for the post. half). — (L. 81) G_2 क्रीडार्थं ता (for क्रीता दत्ता). D_{10} [अ]थ वा हृता (for हृतापि वा). — (L. 82) D_{10} -फलं तासां; T_1 -फलं तस्यास् (for -कृतं तस्यास्). — (L. 83) D_{10} कन्या पाणिविवर्जिता (for the post. half). — (L. 84) G_2 या (for सा). M_4 (also as above) कन्या (for भार्या). D_{10} प्रसवेत्पुत्रमौरसं (for the post half). — D_{10} om. line 85. — (L. 85) T_3 भक्त्यर्थे; M_4 पत्न्यर्थे (for पत्यर्थे). T_1 न (for तत्). Madras ed. [अ]पवर्जिते (for [अ]पराजिते). — (L. 86) D_{10} कथं (for केन). D_{10} -कार्याणि (for -कृत्येषु). — (L. 88) D_{10} हि (for नि-). D_{10} वपुष्मती (for प्रतिष्ठिता). — After line 88, D_{10} reads line 97, repeating it in its proper place. D_{10} om. line 89. — (L. 89) T_1 M तदा (T_1 M_4 °था) शुभा द्युतिः शोभा; G_2 शोभनास्ता शुभा योग्याः (for the prior half). M पूजा- (for पूज्या). — (L. 90) D_{10} आगारस्थं (for आकरस्थं). D_{10} -फलं भवेत्; T_1 M_{1-3} -फलोदयं (for -फलोपगम्). — (L. 91) D_{10} सदा (for महा-). G_3 reads the post. half of line 91 and the prior half of line 92 (transposed) twice. — Before line 92, D_{10} ins. मार्कण्डेयः. — D_{10} reads line 92 twice. — (L. 92) D_{10} (second time) कथं कन्या च लभते (for the prior half). D_{10} (second time) प्राणिनां (for देहिनाम्). — (L. 93) D_{10} M_4 चरितं; T_1 M_{1-3} चारित्र- (for चारित्रं). D_{10} वृत्तं च (for वृत्तेन). $M_{1.3.4}$ निकषोपलः. — Before line 94, D_{10} ins. नारदः. — (L. 94) D_{10} अर्चयित्वा स्वकान्वर्णान्कन्यकायास्तथा नरः. — (L. 95) M_4 प्रसूयति. — (L. 96) D_{10} सा च (for the second साध्वी). — (L. 97) D_{10} (first time) मुने सा श्रीस्ततो रक्षा (for the prior half). D_{10} (both times) प्रतिष्ठा शाश्वतीः समाः (for the post. half). — Colophon. *Sub-parvan :* D_{10} M दानधर्म. — *Adhy. name :* T_2 मार्कंडेयनारदसंवादे कन्यालक्षणं; T_3 G कन्यालक्षणं; M_{1-3} नारदमार्कंडेयसंवादे पुत्रकन्यावि(M_1 °न्यासंवि)भागः; M_4 नारदगीतासु कन्यावृत्तं. — *Adhy. no. :* D_{10} 49; T_1 M 51; $T_{2.3}$ $G_{2.4}$ 57; $G_{1.3}$ 52. — (L. 98) D_{10} महामुने (for °मते). — (L. 99) M_{1-3} धर्माधर्मौ (for °धर्मं). M_4 महामते (for परिग्रहे). — (L. 100) D_{10} गम्यागम्यासु नारद (for the post. half). M_1 (also as above) नराणां न कलौ तथा (for the post. half). — (L. 101) G_2 [इ]त्र (for [इ]ह). T_1 [अ]पिता (for हिता). D_{10} प्रेत्येव च यथा व्युष्टिः (for the prior half). — (L. 102) D_{10} साक्षात् (for साध्वी). — (L. 103) D_{10} M च (for स्व-). D_{10} सूयते (for प्रसूयेत्).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मार्कण्डेयः ।

त्रयो भार्यागमा ज्ञाता यत्र धर्मो न नश्यति ।
पश्चान्याः पश्चिमा ब्रूहि भार्यास्तासां च ये सुताः ।

नारदः ।

सगोत्रभार्या क्रीता च परभार्या च कारिता ।
गतागता च या भार्या आश्रमादाहृता च या ।
एते भार्यागमाः पञ्च पुनर्भार्या भवन्ति याः ।
एता भार्या नृणां गम्यास्तत्पुत्रा हव्यकव्यदाः ।

Colophon.

मार्कण्डेयः ।

श्रुता भार्याश्च पुत्राश्च विस्तरेण महामुने ।
आश्रमस्थाः कथं नार्यो न दुष्यन्तीति ब्रूहि मे ।

नारदः ।

आश्रमस्थासु नारीषु बान्धवत्वं प्रणश्यति ।
नष्टवंश्या भवन्त्येता बन्धूनामथ भर्तृणाम् ।
परदारा मुक्तदोषास्ता नार्योऽऽश्रमसंस्थिताः ।
स्वयमीशाः स्वदेहानां काम्यास्तद्गतमानसाः ।
एवं नार्यो न दुष्यन्ति नराणां तत्प्रसूतिषु ।
धर्मपत्न्यो भवन्त्येताः सपुत्रा हव्यकव्यदाः ।

मार्कण्डेयः ।

परस्य भार्या या पूर्वं मृते भर्तरि या पुनः ।
अन्यं भजति भर्तारं ससुता असुता कथम् ।

नारदः ।

असूता वा प्रसूता वा गृहस्थानां परस्त्रियः ।
परामृष्टेति ता वर्ज्या धर्माचारेषु दूषिताः ।
न चासां हव्यकव्यानि प्रतिगृह्णन्ति देवताः ।
यस्तासु जनयेत्पुत्रान्न तैः पुत्रमवाप्नुयात् ।

मार्कण्डेयः ।

परक्षेत्रेषु यो बीजं चापल्याद्विसृजेन्नरः ।
कथं पुत्रफलं तस्य भवेत्तदृषिसत्तम ।

नारदः ।

अस्वामिके परक्षेत्रे यो नरो बीजमुत्सृजेत् ।
स्वयंवृत्तोऽऽश्रमस्थायां तद्बीजं न विनश्यति ।
परक्षेत्रेषु यो बीजं नरो दर्पात्समुत्सृजेत् ।
क्षेत्रिकस्यैव तद्बीजं न बीजी लभते फलम् ।
नातः परमधर्म्यं चाप्ययशस्यं तथोत्तरम् ।
गर्भादीनां च बहुभिस्ताश्च त्याज्याः समेष्वपि ।

मार्कण्डेयः ।

अथ ये परदारेषु पुत्रा जायन्ति नारद ।
कस्य ते बन्धुदायादा भवन्ति परमद्युते ।

नारदः ।

परदारेषु जायेते द्वौ पुत्रौ कुण्डगोलकौ ।
जीवत्यथ पतौ कुण्डो मृते भर्तरि गोलकः ।
ते च जाताः परक्षेत्रे देहिनां प्रेत्य चेह च ।

—(L. 104) T_2 ज्ञेयं; T_3 ज्ञेया; M_4 धर्म्या (for ज्ञाता). M_{1-3} महामते (for न नश्यति). —(L. 105) T_1 पंचमाः (for पश्चान्याः). D_{10} पंचेमा अपरा यास्ता ब्रूहि भार्याः सुतेषु च. —(L. 106) D_{10} भ्रातृभार्या च (for सगोत्रभार्या). T_1 प्रीता (for क्रीता). D_{10} नारद (for कारिता). —(L. 107) D_{10} भार्या च (for या भार्या). D_{10} आश्रमस्था च या परा (for the post. half). —(L. 108) T_2 G भार्यागताः (for °माः). —(L. 109) D_{10} नृभिः (for नृणां). D_{10} M कार्याः; T_1 अन्यास् (for गम्यास्). D_{10} M सपुत्रा (for तत्पुत्रा). — Colophon om. in M_{1-3}. — *Adhy. name :* T_2 मार्कंडेयनारदसंवादे धर्माधर्मपरिग्रहलक्षणं. — *Adhy. no.* : T_1 M_4 52; $T_{2.3}$ $G_{2.4}$ 58; $G_{1.3}$ 53. — D_{10} om. (hapl.) lines 110–117. —(L. 111) Cv च या (for कथं). G_2 भो (for मे). T_2 न दूष्यंति हि न प्रभो (for the post. half). —(L. 112) T_3 प्रपश्यति (for प्रण°). —(L. 113) T_1 प्रष्टव्याश्च (for नष्टवंश्या). G_4 अपि (for अथ). G_2 भ्रातृणां (for भर्तृणाम्). M_{1-3} सपुत्रा हव्यकव्यदाः (for the post. half). —(L. 114) M_3 परदारोक्तदोषास्ता (for the prior half). —(L. 115) G_4 स्वगेहानां (for स्वदे°). —(L. 118) T_1 सा; G_2 वा; M यत् (for the second या).

—(L. 119) G_4 चासुता; Madras ed. द्य° (for अ°). D_{10} तासु कन्यासु या च सा (for the post. half). —(L. 120) M_{1-3} गृहस्थेन (for गृहस्थानां). —(L. 121) D_{10} परक्षेत्रेति सा वर्ज्या (for the prior half). D_{10} चोदिताः (for दूषिताः). T_1 धर्माचारबहिष्कृताः (for the post. half). —(L. 122) D_{10} तस्या (for चासां). —(L. 123) G_2 न (for यस्). D_{10} यस्तस्यां जनयेत्पुत्रं (for the prior half). D_{10} न स पुत्रत्वमाप्नुयात्; T_1 G_2 $M_{1.2.4}$ न तैः पुत्र($M_{1.2}$ °त्रि)त्वमाप्नुयात् (for the post. half). — D_{10} om. (hapl) lines 124–131. T_3 G_2 om. (hapl.) lines 124–127. —(L. 124) Kumbh. ed. चापलाद् (for °ल्याद्). —(L. 127) $M_{1.4}$ स्वयंवृतो (for °वृत्तो). T_1 स्वयंवृताश्रमस्था वा (for the prior half). —(L. 129) T_1 ब्रह्मन् (for बीजं). G_2 न बीजी फलमाप्नुयात् (for the post. half). —(L. 130) G_2 यथोत्तरं (for त°). — T_1 om. line 131. —(L. 131) G_2 M_4 गर्हादिना (for गर्भादीनां). —(L. 132) D_{10} ते (for ये). D_{10} मानवैः (for नारद). —(L. 133) D_{10} भवंति मुनिसत्तम (for the post. half). — Lines 134–137 = (var.) Manu. 3. 174–175. —(L. 134) D_{10} यातौ यौ; G_4 जायंते (for जायेते).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दत्तानि हव्यकव्यानि नाशयन्त्यथ दातृणाम् ।
पितुर्हि नरकायैते गोलकस्तु विशेषतः ।
चण्डालतुल्यौ तज्जौ हि परत्रेह च नश्यतः ।

मार्कण्डेयः ।

कस्य ते गर्हिताः पुत्राः पितॄणां हव्यकव्यदाः ।
यस्य क्षेत्रे प्रसूयन्ते यो वा ताञ्जनयेत्सुतान् ।

नारदः ।

क्षेत्रिकश्चैव बीजी च द्वावेतौ निरयं गतौ ।
न रक्षति हि यो दारान्परदारांश्च गच्छति ।
गर्हितास्ते नरा नित्यं धर्माचारबहिष्कृताः ।
कुण्डो भोक्ता च भोजी च कुत्सिताः पितृदैवतैः ।

मार्कण्डेयः ।

तथैते गर्हिताः पुत्रा हव्यकव्यानि नारद ।
कस्य नित्यं प्रयच्छन्ति धर्मो वा तेषु किं फलम् ।

नारदः ।

यातुधानाः पिशाचाश्च प्रतिगृह्णन्ति तैर्हुतम् ।
हव्यं कव्यं च तैर्दत्तं ये च भूता निशाचराः ।

मार्कण्डेयः ।

अथ ते राक्षसाः प्रीताः किं प्रयच्छन्ति दातृणाम् ।
किं वा धर्मफलं तेषां भवेत्तदृषिसत्तम ।

नारदः ।

न दत्तं नश्यते किंचित्सर्वभूतेषु दातृणाम् ।
प्रेत्य चेह च तां पुष्टिमुपाश्नन्ति प्रदायिनः ।

मार्कण्डेयः ।

अथ गोलककुण्डाभ्यां संततिर्या भविष्यति ।
तयोर्ये बान्धवाः केचित्प्रदास्यन्ति कथं नु तत् ।

नारदः ।

साध्वीजाताः सुतास्तेषां तां वृत्तिमनुतिष्ठताम् ।
प्रीणन्ति पितृदैवत्यं हव्यकव्यसमाहिताः ।
एवं गोलककुण्डाभ्यां ये च वर्णापदेशिनः ।
हव्यं कव्यं च शुद्धानां प्रतिगृह्णन्ति देवताः ।

Colophon.

मार्कण्डेयः ।

श्रुतं नराणां चापल्यं परस्त्रीषु प्रजायताम् ।
प्रमदानां तु चापल्ये दोषमिच्छामि वेदितुम् ।

नारदः ।

एकवर्णेऽपि दोषं तु गमनं पूर्वकालिकम् ।
धाता च समनुज्ञातो विष्णुना तत्तथाकरोत् ।

— (L. 135) D_{10} [ए]त्र पतौ ; T_1 [ए]व धवे (for [अ]थ पत्नौ). D_{10} भवति (for भर्तरि). — G_2 om. line 136. — (L. 136) T_1 प्र- ; M_{1-3} हि (for च). D_{10} तौ तु जातौ परक्षेत्रे (for the prior half). D_{10} प्राणिनां (for देहिनां). — (L. 137) G_2 तयोस्तु (for दत्तानि). T_1 M_4 प्र- (for [अ]थ). D_{10} नाशयेतां प्रदायिनां ; G_2 नाशं दत्तानि यांति च ; M_{1-3} नाशं यांति प्रदातॄणां (for the post. half). — D_{10} om. lines 138–139. — (L. 138) T_1 G_2 पित्रोर् (for पितुर्). T_1 G_2 M [ए]तौ (for [ए]ते). — (L. 139) Some MSS. चांडाल-. — (L. 141) G_2 प्रसूयंति. D_{10} यस्य क्षेत्रेषु जायंते (for the prior half). T_1 हि ताञ् ; G_3 वा सं- (for वा ताञ्). D_{10} नरः (for सुतान्). — (L. 142) D_{10} क्षेत्रकं नैव बीजं तु (for the prior half). D_{10} नरकं (for निरयं). M_4 (*inf. lin.*) -गमौ (for गतौ). — (L. 143) D_{10} यो व्रजेत् (for गच्छति). — (L. 144) $T_{2,3}$ G_4 धर्ममार्ग- (for धर्माचार-). D_{10} धर्माचारेषु साधुभिः (for the post. half). — (L. 145) D_{10} $M_{1,2}$ कुंड- (for कुण्डो). D_{10} भोगी (for भोजी). Madras ed. कुत्सितः. D_{10} जयंति पितृदेवतां (for the post. half). — (L. 146) D_{10} T_1 अथ ते ; G_2 तथा ते (for °तथैते). — After line 146, M_{1-3} ins. :

पितृदेवविसृष्टानि भुञ्जते ते महामुने ।

— M_2 om. line 147. — (L. 147) G_1 तस्य (for कस्य). D_{10} पुष्टि (for नित्यं). D_{10} T_1 धर्माचारेषु किं फलं (for the post. half). — (L. 149) $M_{1,2}$ हव्य-. M_{1-3} यैर् (for तैर्). — M_1 om. (hapl.) lines 151–152. — (L. 151) D_{10} कथं दत्तं ; G_2 किं वा कर्म- (for किं वा धर्म-). T_1 भवेच्च ; G_2 उभयोर् ; $M_{2,3}$ भवेत (for भवेत्तद्). D_{10} वै मुनि- (for तदृषि-). — (L. 152) G_2 दत्तं न (by transp.). — (L. 153) D_{10} एत्र (for चेह). M व्युष्टिम् (for पुष्टिम्). D_{10} प्रदायकाः (for °यिनः). — (L. 154) D_{10} चातो भार्या (for संततिर्या). — (L. 155) D_{10} भवेत् ; G_{1-3} तु तत् (for नु तत्). — (L. 156) T_1 M सतां वृत्तिमनुष्ठिताः (for the post. half). D_{10} सर्व एते धर्मसुतास्तेषां वृत्तिरनुष्ठिता. — (L. 157) T_1 -देवास्ते (for -दैवत्यं). D_{10} प्रयांति पितृदेवांश्च ; G_2 प्रीणयंति पितॄन्देवान् (for the prior half). D_{10} -समाहितं (for °ताः). G_2 हव्यकव्यैः समाहितैः (for the post. half). — (L. 158) D_{10} एवं कुंडगोलकाभ्यां (for the prior half). T_1 वंश्या (for ये च). — (L. 159) M वि- (for च). D_{10} G_2 हव्यकव्याति(G_2 °दि)शुद्धानां (for the prior half). — Colophon om. in D_{10}. *Sub-parvan* : M दानधर्म. — *Adhy. name* : T_2 मार्कंडेयनारदसंवादे कुंडगोलकदोषकथनं ; $G_{1,3}$ कुंडगोलकदोषकथनं ; M नारदगीता. — *Adhy. no.* : T_1 M_4 53 ; $T_{2,3}$ $G_{2,4}$ 59 ; $G_{1,3}$ 54 ; M_{1-3} 52. — (L. 160) T_1 M चापल्ये. D_{10} श्रुतं परस्त्रीजातं यं यश्चैवात्र प्रसूयिता. — (L. 161) D_{10} चापल्यं (for °ल्ये). D_{10} एतद् (for दोषम्). — D_{10} om. lines 162-163. T_1 M transp. lines 162–163 and

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भगलिङ्गे महाप्राज्ञ पूर्वमेव प्रजापतिः ।
ससर्ज ताभ्यां संयोगमनुज्ञातश्चकार सः ।
अथ विष्णुप्रसादेन भगो दत्तवरः किल ।
तेन चैव प्रसादेन सर्वाँल्लोकानुपाश्नुते ।
तस्मात्तु पुरुषे दोषो ह्यधिको नात्र संशयः ।
विना गर्भं सवर्णेषु न त्याज्या गमनात्स्त्रियः ।
प्रायश्चित्तं यथान्यायं दण्डं कुर्यात्स पण्डितः ।
श्वभिर्वा दशनं स्नानं सवनत्रितयं निशि ।
भूमौ च भस्मशयनं दानं भोगविवर्जितम् ।
दोषगौरवतः कालो द्रव्यगौरवमेव च ।
मर्यादा स्थापिता पूर्वमिति तीर्थान्तरं गते ।
तद्योषितां तु दीर्घायो नास्ति दोषो व्यतिक्रमे ।
भगस्तीर्थान्तरे शुद्धो विष्णोस्तु वचनादिह ।
रक्ष्याश्चैवान्यसंवादैरन्यगेहाद्विमोक्षणैः ।
आसां शुद्धौ विशेषेण कर्मणां फलमश्नुते ।
नैता वाच्या न वै वध्या न क्लेश्याः शुभमिच्छता ।
विष्णुप्रसादादित्येव भगस्तीर्थान्तरं गतः ।
मासि मासि रजस्तासां दुष्कृतान्यपकर्षति ।
स्त्रियस्तोषकरा नृणां स्त्रियस्तुष्टिप्रदाः सदा ।
पुत्रसेतुप्रतिष्ठाश्च स्त्रियो लोके महाद्युते ।

Colophon.

मार्कण्डेयः ।

श्रुतं बलं प्रभावश्च योषितां मुनिसत्तम ।
एकस्य बहुभार्यस्य धर्ममिच्छामि वेदितुम् ।

नारदः ।

बहुभार्यासु सक्तस्य नारीभोगेषु देहिनः ।
ऋतौ विमुच्यमानस्य सांनिध्ये भ्रूणहा स्मृतः ।
वृद्धां वन्ध्यां सुव्रतां च मृतापत्यामपुष्पिणीम् ।
कन्यां च बहुपुत्रां च वर्जयन्मुच्यते भयात् ।
व्याधितो बन्धनस्थो वा प्रवासेष्वथ पर्वसु ।
ऋतुकालेषु नारीणां भ्रूणहत्यां प्रमुञ्चति ।

मार्कण्डेयः ।

वेशनारीषु वै जाताः परप्रेष्यासु वा सुताः ।
कस्य ते बन्धुदायादा भवन्ति हि महामुने ।

164–165. —(L. 162) T2 G2.4 तु; M4 (*inf. lin.*) वि- (for ऽपि). —(L. 164) T1.3 G भगलिंगैर्. D10 G2 M महाभाग (for °प्राज्ञ). D10 आद्यकाले (for पूर्वमेव). —(L. 165) T1 मनुजांश्च (for अनुज्ञातश्). G2 अनुजज्ञे पितामहः (for the post. half). D10 पूर्व एव तु सा राजन्संयोगेन विगर्हितं (sic). —(L. 166) D10 पुरा (for अथ). M4 जिष्णु- (for विष्णु-). D10 त्रीँल्लोकान्समुपाश्नुते (for the post. half). —(L. 167) G2 कामान् (for लोकान्). —T1 reads line 168 twice. —(L. 168) T2.3 G1.3.4 [ऽ]भ्यधिको (for ह्य°). —(L. 171) Madras ed. वहिर् (for श्वभिर्). T2 M1 दर्शनं; T3 G2 दंशनं (for द°). M -त्रितये (for °यं). —(L. 172) T2.3 G1.3.4 भस्मनि (for च भस्म-). T1 om. the post. half. M1.2.4 -विवर्जनं (for °र्जितम्). —(L. 173) T1 om. the post. half. T3 दिव्य- (for द्रव्य-). —(L. 174) T1 इह स्त्रीणां व्यतिक्रमे (for the post. half). —(L. 177) G2 प्रसादाद्यैर् (for [अ]न्यसंवादैर्). Madras ed. -देहाद् (for -गे°). Kumbh. ed. विचक्षणैः (for विमो°). —(L. 179) T1 ता (for [ए]ता). T1 नरैर्नार्यो (for न वै वध्या). G1.3 शुद्धिम् (for शुभम्). —T1 om. line 180. —(L. 180) M1–3 [ए]वं; M4 [ए]प (for [ए]व). M1–3 भगे (for भगस्). M1–3 गते (for गतः). —(L. 181) T2 द्युतिस्; Kumbh. ed. ऋतुस् (for रजस्). G2 चासां; M4 चैषां (for तासां). —(L. 182) G2 पुष्टि- (for तुष्टि-). —(L. 183) T1 M महामुने (for °द्युते). —For lines 167–183, D10 subst.:

मर्यादा स्थापिता नित्यं विष्णुना स्त्रीषु गर्हिता ।
न नारी दुष्यते धर्मे परपुंसावमर्दने ।
न च साशुचिर्भवति यथा प्राह पितामहः ।
विष्णोस्तोपाद्भगः पूर्वमिति तीर्थान्तरं गतः ।
तन्नारीणां तु दीर्घायो नास्ति दोषो व्यतिक्रमे ।
मासि मासि रजो मुक्त्वा विशुध्यन्ते यथा शशी ।
न संतोषकरो नृणां समृद्धि निर्वृतिरात्मभिः (?) ।
पुत्रांश्चापि प्रतिष्ठाप्य जगत्यथ प्रतिष्ठिताम् (?) ।

Colophon. *Sub-parvan*: M1–3 दानधर्म. —*Adhy. name*: T2 G2 स्त्रीप्रशंसा; G3 कुंडगोलकदोषकथनं; M2.3 नारदगीतासु योषित्प्रभावकथनं; M4 नारदगीता. —*Adhy. no.*: T1 M4 54; T2 G2.4 60; G1.3 55; M1–3 53. —(L. 184) D10 योषितां वै महामुने (for the post. half). —(L. 186) Kumbh. ed. गेहिनः (for दे°). —(L. 187) G2 सांनिध्ये गर्भहिंसनं (for the post. half). D10 ऋतौ च वर्तमानस्य सांनिध्ये भ्रूणहत्यया. —(L. 188) T1 सव्रतां; T2.3 G M4 संवृतां (for सुव्रतां). D10 व्रतिनीमव्रतिनीं वा; M1–3 व्रतवान्प्रवसन्वंध्यां (for the prior half). T1 मृतपुत्राम् (for मृतापत्याम्). D10 च पुष्पिणीं (for अपु°). —(L. 190) G2 व्यथितो (for व्याधितो). D10 सवनस्थो (for बन्धनस्थो). G2 M प्रवासी वा (for °सेषु). T1 [अ]पि (for [अ]थ). D10 प्रवासी वा व्रती तथा (for the post. half). —(L. 191) G4 -काले तु (for -कालेषु). D10 भ्रूणहत्या प्रमुच्यते (for the post. half). —(L. 192) T3 G3.4 M2.3 -जातीषु (for -नारीषु). D10 T1.3 M1–3 ये; G2 M4 वा (for वै); D10 ये (for वा). —G2

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नारदः ।
पण्यस्त्रीषु प्रसूता ये यस्य स्त्री तस्य ते सुताः ।
क्रयाच्च कृत्रिमाः पुत्राः प्रदानाच्चैव दत्रिमाः ।
मार्कण्डेयः ।
पण्यनारीष्वनियतः पुंसोऽर्थो वर्तते ध्रुवम् ।
अत्र चाहितगर्भायाः कस्य पुत्रं वदन्ति तम् ।
नारदः ।
तीर्थभूतासु नारीषु ज्ञायते योऽभिगच्छति ।
ऋतौ तस्य भवेद्गर्भो यं वा नारी न शङ्कते ।
मार्कण्डेयः ।
नराणां त्यजतां भार्यां कामक्रोधाद्गुणान्विताम् ।
अप्रसूतां प्रसूतां वा तेषां पृच्छामि निष्कृतिम् ।
नारदः ।
अपापां त्यजमानस्य साध्वीं मत्वैवमादितः ।
आत्मवंशः स्वधर्मो वा त्यजतो निष्कृतिर्न तु ।
यो नरस्त्यजते भार्यां पुष्पिणीमप्रसूतिकाम् ।
स नष्टवंशः पितृभिर्युक्तस्त्यज्येत दैवतैः ।
भार्यामपत्यसंजातां प्रसूतां पुत्रपौत्रिणीम् ।
पुत्रदारपरित्यागी न संप्राप्नोति निष्कृतिम् ।
एवं हि भार्यां त्यजतां नराणां नास्ति निष्कृतिः ।
नार्हन्ति प्रमदास्त्यक्तुं पुत्रपौत्रप्रतिष्ठिताः ।

मार्कण्डेयः ।
कीदृशीं संत्यजन्भार्यां नरो दोषैर्न लिप्यते ।
एतदिच्छामि तत्त्वेन विज्ञातुमृषिसत्तम ।
नारदः ।
मोक्षधर्मेस्थितानां तु अन्योन्यमनुजानताम् ।
भार्यापतीनां मुक्तानामधर्मो न विधीयते ।
अन्यसक्तां गतापत्यां शूद्रगां परगामिनीम् ।
परीक्ष्य त्यजमानानां नराणां नास्ति पातकम् ।
पातकेऽपि तु भर्तव्यौ द्वौ तु माता पिता तथा ।
मार्कण्डेयः ।
भार्यायां व्यभिचारिण्यां नरस्य त्यजतो रुषा ।
कथं धर्मोऽप्यधर्मो वा भवतीह महामते ।
नारदः ।
अनृतेऽपि हि सत्ये वा यो नारीं दूषितां त्यजेत् ।
अरक्षमाणः स्वां भार्यां नरो भवति भ्रूणहा ।
अपत्यहेतोर्या नारी भर्तारमतिलङ्घयेत् ।
लोलेन्द्रियेति सा रक्ष्या न संत्याज्या कथंचन ।
नद्यश्च नार्यश्च समस्वभावा
नैताः प्रदुष्यन्ति नरावगाढाः ।
स्रोतांसि नद्या वहते निपातं
नारी रजोभिः पुनरेति शौचम् ।

om. the ref. —(L. 194) D_{10} परस्त्रीषु प्रजाता ये (for the prior half). T_2 वै (for ते). —(L. 195) D_{10} क्रयिणः (for कृत्रिमाः). M_{1-3} प्रोक्ताः (for पुत्राः). D_{10} प्रदायिनः (for [ए]व दत्रिमाः). — D_{10} om. (hapl.) lines 196–199. —(L. 197) M -गर्भायां (for °याः). T_1 गर्भिण्यां चैव तस्यां तु (for the prior half). G_2 M_4 गर्भं (for पुत्रं). M_{1-3} कस्य गर्भो भवेत्तु सः (for the post. half). —(L. 198) T_1 G_2 M_4 जायते (for ज्ञा°). $T_{2,3}$ $G_{3,4}$ हि (for ऽभि-). —(L. 200) $T_{2,3}$ G कामक्रोध- (for °धाद्). D_{10} कामक्रोधसमन्वितां (for the post. half). —(L. 202) T_1 अपापां त्यजतो मोहान्निष्कृतिर्नोपलभ्यते. — T_1 om. line 203. —(L. 203) Madras ed. स्वधर्मौ तु (for °र्मो वा). Madras ed. त्यजतां (for °तो). D_{10} यो धर्मः प्रतिपन्नानां निष्कृतिर्नैव दृश्यते; M आत्मवंशं हि त्यजतो निष्कृतिर्नोपलभ्यते. —(L. 205) T_1 G_1 M त्यक्तस् (for युक्तस्). T_1 त्यजति (for त्यज्येत). —(L. 206) D_{10} भार्यामपापां त्यजतः (for the prior half). —(L. 207) D_{10} हि; G_2 स (for सं-). — G_2 om. (hapl.) line 208. —(L. 209) G_2 प्रमदां (for °दास्). D_{10} न सार्हति महाभागा (for the prior half). G_2 पुत्रिणीमप्यपुत्रिणीं (for the post. half). —(L. 210) G_2 त्यजतो (for संत्यजन्). D_{10} कीदृशीं त्यजमानोथ (for the prior half). D_{10} पापैर् (for दोषैर्). —(L. 212) D_{10} G_2 M मोक्षधर्मे. —(L. 214) T_1 M कन्यासूं विगतापत्यां; G_2 अन्यप्रसूतां पतितां (for the prior half). T_1 G_2 M शूद्रगा(M_2 भगिनी)मपकारिणीं (for the post. half). —For lines 213–214, D_{10} subst. :

भार्यां पतिविनिर्मुक्तां विचरन्तीं च कामतः ।
अबीजां वन्यकासूं च मृतापत्यां च भामिनीम् ।

—(L. 215) D_{10} बलेन (for परीक्ष्य). — D_{10} M om. line 216. —(L. 216) G_2 वि- (for the first तु). G_2 द्वौ मातापितराविति (for the post. half). —(L. 218) D_{10} अथ (for कथं). D_{10} M महामुने (for °मते). —For line 218, G_2 subst. :

प्रायश्चित्ते तदाभ्यासे धर्मो वाधर्म एव वा ।

—(L. 219) M वाथ (for ऽपि हि). D_{10} अनृतेप्यथ वा सत्ये; T_1 अनृतेनापि सत्ये वा; G_2 °ते वाथ वा सत्ये (for the prior half). T_1 विसृष्टां (for यो नारीं). —(L. 220) T_1 G_2 तां (for स्वां). D_{10} त्यक्त्वा; $T_{2,3}$ ततो (for नरो). —(L. 221) D_{10} अभि- (for अति-). —(L. 222) M_{1-3} सं- (for सा). D_{10} सा (for सं-). G_3 M कदाचन (for कथं°). —(L. 223) T_1 G_2 -प्रभावा (for -स्वभावा). —(L. 224) Kumbh. ed. प्रमुंचंति (for प्रदुष्यन्ति). D_{10} न ताः प्रदुष्यंति नरो-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एवं नार्यो न दुष्यन्ति व्यभिचारेऽपि भर्तृणाम् ।
मासि मासि भवेत्त्यागस्ततः शुद्धा भवन्त्युत ।
मार्कण्डेयः ।
कानि तीर्थानि भगवन्नृणां देहाश्रितानि वै ।
तानि वै शंस भगवन्याथातथ्येन पृच्छतः ।
सर्वतीर्थेषु तीर्थज्ञ किं तीर्थं परमं नृणाम् ।
यत्रोपस्पृश्य पूतात्मा नरो भवति नित्यशः ।
नारदः ।
देवर्षिपितृतीर्थानि ब्राह्मं मध्येऽथ वैष्णवम् ।
नृणां तीर्थानि पञ्चाहुः पाणौ संनिहितानि वै ।
आद्यतीर्थं तु तीर्थानां वैष्णवो भाग उच्यते ।
यत्रोपस्पृश्य वर्णानां चतुर्णां वर्धते कुलम् ।
पितृदैवतकार्याणि वर्धन्ते प्रेत्य चेह च ।
मार्कण्डेयः ।
नराणां कामवृत्तानां या नार्यो निरवग्रहाः ।
यासामभिग्रहो नास्ति ता मे कथय नारद ।
नारदः ।
वागुर्वेश्या नटी गोपी तान्तुकी तुन्नवायिकी ।
नारी किराती शबरी नर्तकी चानभिग्रहा ।
मार्कण्डेयः ।
एतासु जाता नारीषु सर्ववर्णेषु ये सुताः ।
तेषु के बन्धुदायादा भवन्ति ऋषिसत्तम ।
नारदः ।
य एताः परिगृह्णन्ति तेषामेव हि ते सुताः ।
सर्वत्र तु प्रवृत्तासु बीजं नश्यति देहिनाम् ।
मार्कण्डेयः ।
सर्वस्त्रीषु प्रवृत्ताश्च साधुवेदविवर्जिताः ।
मानवाः काण्डपृष्ठाश्च वेदमन्त्रबहिष्कृताः ।
नियुक्ता हव्यकव्येषु तेषां दत्तं कथं भवेत् ।
नारदः ।
नार्हन्ति हव्यकव्यानि सावित्रीवर्जिता द्विजाः ।
व्रात्येष्वन्नप्रदानं तद्यथा शूद्रेषु वै तथा ।
मार्कण्डेयः ।
धर्मेष्वधिकृतानां तु नराणां मुह्यते मनः ।
कथं नु विघ्नो भवति एतदिच्छामि वेदितुम् ।
नारदः ।
अर्थाश्च नार्यश्च समानमेत-
च्छ्रेयांसि पुंसामिह मोहयन्ति ।
रतिप्रमोदात्प्रमदा हरन्ति
भोगैर्धनं चाप्युपहन्ति धर्मान् ।
हव्यं कव्यं च धर्मात्मा सर्वं तच्छ्रोत्रियोऽर्हति ।
दत्तं हि श्रोत्रिये साधौ ज्वलिताग्नाविवाहुतिः ।

पगृह्याः. — (L. 225) D_{10} स्रोतो हि नद्या व्यपनोति शौचं; T_1 स्रोतांसि नद्यः प्रवहंति सर्वे; $T_{2.3}$ G °सि नद्योपहतेः प्रपातं. — (L. 226) T G नार्यो (for नारी). G_2 शुद्धिं (for शौचम्). — (L. 227) D_{10} भार्या (for नार्यो). D_{10} व्यभिचारेण (for °रेऽपि). — D_{10} om. lines 228–230. — (L. 228) Kumbh. ed. रागस् (for त्यागस्). — T_2 om. (hapl.) from the post. half of line 229 up to the prior half of line 230. — (L. 230) M मे (for वै). T_1 विप्रेंद्र; M_4 तीर्थानि (for भगवन्). — (L. 231) Kumbh. ed. सर्वज्ञ (for तीर्थज्ञ). D_{10} तीर्थं परमकं नृणां (for the post. half). — (L. 232) $T_{2.3}$ $G_{1.3.4}$ पूतो यो (for पूतात्मा). D_{10} तद्वद (for नित्यशः). — G_2 om. the ref. — (L. 233) T_1 अपि (for मध्ये). — (L. 234) M_4 पाणि- (for पाणौ). — (L. 235) G_2 M आद्यं तु तीर्थं तीर्थानां (for the prior half). D_{10} अयं तु सर्वतीर्थानां विष्णोस्तीर्थमनुत्तमं. — (L. 236) T_1 चतुर्णां विंदते फलं (for the post. half). — (L. 237) D_{10} सिद्धिर्वा सर्वकार्याणां (for the prior half). D_{10} वर्धते; G_2 वर्तंते (for वर्धन्ते). — G_2 नारदः (for मार्कण्डेयः). — (L. 238) M नारीणां (for नराणां). D_{10} यास्ता नार्यो विगर्हिताः; T_1 या नार्यस्त्वनभिग्रहाः; M या नार्यो निरभिग्रहाः (for the post. half). — (L. 239) D_{10} च वि- (for अभि-). T_2 $G_{2.4}$ तां (for ता). D_{10} त्वमेतद्वक्तुमर्हसि (for the post. half). — G_{1-3} M_4 om. the ref. — (L. 240) D_{10} शुचिर्यथा नदी गोपी; T_1 वेश्या नटी गोपिका च (for the prior half). M तुन्नवायिका (for °यिकी). T_1 घटी वै तुन्नवायिनी (for the post. half). — (L. 241) G_2 M_{1-3} दैवी (for नारी). T_1 रजकी (for नर्तकी). G_{1-3} [अ]नवग्रहा (for °भिग्रहा). D_{10} सैरंध्री शबरी चैव नर्तकी मानविग्रहा. — (L. 243) T_1 G_3 M केषु; G_2 केषां (for तेषु). D_{10} T_1 G_2 M ते (for के). — (L. 244) D_{10} भार्या भवेयुर्येषां तास् (for the prior half). — (L. 245) M_{1-3} सु- (for तु). D_{10} चापल्येन प्रवृत्तानां (for the prior half). D_{10} वै नृणां (for देहिनाम्). — D_{10} om. line 246. T_1 om. (hapl.) line 247. — (L. 247) D_{10} -शास्त्र- (for -मन्त्र-). — After line 247, M_4 reads the post. half of line 248, repeating it in its proper place. — (L. 248) D_{10} भोज्यंते हव्यकव्यानि (for the prior half). M_4 (second time) तेषु (for तेषां). D_{10} तथाविधं (for कथं भवेत्). — (L. 249) D_{10} नष्टसावित्रिका द्विजाः (for the post. half). — (L. 250) M_{1-3} यत् (for [अ]न्न-). D_{10} प्रेत्य चेह प्रदातव्यं दत्त्वा शूद्रेषु चैव ह. — (L. 251) M [अ]भिरतानां (for [अ]धिकृ°). D_{10} धर्मेष्वनभिषंगाणां तु (hypermetric) (for the prior half). — (L. 252) Madras ed. विघ्नं (for विघ्नो). — G_2 om. the ref. D_{10} om. lines 253–256.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मार्कण्डेयः ।
श्रोत्रियाणां कुले जाता वेदार्थविदितात्मनाम् ।
हित्वा कस्मात्त्रयीं विद्यां वार्तां वृत्तिमुपाश्रिताः ।
नारदः ।
चातुर्वर्ण्यं पुरा न्यस्तं सुविद्वत्सु द्विजातिषु ।
तस्माद्वर्णैः संविभज्या वृत्तिः संकरवर्जिता ।
ये चान्ये श्रोत्रियाज्जाताः संस्कृताः पुत्रगृध्नुभिः ।
पूर्वनिर्वाणनिर्वृत्तां जातां वृत्तिमुपाश्रिताः ।
मार्कण्डेयः ।
असंस्कृताः श्रोत्रियजाः संस्कृता ज्ञानिनः कथम् ।
नारदः ।
असंस्कारो वैदिकश्च न मान्यः श्रोत्रियात्मजः ।
शुद्धान्वयः श्रोत्रियस्तु स विद्वद्भिः समोऽन्यथा ।
अनधीयानपुत्राश्च वेदसंस्कारवर्जिताः ।
तस्मात्ते वेदविज्ञापि विप्राः श्रुतिनिकारिणः ।
ब्रह्मराशौ पुरा सृष्टा वेदसंस्कारसंस्कृताः ।
तस्मात्तेष्वेव ते जाताः साधवः कुलधारिणः ।
मार्कण्डेयः ।
स्वयं क्रीतासु प्रेष्यासु प्रसूयन्ते तु ये नराः ।
कस्य नार्यः सुताश्चैव भवन्ति ऋषिसत्तम ।
नारदः ।
स्वदास्यां यो नरो मोहात्प्रसूयेत स पापकृत् ।
इहापि निन्दितः प्रेत्य अपत्यं प्रेष्यतां नयेत् ।
सा तस्य भार्या पुत्रा ये हव्यकव्यप्रदास्तु ते ।
तस्या ये बान्धवाः केचिद्विपक्ताः प्रेष्यतां गताः ।
सर्वे तस्यास्तु संबन्धान्मुच्यन्ते प्रेष्यकर्मसु ।
एतत्ते कथितं सर्वं यदभिव्याहृतं त्वया ।
अथ वा संशयः कश्चिद्भूयः संप्रष्टुमर्हसि ।

—(L. 253) $T_{2.3}$ G_4 अर्थोर्थ- (for अर्थाश्च). —(L. 255) T_1 नरं (for रति-). —(L. 256) T_1 धनैश् (for धनं). —(L. 257) D_{10} T_1 M यत्किंचित् (for धर्मात्मा). D_{10} तत्सर्वं (by transp.); G_2 विनीतः. —(L. 258) M_{1-3} तच् (for हि). D_{10} श्रेष्ठं (for साधौ). G_2 M ज्वलितेश्चाव् (for °ताश्चाव्). —D_{10} transp. lines 259 and 260. —(L. 259) D_{10} श्रोत्रियस्य कुले जातं वेदार्थे विदितात्मनः. —(L. 260) D_{10} M_4 तस्मात् (for क°). —(L. 261) D_{10} ग्रस्तं (for न्यस्तं). T_1 धर्मवित्सु (for सुविद्वत्सु). D_{10} सा सा जातिर्द्विजातिना (for the post. half). —(L. 262) T_1 संविभक्ता (for °भज्या). — Before line 263, $T_{2.3}$ G ins. मार्कण्डेयः. —(L. 263) D_{10} श्रोत्रिये (for °याज्). D_{10} T_1 G_2 M -गृद्धिभिः (for -गृध्नुभिः). — T G Madras ed. om. line 264. —(L. 264) M_4 -निर्वृत्तास् (for °त्तां). M तां तां (for जातां). D_{10} वृत्तिं ते समुपाश्रिताः (for the post. half). — After line 264, D_{10} ins. :

मार्कण्डेयः ।
मरुतः केन विख्याताः साध्याः केन महामुने ।
एतदिच्छामि तत्त्वेन विज्ञातुमृषिसत्तम ।
नारदः ।
कश्यपस्य सुताः सप्त दिव्या जातास्तरस्विनः ।
मारुतास्ते च विख्याता व्याप्य लोकत्रयं स्थिताः ।
इन्द्रेण सप्तधा भिन्नो दित्या गर्भोऽनुरूपतः ।
इन्द्रेण मा रुतेत्युक्त्वा तदेतेषां मरुत्त्वता ।
तस्मात्सगर्भादिन्द्रेण सह लोहितबिन्दुभिः ।
निःसृतास्तत्र ये साध्या देवा इन्द्रपुरोगमाः ।
आवहः प्रवहः प्राणो विवहः संवहस्तथा ।
उद्वहश्च तथोदानः सप्तैते मारुतोत्तमाः ।
सहस्रशश्च ते सर्वे भ्रातरः साध्यमारुताः ।
मातुर्नियोगादिन्द्रेण सहाया राज्यधारिणः ।

— $T_{2.3}$ G om. the ref. D_{10} om. lines 265–267. —(L. 265) T_1 M ज्ञानिजाः (for °नः). —(L. 266) G_2 असंस्कृता वैदिकाश्च (for the prior half). T_1 नमस्यः; Kumbh. ed. Madras ed. स मान्यः (for न मान्यः). —(L. 267) M_1 शुद्धान्वये. T_1 कृतः (for ऽन्यथा). — After line 267, G_2 ins. :

वृषलावृषलानीं च त्यक्त्वा संस्कारसंयुताः ।

— Before line 268, M_4 ins. नारदः. — G_2 om. (hapl.) lines 268–270. —(L. 268) D_{10} अनधीनाः कुपुत्राश्च; T_3 $G_{1.3.4}$ अनधीयानधीयांश्च (for the prior half). —(L. 269) D_{10} तस्मात्ते तदविज्ञाता विश्रुताश्च हि कारणात्. — Before line 270, D_{10} ins. नारदः. —(L. 270) D_{10} ब्रह्मणा ये (for ब्रह्मराशौ). —(L. 271) G_2 M_4 एतेषु (for तेष्वेव). G_2 ये (for ते). D_{10} तस्मिन्देशे तु ये ज्ञाताः (for the prior half). —(L. 272) $G_{1.3}$ स्वसंस्कृतासु प्रेष्यासु (for the prior half). —(L. 273) T_1 वा ते (for नार्यः). G_2 M_{1-3} मुनि- (for ऋषि-). —(L. 275) M_{1-3} निंद्यते (for निन्दितः). $M_{2.3}$ [अ]प्यवश्यं (for अपत्यं). T_1 परलोकेपि हीयते (for the post. half). —(L. 276) T तस्यां जातास्तु पुत्रा ये (for the prior half). —(L. 277) D_{10} विपन्नाः (for विपक्ताः). —(L. 278) M_{1-3} तस्याः सर्वे (by transp.). D_{10} तस्याः संबंधतः सर्वे (for the prior half). T_1 M -कर्मणः (for -कर्मसु). —(L. 279) G_2 इह (for अभि-). —(L. 280) $M_{2.3}$ त्वं (for सं-). D_{10} यत्र ते संशयो जातः किं भूयः श्रोतुमिच्छसि. — T_1 om. lines 281–282 (with the ref.). — T_1 om. the ref. —(L. 283) T_1 मुनिभिर् (for ऋषि°). — T_1 om. line 284. —(L. 284) $M_{1.2.4}$

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मार्कण्डेयः ।
अमिथ्यादर्शनो लोके नारदः सर्वकोविदः ।
प्रत्यक्षदर्शी लोकानां स्वयंभूरिव सत्तमः ।
भीष्मः ।
इति संभाष्य ऋषिभिर्मार्कण्डेयो महातपाः ।
नारदं चापि सत्कृत्य तेन चैवाभिसत्कृतः ।
आमन्त्रयित्वा ऋषिभिः प्रययावाश्रमं मुनिः ।
ऋषयश्चापि तीर्थानां परिचर्यां प्रचक्रमुः ।
सुक्षेत्रबीजसंस्कारविशुद्धो ब्रह्मचर्यया ।
नित्यनैमित्तिकात्स्नातो मनःशुद्ध्या च शुध्यति ।

Colophon.

8

After 13. 32, V_1 B Dn $D_{5, 8, 10}$ ins. :

युधिष्ठिरः ।
पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
त्वत्तोऽहं श्रोतुमिच्छामि धर्मं भरतसत्तम ।
शरणागतं ये रक्षन्ति भूतग्रामं चतुर्विधम् ।
किं तस्य भरतश्रेष्ठ फलं भवति तत्त्वतः ।
भीष्मः ।
इदं शृणु महाराज धर्मपुत्र महायशः ।
इतिहासं पुरावृत्तं शरणार्थं महाफलम् ।
प्रपात्यमानः श्येनेन कपोतः प्रियदर्शनः ।
वृषदर्भं महाभागं नरेन्द्रं शरणं गतः ।
स तं दृष्ट्वा विशुद्धात्मा त्रासादङ्कमुपागतम् ।
आश्वास्याश्वसिहीत्याह न तेऽस्ति भयमण्डज ।
भयं ते सुमहत्कस्मात्कुत्र किं वा कृतं त्वया ।
येन त्वमिह संप्राप्तो विसंज्ञो भ्रान्तचेतनः ।
नवनीलोत्पलापीड चारुवर्ण सुदर्शन ।
दाडिमाशोकपुष्पाक्ष मा त्रसस्वाभयं तव ।
मत्सकाशमनुप्राप्तं न त्वां कश्चित्समुत्सहेत् ।
मनसा ग्रहणं कर्तुं रक्षाध्यक्षपुरस्कृतम् ।
काशिराज्यं तवाद्येदं त्वदर्थं जीवितं तथा ।
त्यजेयं भव विश्रब्धः कपोत न भयं तव ।
श्येनः ।
ममैद्विहितं भक्ष्यं न राजंस्त्रातुमर्हसि ।
अतिक्रान्तं च प्राप्तं च प्रयत्नाच्चोपपादितम् ।
मांसं च रुधिरं चास्य मज्जा मेदश्च मे हितम् ।
परितोषकरो ह्येष मम मास्याग्रतो भव ।
तृष्णा मे बाधतेऽत्युग्रा क्षुधा निर्दहतीव माम् ।
मुञ्चैनं न हि शक्ष्यामि राजन्मन्दयितुं क्षुधाम् ।
मया ह्यनुसृतो ह्येष मत्पक्षनखविक्षतः ।
किंचिदुच्छ्वासनिःश्वासं न राजन्गोप्तुमर्हसि ।
यदि स्वविषये राजन्प्रभुस्त्वं रक्षणे नृणाम् ।

संपूज्य (for सत्कृत्य). — (L. 285) T_1 च मुनीन्; G_2 $M_{1,2}$ [अ]थ ($M_{1,2}$ च) ऋषीन् (for ऋषिभिः). M_3 चाश्रमं (for आ°). — For lines 284-285, D_{10} subst. :

न मिथ्याचक्षते लोके नारदो धर्मदर्शनः ।
यत्र तेऽहं प्रवक्ष्यामि प्रातः श्रोष्यामि गम्यताम् ।
नारदस्य वचः श्रुत्वा सर्वधर्मार्थदर्शिनः ।
नारदश्च ऋषींश्चैव सर्वे तमभिवाद्य च ।
प्रातः कृतोपदेशश्च मार्कण्डेयाय विस्मितः ।
मुनीनामन्त्र्य स मुनिमार्कण्डेयं पुनः पुनः ।
प्रस्थितो मनसा प्रीतः कृतकृत्यस्तपोधनः ।

— D_{10} om. lines 286–288. — (L. 286) T_1 G_2 $M_{1,2,4}$ प्रचक्रिरे (for °क्रमुः). — T_1 $M_{1,2}$ om. lines 287–288. — (L. 287) M_4 सुक्षेत्रबीजे संस्कारस्(for the prior half). G_2 M_4 तच्छुद्धो (for -विशुद्धो). — M_3 om. line 288. — (L. 288) M_4 [अ]पि (for च). G_2 M_4 सिध्यति (for शु°). — Colophon. *Sub-parvan :* D_{10} M दानधर्म. — *Adhy. name :* D_{10} मार्कंडेयपृच्छा ; T_2 मार्कंडेयनारदसंवादे स्त्रीसंकरवर्णसंस्कारश्राद्धपुत्रानिरूपणं ; T_3 $G_{1,3,4}$ मार्कंडेयनारदसंवादः ; M_{1-3} मार्कंडेयनिवर्तनं ; M_4 नारदमार्कंडेयसंवादः. — *Adhy. no. :* D_{10} 51; T_1 G_3 M_4 55; $T_{2,3}$ $G_{2,4}$ 61; G_1 56; M_{1-3} 54.

8

The episode of Śibi Auśīnara's having saved the life of a pigeon pursued by a hawk occurs in the *Mahābhārata*, in several contexts; *vide*, 3. 130. 19–131. 30 and 3. App. I, No. 21. 5.

(L. 1) B_4 सर्वशास्त्रभृतां वर (for the post. half). — (L. 2) D_5 सर्वं (for धर्मं). — (L. 3) Prior half hypermetric. B_{1-4} $D_{8,10}$ रक्षति यो (for ये रक्षन्ति). — (L. 4) B_1 तद्वद (for तत्त्वतः). — (L. 5) B_{2-4} महाभाग ; Dn_1. n_2 °प्राज्ञ (for °राज). — (L. 11) B_1 अत्र (for कुत्र). — (L. 15) D_{10} समुत्सृजेत् (for °त्सहेत्). — (L. 17) V_1 तदर्थेति ; $B_{1,2,4,5}$ Dn_3 D_5 तदद्येदं ; Dn_1. n_2 तदद्यैव (for तवाद्येदं). — (L. 19) B_4 अर्हति (for °सि). — (L. 22) B_1 च (for मा). — (L. 24) $B_{1,3,4}$ शक्यामि (for शक्ष्यामि). V_1 $B_{1,2}$ D_5 मंदायितुं ; B_4 मोच° ; B_5 धार° (for मन्द°). — D_{10} om. line 25. — (L. 25) Dn_1. n_2 स्वनुसृतो (for ह्यनु°). — (L. 28) B_2 खगस्य च (for खेचरस्य). V_1 B Dn D_5 अथोत्तम (for अथो मम). — (L. 29) $D_{8,10}$ मित्रेषु (for भृत्येषु).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

खेचरस्य तृषार्तस्य न त्वं प्रभुरथो मम ।
यदि वैरिषु भृत्येषु स्वजनव्यवहारयोः ।
विषयेष्विन्द्रियाणां च आकाशे मा पराक्रम ।
प्रभुत्वं हि पराक्रम्य सम्यक्पक्षहरेषु ते ।
यदि त्वमिह धर्मार्थी मामपि द्रष्टुमर्हसि ।
भीष्मः ।
श्रुत्वा श्येनस्य तद्वाक्यं राजर्षिर्विस्मयं गतः ।
संभाव्य चैनं सद्वाक्यं तदर्थी प्रत्यभाषत ।
गोवृषो वा वराहो वा मृगो वा महिषोऽपि वा ।
त्वदर्थमद्य क्रियतां क्षुधाप्रशमनाय ते ।
शरणागतं न त्यजेयमिति मे व्रतमाहितम् ।
न मुञ्चति ममाङ्गानि द्विजोऽयं पश्य वै द्विज ।
श्येनः ।
न वराहं न चोक्षाणं न चान्यान्विविधान्द्विजान् ।
भक्षयामि महाराज किमन्नाद्येन तेन मे ।
यस्तु मे विहितो भक्षः स्वयं देवैः सनातनः ।
श्येनाः कपोतान्खादन्ति स्थितिरेषा सनातनी ।
उशीनर कपोते तु यदि स्नेहस्तवानघ ।
ततस्त्वं मे प्रयच्छाद्य स्वमांसं तुलया धृतम् ।
राजा ।
महाननुग्रहो मेऽद्य यस्त्वमेवमिहात्थ माम् ।
बाढमेवं करिष्यामीत्युक्त्वासौ राजसत्तमः ।
उत्कृत्योत्कृत्य मांसानि तुलया समतोलयत् ।
अन्तःपुरे ततस्तस्य स्त्रियो रत्नविभूषिताः ।
हाहाभूता विनिष्क्रान्ताः श्रुत्वा परमदुःखिताः ।
तासां रुदितशब्देन मन्त्रिभृत्यजनस्य च ।
बभूव सुमहान्नादो मेघगम्भीरनिस्वनः ।
निरुद्धं गगनं सर्वं शुभ्रं मेघैः समन्ततः ।
मही प्रचलिता चासीत्तस्य सत्येन कर्मणा ।
स राजा पार्श्वतश्चैव बाहुभ्यामूरुतश्च यत् ।
तानि मांसानि संछिद्य तुलां पूरयते शनैः ।
तथापि न समस्तेन कपोतेन बभूव ह ।
अस्थिभूतो यदा राजा निर्मांसो रुधिरस्रवः ।
तुलां ततः समारूढः स्वं मांसक्षयमुत्सृजन् ।
ततः सेन्द्रास्त्रयो लोकास्तं नरेन्द्रमुपस्थिताः ।
भेर्यश्चाकाशगैस्तत्र वादिता देवदुंदुभिः ।
अमृतेनावसिक्तश्च वृषदर्भो नरेश्वरः ।
दिव्यैश्च सुसुखैर्माल्यैरभिवृष्टः पुनः पुनः ।
देवगन्धर्वसंघातैरप्सरोभिश्च सर्वतः ।
नृत्तश्चैवोपगीतश्च पितामह इव प्रभुः ।
हेमप्रासादसंबाधं मणिकाञ्चनतोरणम् ।
स वैदूर्यमणिस्तम्भं विमानं समधिष्ठितः ।
स राजर्षिर्गतः स्वर्गं कर्मणा तेन शाश्वतम् ।
शरणागतेषु चैवं त्वं कुरु सर्वं युधिष्ठिर ।
भक्तानामनुरक्तानामाश्रितानां च रक्षिता ।
दयावान्सर्वभूतेषु परत्र सुखमेधते ।
साधुवृत्तो हि यो राजा सद्वृत्तमनुतिष्ठति ।
किं न प्राप्तं भवेत्तेन स्वव्याजेनेह कर्मणा ।
स राजर्षिर्विशुद्धात्मा धीरः सत्यपराक्रमः ।
काशीनामीश्वरः ख्यातस्त्रिषु लोकेषु कर्मणा ।
योऽप्यन्यः कारयेदेवं शरणागतरक्षणम् ।
सोऽपि गच्छेत तामेव गतिं भरतसत्तम ।
इदं वृत्तं हि राजर्षेर्वृषदर्भस्य कीर्तयन् ।
पूतात्मा वै भवेल्लोके शृणुयाद्यश्च नित्यशः ।

Colophon.

— (L. 30) B_1 Dn_3 D_5 विषये तु (for °येषु). — (L. 32) B_1 D_5 अपि (for इह). D_{10} धर्मार्थ (for °र्थी). — (L. 34) V_1 B Dn_3 $D_{8.10}$ संसाध्य ; D_5 संपाद्य (for संभाव्य). V_1 B Dn_2 $D_{5.10}$ तदर्थं (Dn_2 °र्थं) (for तदर्थी). — Before line 35, V_1 B Dn $D_{5.8.10}$ ins. राजोवाच. — (L. 37) Prior half hypermetric. — (L. 39) B_{1-4} $D_{8.10}$ मृगान् (for द्विजान्). — (L. 41) B Dn D_5 भक्ष्यः. — (L. 42) V_1 B Dn_3 D_5 पुरातनी (for सना°). — (L. 43) B_1 om. from कपोते up to त्वं मे (in line 44). $B_{2.4}$ $D_{3.10}$ च (for तु). — (L. 45) B_3 एव विहाय (for एवमिहात्थ). — (L. 47) D_5 तुलयामास तोलयन् (for the post. half). — (L. 50) D_5 रुदन- (for रुदित-). B_1 मंत्रिणां स्व- (for मन्त्रिभृत्य-). — (L. 58) ❁ Cn : मांसक्षयं मांसालयं शरीरम् । ❁ — (L. 62) B_1 कुसुमैर् (for सुसुखैर्). $D_{8.10}$ अभिवर्षन्पुरंदरः (for the post. half). — (L. 63) D_{10} -संतानैर् (for -संघातैर्). V_1 B Dn_3 $D_{5.8.10}$ सर्वशः (for °तः). — (L. 64) B_1 नृत्यैश् (for नृत्तश्). — (L. 66) Dn_3 वैडूर्य- (for वैदूर्य-). D_{10} वैडूर्यविपणिस्तंभं (for the prior half). — (L. 68) Prior half hypermetric. B_{1-4} $D_{8.10}$ रक्षां (for सर्वं). — (L. 72) D_{10} स्वकीयेन (for स्वव्याजेन). — D_5 om. (hapl.) lines 73–74. — (L. 75) B_1 -पालनं (for -रक्षणम्). — (L. 77) $B_{2.3.5}$ $Dn_{1.n2}$ $D_{5.8.10}$ राजर्षे. — (L. 78) B_3 कृतार्थो (for पूतात्मा). D_{10} चापि (for यश्च). — Colophon. *Parvan name :* B_{1-4} Dn_3 शांति. — *Sub-parvan :* V_1 B Dn $D_{5.8.10}$ दानधर्म. — *Adhy. name :* V_1 B Dn $D_{5.8.10}$ श्येनकपोतीयं. — *Adhy. no. :* V_1 32 ; $D_{5.10}$ 31.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

9

After 13. 80, D_{10} S Kumbh. ed. Madras ed. and C_v ins. :—

युधिष्ठिरः

सुराणामसुराणां च भूतानां च पितामह ।
प्रभुः स्रष्टा च भगवान्मुनिभिः स्तूयते विभुः ।
तस्योपरि कथं ह्येष गोलोकः स्थानतां गतः ।
संशयो मे महानेष तन्मे व्याख्यातुमर्हसि ।

भीष्मः ।

मनोवाग्बुद्धयस्तावदेकस्थाः कुरुसत्तम ।
ततो मे शृणु कात्स्न्येंन गोमहाभाग्यमुत्तमम् ।
पुण्यं यशस्यमायुष्यं तथा स्वस्त्ययनं महत् ।
कीर्तिर्विहरतां लोके गवां योगेषु भक्तिमान् ।
श्रूयते हि पुराणेषु महर्षीणां महात्मनाम् ।
संस्थाने सर्वलोकानां देवानां चापि संभवे ।
देवतार्थेऽमृतार्थे च यज्ञार्थे चैव भारत ।
सुरभिर्नाम विख्याता रोहिणी कामरूपिणी ।
संकल्प्य मनसा पूर्वं रोहिणी ह्यमृताननां ।
घोरं तपः समास्थाय निर्मिता विश्वकर्मणा ।
पुरुषं चासृजद्भूयस्तेजसा तपसा च ह ।
देदीप्यमानं वपुषा समिद्धमिव पावकम् ।
सोऽपश्यद्दिव्यरूपां तां सुरभिं रोहिणीं तदा ।
दृष्ट्वैव चातिविमनाः सोऽभवत्काममोहितः ।
तं कामार्तमथो ज्ञात्वा स्वयंभूर्लोकभावनः ।
मार्तो भव तथा चैष भगवानभ्यभाषत ।
ततः स भगवांस्तत्र मार्तण्ड इति विश्रुतः ।
चकार नाम तं दृष्ट्वा तस्यार्तीभावमुत्तमम् ।
सोऽददाद्भगवांस्तस्मै मार्तण्डाय महात्मने ।
सुरूपां सुरभिं कन्यां तपस्तेजोमयीं शुभाम् ।
यथा मयैष चोद्भूतस्त्वं चैवेषा च रोहिणी ।
मैथुनं गतवन्तौ च तथा चोत्पत्स्यति प्रजा ।
प्रजा भविष्यते पुण्या पवित्रं परमं च वाम् ।
न चाप्यगम्यागमनाद्दोषं प्राप्स्यसि कर्हिचित् ।
त्वत्प्रजासंभवं क्षीरं भविष्यति परं हविः ।
यज्ञेषु चाज्यभागानां त्वत्प्रजामूलजो विधिः ।
प्रजाशुश्रूषवश्चैव ये भविष्यन्ति रोहिणि ।
तव तेनैव पुण्येन गोलोकं यान्तु मानवाः ।
इदं पवित्रं परममृषभं नाम कर्हिचित् ।
यद्वै ज्ञात्वा द्विजा लोके मोक्ष्यन्ते योनिसंकरात् ।
एतत्क्रियाः प्रपत्स्यन्ते मन्त्रब्राह्मणसंस्कृताः ।
देवतानां पितॄणां च हव्यकव्यपुरोगमाः ।
तत एतेन पुण्येन प्रजास्तव तु रोहिणि ।
ऊर्ध्वं ममापि लोकस्य वत्स्यन्ते निरुपद्रवाः ।
भद्रं तेभ्यश्च भद्रं ते ये प्रजासु भवन्ति वै ।
युगंधराश्च ते पुत्राः सन्तु लोकस्य धारणे ।
यान्यान्कामयसे लोकांस्ताल्ँलोकाननुयास्यसि ।
सर्वदेवगणाश्चैव तव यास्यन्ति पुत्रताम् ।
तव स्तनसमुद्भूतं पिबन्तोऽमृतमुत्तमम् ।
एवमेतान्वरान्सर्वानगृह्णात्सुरभिस्तदा ।
ब्रुवतः सर्वलोकेशान्निर्वृतिं चागमत्पराम् ।
सृष्ट्वा प्रजाश्च विपुला लोकसंधारणाय वै ।
ब्रह्मणा समनुज्ञाता सुरभिर्लोकमाविशत् ।
एवं वरप्रदानेन स्वयंभोरेव भारत ।
उपरिष्टाद्गवां लोकं प्रोक्तं ते सर्वमादितः ।

Colophon.

9

(L. 1) T_1 नराणां (for भूतानां). — (L. 2) G_3 सृष्टा (for स्रष्टा). T_2 त्रायते (for स्तू°). D_{10} T_3 $G_{2.4}$ भुवि (for विभुः). — (L. 3) D_{10} T_2 G_4 लोकश्च (for गोलोकः). — (L. 6) T_1 गवां भाग्यमनुत्तमं; T_2 गोमाहात्म्यमनुत्तमं (for the post. half). — T_1 om. line 8. — (L. 8) $G_{1.3}$ श्रेष्ठेषु ; Kumbh. ed. यो गोषु (for योगेषु). — (L. 9) D_{10} $T_{2.3}$ $G_{2.4}$ शुश्रूषते (for श्रूयते हि). G_3 पुराणे हि (for °णेषु). T_1 ऋषीणां च (for महर्षीणां). — T_1 om. 11. — (L. 11) $G_{1.3}$ वेदार्थे च (for देवतार्थे). — (L. 12) G_4 नामभिः (for नाम वि-). — (L. 13) T_1 सर्वं (for पूर्वं). T_2 [अ]-मृताशना (for °नना). — (L. 16) T_1 पुरुषं (for वपुषा). — (L. 17) $T_{2.3}$ G_4 इष्ट- (for दिव्य-). — T_1 om. lines 20–22. — (L. 20) G_2 यथा (for तथा). — (L. 23) Madras ed. स ददौ (for सोऽददाद्). — T_1 om. line 25. — (L. 25) M_{1-3} [ए]षा चैव (for [ए]वैषा च). — (L. 26) T_1 प्रजार्थममितप्रभौ ; M_{1-3} तथावां धास्यति प्रजाः (for the post. half). — (L. 30) T_1 -मूलको (for °जो). — T_1 M_4 read lines 31–32 after line 38. – (L. 32) G_4 गोलोकान्. $G_{1.3}$ यांति (for यान्तु). — After line 33, T_1 reads line 40. T_1 om. line 34. — M_{1-3} ins. after line 34 : T_1 M_4 after line 40 :

ऋषिभिर्निखिलं लोके वक्ष्यते धर्ममुत्तमम् ।

— After line 34, M_4 reads line 40. — (L. 35) T_1 $G_{1.3}$ प्रवर्तंते ; T_2 प्रपद्यंते (for °त्स्यन्ते). $G_{1.3}$ मंत्राः (for मन्त्र-). — T_1 om. lines 39, 41–46. — (L. 44) Madras ed. राजन् (for सर्वान्). D_{10} T_3 G_2 तथा (for तदा). — T_1 transp. lines 47 and 48. — (L. 49)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

युधिष्ठिरः ।

सुरभेः काः प्रजाः पूर्वं मार्ताण्डादभवन्पुरा ।
एतन्मे शंस तत्त्वेन गोषु मे प्रीयते मनः ।

भीष्मः ।

शृणु नामानि दिव्यानि गोमातॄणां विशेषतः ।
याभिर्व्याप्तास्त्रयो लोकाः कल्याणाभिर्जनाधिप ।
सुरभ्यः प्रथमोद्भूता याश्च स्युः प्रथमाः प्रजाः ।
मयोच्यमानाः शृणु ताः प्राप्स्यसे विपुलं यशः ।
तप्त्वा तपो घोरतपाः सुरभिर्दीप्ततेजसी ।
सुषावैकादश सुतान्रुद्रा ये छन्दसि स्तुताः ।
अजैकपादहिर्बुध्न्यस्त्र्यम्बकश्च महायशाः ।
वृषाकपिश्च शंभुश्च कपाली रैवतस्तथा ।
हरश्च बहुरूपश्च उग्र उग्रोऽथ वीर्यवान् ।
तस्य चैवात्मजः श्रीमान्विश्वरूपो महायशाः ।
एकादशैते कथिता रुद्रास्ते नाम नामतः ।
महात्मानो महायोगास्तेजोयुक्ता महाबलाः ।
एते वरिष्ठजन्मानो देवानां ब्रह्मवादिनाम् ।
विप्राणां प्रकृतिर्लोके एत एव हि विश्रुताः ।
एत एकादश प्रोक्ता रुद्रास्त्रिभुवनेश्वराः ।
शतं त्वेतत्समाख्यातं शतरुद्रं महात्मनाम् ।
सुषुवे प्रथमां कन्यां सुरभिः पृथिवीं तदा ।
विश्वकामदुघा धेनुर्या धारयति देहिनः ।
सुतं गोब्राह्मणं राजन्नेकमित्यभिधीयते ।
गोब्राह्मणस्य जननी सुरभिः परिकीर्त्यते ।
सृष्ट्वा तु प्रथमं रुद्रान्वरदान्ब्रह्मसंभवान् ।
पश्चात्प्रभुं ग्रहपतिं सुषुवे लोकसंमतम् ।
सोमराजानममृतं यज्ञसर्वस्वमुत्तमम् ।
ओषधीनां रसानां च देवानां जीवितस्य च ।
ततः श्रियं च मेधां च कीर्तिं देवीं सरस्वतीम् ।
चतस्रः सुषुवे कन्या योगेषु नियताः स्थिताः ।
एताः सृष्ट्वा प्रजा एषा सुरभिः कामरूपिणी ।
सुषुवे चरमं भूयो दिव्या गोमातरः शुभाः ।
पुण्यां मायां मधुश्च्योतां शिवां शीघ्रां सरिद्वराम् ।
हिरण्यवर्णां सुभगां गव्यां पृश्निं कुथावतीम् ।
अङ्गावतीं घृतवतीं दधिक्षीरपयोवतीम् ।
अमोघां सुरसां सत्यां रेवतीं मारुतीं रसाम् ।
अजां च सिकतां चैव शुद्धधूमामधारिणीम् ।
जीवां प्राणवतीं धन्यां शुद्धां धेनुं धनावहाम् ।
इन्द्रामृद्धिं च शान्तिं च शान्तपापां सरिद्वराम् ।
चत्वारिंशतमेकां च धन्यास्ता दिवि पूजिताः ।
भूयो जज्ञे सुरभ्याश्च श्रीमांश्चन्द्रांशुसप्रभः ।
वृषो दक्ष इति ख्यातः कण्ठे मणितलप्रभः ।
स्रग्वी ककुद्मान्द्युतिमान्मृणालसदृशप्रभः ।
सुरभ्यनुमते दत्तो ध्वजो माहेश्वरस्तु सः ।
सुरभ्यः कामरूपिण्यो गावः पुण्यार्थमुत्तमाः ।
आदित्येभ्यो वसुभ्यश्च विश्वेभ्यश्च ददुर्वरान् ।
सुरभिस्तु तपस्तप्त्वा सुषुवे गास्ततः पुनः ।
या दत्ता लोकपालानामिन्द्रादीनां युधिष्ठिर ।
सुष्टुतां कपिलां चैव रोहिणीं च यशस्विनीम् ।
सर्वकामदुघां चैव मरुतां कामरूपिणीम् ।

D_{10} T_3 $G_{2.4}$ लोकः; T_2 लोकाः (for लोकं). D_{10} $T_{2.3}$ $G_{3.4}$ प्रोक्तास् (for प्रोक्तं). — Colophon. *Sub-parvan :* D_{10} M_{1-3} दानधर्म. — *Adhy. name :* T_2 गोमाहात्म्ये सुरभिसृष्टिप्रकारः; M_{1-3} गोमहाभाग्ये वरलाभः. — *Adhy. no.:* T_1 M 110; $T_{2.3}$ $G_{2.4}$ 117; $G_{1.3}$ 111. — (L. 51) T_1 [s]नघ (for मनः). — T_1 om. lines 52–53. — (L. 56) T_1 घोररूपा; G_2 °तरा (for °तपाः). T_1 $G_{1.3}$ -तेजसः (for °सी). G_2 सुरभिर्लोकपावनी (for the post. half). — (L. 57) T_1 रुद्रान् (for रुद्रा). — (L. 58) T_1 महातपाः (for °यशाः). — (L. 60) M_{1-3} रुद्र (for उग्र). — (L. 62) M_4 प्रथिता (for क°). M तात (for नाम). — (L. 64) T_3 वेदानां (for देवानां). — T_1 om. line 65. — (L. 66) T_1 M_4 ह्येकादश. — T_1 om. line 67. — (L. 68) $T_{2.3}$ G_2 तथा (for तदा). — T_1 om. line 70. — (L. 72) D_{10} T_3 G_2 दृष्ट्वा (for सृष्ट्वा). D_{10} T_3 G_2 रुद्र- (for ब्रह्म-). — (L. 73) D_{10} $T_{2.3}$ G_2 प्रभुर् (for प्रभुं). — (L. 74) M सोमं (for सोम-). — T_1 om. line 75. — (L. 78) M_{1-3} देवी (for एषा). — (L. 79) D_{10} T_2 $G_{2.4}$ परमं (for च°). — (L. 80) T_3 G_2 M अंबां (for मायां). T_1 पुण्यामंबां मधुमतीं (for the prior half). — (L. 81) Kumbh. ed. -गर्भां (for -वर्णां). $T_{1.3}$ M भवां पृश्निं कुलायनीं (for the post. half). — (L. 84) D_{10} नामिकां; T_1 सरसां (for सिकतां). T_1 $G_{1.3}$ M_4 शुचिधूम्रान्; G_2 शुचिधूमान् (for शुद्ध°). T_3 अहारिणीं (for अधारिणीम्). M_{1-3} शुचिधूमामथारुणीं (for the post. half). — (L. 85) $G_{1.3}$ M जन्यां (for धन्यां). — (L. 86) T_1 शांभवीयां (for शान्तपापां). — (L. 87) T_1 कन्यास् (for ध°). — (L. 88) T_1 तु (for च). T_2 -संनिभः (for -सप्रभः). — T_1 om. (hapl. ?) lines 90–91. — (L. 90) G_2 धृतिमान्; M_4 मति° (for द्युति°). — (L. 91) M सुरभ्यानुमतो दत्तो (for the prior half). — (L. 92) M_{1-3} -चारिण्यो (for -रूपिण्यो). Kumbh. ed. उत्कटाः (for उत्तमाः). — (L. 94) M_{1-3} [s]न्याः प्रजाः; M_4 [s]न्यास्ततः (for गास्ततः). T_1 सुषुवेऽन्याः पुनः सुताः (for the post. half).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गावो मृष्टदुघा ह्येताश्चतस्रोऽमृतसंस्कृताः ।
यासां भूत्वा पुरा वत्साः पिबन्त्यमृतमुत्तमम् ।
सुष्टुतां देवराजाय वासवाय महात्मने ।
कपिलां धर्मराजाय वरुणाय च रोहिणीम् ।
सर्वकामदुघां धेनुं राज्ञे वैश्रवणाय च ।
इत्येता लोकमहिता विश्रुताः सुरभेः प्रजाः ।
एतासां प्रजया पूर्णा पृथिवी मुनिपुंगव ।
गोभ्यः प्रभवते सर्वं यत्किंचिदिह शोभनम् ।
सुरभ्यपत्यमित्येतन्नामतस्तेऽनुपूर्वशः ।
कीर्तितं ब्रूहि राजेन्द्र किं भूयः कथयामि ते ।

Colophon.

युधिष्ठिरः ।

सुरभ्यास्तु तदा देव्याः कीर्तिर्लक्ष्मीः सरस्वती ।
मेधा च प्रवरा देवी याश्चतस्रोऽभिविश्रुताः ।
पृथग्गोभ्यः किमेताः स्युरुताहो गोषु संश्रिताः ।
देवाः के वाश्रिता गोषु तन्मे ब्रूहि पितामह ।

भीष्मः ।

यं देवं संश्रिता गावस्तं देवं देवसंज्ञितम् ।
यद्यद्देवाश्रितं दैवं तत्तद्दैवं द्विजा विदुः ।
सर्वेषामेव देवानां पूर्वं किल समुद्भवे ।
अमृतार्थे सुरपतिः सुरभिं समुपस्थितः ।

इन्द्रः ।

इच्छेयममृतं दत्तं त्वया देवि रसाधिकम् ।
त्वत्प्रसादाच्छिवं मह्यममरत्वं भवेदिति ।

सुरभिः ।

वत्सो भूत्वा सुरपते पिबस्व प्रस्नवं मम ।
ततोऽमरत्वमपि तत्स्थानमैन्द्रमवाप्स्यसि ।
न च ते वृत्रहन्युद्धे व्यथारिभ्यो भविष्यति ।
बलार्थमात्मनः शक्र प्रस्नवं पिब मे विभो ।

भीष्मः ।

ततोऽधयत्स्तनं तस्याः सुरभ्याः सुरसत्तमः ।
अमरत्वं सुरूपत्वं बलं च पदमुत्तमम् ।
पुरंदरोऽमृतं पीत्वा प्रहृष्टः समुपस्थितः ।
पुत्रोऽहं तव भद्रं ते ब्रूहि किं करवाणि ते ।

सुरभिः ।

कृतं पुत्र त्वया सर्वमुपयाहि त्रिविष्टपम् ।
पालयस्व सुरान्सर्वाञ्जहि ये सुरशत्रवः ।
न च गोब्राह्मणेऽवज्ञा कार्या ते शान्तिमिच्छता ।
गोब्राह्मणस्य निःश्वासः शोषयेदपि देवताः ।
गोब्राह्मणप्रियो नित्यं स्वस्तिशब्दमुदाहरन् ।
पृथिव्यामन्तरिक्षे च नाकपृष्ठे च विक्रमेत् ।
यच्च तेऽन्यन्नवेत्कृत्यं तन्मे ब्रूयाः समासतः ।
तत्ते सर्वं करिष्यामि सत्येनैतद्ब्रवीमि ते ।

इन्द्रः ।

इच्छेयं गोषु नियतं वस्तुं देवि ब्रवीमि ते ।
एभिः सुरगणैः सार्धं ममानुग्रहमाचर ।

सुरभिः ।

गवां शरीरं प्रत्यक्षमेतत्कौशिक लक्षये ।

—(L. 96) G_2 सुस्थितां (for सुष्टुतां). G_2 पयस्विनीं (for यश°). —(L. 97) M_4 -दुहां (for -दुघां). M_{1-3} मधुरां (for मरुत्तां). — T_1 om. lines 98–99. —(L. 98) $T_{2,3}$ G M_4 -दुहा (for -दुघा). T_3 G_2 $M_{1,3}$ -संस्तुताः (for -संस्कृताः). D_{10} ताश्चतस्रोमृताः सुताः; T_2 याश्चतस्रोमृतास्तु याः; Kumbh. ed. ताश्चतस्रोत्र संस्तुताः (for the post. half). —(L. 102) M_4 -कामदुहां (for °घां). T_2 (also as above) चैव (for धेनुं). —(L. 103) T_1 -विख्याता; G_2 -महता (for -महिता). — T_1 om. line 106. —(L. 106) $G_{1,3}$ M_2 तु (for ऽनु-). —(L. 107) T_1 माहात्म्यं कीर्तितं त्वेतत् (for the prior half). — Colophon. *Sub-parvan :* D_{10} M_1 दानधर्म. — *Adhy. name :* T_2 गोदानप्रकरणे सुरभिसृष्टिप्रकारकथनं; T_3 G_2 सुरभिसृष्टिः; M_{1-3} गोमाहाभाग्ये सुरभ्यपत्यसंकीर्तनं. — *Adhy. no. :* T_1 101; $T_{2,3}$ $G_{2,4}$ 118; $G_{1,3}$ 112; M_{1-3} 111; M_4 110. —(L. 108) T_1 M_{1-3} सुता (for तदा). —(L. 109) T_1 प्रथिता (for प्रवरा). D_{10} $G_{2,4}$ भुवि; T_1 [ऽ]पि वि-; T_2 [ऽ]थ वि-; T_3 $G_{1,3}$ M_4 हि वि- (for ऽभि वि-). —(L. 111) M_{1-3} किमाश्रिता (for के वाश्रिता). —(L. 112) M_{1-3} संश्रितं (for °ता). T_2 भावस् (for गा°). M_4 -संश्रितं (for -संज्ञितम्). T_1 स देवो देवसंज्ञितः; T_2 M_{1-3} तद्देवं दै(M_1 दे)वसंश्रि(T_2 °ज्ञि)तं (for the post. half). — T_1 om. line 113. —(L. 113) D_{10} G_2 $M_{1,3}$ दैवाश्रितं (for दे°). —(L. 115) M_{1-3} सुरभिं समुपाश्रितः (for the post. half). — T_2 om. the ref. —(L. 117) T_1 चिरं (for शिवं). —(L. 118) D_{10} प्रस्रवं (for प्रस्नवं). —(L. 119) T_1 अपि च; G_2 अमृतं (for अपि तत्). —(L. 120) T_1 दैन्यं जातु (for व्यथारिभ्यो). —(L. 121) D_{10} प्रस्रवं (for प्रस्नवं). —(L. 122) T_2 $G_{1,3}$ [ऽ]पिबत् (for ऽधयत्). —(L. 123) T_1 G_{1-3} अमृतत्वं (for अमरत्वं). $T_{1,2}$ [अ]भवद् (for पदम्). M अमरत्वं बलं सम्यगैश्वर्यं च पदोत्तमं. —(L. 124) M लब्ध्वा (for पीत्वा). —(L. 125) M_{1-3} अस्मि (for तव). —(L. 127) G_4 वै (for ये). T_1 जयस्व सुरवैरिणः (for the post. half). —(L. 128) M_{1-3} हि (for च). G_4 न कार्यो (for कार्या ते). — T_1 om. (hapl.) line 129. T_1 om. 131.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

यो यत्रोत्सहते वस्तुं स तत्र वसतां सुरः ।
सर्वं पवित्रं परमं गवां गात्रं सुपूजितम् ।
तथा कुरुष्व भद्रं ते यथा त्वं शक्र मन्यसे ।
भीष्मः ।
तस्यास्तद्वचनं श्रुत्वा सुरभ्याः सुरसत्तमः ।
सह सर्वैः सुरगणैरभजत्सौरभीं प्रजाम् ।
शृङ्गे वक्त्रे च जिह्वायां देवराजः समाविशत् ।
सर्वच्छिद्रेषु पवनः पादेषु मरुतां गणाः ।
ककुदं सर्वगो रुद्रः कुक्षौ चैव हुताशनः ।
सरस्वती स्तनेष्वब्ध्या श्रीः पुरीषे जगत्प्रिया ।
मूत्रे कीर्तिः सुमहती मेधा पयसि शाश्वती ।
वक्त्रे सोमश्च वै देवो हृदये भगवान्यमः ।
धर्मः पुच्छे क्रिया लोम्नि भास्करश्चक्षुषी श्रितः ।
सिद्धाः संधिषु सिद्धिश्च तपस्तेजश्च चेष्टने ।
एवं सर्वे सुरगणा नियता गात्रवर्त्मसु ।
महती देवता गावो ब्राह्मणैः परिसंस्कृताः ।
गामाश्रयन्ति सहिता देवा हि प्रभविष्णवः ।
किमन्यत्सर्वकामेन न विदध्याद्भवान्प्रियम् ।
भावतः परया भक्त्या पूजयस्व नरेश्वर ।
गावस्तु परमं लोके पवित्रं पावनं हविः ।
निपात्य भक्षितः स्वर्गाद्भार्गवः फेनपः किल ।
स च प्राणान्पुनर्लब्ध्वा ततो गोलोकमाश्रितः ।

Colophon.

9A

D_{10} S Kumbh. ed. Madras ed. and C_v cont.:

युधिष्ठिरः ।
कः फेनपेति नाम्नासौ कथं वा भक्षितः पुरा ।
मृत उज्जीवितः कस्मात्कथं गोलोकमाश्रितः ।
विरुद्धे मानुषे लोके तथा समयवर्त्मसु ।
ऋते दैवं हि दुष्प्रापं मानुषेषु विशेषतः ।
संशयो मे महानत्र तन्मे व्याख्यातुमर्हसि ।
भीष्मः ।
श्रूयते भार्गवे वंशे सुमित्रो नाम भारत ।
वेदाध्ययनसंपन्नो विपुले तपसि स्थितः ।
वानप्रस्थाश्रमे युक्तः स्वकर्मनिरतः सदा ।
विनयाचारतत्त्वज्ञः सर्वधर्मार्थकोविदः ।
यत्तस्त्रिषवणस्नायी संध्योपासनतत्परः ।
अग्निहोत्ररतः क्षान्तो जपञ्जुह्वच्च नित्यदा ।
पितॄन्देवांश्च नियतमतिथींश्चैव पूजयन् ।

—(L. 132) G_2 ब्रूहि (for ब्रूयाः). —(L. 136) G_2 लक्ष्यते (for लक्षये). — T_1 om. the ref. T_1 om. line 141. —(L. 143) T_1 शृंगं वक्त्रं च जिह्वां च (for the prior half). — After line 143, T_1 ins.:

उरःस्थितो गवां ब्रह्मा शिरःस्थाने सदाशिवः ।
शृङ्गमूले स्वयं शक्रः शृङ्गाग्रे च जनार्दनः ।

—(L. 144) T_1 $G_{1.3}$ M ककुदे. $G_{1.3}$ वामकुक्षौ (for कुक्षौ चैव). —(L. 146) T_1 च गंगा च (for सुमहती). T_1 रक्ते शीतांशुरेव च (for the post. half). — T_1 om. line 147. —(L. 147) Madras ed. कंठे (for वक्त्रे). $M_{2.3}$ भवः; M_4 भगः (for यमः). —(L. 148) T_1 स्थितः; T_2 स्मृतः (for श्रितः). — After line 148, T_1 ins.:

ऋषयो रोमकूपेषु पादाङ्गुलीषु गुह्यकाः ।

—(L. 149) $G_{1.3}$ M वेष्टने (for चे°). T_1 सिद्धा अस्थिषु सर्वत्र विश्वेदेवाश्च वेष्टने. —(L. 150) G_2 भर्तृ- (for गात्र-). —(L. 151) T_1 -कीर्तिताः; $G_{1.3.4}$ M -संस्तुताः (for -संस्कृताः). —(L. 152) $G_{1.3}$ M गावः श्रयंति सहिता (for the prior half). — T_1 om. line 153. —(L. 153) M -भावेन (for -कामेन). Kumbh. ed. किमासां सर्वभावेन विदध्याद्भगवान्प्रियं. —(L. 154) T_1 गावः परमया भक्त्या (for the prior half). —(L. 155) T_1 विदुः (for हविः). — M_3 reads line 156 twice. —(L. 156) T_1 निहत्य भक्षितो गोभिर्; C_v निपात्य भर्जितः स्वर्गौ (for the prior half). T_3 C_v भार्गवं (for °वः). M_3 (second time) फेनपं. —(L. 157) D_{10} $T_{2.3}$ $G_{2.4}$ ततो लोकं समाश्रितः (for the post. half). — Colophon. *Sub-parvan*: D_{10} दानधर्म. — *Adhy. name*: T_2 गोदानप्रकरणे गोशरीरे सर्वदेवतास्थितिकरणं; M_{1-3} गोप्रशंसा. — *Adhy. no.*: T_1 M 112; $T_{2.3}$ $G_{2.4}$ 119; T_3 $G_{1.3}$ 113.

9A

(L. 1) T_1 फेनपः किल नाम्नासौ (for the prior half). —(L. 2) T_1 आस्थितः (for आश्रितः). — T_1 om. (hapl.?) lines 3–4. —(L. 3) T_3 विरुद्धो (for °द्धे). —(L. 4) M मानुषेण (for °षु). —(L. 6) T_1 M भार्गवः (for भारत). — T_1 om. from the post. half of line 7 up to the prior half of line 8. —(L. 8) T_1 स्वधर्म- (for स्वकर्म-). — T_1 om. lines 9–10. —(L. 10) T_2 नित्यं; G_2 एकस्; Kumbh. ed. यत्नात् (for यत्तस्). —(L. 11) M_{1-3} -परः (for -रतः). G_2 जपशीलश् (for जपञ्जुह्वच्). —(L. 12) Kumbh. ed. पितृदेवांश्. T_1 पितृदेवार्चनपरो; T_2 पितॄंश्च देवान्नियतम् (for the prior half). D_{10} G_4 स; T_1 [अ]पि; $T_{2.3}$ G_2 सु- (for [इ]व). — T_1 om. (hapl.) line 13.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्राणसंधारणार्थं च यत्किंचिदुपहारयन् ।
गिरिस्त्रिशिखरो नाम यतः प्रभवते नदी ।
कुलहेति पुराणेषु विश्रुता रुद्रनिर्मिता ।
तस्यास्तीरे समे देशे पुष्पमालासमाकुले ।
वन्यौषधिद्रुमोपेते नानापक्षिमृगायुते ।
व्यपेतदंशमशके ध्वाङ्क्षगृध्रैरसेविते ।
कृष्णदर्भतृणप्राये सुरम्ये ज्योतिरश्मिनि ।
सर्वोन्नतैः समैः श्यामैर्याज्ञीयैस्तरुभिर्वृते ।
तत्राश्रमपदं पुण्यं भृगूणामभवत्पुरा ।
उवास तत्र नियतः सुमित्रो नाम भार्गवः ।
यथोद्दिष्टेन पूर्वेषां भृगूणां साधुवर्त्मनाम् ।
तस्मा आङ्गिरसः कश्चिद्ददौ गां शर्करीं शुभाम् ।
वर्षासु पश्चिमे मासि पौर्णमास्यां शुचिव्रतः ।
स तां लब्ध्वा धर्मशीलश्चिन्तयामास तत्परः ।
सुमित्रः परया भक्त्या जननीमिव मातरम् ।
तेन संधुक्ष्यमाणा सा रोहिणी कामचारिणी ।
विवृद्धिमगमच्छ्रेष्ठा प्राणतश्च सुदर्शना ।
सिराविमुक्तपार्श्वान्ता विपुलां कान्तिमुद्वहत् ।
श्यामपार्श्वान्तपृष्ठान्ता सुरभिर्मधुपिङ्गला ।
बृहती सूक्ष्मरोमान्ता रूपोदग्रा तनुत्वचा ।
कृष्णपुच्छा श्वेतवक्त्रा समवृत्तपयोधरा ।
पृष्ठोन्नता पूर्वनता शङ्कुकर्णी सुलोचना ।
दीर्घजिह्वा ह्रस्वशृङ्गी संपूर्णदशनान्तरा ।
मांसाधिकगलान्ता सा प्रसन्ना शुभदर्शना ।
नित्यं शमयुता स्निग्धा संपूर्णोदात्तनिस्वना ।
प्राजापत्यैर्गवां नित्यं प्रशस्तैर्लक्षणैर्युता ।
यौवनस्थेव वनिता शुशुभे रूपशोभया ।
वृषेणोपगता सा तु कल्या मधुरदर्शना ।
मिथुनं जनयामास तुल्यरूपमिवात्मनः ।
संवर्धयामास स तां सवत्सां भार्गवो ऋषिः ।
तयोः प्रजाधिसंसर्गात्सहस्रं च गवामभूत् ।
गवां जातिसहस्राणि संभूतानि परस्परम् ।
ऋषभाणां च राजेन्द्र नैवान्तः प्रतिदृश्यते ।
तैराश्रमपदं रम्यमरण्यं चैव सर्वशः ।
समाकुलं समभवन्मेघैरिव नभःस्थलम् ।
कानिचित्पद्मवर्णानि किंशुकाभानि कानिचित् ।
रुक्मवर्णानि चान्यानि चन्द्रांशुसदृशानि च ।
तथा राजतवर्णानि कानिचिल्लोहितानि वै ।
नीललोहितताम्राणि कृष्णानि कपिलानि च ।
नानारागविचित्राणि यूथानि बहुलानि च ।
न च क्षीरं घृतं स्नेहाद्वत्सानामुपजीवति ।
भार्गवः केवलं चासीद्गवां प्राणायने रतः ।
तथा शुश्रूषतस्तस्य गवां हितमवेक्षतः ।
व्यतीयात्सुमहान्कालो वत्सोच्छिष्टेन वर्ततः ।
क्षुत्पिपासापरिश्रान्तः सततं प्रस्नवं गवाम् ।
वत्सैरुच्छिष्टमुदितं बहुक्षीरतया बहु ।
पीतवांस्तेन नामास्य फेनपेत्यभिविश्रुतम् ।
गौतमस्याभिनिष्पन्नमेवं नाम युधिष्ठिर ।

Colophon.

—(L. 13) T2 प्राणसंरक्षणार्थं च (for the prior half). —(L. 14) G3 यत्र (for यतः). —(L. 15) G2 कुलभेदि; Kumbh. ed. °जेति (for °हेति). —(L. 16) G1.3 पुष्पपुंज-; M °मूल- (for °माला-). T1.2 पुष्पमूलफलाकुले (for the post. half). —T1 om. lines 17–18. —(L. 17) T2 वनौपधि-; T3 G1.3 M धान्यौ° (for वन्यौ°). M1–3 -समायुते (for -मृगा°). —(L. 18) T2 ध्वांक्षगृध्रोपसेविते (for the post. half). —(L. 19) T1 om. the post. half and the prior half of line 20. D10 T2.3 G1 M1–3 सुरम्य- (for °म्ये). —(L. 20) D10 T3 G1.3 M सर्वोन्नते समे श्यामे (for the prior half). —(L. 22) T1 पार्थिव (for भार्गवः). —T1 om. line 23. —(L. 23) D10 T2 -वर्त्मना (for °नाम्). —(L. 25) T1 M मासे (for मासि). —(L. 26) T2 धर्मशीलां (for °शीलश्). —(L. 28) Kumbh. ed. -रूपिणी (for -चारिणी). —(L. 29) T1 चापि (for श्रेष्ठा). T1 om. from the post. half up to the prior half of line 31. G3 M प्रमाणं (for प्राणतश्). —(L. 31) G2 वाम- (for श्याम-). D10 G4 -पृष्ठा च; T2 -पृष्ठा सा (for -पृष्ठान्ता). Some MSS. -पिंगळा. —T1 om. line 35 and om. (hapl.) lines 37–40. —(L. 38) D10 T2.3 G2 प्रशांतैर् (for प्रशस्तैर्). —(L. 40) Madras ed. कला मधुरशोभना (for the post. half). —(L. 41) T1 अपत्यं (for मिथुनं). —(L. 42) D10 T1 मुनिः (for ऋषिः). —T1 om. line 43. —(L. 44) T1 शत-; M तानि (for जाति-). —(L. 45) G1.3 परि- (for प्रति-). —(L. 46) G4 पुण्यम् (for रम्यम्). —(L. 50) T1 G4 च (for वै). —T1 om. (hapl.) lines 51–52. M4 om. (hapl.) line 52. —(L. 52) D10 T2.3 G4 यूथानि कुलयूथप (for the post. half). —(L. 53) G2 तत् (for च). D10 G2.4 सुत- (for घृतं). —(L. 55) T1 सुखम् (for हितम्). —T1 om. line 57. —(L. 57) D10 प्रस्रवं (for प्रस्नवं). —(L. 58) T1 वत्सोच्छिष्टं तथा फेनं (for the prior half). —(L. 60) M2 (*inf. lin.*) भार्गवस्य (for गौतमस्य). G1.3.4 M4 एतन् (for एवं). —Colophon. *Sub-parvan :*

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भीष्मः ।
कदाचित्कामरूपिण्यो गावः स्त्रीवेषमास्थिताः ।
ह्रदे क्रीडन्ति संहृष्टा गायन्त्यः पुण्यलक्षणाः ।
ददृशुस्तस्य गावो वै विस्मयोत्फुल्ललोचनाः ।
ऊचुश्च का यूयमिति स्त्रियो मानुषया गिरा ।
स्त्रियः ।
गाव एव वयं सर्वाः कर्मभिः शोभनैर्युताः ।
सर्वाः स्त्रीवेषधारिण्यो यथाकामं चरामहे ।
गावः ।
गवां गावः परं दैवं गवां गावः परा गतिः ।
कथयध्वमिहास्माकं केन वः सुकृतां गतिः ।
स्त्रियः ।
अस्माकं हविषा देवा ब्राह्मणास्तर्पितास्तथा ।
कव्येन पितरश्चैव हव्येनाग्निश्च तर्पितः ।
प्रजया च तथास्माकं कृषिरभ्युद्धृता सदा ।
शकटैश्चापि संयुक्ता दशवाहशतेन वै ।
तदेतैः सुकृतैः स्फीतैर्वयं याश्चैव नः प्रजाः ।
गोलोकमनुसंप्राप्ता यः परः कामगोचरः ।
यूयं तु सर्वा रोहिण्यः सप्रजाः सहपुंगवाः ।
अधोगामिन्य इत्येव पश्यामो दिव्यचक्षुषा ।
गावः ।
एवं गवां परं दैवं गाव एव परायणम् ।
स्वपक्ष्यास्तारणीया वः शरणाय गता वयम् ।
किमस्माभिः करणीयं वर्तितव्यं कथंचन ।
प्राप्नुयाम च गोलोकं भवाम न च गर्हिताः ।
स्त्रियः ।
वर्तते रन्तिदेवस्य सत्रं वर्षसहस्रकम् ।
तत्र तस्य नृपस्याशु पशुत्वमुपगच्छत ।
ततस्तस्योपयोगेन पशुत्वे यज्ञसंस्कृताः ।
गोलोकान्प्राप्स्यथ शुभांस्तेन पुण्येन संयुताः ।
भीष्मः ।
एतत्तासां वचः श्रुत्वा गवां संहृष्टमानसाः ।
गमनाय मनश्चक्रुरौत्सुक्यं चागमन्परम् ।
न हि नो भार्गवो दाता पशुत्वेनोपयोजनम् ।
यज्ञस्तस्य नरेन्द्रस्य वर्तते धर्मतस्तथा ।
वयं न चाननुज्ञाताः शक्ता गन्तुं कथंचन ।
अवोचन्नथ तत्रत्या भार्गवो वध्यतामयम् ।
एतत्सर्वा रोचयत न हि शक्यमतोऽन्यथा ।
लोकान्प्राप्तुं सहास्माभिर्निश्चयः क्रियतामयम् ।
न तु तासां समेतानां काचिद्घोरेण चक्षुषा ।
शक्नोति भार्गवं द्रष्टुं सत्कृतेनोपसंयुता ।
अथ पद्मसवर्णाभा भास्करांशुसमप्रभाः ।
जपालोहितताम्राक्ष्यो निर्मांसकठिनाननाः ।
रोहिण्यः कपिलाः प्राहुः सर्वासां वै समक्षतः ।
मेघस्तनितनिर्घोषास्तेजोभिरभिरञ्जिताः ।
वयं हि तं वधिष्यामः सुमित्रं नात्र संशयः ।
सुकृतं पृष्ठतः कृत्वा किं नः श्रेयो विधास्यथ ।
गावः ।
कपिलाः सर्ववर्णेषु प्रधानत्वमवाप्स्यथ ।
गवां शतफलाच्चैकां दत्त्वा फलमवाप्स्यति ।
भीष्मः ।
एतद्गवां वचः श्रुत्वा कपिला हृष्टमानसाः ।
चक्रुः सर्वा भार्गवस्य सुमित्रस्य वधे मतिम् ।
Colophon.

D_{10} M_{1-3} दानधर्म. — *Adhy. name:* T_2 गोमाहात्म्ये फेनपसुमित्रचरित्रकथनं; M_{1-3} फेनपानिर्वचनं. — *Adhy. no.:* T_1 M 113; $T_{2.3}$ $G_{2.4}$ 120; $G_{1.3}$ 114. — (L. 61) D_{10} $T_{2.3}$ M_1 आश्रिताः (for आस्थिताः). — (L. 63) $G_{1.3}$ M_{1-3} ता गावो (for गावो वै). T_1 M_4 ता दृष्ट्वा (M_4 दृष्ट्वा तु) तस्य ता गावो (for the prior half). — (L. 65) Kumbh. ed. सर्व- (for सर्वाः). T_1 वृताः (for युताः). — (L. 66) T_1 तथा (for सर्वाः). D_{10} $G_{1.3}$ लोकाननु- (for यथाकामं). — (L. 68) G_2 कथयस्व (for °ध्वम्). T_1 $G_{1.3}$ M सुकृता (for °तां). — (L. 69) T_1 G_{1-3} M तर्पिता ब्राह्मणास्तथा (T_1 $G_{1.3}$ °णाः सदा) (for the post. half). — (L. 71) M सदा (for तथा). T_1 तथा (for सदा). — (L. 72) M_{1-3} शकटाश् (for °टैश्). M_{1-3} दशभार- (for °वाह-). — (L. 73) G_2 सर्वे (for वयं). — (L. 74) D_{10} T_2 परं (for परः). — (L. 75) D_{10} T_3 G_1 M_4 सर्व- (for सर्वा). — (L. 78) D_{10} G $M_{2.4}$ स्वपक्षास् (for °क्ष्यास्). — (L. 81) M_{1-3} -सहस्रिकं (for °स्रकम्). — (L. 82) $G_{1.3}$ M_2 तत्र (for तस्य). — (L. 84) $G_{1.3}$ सुव्रताः; G_4 संयताः (for संयुताः). — (L. 86) T_1 $G_{1.3.4}$ मतिं (for मनश्). — (L. 90) $G_{1.3}$ अवोचंत च (for °चन्नथ). T_1 तत्रान्या (for तत्रत्या). — T_1 om. lines 93–94. — (L. 95) D_{10} T_3 $G_{2.4}$ -सुवर्णाभा (for -स°). D_{10} $T_{2.3}$ G_4 भास्करेण (for °रांशु-). — (L. 96) T_1 निर्मांसकठिनत्वचः (for the post. half). — (L. 97) T_2 पिंगळाः (for कपिलाः). — T_1 om. line 98. Before line 99, MSS. ins. कपिला ऊचुः. — (L. 100) T_1 G_3 विधास्यति (for °स्यथ). — (L. 102) M_{1-3} शतफलं (for °फलाच्). T_2 $G_{1.3}$ अवाप्स्यथ; G_2 असंशयः; G_3 (also) अवाप्स्यसि (for °ति). — Colophon. *Sub-parvan:* D_{10} M_{1-3} दानधर्म. — *Adhy. name:* T_2 गोमाहात्म्ये सुमित्रचरित्रं; M_{1-3} कपिलाप्राधान्यकथनं. — *Adhy. no.:* T_1 M 114; $T_{2.3}$

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भीष्मः ।
यास्तु गोमातरस्तस्य कामचारिण्य आगताः ।
समीपं हि सुमित्रस्य कृतज्ञाः समुपस्थिताः ।
अग्निप्रशस्य चैवाहुस्तमृषिं पुण्यदर्शनाः ।
गोलोकादागता वेद ऋषे गोमातरो वयम् ।
सुप्रीताः स्म वरं गृह्ण यमिच्छसि महामुने ।
यद्धि गोषु परां बुद्धिं कृतवानसि नित्यदा ।
सुमित्रः ।
प्रीतोऽस्म्यनुगृहीतोऽस्मि यन्मां गोमातरः शुभाः ।
सुप्रीतमनसः सर्वास्तिष्ठन्ते च वरप्रदाः ।
भवेद्गोष्वेव मे भक्तिर्यथैवाद्य तथा सदा ।
गोघ्नाश्चैवावसीदन्तु नरा ब्रह्मद्विषश्च ये ।
गोमातरः ।
एवमेतदृषिश्रेष्ठ हितं वदसि नः प्रियम् ।
एहि गच्छ सहास्माभिर्गोलोकमृषिसत्तम ।
सुमित्रः ।
यूयमिष्टां गतिं यान्तु न ह्यहं गन्तुमुत्सहे ।
इमा गावः समुत्सृज्य तपस्विन्यो मम प्रियाः ।
भीष्मः ।
तास्तु तस्य वचः श्रुत्वा कपिलानां सुदारुणम् ।
निन्युस्तमृषिमुत्क्षिप्य भार्गवं नभ उद्वहन् ।
कलेवरं तु तत्रैव तस्य संन्यस्य मातरः ।
निष्कृष्य करणं योगादनयन्भार्गवस्य वै ।
सर्वं चास्य तदाचख्युः कपिलानां विचेष्टितम् ।
यदर्थं हरणं गोभिर्गोलोकं लोकमातरः ।
ततस्तु कपिलास्तत्र तस्य दृष्ट्वा कलेवरम् ।
यथाप्रतिज्ञं शृङ्गैश्च खुरैश्चाप्यवचूर्णयन् ।
ततः संछिद्य बहुधा भार्गवं नृपसत्तम ।
ययुर्यत्रेतरा गावस्तच्च सर्वं न्यवेदयन् ।
अथ गोमातृभिः शप्तास्ता गावः पृथिवीचराः ।
अमेध्यवदनाः क्षिप्रं भवध्वं ब्रह्मघातकाः ।
एवं कृतज्ञा गावो हि यथा गोमातरो नृप ।
ऋषिश्च प्राप्तवाँल्लोकं गावश्च परिमोक्षिताः ।

Colophon.

भीष्मः ।
ता गावो रन्तिदेवस्य गत्वा यज्ञं मनीषिणः ।
आत्मानं ज्ञापयामासुर्महर्षीणां समक्षतः ।
रन्तिदेवस्ततो राजा प्रयतः प्राञ्जलिः शुचिः ।
उवाच गावः प्रणतः किमागमनमित्यपि ।
गावः ।
इच्छामस्तव राजेन्द्र सत्रेऽस्मिन्विनियोजनम् ।
पशुत्वमुपसंप्राप्तुं प्रसादं कर्तुमर्हसि ।
रन्तिदेवः ।
नास्मि शक्तो गवां घातं कर्तुं शतसहस्रशः ।
घातयित्वा त्वहं युष्मान्कथमात्मानमुद्धरे ।
यः पशुत्वेन संयोज्य युष्मान्स्वर्गं नयेदिह ।
आत्मानं चैव तपसा गावः समुपगम्यताम् ।
गावः ।
अस्माकं तारणे युक्तो धर्मात्मा तपसि स्थितः ।
श्रुतोऽस्माभिर्भवान्राजंस्ततस्तु स्वयमागताः ।
रन्तिदेवः ।
मम सत्रे पशुत्वं वो यद्येवं हि मनीषितम् ।
समयेनाहमेतेन जुहुयां वो हुताशने ।
कदाचिद्यदि वः काचिदकामा विनियुज्यते ।
तदा समाप्तिः सत्रस्य गवां स्यादिति नैष्ठिकी ।
गावः ।
एवमस्तु महाराज यथा त्वं प्रब्रवीषि नः ।
अकामाः स्युर्यदा गावस्तदा सत्रं समाप्यताम् ।
भीष्मः ।
ततः प्रवृत्ते गोसत्रे रन्तिदेवस्य धीमतः ।
गोसहस्राण्यहरहर्नियुज्यन्ते शमितृभिः ।
एवं बहूनि वर्षाणि व्यतीतानि नराधिप ।

$G_{2.4}$ 121; $G_{1.3}$ 115. — Before line 108, Madras ed. ins. गोमातरः. — (L. 108) M_{1-3} विद्धि; Madras ed. वेत्थ (for वेद). M_{1-3} मुने; Kumbh. ed. नृप- (for ऋषे). — (L. 109) $G_{1.3}$ सु- (for स्म). G_3 यद् (for यम्). T_1 महामते (for °मुने). — (L. 110) $M_{1.3}$ भक्तिं (for बुद्धिं). — (L. 111) $T_{3.4}$ G M च (for the second ऽस्मि). — (L. 113) M [ए]व सा (for सदा). — (L. 116) T_1 $G_{1.3}$ एभिर् (for एहि). T_2 om. (hapl.) from the post. half of line 119 up to the prior half of line 123. — (L. 121) T_1 तस्य (for तत्र). T_1 तदा (for तस्य). — (L. 124) M_{1-3} गोलोके (for °कं). — (L. 126) Kumbh. ed. तथाप्रतिज्ञं. — T_1 om. (hapl.) lines 127–128. — (L. 132) T_3 M_4 लोकान् (for लोकं). — Colophon. *Sub-parvan* : D_{10} M_{1-3} दानधर्म. — *Adhy. name* : T_2 गोमाहात्म्ये सुमित्रचरित्रे सुमित्रगोलोकप्राप्तिः. — *Adhy. no.* : T_1 M 115; $T_{2.3}$ $G_{2.4}$ 122; $G_{1.3}$ 116. — (L. 137) D_{10} $T_{2.3}$ $G_{1.4}$ इच्छाम (for °मस्). — (L. 138) T_3 पशुत्वमपि संप्राप्तं (for the prior half). — T_1 om. lines 141–142 and 145. — (L. 145) M_{1-3} समीहितं (for मनीषितम्). — (L. 146) T_1 M एकेन (for एतेन). — (L. 148) G_2 नैष्ठिकं (for °की). — (L. 151) T_1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गवां वै वध्यमानानां न चान्तः प्रत्यदृश्यत ।
गवां चर्मसहस्रैस्तु राशयः पर्वतोपमाः ।
बभूवुः कुरुशार्दूल बहुधा मेघसंनिभाः ।
मेदःक्लेदवहा चैव प्रावर्तत महानदी ।
अद्यापि भुवि विख्याता नदी चर्मण्वती शुभा ।
ततः कदाचित्स्वं वत्सं गौरुपामन्त्र्य दुःखिता ।
एहि वत्स स्तनं पाहि मा त्वं पश्चात्क्षुधार्दितः ।
तप्स्यसे विमना दुःखं घातितायां मयि ध्रुवम् ।
एते ह्यायान्ति चण्डालाः सशस्त्रा मां जिघांसवः ।
अथ शुश्राव तां वाणीं मानुषीं समुदाहृताम् ।
रन्तिदेवो महाराज ततस्तां समवारयत् ।
स्थापयामास गोसत्रमथ तं पार्थिवर्षभ ।
सत्रोत्सृष्टाः परित्यक्ता गावोऽन्याः समुपाश्रिताः ।
यास्तस्य राज्ञो निहता गावो यज्ञे महात्मनः ।
ता गोलोकमुपाजग्मुः प्रोक्षिता ब्रह्मवादिभिः ।
रन्तिदेवोऽपि राजर्षिरिष्ट्वा यज्ञं यथाविधि ।
ततः सख्यं सुरपतेस्त्रिदिवं चाक्षयं ययौ ।
फेनपो दिवि गोलोके मुमुदे शाश्वतीः समाः ।
अवशिष्टाश्च या गावस्ता बभूवुर्वनेचराः ।
फेनपाख्यानमेतत्ते गवां माहात्म्यमेव च ।
कथितं पावनं पुण्यं कृष्णद्वैपायनेरितम् ।
नारायणोऽपि भगवान्दृष्ट्वा गोषु परं यशः ।
शुश्रूषां परमां चक्रे भक्तिं च भरतर्षभ ।
तस्मात्त्वमपि राजेन्द्र गा वै पूजय भारत ।
द्विजेभ्यश्चैव सततं प्रयच्छ कुरुसत्तम ।

Colophon.

9B

D_{10} S Kumbh. ed Madras ed. and C_v cont. :

युधिष्ठिरः ।
पवित्राणां पवित्रं यच्छ्रेष्ठं लोकेषु पूजितम् ।
महाव्रतं महाभाग तन्मे ब्रूहि पितामह ।
भीष्मः ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पितुः पुत्रस्य संवादं व्यासस्य च शुकस्य च ।
ऋषीणामुत्तमं कृष्णं भावितात्मानमच्युतम् ।
पारंपर्यविशेषज्ञं सर्वशास्त्रार्थकोविदम् ।
कृतशौचः शुकस्तत्र कृतजप्यः कृताह्निकः ।
परं नियममास्थाय परं धर्ममुपाश्रितः ।
प्रणम्य शिरसा व्यासं सूक्ष्मतत्त्वार्थदर्शिनम् ।
शुकः पप्रच्छ वै प्रश्नं दानधर्मकुतूहलः ।
बहुचित्राणि दानानि बहुशः शंससे मुने ।
महार्थं पावनं पुण्यं किंस्विद्दानं महाफलम् ।
केन दुर्गाणि तरति केन लोकानवाप्नुते ।
केन वा महदाप्नोति इह लोके परत्र च ।
के वा यज्ञस्य वोढारः केषु यज्ञः प्रतिष्ठितः ।
किं च यज्ञस्य यज्ञत्वं किं च यज्ञस्य भेषजम् ।
यज्ञानामुत्तमं किं च तद्भवान्प्रब्रवीतु मे ।
स तस्मै भजमानाय जातकौतूहलाय च ।
व्यासो व्रतनिधिः प्राह गवामिदमनुत्तमम् ।
धन्यं यशस्यमायुष्यं लोके श्रुतिसुखावहम् ।
यत्पवित्रं पवित्राणां मङ्गलानां च मङ्गलम् ।
सर्वपापप्रशमनं तत्समासेन मे शृणु ।
यदिदं तिष्ठते लोके जगत्स्थावरजंगमम् ।

M ततः प्रवृत्तं गोसत्रं (for the prior half). — Before line 160, Madras ed. ins. गौः. — (L. 160) T M_3 पुत्र (for वत्स). G_{1-3} वत्स (for पश्चात्). — (L. 161) T_3 M_{1-3} दुःखाद् (for दुःखं). — (L. 162) G_1 चांडालाः. — Before line 163, Madras ed. ins. भीष्मः. T_2 om. the post. half of line 163 and the prior half of line 164. — (L. 164) G_4 महाराजस्. — (L. 168) G_1 M नाक- (for ता गो-). T_1 सुहुता ; G_2 तैः प्रोक्ता (for प्रोक्षिता). — Before line 171, Madras ed. ins. वैशंपायनः. — (L. 171) G_4 मोदते (for मुमुदे). — T_1 om. lines 175–176. — (L. 175) D_{10} वरं (for परं). — (L. 177) T_1 गाः संपूजय नित्यदा (for the post. half). — Colophon. *Sub-parvan :* D_{10} M_{1-3} दानधर्म. — *Adhy. name :* T_2 गोमाहात्म्ये रंतिदेवचरित्रकथनं ; M_{1-3} गोमाहाभाग्ये भार्गवोपाख्यानं ; M_4 गोमाहात्म्यं. — *Adhy. no. :* T_1 M 116 ; $T_{2.3}$ $G_{2.4}$ 123 ; $G_{1.3}$ 117.

9B

T_1 om. lines 7–8. — (L. 8) T_1 इव स्थितं ; M_1 अवस्थितः ; $M_{2.3}$ इव स्थितः (for उपाश्रितः). — (L. 10) $M_{1.3}$ सुतः (for शुकः). D_{10} T_2 $G_{2.4}$ -कुतूहलं. — T_1 om. line 11. — (L. 12) T_1 परमं (for महार्थं). T_1 महत्फलं (for महाफलम्). — (L. 13) M_{1-3} तरते (for °ति). T_1 G_4 M_1 लोकम् ; C_v दुर्गान् (for लोकान्). $G_{1.3}$ M_4 केन लोकमवाप्नुयात् (for the post. half). — T_1 om. lines 14–15. Before line 18, Madras ed. ins. भीष्मः. T_1 om. lines 18–19. Before line 20, $T_{1.2}$ ins. व्यासः. — After line 21, T_1 ins. :

गाव एव परं लोके गाव एव परं धनम् ।

— T_1 om. lines 22–24. — (L. 23) $G_{1.3}$ यदिदं त्रिषु लोकेषु (for the prior half). — (L. 24) M गावः प्राप्य

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गावस्ताः प्राप्य तिष्ठन्ति गोलोके पुण्यदर्शनाः ।
मातरः सर्वभूतानां विश्वस्य जगतश्च ह ।
रुद्राणामथ साध्यानां गाव एव तु मातरः ।
रुद्राणां मातरो ह्येता आदित्यानां स्वसा स्मृताः ।
वसूनां च दुहितृस्ता ब्रह्मसंतानमूलजाः ।
यासामधिपतिः पूषा मरुतो वालबन्धनाः ।
ऐश्वर्यं वरुणो राजा विश्वेदेवाः समाश्रिताः ।
य एवं वेद ता गावो मातरो देवपूजिताः ।
स विप्रो ब्रह्मलोकाय गवां लोकाय वा ध्रुवः ।
गावस्तु नावमन्येत कर्मणा मनसा गिरा ।
गवां स्थानं परं लोके प्रार्थयेद्यः परां गतिम् ।
न पद्भ्यां ताडयेद्गावो न दण्डेन न मुष्टिना ।
इमां विद्यामुपाश्रित्य पावनीं ब्रह्मनिर्मिताम् ।
मातृणामनुपाते च न गोमध्ये न गोव्रजे ।
नरो मूत्रपुरीषस्य दृष्ट्वा कुर्याद्विसर्जनम् ।
शुद्धाश्चन्दनशीताङ्ग्यश्चन्द्ररश्मिसमप्रभाः ।
सौम्याः सुरभ्यः सुभगा गावो गुग्गुलुगन्धयः ।
सर्वे देवाविशन्गावः समुद्रमिव सिन्धवः ।
दिवं चैवान्तरिक्षं च गवां व्युष्टिं समश्नुते ।
दधिना जुहुयादग्निं दधिना स्वस्ति वाचयेत् ।
दधि दद्याच्च प्राशेत गवां व्युष्टिं समश्नुते ।
घृतेन जुहुयादग्निं घृतेन स्वस्ति वाचयेत् ।
घृतमालभ्य प्राश्नीयाद्गवां व्युष्टिं समश्नुते ।
गावः संजीवना यास्तु गावो दानमनुत्तमम् ।
ताः पुण्यगोपाः सुफला भजमानं भजन्तु माम् ।
येन देवाः पवित्रेण स्वर्गलोकमितो गताः ।
तत्पवित्रं पवित्राणां मम मूर्ध्नि प्रतिष्ठितम् ।
वीणामृदङ्गपणवा गवां गात्रं प्रतिष्ठिताः ।
क्रीडारतिविहारार्थे त्रिषु लोकेषु वर्तते ।
न तत्र देवा वर्तन्ते नाग्निहोत्राणि जुह्वति ।
न यज्ञैरिज्यते चात्र यत्र गौर्वै न दुह्यते ।
क्षीरं दधि घृतं यासां रसानामुत्तमो रसः ।
अमृतप्रभवा गावस्त्रैलोक्यं येन जीवति ।
इडामाहूय धेनुं च सवत्सां यज्ञमातरम् ।
उपाह्वयन्ति यं विप्रा गावो यज्ञहविष्कृताः ।
या मेध्या प्रथमं कर्म इयं धेनुः सरस्वती ।
पौर्णमासेन वत्सेन कामं कामगुणान्विता ।
यत्र सर्वमिदं प्रोतं यत्किंचिज्जंगमं जगत् ।
सा गौर्वै प्रथमा पुण्या सर्वभूतहिते रता ।
धारणाः पावनाः पुण्या भावना भूतभावनाः ।
गावो मामभिरक्षन्तु इह लोके परत्र च ।
एष यज्ञः सहोपाङ्ग एष यज्ञः सनातनः ।
वेदाः सहोपनिषदो गवां रूपे प्रतिष्ठिताः ।
एतत्तात मया प्रोक्तं गवामिह परं मतम् ।
सर्वतः श्रावयेन्नित्यं प्रयतो ब्रह्मसंसदि ।
श्रुत्वा लभेत ताँल्लोकान्ये मया परिकीर्तिताः ।
श्रावयित्वापि प्रीतात्मा लोकांस्तान्प्रतिपद्यते ।
धेनुमेकां सदा दद्यादहन्यहनि पावनीम् ।

द्विजश्रेष्ठ ; Kumbh. ed. गावस्तत्प्राप्य तिष्ठंते (for the prior half). T G लोके पुण्यस्य दर्शनात् ; M तेनैताः (M_4 तिष्ठंते) पुण्यदर्शनाः (for the post. half). — (L. 25) T_1 तथा (for च ह). — (L. 26) T_1 G_3 अपि ; M_4 एव ; Kumbh. ed. इह (for अथ). T_1 वसूनामपि मातरः (for the post. half). — (L. 27) Kumbh. ed. ह्यादित्यानां (for आ°). — (L. 29) G_4 मूल- (for वाल-). — (L. 31) G_2 om. (hapl.) from the post. half up to the prior half of line 35. T_1 G_4 M_{1-3} लोक- (for देव-). — (L. 32) G_3 M ध्रुवं (for ध्रुवः). — (L. 34) T_1 M_4 गावस्तात ; M_1 गवां दानं (for गवां स्थानं). — (L. 35) D_{10} T गा वै (for गावो). — (L. 37) T_2 अनुयाने च ; Kumbh. ed. अन्ववाये च ; Madras ed. अनुपातेन (for °पाते च). T_1 गवां वा न च पार्श्वे तु (for the prior half). — (L. 39) D_{10} $T_{2,3}$ -शीताढ्याश् ; T_1 -शीताश्च (for -शीताङ्ग्यश्). — (L. 40) M_4 गुल्गुल- ; Kumbh. ed. गुग्गुल- (for गुग्गुलु-). — (L. 41) T_1 गा वै (for गावः). — T_1 om. lines 42–44. — (L. 42) M_4 पुष्टिं (for व्युष्टिं). — (L. 44) T_3 पुष्टिं (for व्युष्टिं). — (L. 46) G_2 घृतकूलं ह्युपाश्नीयाद् (for the prior half). T_1 $G_{1,3}$ M तथाश्नुते (for सम°). — (L. 47) T_1 गवां (for गावो). — (L. 48) $G_{1,3}$ पुण्यगावः (for °गोपाः). M_{1-3} सुभगा (for सुफला). — (L. 49) $T_{1,3}$ G_3 M ययुः (for गताः). — T_1 om. lines 51–52. — (L. 51) M -पणवं (for -पणवा). G_4 गात्रे ; Madras ed. मंत्र- (for गात्रं). — (L. 55) G_2 चासां (for यासां). — T_1 om. lines 57–58. — (L. 57) Kumbh. ed. इमाम् (for इडाम्). — (L. 58) Madras ed. यज्ञे (for विप्रा). Kumbh. ed. -हविष्कृतं (for °ताः). — (L. 59) T_2 G_{1-3} कामं (for कर्म). T_1 गौर्मेध्या प्रथमं कीर्णा ; M_4 या मेध्याः परमं कीर्णा (for the prior half). — T_1 om. line 60. — (L. 61) M_4 यच्च (for यत्र). T_2 M_4 च यत् (for जगत्). — T_1 om. line 62. — (L. 62) M वै गौः (by transp.). — (L. 63) T_1 M_{1-3} भुवने ; G_2 पावना सर्वतः (in line 68). — (L. 64) T_2 om. from मभिरक्षन्तु up to सर्वतः (in line 68). — (L. 65) T_1 सर्वे यज्ञाः सहोपांगाः (for the prior half). D_{10} ह्येष (for एष). T_1 स्विष्टाश्चैव सदक्षिणाः (for the post. half). — (L. 67)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तत्तथा प्राप्नुयाद्विप्रः पठन्वै गोमतीं सदा ।
अथ धेनुर्न विद्येत तिलधेनुमनुत्तमाम् ।
दद्याद्गोमतिकल्पेन तां धेनुं सर्वपावनीम् ।
आह्निकं गोमतीं नित्यं यः पठेत सदा नरः ।
सर्वपापात्प्रमुच्येत प्रयतात्मा य आचरेत् ।
घृतं वा नित्यमालभ्य प्राश्य वा गोमतीं जपेत् ।
स्नात्वा वा गोकरीषेण पठन्पापात्प्रमुच्यते ।
मनसा गोमतीं जप्येद्गोमत्या नित्यमाह्निकम् ।
न त्वेव दिवसं कुर्याद्व्यर्थं गोमतिपाठकः ।
गोमतीं जपमाना हि देवा देवत्वमाप्नुवन् ।
ऋषित्वमृषयश्चापि गोमत्या सर्वमाप्नुवन् ।
बद्धो बन्धात्प्रमुच्येत कृच्छ्रान्मुच्येत संकटात् ।
गोमतीं सेवते यस्तु लभते प्रियसंगमम् ।
एतत्पवित्रं कार्त्स्न्येन एतद्व्रतमनुत्तमम् ।
एतत्तु पृथिवीपाल पावनं शृण्वतां सदा ।
पुत्रकामाश्च ये केचिद्धनकामाश्च मानवाः ।
अध्वाने चोरवैरिभ्यो मुच्यते गोमतीं पठन् ।
पूर्ववैरानुबन्धेषु रणे चाप्याततायिनः ।
लभते जयमेवाशु सदा गोमतिपाठकः ।

Colophon.

शुकः ।

क्षत्रियाश्चैव शूद्राश्च मन्त्रहीनाश्च ये द्विजाः ।
कपिलामुपजीवन्ति कथमेतत्पितर्भवेत् ।

व्यासः ।

क्षत्रियाश्चैव शूद्राश्च मन्त्रहीनाश्च ये द्विजाः ।
कपिलामुपजीवन्ति तेषां वक्ष्यामि निर्णयम् ।
कपिलास्तूत्तमा लोके गोषु चैवोत्तमा मताः ।
तासां दाता लभेत्स्वर्गं विधिना यश्च सेवते ।
स्पृशेत कपिलां यस्तु दण्डेन चरणेन वा ।
स तेन स्पर्शमात्रेण नरकायोपपद्यते ।
मन्त्रेण युञ्ज्यात्कपिलां मन्त्रेणैव प्रमुच्यते ।
मन्त्रहीनं तु यो युञ्ज्यात्कृमियोनौ प्रसूयते ।
प्रहारहतमर्माङ्गा दुःखेन च जडीकृता ।
पदानि यावद्गच्छेत तावल्लोकान्कृमिर्भवेत् ।
यावच्च बिन्दवस्तस्याः शोणितस्य क्षितिं गताः ।
तावद्वर्षसहस्राणि नरकं प्रतिपद्यते ।
मन्त्रेण युञ्ज्यात्कपिलां मन्त्रेण विनियोजयेत् ।
मन्त्रहीनैरनुयुतो मज्जयेत्तमसि प्रभो ।
कपिलां येऽपि जीवन्ति बुद्धिमोहान्विता नराः ।
तेऽपि वर्षसहस्राणि पतन्ति नरके नृप ।
अथ न्यायेन ये विप्राः कपिलामुपयुञ्जते ।
तस्मिँल्लोके प्रमोदन्ते लोकाश्चैषामनामयाः ।
विधिना ये न कुर्वन्ति शूद्रांस्तानुपधारय ।

Colophon.

G_{2} एतं (for एतत्). —(L. 68) Madras ed. सर्वमाश्रावयेन्नित्यं (for the prior half). $G_{1.3}$ -संनिधौ (for -संसदि). — T_{1} om. line 69. —(L. 69) $T_{2.3}$ सर्वान् (for लोकान्). —(L. 70) T_{1} श्रावयित्वा गवां लोकान्पूतात्मा प्रतिपद्यते. —(L. 71) G_{2} एतां (for एकां). —(L. 72) T_{1} फलं (for तथा). —(L. 73) M_{1-3} विंदेत (for विद्येत). —(L. 75) T_{1} पूतात्मा (for आह्निकं). —(L. 76) T_{1} $G_{1.3}$ M सर्वपापैः (for °पात्). M_{4} वि- (for प्र-). T_{1} गवां लोके महीयते (for the post. half). —(L. 77) T_{2} घृतं वा दधि वा नित्यं (for the prior half). — T_{1} om. lines 79–80. T_{2} om. (hapl.) from the post. half of line 79 up to the prior half of line 82. D_{10} om. (hapl.) line 82. —(L. 82) T_{1} M [ए]व (for [अ]पि). —(L. 83) T_{1} वि- (for प्र-). —(L. 86) T_{1} एतच्च भूमिपालानां; M_{1} एतत्पृथिविपालानां (for the prior half). — T_{1} om. lines 88–89. —(L 90) D_{10} T_{2} G_{2} लभंत (for लभते). T_{1} लभंते सर्वमेवाशु (for the prior half). — Colophon. *Sub-parvan* : D_{10} M_{1-3} दानधर्म. — *Adhy. name* : D_{10} T_{3} $G_{2.4}$ गोमतीमाहात्म्यं; T_{2} गोमाहात्म्ये गोदानप्रकरणे गोमतीस्तोत्रमहिमानं. — *Adhy. no.* : T_{1} M 117; $T_{2.3}$ $G_{2.4}$ 124; $G_{1.3}$ 118. — T_{1} om. (hapl.) lines 91–92. —(L. 92) T_{3} om. (hapl.) from the post. half up to the prior half of line 94. M_{1-3} महामते (for पितर्भवेत्). G_{2} कथमेतद्विधं भवेत् (for the post. half). —(L. 93) M_{1-3} हीनाश् (for शूद्राश्). —(L. 97) T_{1} M स्पृशेत्तु (for °त). —(L. 100) T_{1} प्रजायते; Madras ed. हि जायते (for प्रसूयते). — T_{1} om. line 101. —(L. 102) D_{10} $T_{2.3}$ $G_{2.4}$ यानि (for यावद्). —(L. 103) Kumbh. ed. यावंतो (for यावच्च). G_{4} व्रजेत् (for गताः). —(L. 104) T_{1} तिर्यग्योनिषु सेवते; G_{3} पतंति नरके नृप; M तिर्यग्योनिं निषेवते (for the post. half). — T_{1} om. lines 105–106. G_{3} om. lines 105–108. —(L. 105) M_{4} -युज्यते (for -योजयेत्). —(L. 106) G_{2} अनुगतो (for °युतो). —(L. 107) T_{1} बुद्धिहीना नराः कचित् (for the post. half). —(L. 108) T_{1} ध्रुवं; G_{1} सदा (for नृप). G_{4} नरकं प्रतिपद्यते (for the post. half). —(L. 109) T_{2} G_{4} अन्यथा येन ये विप्राः (for the prior half). T_{1} -भुंजते; M_{4} -सेवते (for -युञ्जते). —(L. 110) T_{1} तासां; T_{3} $G_{1.3}$ $M_{1.2.4}$ तेस्मिँल्ल (for तस्मिँल्ल). $G_{1.3.4}$ काले (for लोके). G_{1-3} M_{4} हि (for च). T_{1} सनातनाः (for अनामयाः). —(L. 111) M_{1-3} न्यायेन (for विधिना). — Colophon. *Sub-*

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शुकः ।
नानावर्णैरुपेतानां गवां किं मुनिसत्तम ।
कपिलाः सर्ववर्णेषु वरिष्ठत्वमवाप्नुवन् ।
व्यासः ।
शृणु पुत्र यथा गोषु वरिष्ठाः कपिलाः स्मृताः ।
कपिलत्वं च संप्राप्ताः पूज्याश्च सततं नृषु ।
अग्निः पुरापचक्राम देवेभ्य इति नः श्रुतम् ।
देवेभ्यो मां छादयत शरण्याः शरणं गतम् ।
ऊचुस्ताः सहितास्तत्र स्वागतं तव पावक ।
इह गुप्तस्त्वमस्माभिर्न देवैरुपलप्स्यसे ।
अथ देवा विवित्सन्तः पावकं परिचक्रमुः ।
गोषु गुप्तं च विज्ञाय ताः क्षिप्रमुपतस्थिरे ।
युष्मासु निवसत्यग्निरिति गाः समचूचुदन् ।
प्रकाश्यतां हुतवहो लोकान्न च्छेत्तुमर्हथ ।
एवमस्त्वित्यनुज्ञाय पावकं समदर्शयन् ।
अधिगम्य पावकं तुष्टास्ते देवाः सद्य एव तु ।
अग्निं प्रचोदयामासुः क्रियतां गोष्वनुग्रहः ।
गवां तु यासां गात्रेषु पावकः समवस्थितः ।
कपिलत्वमनुप्राप्ताः सर्वश्रेष्ठत्वमेव च ।
महाफलत्वं लोके च ददौ तासां हुताशनः ।
तस्माद्धि सर्ववर्णानां कपिलां गां प्रदापय ।
श्रोत्रियाय प्रशान्ताय प्रयतायाग्निहोत्रिणे ।
यावन्ति रोमाणि भवन्ति धेन्वा
युगानि तावन्ति पुनाति दातृन् ।
प्रतिग्रहीतॄंश्च पुनाति दत्ता
शिष्टे तु गौर्वै प्रतिपादनेन ।

Colophon.

शुकः ।
केन वर्णविभागेन विज्ञेया कपिला भवेत् ।
कति वा लक्षणान्यस्या दृष्टानि मुनिभिः पुरा ।
व्यासः ।
शृणु तात यथा गोषु विज्ञेया कपिला भवेत् ।
नेत्रयोः शृङ्गयोश्चैव खुरेषु वृषणेषु च ।
कर्णतो घ्राणतश्चापि षड्विधाः कपिलाः स्मृताः ।
एतेषां लक्षणानां तु यद्येकमपि दृश्यते ।
कपिलां तां विजानीयादेवमाहुर्मनीषिणः ।
आग्नेयी नेत्रकपिला खुरैर्माहेश्वरी भवेत् ।
ग्रीवायां वैष्णवी ज्ञेया पूष्णो घ्राणादजायत ।
कर्णतस्तु वसन्तेन स्वयोनिमभिजायते ।
गायत्र्याश्च वृषणयोरुत्पत्तिः षड्गुणा स्मृता ।
एवं गावश्च विप्राश्च गायत्री सत्यमेव च ।
वसन्तश्च सुपर्णश्च एकतः समजायत ।
नेत्रयोः कपिलां यस्तु वाहयेत दुहेत वा ।
स पापकर्मा नरके प्रतिष्ठां प्रतिपद्यते ।
नरकाद्विप्रमुक्तस्तु तिर्यग्योनिं निषेवते ।
यदा लभेत मानुष्यं जात्यन्धो जायते नरः ।
शृङ्गयोः कपिलां यस्तु वाहयेत दुहेत वा ।
तिर्यग्योनिं स लभते जायमानः पुनः पुनः ।

---

parvan : D_{10} M_{1-3} दानधर्म. — *Adhy. name* : T_2 गोमाहात्म्ये कपिलामाहात्म्यं. — *Adhy. no.* : T_1 M 118 ; $T_{2.3}$ $G_{2.4}$ 125 ; $G_{1.3}$ 119. — Before line 112, G_2 reads lines 136–139 repeating them in their places. — (L. 112) T_1 M_1 हि (for किं). — (L. 117) $T_{1.2}$ $G_{2.3}$ $M_{1.2}$ शरण्या शरणागतं (for the post. half). — (L. 119) T_1 यथा लीनस् (for इह गुप्तस्). — (L. 121) T_1 तं गोषु गुप्तं विज्ञाय (for the prior half). — (L. 122) T_1 ताः (for गाः). — (L. 123) T_1 लोकान्गच्छेयुरुत्तमान् (for the post. half). — (L. 125) Prior half hypermetric. $T_{1.3}$ हृष्टा (for तुष्टास्). $G_{1.3}$ M_4 सर्वे (for सद्य). — (L. 127) D_{10} पावकः समुपस्थितः (for the post. half). — (L. 128) M_{1-3} च सं- (for अनु-). G_2 -ज्येष्ठत्वम् (for -श्रे°). T_1 $G_{1.3}$ M ताः सर्वाः श्रैष्ठ्यमेव च (for the post. half). — (L. 130) T_2 तस्माद्धि सर्वथा राजन् (for the prior half). T_1 कपिला ह्युत्तमाः स्मृताः (for the post. half). — After line 131, T_1 ins. :

ददस्व कपिलां तात यदिच्छसि महत्फलम् ।

— (L. 133) T_2 युनानि (for युगानि). — (L. 135) T_1 $G_{1.3}$ $M_{2.4}$ शिष्टेषु (for शिष्टे तु). G_1 M_{1-3} -पाद्यमाना ; M_4 -पूज्यमाना (for -पादनेन). — Colophon. *Sub-parvan* : D_{10} M_{1-3} दानधर्म. — *Adhy. name* : T_2 गोमाहात्म्ये व्यासशुकसंवादे कपिलामाहात्म्यं. — *Adhy. no.* : T_1 M 119 ; $T_{2.3}$ $G_{2.4}$ 126 ; G_1 121 ; G_3 120. — (L. 136) $M_{1.3.4}$ -विकारेण (for -विभागेन). — (L. 139) M [अ]पि (for [ए]व). — (L. 140) M कर्णयोर् (for कर्णतो). $G_{1.3}$ [ए]व (for [अ]पि). — M_1 om. lines 142–145. — (L. 144) $G_{1.3}$ शृंगयोर् (for ग्रीवायां). — T_1 om. line 145. T_2 om. (hapl.) lines 145–148. — (L. 145) Madras ed. वर्णतस् (for क°). — G_1 om. (hapl.) lines 146–148. — (L. 146) T_1 शृंगयोः कपिलाः स्मृताः (for the post. half). — T_1 om. lines 147–148. — (L. 147) Cv गायंति (for गावश्च). — (L. 149) Cv नेत्रयोः कपिलायास्तु (for the prior half). M_2 वाहयीत (for °येत). $M_{1.3.4}$ वाहयेद्वापयीत वा (for the post. half). — After line 150, T_1 reads the prior half of line 153 and repeats line 150. — (L. 152) G_4

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

खुरेषु कपिलां यस्तु वाहयेत दुहेत वा ।
तमस्यपारे मज्जेत धनहीनो नराधमः ।
कपिलां वालधानेषु वाहयेत दुहेत वा ।
निराश्रयः सदा चैव जायते यदि चेत्कृमिः ।
वर्णेन कपिलां यस्तु जानन्नप्युपजीवति ।
सहस्रशः कृमिर्भूत्वा मानुष्यं प्राप्नुयादथ ।
चण्डालः पापकर्मा वा जायते स नराधमः ।
घ्राणेन कपिलां यस्तु प्रमादादुपजीवति ।
सोऽपि वर्षसहस्राणि तिर्यग्योनौ प्रजायते ।
व्याधिग्रस्तो जडो रोगी भवेन्मानुष्यमागतः ।
मधुसर्पिःसुगन्धास्तु कपिलाः शाश्वतः स्मृताः ।
एताः समुपजीवेत सोऽपि तिर्यक्षु जायते ।
स्थावरत्वमनुप्राप्तो यदि मानुष्यतां लभेत् ।
अल्पायुः स भवेज्जातो हीनवर्णकुलोद्भवः ।
ये तु पापा ह्यसूयन्ते कपिलां वाहयन्ति च ।
निरयेषु प्रतिष्ठन्ते यावदाभूतसंप्लवम् ।

Colophon.

10

After 13. 98, D10 S Kumbh. ed. Madras ed. and Cv ins.:

युधिष्ठिरः ।

शूद्राणामिह शुश्रूषा नित्यमेवानुवर्णिता ।
कैः कारणैः कतिविधा शुश्रूषा समुदाहृता ।
के च शुश्रूषया लोका विहिता भरतर्षभ ।
शूद्राणां भरतश्रेष्ठ ब्रूहि मे धर्मलक्षणम् ।

भीष्मः ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शूद्राणामनुकम्पार्थं यदुक्तं ब्रह्मवादिना ।
वृद्धः पराशरः प्राह धर्मं शुभ्रमनामयम् ।
अनुग्रहार्थं वर्णानां शौचाचारसमन्वितम् ।
धर्मोपदेशमखिलं यथावदनुपूर्वशः ।
शिष्यानध्यापयामास शास्त्रमर्थवदर्थवित् ।
क्षान्तेन्द्रियेण मानेन शुचिनाचापलेन वै ।
अदुर्बलेन धीरेण नोत्तरोत्तरवादिना ।
अलुब्धेनानृशंसेन ऋजुना ब्रह्मवादिना ।
चारित्रतत्परेणैव सर्वभूतहितात्मना ।
अरयः षड्विजेतव्या नित्यं स्वं देहमाश्रिताः ।
कामक्रोधौ च लोभश्च मानमोहौ मदस्तथा ।
विधिना धृतिमास्थाय शुश्रूषुरनहंकृतः ।
वर्णत्रयस्यानुमतो यथाशक्ति यथाबलम् ।
कर्मणा मनसा वाचा चक्षुषा च चतुर्विधम् ।
आस्थाय नियमं धीमाञ्शान्तो दान्तो जितेन्द्रियः ।
रक्षोयक्षजनद्वेषी शेषान्नकृतभोजनः ।
वर्णत्रयान्मधु यथा भ्रमरो धर्ममाचरेत् ।
यदि शूद्रस्तपः कुर्याद्विदद्दष्टेन कर्मणा ।

यथा (for यदा). G1.3 M4 लभति: M1-3 भवति (for लभेत). — (L. 153) M4 om. from the post. half up to the post. half of line 157. M1-3 वाहयीत (for °येत). — T1 om. line 154. M1 om. (hapl.) lines 154-155. G2 M2.3 om. (hapl.) 154-157. M4 om. from the prior half of line 154 up to the prior half of line 159. — (L. 157) G1.3 M1 -धाने तु (for -धानेषु). T1 ग्रीवायां कपिलां यस्तु (for the prior half). — (L. 159) T2 G1.3 कर्णेन (for व°). T2 -जीवते (for °ति). — (L. 160) Kumbh. ed. शुनिर् (for कृमिर्). — (L. 161) M1.4 चंडालाः. D10 T2.3 G2.4 -योनिश्च (for -कर्मा वा). — (L. 163) T1 तिर्यग्योनिसहस्राणि लभते नात्र संशयः. — T1 om. lines 164-168. M1-3 om. (hapl.) lines 164-166. — (L. 164) T2 भवेद् (for जडो). G1.3 M4 वापि (for रोगी). — (L. 166) T एताः समुपसेवेत (for the prior half). — (L. 167) M1.3.4 अनुप्राप्य (for °प्तो). M1-3 व्रजेत् (for लभेत्). — (L. 168) M1-3 आर्तो (for जातो). — (L. 169) M4 [अ]स्यसूयंते (for ह्यसू°). — Colophon. *Sub-parvan* : D10 M1-3 दानधर्म. — *Adhy. name* : T2 कपिलावर्णविभागः. — *Adhy. no.* : T1 M 120; T2.3 G2.4 127; G1.3 121.

10

(L. 2) T1 कारणैः कैः (by transp.). — (L. 7) T1 M शुभम् (for शुभ्रम्). — (L. 9) T1 M अतुलं (for अखिलं). — (L. 10) G2.3 अर्थवत् (for °वित्). T1 G1.4 शास्त्रमर्थविदर्थवत् (for the post. half). — T1 om. lines 11-12. Before line 11, Madras ed. ins. पराशरः. — (L. 11) T3 M दांतेन (for मानेन). — (L. 12) D10 G2.4 अबलेन च; T2 दुर्बलेन च (for अदुर्बलेन). T3 शांतेनोत्तरवादिना (for the post. half). — (L. 13) T1 सत्य- (for ब्रह्म-). — (L. 14) T1.3 चारित्राचरणेनैव (for the prior half). — (L. 15) T1 नित्यं धर्मपरेण वै (for the post. half). — T1 om. lines 16-18. — (L. 16) T3 G1.3.4 कामः क्रोधश्च (for कामक्रोधौ). M मोहमानौ भयं तथा (for the post. half). — (L. 19) T3 M मनसा कर्मणा वाचा (for the prior half). — (L. 20) D10 T1.2 G नियमान्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

इह चास्य परिक्लेशः प्रेत्य चास्याशुभा गतिः ।
अधर्म्यमयशस्यं च तपः शूद्रे प्रतिष्ठितम् ।
अमार्गेण तपस्तप्त्वा म्लेच्छेषु फलमश्नुते ।
अन्यथा वर्तमानो हि न शूद्रो धर्ममर्हति ।
अमार्गेण प्रयातानां प्रत्यक्षादुपलभ्यते ।
चातुर्वर्ण्यव्यपेतानां जातिमूर्तिपरिग्रहः ।
तथा ते हि शकाश्चीनाः काम्भोजाः पारदास्तथा ।
शबराः पह्लवाश्चैव तुषारयवनास्तथा ।
दार्वाश्च दरदाश्चैव उज्जिहानास्तथेतराः ।
वेणाश्च कङ्कणाश्चैव सिंहला मद्रकास्तथा ।
किष्किन्धकाः पुलिन्दाश्च कह्वाश्चान्ध्राः सनीरगाः ।
गन्धिका द्रमिडाश्चैव बर्बराश्चूचुकास्तथा ।
किराताः पार्वतेयाश्च कोलाश्चोलाः सखाषकाः ।
आरुकाश्चैव दोहाश्च याश्चान्या म्लेच्छजातयः ।
विकृता विकृताचारा दृश्यन्ते क्रूरबुद्धयः ।
अमार्गेणाश्रिता धर्मं ततो जात्यन्तरं गताः ।
अमार्गोपार्जितस्यैतत्तपसो विदितं फलम् ।
न नश्यति कृतं कर्म शुभं वा यदि वाशुभम् ।
अत्राप्येते वसु प्राप्य विकर्मतपसार्जितम् ।
पाषण्डानर्चयिष्यन्ति धर्मकामा वृथाश्रमाः ।
एवं चतुर्णां वर्णानामाश्रमाणां च पार्थिव ।
विपरीतं वर्तमाना म्लेच्छा जायन्त्यबुद्धयः ।
अध्यायधनिनो विप्राः क्षत्रियाणां बलं धनम् ।
वणिक्कृषिश्च वैश्यानां शूद्राणां परिचारिका ।
व्युच्छेदात्तस्य धर्मस्य निरयायोपपद्यते ।
ततो म्लेच्छा भवन्त्येते निर्घृणा धर्मवर्जिताः ।
पुनश्च निरयस्तेषां तिर्यग्योनिश्च शाश्वती ।
ये तु सत्पथमास्थाय वर्णाश्रमकृतं पुरा ।
सर्वान्विमार्गानुत्सृज्य स्वधर्मपथमाश्रिताः ।
सर्वभूतदयावन्तो दैवतद्विजपूजकाः ।
शास्त्रदृष्टेन विधिना श्रद्धया जितमन्यवः ।
तेषां विधिं प्रवक्ष्यामि यथावदनुपूर्वशः ।
उपादानविधिं कृत्स्नं शुश्रूषाधिगमं तथा ।
शिष्टोपनयनं चैव मन्त्राणि विविधानि च ।
तथा शिष्यपरीक्षां च शास्त्रप्रामाण्यदर्शनात् ।
प्रवक्ष्यामि यथातत्त्वं यथावदनुपूर्वशः ।
शौचकृत्यस्य शौचार्थान्सर्वानेव विशेषतः ।
महाशौचप्रभृतयो दृष्टास्तत्त्वार्थदर्शिभिः ।
तत्रापि शूद्रो भिक्षूणामिदं शेषं च कल्पयेत् ।
भिक्षुभिः सुकृतप्रज्ञैः केवलं धर्ममाश्रितैः ।
सम्यग्दर्शनसंपन्नैर्गताध्वनि हितार्थिभिः ।
अवकाशमिमं मेध्यं निर्मितं कामवीरुधम् ।

(for °मं). — T_1 om. line 21. — (L. 21) T_3 नित्यं दक्षजनान्वेषी; $G_{1.3}$ M चौक्षश्चौक्षजनान्वेषी; Cv श्रौषट्वौषट् चमान्वेषी (for the prior half). — (L. 22) Cv -त्रयं (for -त्रयान्). T_3 G_4 आचरन् (for °रेत्). — (L. 23) T_1 विधि- (for वेद-). — (L. 24) T_1 [अ]त्र (for the second [अ]स्य). — (L. 25) D_{10} T_3 G_2 अधर्मम् (for °र्म्यम्). $T_{1.3}$ M प्रकल्पितं (for प्रतिष्ठितम्). — (L. 26) D_{10} T_2 $G_{3.4}$ अमार्गेषु (for °ण). T_1 कृत्वा (for तप्त्वा). — (L. 27) T_1 M_{1-3} [ऽ]पि (for हि). — T_1 om. lines 28–29. — (L. 29) D_{10} T_2 G जात- (for जाति-). T_3 -मुक्त- (for -मूर्ति-). — (L. 30) T_1 भवंति ते; M तथा तेपि (for तथा ते हि). — (L. 31) M_4 पह्लवाश् (for पह्ल°). — T_1 om. line 32. — (L. 32) T_3 [अ]पराः (for [इ]तराः). M औजिहानास्तुखास्तथा (for the post. half). — (L. 33) T_2 कंबळाश्; M तंकणाश् (for कङ्क°). — (L. 34) $G_{1.3.4}$ कण्वाश् (for कह्वाश्). M सनीपराः (for °रगाः). — For lines 33–34, T_1 subst.:

ढङ्कणाश्च पुलिन्दाश्च पुण्ड्राः पौण्ड्राः सधीवराः ।
सिंहका मद्रकाश्चैव बर्बराश्च समालवाः ।

— T_1 om. line 35. — (L. 35) M गंडिका (for गन्धिका). T_3 बर्बराश्च सचूचुकाः (for the post. half). — (L. 36) D_{10} T_1 M पर्वतीयाश् (for पार्वते°). T_3 पार्वतीयाश्च काशाश्च (for the prior half). D_{10} कालाश्; T_2 G_4 कोळाश्; G_3 काशाश्; M कासाश् (for कोलाश्). D_{10} चोपाः; T_2 G_{2-4} M चोळाः (for चोलाः). T_1 G_1 काशाश्चोलाः सहोल(G_1 °वाष्ट)काः; T_3 किराताश्चोळकाः शकाः (for the post. half). — (L. 37) M आरुहाश् (for °काश्). T_1 उज्जिहानाश्च खर्वाश्च; T_3 करुकाश्च विदेहाश्च (for the prior half). — T_1 reads line 38 after line 41. — (L. 38) M_4 विकृतं (for °ता). T_1 $G_{1.3.4}$ विकृता विकृताकारा (for the prior half). T_3 कृत- (for क्रूर-). — (L. 40) T_1 [इ]ह (for [ए]तत्). T_3 M विमार्गोपार्जितस्यैतत् (for the prior half). — (L. 42) M सुखं (for वसु). — (L. 45) T_1 विपरीतेन वृत्तेन (for the prior half). — (L. 46) T_3 M स्वाध्याय- (for अ°). — T_3 om. line 47. T_1 om. lines 48–53. — (L. 48) M अस्य (for तस्य). T_3 विच्छेदादस्य धर्मस्य (for the prior half). — (L. 52) Kumbh. ed. -विधिम् (for -पथम्). — (L. 53) $T_{2.3}$ दैवतं (for °त-). G_4 -पूर्वकाः (for -पूजकाः). — (L. 54) T_2 श्रद्धावि- (for श्रद्धया). — (L. 55) T_3 सिद्धिं (for विधिं). — (L. 56) T_1 शुश्रूषाधिगतं तथा; T_2 °भिगमं तथा (for the post. half). — (L. 57) M_{1-3} तंत्राणि (for मन्त्राणि). — (L. 58) D_{10} T_2 G -परीक्षा (for °क्षां). — (L. 60) T_3 पूर्वार्थान् (for शौचा°). M शौचं हि सर्वकृत्यार्थं (for the prior half). M सर्वेषां च

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

निर्जनं संवृतं बुद्ध्वा नियतात्मा जितेन्द्रियः ।
सजलं भाजनं स्थाप्य मृत्तिकां च परीक्षिताम् ।
परीक्ष्य भूमिं मूत्रार्थी तत आसीत वाग्यतः ।
उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः ।
अन्तर्हितायां भूमौ तु अन्तर्हितशिरास्तथा ।
असमाप्ते तथा शौचे न वाचं किंचिदीरयेत् ।
कृतकृत्यस्तथाचम्य गच्छन्नोदीरयेद्वचः ।
शौचार्थमुपविष्टस्तु मृद्भाजनपुरस्कृतः ।
स्थाप्यं कमण्डलुं गृह्य पार्श्वोरुभ्यामथान्तरे ।
शौचं कुर्याच्छनैर्वीरो बुद्धिपूर्वमसंकरम् ।
पाणिना शुद्धमुदकं संगृह्य विधिपूर्वकम् ।
विप्रुषश्च यथा न स्युर्यथा चोरू न संस्पृशेत् ।
अपाने मृत्तिकास्तिस्रः प्रदेयास्त्वनुपूर्वशः ।
हस्ताभ्यां च तथा विप्रो हस्तं हस्तेन संस्पृशेत् ।
अपाने नव देयाः स्युरिति वृद्धानुशासनम् ।
मृत्तिका दीयमाना हि शोधयेद्देशमञ्जसा ।
तस्मात्पाणितले देया मृत्तिकास्तु पुनः पुनः ।
बुद्धिपूर्वं प्रयत्नेन यथा नैव स्पृशेत्स्फिजौ ।
यथा घातो हि न भवेत्क्लेदजः परिधानके ।
तथा गुदं प्रमार्जेत शौचार्थं तु पुनः पुनः ।
प्रतिपादं ततस्त्यक्त्वा शौचमुत्थाय कारयेत् ।
सव्ये द्वादश देयाः स्युस्तिस्रस्तिस्रः पुनः पुनः ।
देयाः कूर्परके हस्ते पृष्ठबन्धे पुनः पुनः ।
तथैवादर्शके दद्यात्तिस्रस्तूभयोरपि ।
उभयोर्हस्तयोरेकं सप्त सप्त प्रदापयेत् ।
ततोऽन्यां मृत्तिकां गृह्य कार्यं शौचं पुनस्तयोः ।
हस्तयोरेवमेतद्धि महाशौचं विधीयते ।
ततोऽन्यथा न कुर्वीत विधिरेष सनातनः ।
उपस्थे मूत्रशौचस्य अत ऊर्ध्वं विधीयते ।
अतोऽन्यथा तु यः कुर्यात्प्रायश्चित्तीयते तु सः ।
मलोपहतचेलस्य द्विगुणं तु विधीयते ।
सहपादमथोरुभ्यां हस्तशौचमसंशयम् ।
अवधीरयमाणस्य संदेह उपजायते ।
यथा यथा विशुध्येत तत्तथा तदुपक्रमे ।
सकर्दमं तु वर्षासु गृहमाविश्य संकटम् ।
हस्तयोर्मृत्तिकास्तिस्रः पादयोः षट् प्रदापयेत् ।
कामं दत्त्वा गुदे दद्यात्तिस्रः पञ्चयां तथैव च ।
हस्तशौचं प्रकर्तव्यं मूत्रशौचविधेस्तथा ।
मूत्रशौचे तथा हस्तौ पादाभ्यां चानुपूर्वशः ।
नैष्ठिके स्थानशौचे तु महाशौचं विधीयते ।
क्षारौषराभ्यां वस्त्रस्य कुर्याच्छौचं मृदा सह ।
लेपगन्धापनयनममेध्यस्य विधीयते ।
स्नानशाट्यां मृदस्तिस्रो हस्ताभ्यां चानुपूर्वशः ।
शौचं प्रयत्नतः कृत्वा कम्पयानः समुद्धरेत् ।

(for सर्वानेव). — T_1 M_4 om. line 62. — (L. 62) $G_{1.3}$ शेषेण (for शेषं च). $M_{1.2}$ मृदं देशं च कल्पयेत् (for the post. half). — After line 62, M_{1-3} read line 70 repeating it in its proper place. — (L. 63) T_1 $G_{1.3}$ च ; T_3 M हि (for सु-). — (L. 64) T_1 शृणु वक्ष्यामि पार्थिव (for the post. half). — (L. 65) $T_{1.2}$ $G_{1.3}$ $M_{1.4}$ इदं (for इमं). — (L. 66) D_{10} निर्जितं (for निर्जनं). M_1 नियमात्मा (for °तात्मा). — (L. 67) $G_{1.3}$ सकलं (for सजलं). Madras ed. शुभ्रं (for स्थाप्य). — (L. 70) T_3 अंतर्हिताया भूमेस्तु (for the prior half). — (L. 71) T_1 M कांचिद् (for किंचिद्). — T_1 om. line 72. — (L. 73) T_1 उपतिष्ठेत (for °विष्टस्तु). — After line 73, M_{1-3} ins. :

मूत्रशौचं पुरस्कृत्य शौचं कुर्याच्छनैर्मृदा ।

— (L. 74) T_1 स्थितं ; Cv सर्वे (for स्थाप्यं). G_2 छत्र (for गृह्य). M_4 तथा (for अथ). Cv पार्श्वे दिग्भ्यामवांतरं (for the post. half). — (L. 75) $T_{1.3}$ M_{1-3} धीरो (for वीरो). — T_1 om. line 79–86. — (L. 79) M तदा (for तथा). $M_{2.3}$ न (for सं-). — (L. 81) G_2 देहम् (for देशम्). $G_{1.3}$ अंभसा (for अञ्जसा). T_3 M कोपयेद्दोषमार्शसं (for the post. half). — (L. 84) T_3 M यथोद्घातो (for यथा घातो). — (L. 85) M_{1-3} यथा (for तथा). D_{10} प्रसर्जेत (for प्रमा°). T_3 M शनैः शनैः (for पुनः पुनः). — (L. 88) G_4 पृष्ठे (for पृष्ठ-). — (L. 89) Cv तथैव दशके त्वर्धे (for the prior half). — (L. 90) Cv सर्वांस्तत्र प्रभावयेत् (for the post. half). — G_2 om. (hapl.) lines 93–96. M_4 om. (hapl.) lines 93–105. — (L. 93) M_{1-3} अतो (for ततो). — (L. 94) M_{1-3} अयं विधिः (for विधीयते). — T_1 om. line 95. — (L. 95) $M_{1.2}$ ततो (for अतो). — (L. 96) $G_{1.3.4}$ M_{1-3} -गात्रस्य (for -चेलस्य). Cv मलोपहतता चेत्स्याद् (for the prior half). $G_{1.3}$ तद् (for तु). — (L. 97) T_1 हस्ते शौचमतःपरं (for the post. half). — T_1 om. line 98. — (L. 99) T_1 $G_{1.3}$ यस्य (for the second यथा). T_1 तत्तथा शौचमाचरेत् (for the post. half). — T_1 om. lines 100–103. — (L. 100) Cv सकर्दमा शुभार्द्रासु (for the prior half). — (L. 102) T_3 G_3 कामं दद्याद् ; Cv वामे कृत्वा (for कामं दत्त्वा). — (L. 103) $G_{1.3.4}$ तदा (for तथा). — (L. 105) T_2 स्नान- (for स्थान-). T_1 -काले (for -शौचे). — (L. 107) T_1 पूति- (for लेप-). — T_1 om. line 108. — (L. 108) D_{10} T_2 G_{1-3} -शाट्या (for -शाट्यां). — (L. 109)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

देयाश्चतस्रस्तिस्रो वा द्विर्वाप्येका तथापदि ।
कालमासाद्य देशं च शौचस्य गुरुलाघवम् ।
विधिनानेन शौचं तु नित्यं कुर्यादतन्द्रितः ।
अविप्रेक्षन्नसंभ्रान्तः पादौ प्रक्षाल्य तत्परः ।
अप्रक्षालितपादस्तु पाणिमा मणिबन्धनात् ।
अधस्तादुपरिष्टाच्च ततः पाणिमुपस्पृशेत् ।
मनोगतास्तु निःशब्दा निःशब्दं त्रिरपः पिबेत् ।
द्विर्मुखं परिमृज्याच्च खानि चोपस्पृशेद्बुधः ।
ऋग्वेदं तेन प्रीणाति प्रथमं यः पिबेदपः ।
द्वितीयं तु यजुर्वेदं तृतीयं साम एव च ।
मृज्यते प्रथमं तेन अथर्वा प्रीतिमाप्नुयात् ।
द्वितीयेनेतिहासं च पुराणस्मृतिदेवताः ।
यच्चक्षुषि समाधत्ते तेनादित्यं तु प्रीणयेत् ।
प्रीणाति वायुं घ्राणं च दिशश्चाप्यथ श्रोत्रयोः ।
ब्रह्माणं तेन प्रीणाति यन्मूर्धनि समापयेत् ।
समुत्क्षिपति चापोर्ध्वमाकाशं तेन प्रीणयेत् ।
प्रीणाति विष्णुं पद्भ्यां तु सलिलं वै समादधत् ।
प्राङ्मुखोदङ्मुखो वापि अन्तर्जानुरुपस्पृशेत् ।
सर्वत्र विधिरित्येष भोजनादिषु नित्यशः ।
अन्नेषु दन्तलग्नेषु उच्छिष्टः पुनराचमेत् ।
विधिरेष समुद्दिष्टः शौचे चाभ्युक्षणं स्मृतम् ।
शूद्रस्यैष विधिर्दृष्टो गृहान्निष्क्रमतः सतः ।
नित्यं त्वलुप्तशौचेन वर्तितव्यं कृतात्मना ।
यशस्कामेन भिक्षुभ्यः शूद्रेणात्महितार्थिना ।

Colophon.

पराशरः ।

क्षत्रा आरम्भयज्ञास्तु वीर्ययज्ञा विशः स्मृताः ।
शूद्राः परिचरायज्ञा जपयज्ञास्तु ब्राह्मणाः ।
शुश्रूषाजीविनः शूद्रा वैश्या विपणिजीविनः ।
अनिष्टनिग्रहाः क्षत्रा विप्राः स्वाध्यायजीविनः ।
तपसा शोभते विप्रो राजन्यः पालनादिभिः ।
आतिथ्येन तथा वैश्यः शूद्रो दास्येन शोभते ।
यतात्मना तु शूद्रेण शुश्रूषा नित्यमेव च ।
कर्तव्या त्रिषु वर्णेषु प्रायेणाश्रमवासिषु ।
अशक्तेन त्रिवर्गस्य सेव्या ह्याश्रमवासिनः ।
यथाशक्यं यथाप्रज्ञं यथाधर्मं यथाश्रुतम् ।
विशेषेणैव कर्तव्या शुश्रूषा भिक्षुकाश्रमे ।
आश्रमाणां तु सर्वेषां चतुर्णां भिक्षुकाश्रमम् ।
प्रधानमिति वर्ण्यन्ते शिष्टाः शास्त्रविनिश्चये ।
यच्चोपदिश्यते शिष्टैः श्रुतिस्मृतिविधानतः ।
तथा स्थेयमशक्तेन स धर्म इति निश्चितः ।
अतोऽन्यथा तु कुर्वाणः श्रेयो नाप्नोति मानवः ।
तस्माद्भिक्षुषु शूद्रेण कार्यमात्महितं सदा ।
इह यत्कुरुते श्रेयस्तत्प्रेत्य समुपाश्नुते ।
तच्चानसूयता कार्यं कर्तव्यं यद्धि मन्यते ।
असूयता कृतस्येह फलं दुःखादवाप्यते ।

Kumbh. ed. कंपमानः (for °यानः). — T_1 om. line 110. —(L. 110) T_3 तथाविधि (for तथापदि). —(L. 112) T_3 तेन (for [अ]नेन). $G_{1.3}$ नित्यं कुर्युरतंद्रिताः (for the post. half). —(L. 114) M_{1-3} सुप्रक्षालित- (for अप्र°). T_2 -पादं (for -पादस्). T_1 M पाणिना पाणि(T_1 °द)बंधनात्; T_2 पाणिक्रमणबंधनात् (for the post. half). —(L. 116) M च त्र्यपः (for त्रिरपः). —(L. 117) T_3 द्विजः (for बुधः). —(L. 120) $T_{1.3}$ स्पृश्यते (for मृज्यते). —(L. 121) T M_4 [इ]तिहासश् (for °हासं). M_{1-3} द्वितीयं सेतिहासाश्च (for the prior half). —(L. 124) T_2 यच्च मूर्ध्नि (for यन्मूर्धनि). T_3 समालभेत् (for °पयेत्). —(L. 125) M यदुत्क्षिपति (for समुत्क्षि°). $T_{1.3}$ यदुत्क्षिपति चाप्यूर्ध्वम् (for the prior half). —(L. 126) D_{10} $T_{1.3}$ $G_{1.3.4}$ M_4 विष्णुः (for विष्णुं). — T_1 om. lines 129–130. —(L. 130) T_2 $G_{1.3}$ शौचे वा; T_3 शौचे हि; M शौचेषु (for शौचे च). —(L. 131) G_1 ततः (for सतः). —(L. 132) $T_{1.3}$ M कृतात्मसु (for °त्मना). —(L. 133) T_1 -हितात्मना; T_3 M_{1-3} -हितैषिणा (for -हितार्थिना). — Colophon. *Sub-parvan :* D_{10} M_{1-3} दानधर्म. — *Adhy. name :* T_2 शूद्रधर्मविधिसकलवर्णधर्मविधिः; G_3 शूद्रविधिः. — *Adhy. no. :* D_{10} 106; T_1 M_4 139; $T_{2.3}$ $G_{2.4}$ 146; $G_{1.3}$ M_1 140; $M_{2.3}$ 141. —(L. 134) T_1 $G_{1.3}$ M क्षत्रस्यारंभयज्ञस्तु (for the prior half). T_3 $G_{1.3}$ M हविर्यज्ञो विशां तथा (for the post. half). —(L. 135) $G_{1.3.4}$ शूद्रः (for शूद्राः). D_{10} परिचार-; T_1 °चर्या- (for °चरा-). M_{1-3} परिचारयज्ञाः शूद्रास्तु (for the prior half). —(L. 136) D_{10} T_2 M_{1-3} विपण- (for विपणि-). — D_{10} $T_{1.2}$ om. (hapl.) line 137. —(L. 137) T_3 क्षत्रं (for क्षत्रा). M अनिष्टनिग्रहात्क्षत्रं (for the prior half). —(L. 138) T_2 तपः सं- (for तपसा). M राजन्यः पालनादपि (for the post. half). —(L. 139) $M_{2.3}$ दाक्ष्येण (for दास्येन). —(L. 142) Madras ed. त्रिवर्णस्य (for °र्गस्य). T_1 $G_{1.3}$ च (for हि). T_1 -वासिषु (for °नः). —(L. 143) $T_{1.3}$ M_4 -शक्त्या; $G_{1.3}$ M_{1-3} -शक्ति (for -शक्यं). —(L. 144) Madras ed. शुश्रूषा भिक्षुकाश्रमं (for the post. half). —(L. 146) T $G_{1.3}$ M मन्यंते (for वर्ण्यन्ते). — T_1 om. lines 147–156. —(L. 148) M_{1-3} निश्चयः (for निश्चितः). —(L. 153) $G_{2.4}$ तु तस्य (for कृतस्य).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रियवादी जितक्रोधो वीततन्द्रिरमत्सरः ।
क्षमावाञ्शीलसंपन्नः सत्यधर्मपरायणः ।
आपद्भावेन कुर्याद्धि शुश्रूषां भिक्षुकाश्रमे ।
अयं मे परमो धर्मस्त्वनेनेमं सुदुष्करम् ।
संसारसागरं घोरं तरिष्यामि न संशयः ।
विभयो देहमुत्सृज्य यास्यामि परमां गतिम् ।
नातः परं ममाप्यन्य एष धर्मः सनातनः ।
एवं संचिन्त्य मनसा शूद्रो बुद्धिसमाधिना ।
कुर्यादविमना नित्यं शुश्रूषाधर्ममुत्तमम् ।
शुश्रूषानियमेनेह भाव्यं शिष्टाशिना सदा ।
शमान्वितेन दान्तेन कार्याकार्यविदा सदा ।
सर्वकार्येषु कृत्यानि कृतान्येव तु दर्शयेत् ।
यथा प्रियो भवेद्भिक्षुस्तथा कार्यं प्रसाधयेत् ।
यदकल्पं भवेद्भिक्षोर्न तत्कार्यं समाचरेत् ।
यदाश्रमस्याविरुद्धं धर्ममात्राभिसंहितम् ।
तत्कार्यमविचारेण नित्यमेव शुभार्थिना ।
मनसा कर्मणा वाचा नित्यमेव प्रसादयेत् ।
स्थातव्यं तिष्ठमानेषु गच्छमानाननुव्रजेत् ।
आसीनेष्वासितव्यं च नित्यमेवानुवर्तता ।
धर्मलब्धेन स्नेहेन पादौ संपीडयेत्सदा ।
उद्वर्तनादींश्च तथा कुर्यादप्रतिचोदितः ।
नैशकार्याणि कृत्वा तु नित्यं चैवानुचोदितः ।
यथाविधिरुपस्पृश्य संन्यस्य जलभाजनम् ।
भिक्षूणां निलयं गत्वा प्रणम्य विधिपूर्वकम् ।
ब्रह्मपूर्वान्गुरूंस्तत्र प्रणम्य नियतेन्द्रियः ।
तथाचार्यपुरोगाणामनुकुर्यान्नमस्क्रियाम् ।
स्वधर्मचारिणां चापि सुखं पृष्ट्वाभिवाद्य च ।
यो भवेत्पूर्वसंसिद्धस्तुल्यधर्मा भवेत्सदा ।
तस्मै प्रणामः कर्तव्यो नेतरेषु कदाचन ।
अनुक्त्वा तेषु चोत्थाय नित्यमेव यतव्रतः ।
संमार्जनमथो कृत्वा कृत्वा चाप्युपलेपनम् ।
ततः पुष्पबलिं दद्यात्पुष्पाण्यादाय धर्मतः ।
निष्क्रम्यावसथात्तूर्णमन्यत्कर्म समाचरेत् ।
यथोपघातो न भवेत्स्वाध्यायेऽऽश्रमिणां तथा ।
उपघातं तु कुर्वाण एनसा संप्रयुज्यते ।
तथात्मा प्रणिधातव्यो यथा ते प्रीतिमाप्नुयुः ।
परिचारकोऽहं वर्णानां त्रयाणां धर्मतः स्मृतः ।
किमुताश्रमवृद्धानां यथालब्धोपजीविनाम् ।
भिक्षूणां गतरागाणां केवलं ज्ञानदर्शिनाम् ।
विशेषेण मया कार्या शुश्रूषा नियतात्मना ।
तेषां प्रसादात्तपसा प्राप्स्यामीष्टां शुभां गतिम् ।
एवमेतद्विनिश्चित्य यदि सेवेत भिक्षुकान् ।
विधिना स्वोपदिष्टेन प्राप्नोति परमां गतिम् ।

Colophon.

—(L. 154) G_2 वितंद्री वीतमत्सरः; Kumbh. ed. वीततंद्रीरमत्सरः (for the post. half). —(L. 156) G_3 भिक्षुराश्रमे (for भिक्षुका°). —(L. 157) T_1 नः (for मे). $T_{1.2}$ $M_{1.2.4}$ अनेनैव (for त्वनेनेमं). T_1 M सुदुस्तरं (for सुदुष्करम्). —(L. 159) $T_{1.3}$ निर्भयो (for विभयो). —(L. 160) T_3 [अ]स्ति (for [अ]पि). M_{1-3} [अ]न्यद्; M_4 [अ]द्य (for [अ]न्य). —(L. 162) M_{1-3} शुश्रूषां (for शुश्रूषा-). —(L. 163) G_2 M_{1-3} नियतेन (for °मेन). T_1 भाव्या (for भाव्यं). T_1 तथा (for सदा). — D_{10} reads line 164 twice. —(L. 164) T_1 सता (for सदा). —(L. 165) T_3 M नि- (for तु). —(L. 166) T_3 $G_{1.3}$ प्रीतो (for प्रियो). —(L. 167) T_3 यदकार्यं (for °कल्पं). —(L. 168) $T_{2.3}$ G_4 यथा (for यदा). —(L. 172) G M नीचम् (for नित्यम्). — T_1 om. line 173. —(L. 173) D_{10} G_2 -लुब्धेन; M_2 (*sup. lin.*) -बद्धेन (for -लब्धेन). T_3 M_4 संप्रदिह्येत् (for संपीडयेत्). M_{1-3} पादान्संप्रदिह्येत्सदा (for the post. half). —(L. 174) G_2 सदा (for तथा). T_1 उद्वर्तनं पादयोश्च (for the prior half). —(L. 175) Kumbh. ed. नैज- (for नैश-). T_1 कुर्याच्च (for कृत्वा तु). T_1 अप्रति- (for चैवानु-). — T_1 om. line 176. —(L. 178) G_2 -पूर्वं (for -पूर्वान्). T_1 प्रणमेन् (for °म्य). —(L. 179) T_2 यथा (for तथा). —(L. 180) M_4 -चारिणश् (for °णां). —(L. 181) $T_{1.3}$ G_1 -धर्मो; Kumbh. ed. -कर्मा (for -धर्मा). —(L. 182) $T_{1.3}$ $G_{1.3}$ M [इ]तरेषां (for °रेषु). T_1 कथंचन. —(L. 184) T_3 G_4 गत्वा (for the second कृत्वा). T_1 [अ]त्र- (for [उ]प-). —(L. 185) T_3 M कुर्यात् (for दद्यात्). T_1 ततः पुष्पफलादीनि (for the prior half). T_1 सर्वाणि (for पुष्पाणि). —(L. 186) T_1 कामं (for कर्म). — T_1 om. lines 187–188. —(L. 190) Prior half hypermetric. T_2 धर्माणां; T_3 कर्माणां (for वर्णानां). T_2 वर्णतः (for धर्मतः). T_1 त्रयाणामपि धर्मतः (for the post. half). —(L. 191) G_2 -वर्णानां (for -वृद्धानां). —(L. 192) T_3 -पापानां; M -पारागां (for -रागाणां). —(L. 194) M_{1-3} लप्स्यामि (for प्रा°). T_3 गतिं शुभां (by transp.). —(L. 196) T_1 यथोपदिष्टविधिना; T_3 M विधिना यथोपदिष्टेन (hypermetric) (for the prior half). — Colophon. *Sub-parvan:* D_{10} M_{1-3} दानधर्म. — *Adhy. name:* T_2 शूद्रधर्मोक्तिः. — *Adhy. no.:* T_1 140; $T_{2.3}$ $G_{2.4}$ 147; $G_{1.3}$ $M_{1.4}$ 141; $M_{2.3}$ 142. — Madras ed. om. the ref. — For line 198, T_1 subst.:

इष्टां गतिं स संसर्गादचिरेण न संशयः ।

— G_1 om. line 199–202. —(L. 200) G_4 प्र- (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पराशरः ।

न तथा संप्रदानेन नोपवासादिभिस्तथा ।
इष्टां गतिमवाप्नोति यथा शुश्रूषकर्मणा ।
यादृशेन तु तोयेन शुद्धिं प्रकुरुते नरः ।
तादृग्भवति तद्धौतमुदकस्य स्वभावतः ।
शूद्रोऽप्येतेन मार्गेण यादृशं सेवते जनम् ।
तादृग्भवति संसर्गादचिरेण न संशयः ।
तस्मात्प्रयत्नतः सेव्या भिक्षवो नियतात्मना ।
उदकग्रहणाद्येन स्नपनोद्वर्तनैस्तथा ।
अध्वना कर्शितानां च व्याधितानां तथैव च ।
शुश्रूषां नियतं कुर्यात्तेषामापदि यत्नतः ।
दर्भाजिनान्यवेक्षेत भैक्षभाजनमेव च ।
यथाकामं च कार्याणि सर्वाण्येवोपसाधयेत् ।
प्रायश्चित्तं यथा न स्यात्तथा सर्वं समाचरेत् ।
व्याधितानां तु प्रयतश्चैलप्रक्षालनादिभिः ।
प्रतिकर्मक्रिया कार्या भेषजानयनैस्तथा ।
पिंषणालेपनं चूर्णं कषायमथ साधनम् ।
नान्यस्य प्रतिचारेषु सुखार्थमुपपादयेत् ।
भिक्षाटनोऽभिगच्छेत भिषजश्च विपश्चितः ।
ततो विनिष्क्रयार्थानि द्रव्याणि समुपार्जयेत् ।
यश्च प्रीतमना दद्यादादद्याद्भेषजं नरः ।
अश्रद्धया हि दत्तानि तान्यभोज्यानि भिक्षुभिः ।
श्रद्धया यदुपादत्तं श्रद्धया चोपपादितम् ।
तस्योपभोगाद्धर्मः स्याद्व्याधिभिश्च निवर्त्यते ।
आ देहपतनादेवं शुश्रूषार्थमतन्द्रितैः ।
न त्वेव धर्ममुत्सृज्य कुर्यात्तेषां प्रतिक्रियाम् ।
स्वभावतो हि द्वंद्वानि विप्रयान्त्युपयान्ति च ।
स्वभावतः सर्वभावा भवन्ति न भवन्ति च ।
सागरस्योर्मिसदृशा विज्ञातव्या गुणात्मकाः ।
विद्यादेवं हि यो धीमांस्तत्त्ववित्तत्त्वदर्शनः ।
न स लिप्येत पापेन पद्मपत्रमिवाम्भसा ।

Colophon.

पराशरः ।

एवं प्रयतितव्यं हि शुश्रूषार्थमतन्द्रितैः ।
सर्वाभिरुपसेवाभिस्तुष्यन्ति यतयो यथा ।
नापराध्येत भिक्षोस्तु न चैनमवधीरयेत् ।
उत्तरं च न संदद्यात्क्रुद्धं चैव प्रसादयेत् ।
श्रेय एवाभिधातव्यं कर्तव्यं च प्रहृष्टवत् ।
तूष्णींभावेन वै तत्र न क्रुद्धमभिसंवदेत् ।
नाददीत परस्वानि न गृह्णीयादयाचितम् ।
लब्धालब्धेन जीवेत तथैव परितोषयेत् ।
कोपिनं तु न याचेत ज्ञानविद्वेषकारितः ।
स्थावरेषु दयां कुर्याज्जंगमेषु च प्राणिषु ।
यथात्मनि तथान्येषु समां दृष्टिं निपातयेत् ।
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
तथा मुच्यति पापेन राहुणा चन्द्रमा यथा ।
त्र्यहं स्नातः स भवति निराहारश्च वर्तते ।
स्पृशते यो गवां पृष्ठं वालधिं च नमस्यति ।
ततो विद्युत्प्रभो वाक्यमभ्यभाषत वासवम् ।
अयं सूक्ष्मतरो धर्मस्तं निबोध शतक्रतो ।
घृष्टो वटकषायेण अनुलिप्तः प्रियङ्गुणा ।
क्षीरेण षष्टिकान्भुक्त्वा सर्वपापैः प्रमुच्यते ।
श्रूयतां चापरं गुह्यं रहस्यमृषिचिन्तितम् ।
श्रुतं मे भाषमाणस्य स्थाणोः स्थाने बृहस्पतेः ।
रुद्रेण सह देवेश तन्निबोध शचीपते ।
पर्वतारोहणं कृत्वा एकपादो विभावसुम् ।
निरीक्षेत निराहार ऊर्ध्वबाहुः कृताञ्जलिः ।
तपसा महता युक्त उपवासफलं लभेत् ।
रश्मिभिस्तापितोऽर्कस्य सर्वपापमपोहति ।
ग्रीष्मकालेऽथ वा शीते एवं पापमपोहति ।
ततः पापात्प्रमुक्तस्य द्युतिर्भवति शाश्वती ।
तेजसा सूर्यवद्दीप्तो भ्राजते सोमवत्पुनः ।
मध्ये त्रिदशवर्गस्य देवराजः शतक्रतुः ।
उवाच मधुरं वाक्यं बृहस्पतिमनुत्तमम् ।
धर्मगुह्यं तु भगवान्मानुषाणां सुखावहम् ।
सरहस्याश्च ये दोषास्तान्यथावदुदीरय ।

बृहस्पतिः ।

प्रतिमेहन्ति ये सूर्यमनिलं द्विषते च ये ।

तस्मात्प्रतिग्रहस्त्वन्यः परिहार्योऽन्नमश्नुता ।
[$D_{4.5}$ तस्य (for त्वन्यः).]

— (L. 84) B_{4} तु तदा ; B_{5} [अ]पि तदा ; D_{4-7} सर्वथा (for तु सदा). D_{5} श्राद्धे (for श्राद्धं). D_{5} भोजनं (for भोक्तव्यं). — (L. 85) $B_{1.3}$ ते तथा नान्यथा भवेत् (for the post. half). D_{4-7} ये यथा कीर्तिता दोषास्ते तथा नात्र संशयः. — After line 85, $D_{4.6.7}$ ins. an addl. colophon. *Sub-parvan :* $D_{6.7}$ दानधर्म. — *Adhy. name :* $D_{4.6.7}$ देवरहस्यानि. — $D_{4.6.7}$ om. lines 86–114. — (L. 86) B_{3} श्राद्धमुप- (for क्षान्तः श्राद्धं). — (L. 87) V_{1} Dn_{3} [ए]नं (for [ए]वं). — (L. 88) Dn_{2} D_{5} तथा (for ततो). — (L. 89) D_{5} तुल्यं (for तस्य). D_{8} transp. तस्य and तुल्यं. D_{5} रूपं तस्य प्रकाशते (for the post. half). — (L. 90) D_{5} एवं (for स च). — (L. 92) D_{8} च (for स-). — For lines 91–92, D_{5} subst. :

तिर्यग्योनिगताः सर्वे मर्त्याः सन्ति विमोहिताः ।
कीटाः पिपीलिकाः सर्पा मेषाः समृगपक्षिणः ।

— (L. 97) $B_{1.2}$ (marg. as above) गत्वा (for ध्यात्वा). D_{5} -रोहेत् (for -गाहेत्). Dn_{8} तु भोजनं (for ततो जलम्). — (L. 98) B_{1} मुच्येत (for मुच्यति). — (L. 100) D_{5} वालधिं न नमस्यते (for the post. half). — (L. 101) B_{1} अथाभाषत ; B_{5} प्रत्यभा° (for अभ्यभा°). — (L. 103) V_{1} अवलिप्तः (for अनु°). — (L. 106) Dn_{2} श्रुतं सं- ; D_{8} श्रुतयो (for श्रुतं मे). — (L. 107) $B_{2.3}$ शतक्रतो (for शचीपते). — (L. 111) $B_{1.3}$ तापितः सूर्यरश्मिभिः (for the prior half). — (L. 112) $B_{1.3.4}$ हिम- (for ग्रीष्म-). D_{5} [ऽ]थ शीतेन ; D_{8} तथा शीते (for ऽथ वा शीते). D_{5} ये च पापं व्यपोहति (for the post. half). — (L. 113) V_{1} शापात् (for पा°). — (L. 114) Dn_{3} सूर्यवत्तेजसा दीप्तो (for the prior half). — After line 114, D_{5} ins. an addl. colophon. — *Adhy. name :* देवरहस्यं. — Before line 115, D_{4-7} ins. भीष्मः. — For line 115, D_{5-7} subst. :

सर्वदेवैः समासीनमृषिमध्ये शतक्रतुः ।
[$D_{5.7}$ देवैः सह (for सर्वदेवैः).]

— (L. 116) D_{4-7} बृहत्तेजा बृहस्पतिः (for the post. half). — Before line 117, $D_{4.5}$ ins. धर्मः. — (L. 117) V_{1} B_{1-3} Dn_{2} मनुष्या(B_{1} °षा)णां (for मानुषाणां). D_{4-7} धर्मगुह्यानि सर्वाणि सरहस्यानि तत्त्वतः. — (L. 118) D_{5} तद् (for तान्). $D_{6.7}$ श्रोतुमिच्छामि भगवंस्तानि मे वक्तुमर्हसि. — After the ref., D_{4-7} ins. :

व्यक्तं भूतार्थसंयुक्तं निरुक्तं पापनाशनम् ।
शृणुष्व बलभित्सर्वमेतेषां दोषविस्तरम् ।

— $D_{4.6.7}$ om. lines 119–120. — (L. 119) B_{1} यः (for ये). — (L. 120) B_{1} हव्यवाहस्य दीप्तस्य (for the prior half). Dn_{3} जुह्वते. — $D_{4.7}$ read and D_{5} repeats lines 121–122 after the substitution for line 131. — (L. 121) B_{3} बालं च सा (for बालवत्सां). D_{4} धेनुं च (for ये धेनुं). $D_{6.7}$ दुह्यते. D_{4} -कर्मणः (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कं वा प्रीणयते देवं कथं तारयते पितॄन् ।
मध्यमं तु तदा पत्नी भुङ्क्तेऽनुज्ञातमेव हि ।
किमर्थं पितरस्तस्य कव्यमेव च भुञ्जते ।
अत्र यस्त्वन्तिमः पिण्डो गच्छते जातवेदसम् ।
भवते का गतिस्तस्य कं वा समनुगच्छति ।
एतदिच्छाम्यहं श्रोतुं पिण्डेषु त्रिषु या गतिः ।
फलं वृत्तिं च मार्गं च यश्चैनं प्रतिपद्यते ।

पितरः ।

सुमहानेष प्रश्नो वै यस्त्वया समुदीरितः ।
रहस्यमद्भुतं चापि पृष्टाः स्म गगनेचर ।
एतदेव प्रशंसन्ति देवाश्च मुनयस्तथा ।
तेऽप्येवं नाभिजानन्ति पितृकार्यविनिश्चयम् ।
वर्जयित्वा महात्मानं चिरजीविनमुत्तमम् ।
पितृभक्तस्तु यो विप्रो वरलब्धो महायशाः ।
त्रयाणामपि पिण्डानां श्रुत्वा भगवतो गतिम् ।
देवदूतेन यः पृष्टः श्राद्धस्य विधिनिश्चयः ।
गतिस्त्रयाणां पिण्डानां शृणुष्वावहितो मम ।
अपो गच्छति यो ह्यत्र शशिनं ह्येष प्रीणयेत् ।
शशी प्रीणयते देवान्पितॄंश्चैव महामते ।
भुङ्क्ते तु पत्नी यं चैषामनुज्ञाता तु मध्यमम् ।
पुत्रकामाय पुत्रं तु प्रयच्छन्ति पितामहाः ।
हव्यवाहे तु यः पिण्डो दीयते तन्निबोध मे ।
पितरस्तेन तृप्यन्ति प्रीताः कामान्दिशन्ति च
एतत्ते कथितं सर्वं त्रिषु पिण्डेषु या गतिः ।
ऋत्विग्यो यजमानस्य पितृत्वमनुगच्छति ।
तस्मिन्नहनि मन्यन्ते परिहार्यं हि मैथुनम् ।
शुचिना तु सदा श्राद्धं भोक्तव्यं खेचरोत्तम ।
ये मया कथिता दोषास्ते तथा स्युर्न चान्यथा ।

पिंडानामानुपूर्व्येण (for the prior half). D_8 विभागस्तु (for प्रविभागः). — (L. 57) D_8 हि वः (for त्वया). — For lines 57–58, D_{4-7} subst. :

पिण्डेषु परिपृच्छामि निरुक्तं कथयस्व मे ।
यदेतद्दीयते आप (sic) अधरतात्तस्य किं फलम् ।

— $D_{6,7}$ om. line 59. — (L. 59) B_1 कथं (for कं वा). — (L. 60) B_2 तु यदा ; D_{5-7} चापि यत् (for तु तदा). B_1 ह्यर्थजातं बुभुक्षति ; D_{5-7} अनुज्ञापिंडमश्नुते (for the post. half). — D_6 om. lines 61–63. D_7 om. line 61. — (L. 61) V_1 Dn_2. n_3 D_8 तत्र (for तस्य). B_1 तु ; $B_{2,3}$ प्र- (for च). — For lines 62–63, $D_{5,7}$ subst. :

यस्तु चोत्तमपिण्डो हि दीयते जातवेदसि ।
का गतिर्भगवंस्तस्य को वा तं समुपाश्नुते ।

$D_{5,7}$ cont. : $D_{4,6}$ ins. after line 63 :

कतरः प्रीणयेद्देवान्कतरः पितृतृप्तिदः ।
मातामहस्य कतरः कतरः प्रपितामहान् ।

— (L. 64) $D_{4,5}$ त्रिषु पिंडेषु या गतिः (for the post. half). — After line 64, D_{4-7} ins. :

अनुरूपमिदं सर्वं भवेद्वै खेचरोत्तम ।
महागुह्यमिमं प्रश्नं प्रष्टा स गगनेचरः ।
शृणुष्वैतद्वचो मह्यं शृणु पिण्डेषु या गतिः ।

[Before line 1, D_6 ins पितरः. D_5 reads line 3 after line 78.]

— D_4 om. (hapl.) lines 65–72. D_5 om. lines 65–67. — (L. 65) B_2 Dn_3 वृत्तं (for वृत्तिं). B_3 यथैनं प्रतिगृह्णते (for the post. half). — (L. 66) V_1 D_8 वै प्रश्नो (by transp.). — (L. 68) B_1 ऋषयश्च तपोधनाः (for the post. half). — (L. 69) B_1 चैनं न (for [ए]वं नाभि-). B_3 तपोधना न जानंति (for the prior half). — After line 71, $B_{4,5}$ ins. :

स्वयंभुप्रतिमो धीरो मार्कण्डेयस्तपोधनः ।
पितॄणां हि मनुष्याणां लोकानां च स विन्दति ।

— D_5 om. (hapl.) from the post. half of line 72 up to the prior half of line 74. — D_4 om. lines 73–74. — (L. 73) V_1 B_{2-5} यत् (for यः). B_3 पृष्टं (for पृष्टः). — B_3 om. line 74. — (L. 74) B_1 [ऽ]नघ ; Kumbh. ed. नृप (for मम). — (L. 76) D_{4-7} पितॄंश्चापि महायशाः (for the post. half). — For line 77, D_{4-7} subst. :

यदेतद्भुञ्जते पत्नी अनुज्ञापिण्डमुत्तमम् ।

D_{4-7} cont. :

उद्धरन्ति कुलं तेन प्रीतास्तस्य पितामहाः ।
एकेन तेन पिण्डेन प्रीतिं गच्छन्ति शाश्वतीम् ।
[After line 1, D_5 reads lines 79–80.]

— $D_{6,7}$ om. lines 78–80. — (L. 78) B_1 प्रयच्छति पितामहः (for the post. half). — D_4 om. lines 79–80. — (L. 79) D_8 निबोधत (for °ध मे). — (L. 80) $B_{1,4}$ तुष्यंति ; D_5 प्रीयंति (for तृप्यन्ति). B_1 कामं (for कामान्). — After line 81, D_{4-7} ins. :

भुञ्जाने यजमाने तु वदामो दोषविस्तरम् ।
[D_4 om. the post. half.]

— D_5 repeats lines 82–83 after line 84. — (L. 82) D_4 om. the prior half. Dn_2 D_5 (second time) ऋत्विग्भ्यो ; D_5 (first time) भुंजाने ; $D_{6,7}$ भुंजानो; D_8 ऋत्विक्षु (for °ग्यो). V_1 $B_{1,2,4}$ Dn_3 $D_{4,5}$ (both times). $_{6-8}$ उप- (for अनु-). — For line 83, $D_{4,5}$ (first time). $_{6,7}$ subst. :

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तस्मात्स्नातः शुचिः क्षान्तः श्राद्धं भुञ्जीत वै द्विजः ।
प्रजा विवर्धते चास्य यश्चैवं संप्रयच्छति ।
ततो विद्युत्प्रभो नाम ऋषिराह महातपाः ।
आदित्यतेजसा तस्य तुल्यं रूपं प्रकाशते ।
स च धर्मरहस्यानि श्रुत्वा शक्रमथाब्रवीत् ।
तिर्यग्योनिगतान्सत्त्वान्मर्त्या हिंसन्ति मोहिताः ।
कीटान्पिपीलिकान्सर्पान्मेषान्समृगपक्षिणः ।
किल्बिषं सुबहु प्राप्ताः किंस्विदेषां प्रतिक्रिया ।
ततो देवगणाः सर्वे ऋषयश्च तपोधनाः ।
पितरश्च महाभागाः पूजयन्ति स्म तं मुनिम् ।

शक्रः ।

कुरुक्षेत्रं गयां गङ्गां प्रभासं पुष्कराणि च ।
एतानि मनसा ध्यात्वा अवगाहेत्ततो जलम् ।
तथा मुच्यति पापेन राहुणा चन्द्रमा यथा ।
त्र्यहं स्नातः स भवति निराहारश्च वर्तते ।
स्पृशते यो गवां पृष्ठं वालधिं च नमस्यति ।
ततो विद्युत्प्रभो वाक्यमभ्यभाषत वासवम् ।
अयं सूक्ष्मतरो धर्मस्तं निबोध शतक्रतो ।
घृष्टो वटकषायेण अनुलिप्तः प्रियङ्गुणा ।
क्षीरेण षष्टिकान्भुक्त्वा सर्वपापैः प्रमुच्यते ।
श्रूयतां चापरं गुह्यं रहस्यमृषिचिन्तितम् ।
श्रुतं मे भाषमाणस्य स्थाणोः स्थाने बृहस्पतेः ।
रुद्रेण सह देवेश तन्निबोध शचीपते ।
पर्वतारोहणं कृत्वा एकपादो विभावसुम् ।
निरीक्षेत निराहार ऊर्ध्वबाहुः कृताञ्जलिः ।
तपसा महता युक्त उपवासफलं लभेत् ।
रश्मिभिस्तापितोऽर्कस्य सर्वपापमपोहति ।
ग्रीष्मकालेऽथ वा शीते एवं पापमपोहति ।
ततः पापात्प्रमुक्तस्य द्युतिर्भवति शाश्वती ।
तेजसा सूर्यवद्दीप्तो भ्राजते सोमवत्पुनः ।
मध्ये त्रिदशवर्गस्य देवराजः शतक्रतुः ।
उवाच मधुरं वाक्यं बृहस्पतिमनुत्तमम् ।
धर्मगुह्यं तु भगवान्मानुषाणां सुखावहम् ।
सरहस्याश्च ये दोषास्तान्यथावदुदीरय ।

बृहस्पतिः ।

प्रतिमेहन्ति ये सूर्यमनिलं द्विषते च ये ।

तस्मात्प्रतिग्रहस्त्वन्यः परिहार्योऽन्नमश्नुता ।
[$D_{4.5}$ तस्य (for त्वन्यः).]

— (L. 84) B_4 तु तदा ; B_5 [अ]पि तदा ; D_{4-7} सर्वथा (for तु सदा). D_5 श्राद्धे (for श्राद्धं). D_5 भोजनं (for भोक्तव्यं). — (L. 85) $B_{1.3}$ ते तथा नान्यथा भवेत् (for the post. half). D_{4-7} ये यथा कीर्तिता दोषास्ते तथा नात्र संशयः. — After line 85, $D_{4.6.7}$ ins. an addl. colophon. *Sub-parvan :* $D_{6.7}$ दानधर्म. — *Adhy. name :* $D_{4.6.7}$ देवरहस्यानि. — $D_{4.6.7}$ om. lines 86–114. — (L. 86) B_3 श्राद्धभुग- (for क्षान्तः श्राद्धं). — (L. 87) V_1 Dn_3 [ए]नं (for [ए]वं). — (L. 88) Dn_2 D_5 तथा (for ततो). — (L. 89) D_5 तुल्यं (for तस्य). D_8 transp. तस्य and तुल्यं. D_5 रूपं तस्य प्रकाशते (for the post. half). — (L. 90) D_5 एवं (for स च). — (L. 92) D_8 च (for स-). — For lines 91–92, D_5 subst. :

तिर्यग्योनिगताः सर्वे मर्त्याः सन्ति विमोहिताः ।
कीटाः पिपीलिकाः सर्पा मेषाः समृगपक्षिणः ।

— (L. 97) $B_{1.2}$ (marg. as above) गत्वा (for ध्यात्वा). D_5 -रोहेत् (for -गाहेत्). Dn_3 तु भोजनं (for ततो जलम्). — (L. 98) B_1 मुच्येत (for मुच्यति). — (L. 100) D_5 वालधिं न नमस्यते (for the post. half). — (L. 101) B_1 अथाभाषत ; B_5 प्रत्यभा° (for अभ्यभा°). — (L. 103) V_1 अवलिप्तः (for अनु°). — (L. 106) Dn_2 श्रुतं सं- ; D_8 श्रुतयो (for श्रुतं मे). — (L. 107) $B_{2.3}$ शतक्रतो (for शचीपते). — (L. 111) $B_{1.3}$ तापितः सूर्यरश्मिभिः (for the prior half). — (L. 112) $B_{1.3.4}$ हिम- (for ग्रीष्म-). D_5 [ऽ]थ शीतेन ; D_3 तथा शीते (for ऽथ वा शीते). D_5 ये च पापं व्यपोहति (for the post. half). — (L. 113) V_1 शापात् (for पा°). — (L. 114) Dn_3 सूर्यवत्तेजसा दीप्तो (for the prior half). — After line 114, D_5 ins. an addl. colophon. — *Adhy. name :* देवरहस्यं. — Before line 115, D_{4-7} ins. भीष्मः. — For line 115, D_{5-7} subst. :

सर्वदेवैः समासीनमृषिमध्ये शतक्रतुः ।
[$D_{6.7}$ देवैः सह (for सर्वदेवैः).]

— (L. 116) D_{4-7} बृहत्तेजा बृहस्पतिः (for the post. half). — Before line 117, $D_{4.5}$ ins. धर्मः. — (L. 117) V_1 B_{1-3} Dn_2 मनुष्या(B_1 °षा)णां (for मानुषाणां). D_{4-7} धर्मगुह्यानि सर्वाणि सरहस्यानि तत्त्वतः. — (L. 118) D_5 तद् (for तान्). $D_{6.7}$ श्रोतुमिच्छामि भगवंस्तानि मे वक्तुमर्हसि. — After the ref., D_{4-7} ins. :

व्यक्तं भूतार्थसंयुक्तं निरुक्तं पापनाशनम् ।
शृणुष्व बलभित्सर्वमेतेषां दोषविस्तरम् ।

— $D_{4.6.7}$ om. lines 119–120. — (L. 119) B_1 वः (for ये). — (L. 120) B_1 हव्यवाहस्य दीप्तस्य (for the prior half). Dn_3 जुहुते. — $D_{4.7}$ read and D_5 repeats lines 121–122 after the substitution for line 131. — (L. 121) B_3 बालं च सा (for बालवत्सां). D_4 धेनुं च (for ये धेनुं). $D_{6.7}$ दुहंते. D_4 -कर्मणः (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

हव्यवाहे प्रदीप्ते च समिधं ये न जुह्वति ।
बालवत्सां च ये धेनुं दुहन्ति क्षीरकारणात् ।
तेषां दोषान्प्रवक्ष्यामि तान्निबोध शचीपते ।
भानुमाननिलश्चैव हव्यवाहश्च वासव ।
लोकानां मातरश्चैव गावः सृष्टाः स्वयंभुवा ।
लोकांस्तारयितुं शक्ता मर्त्येष्वेतेषु देवताः ।
सर्वे भवन्तः शृण्वन्तु एकैकं धर्मनिश्चयम् ।
वर्षाणि षडशीतिं तु दुर्वृत्ताः कुलपांसनाः ।
स्त्रियः सर्वाश्च दुर्वृत्ताः प्रतिमेहन्ति या रविम् ।
अनिलद्वेषिणः शक्र गर्भस्था च्यवते प्रजा ।
हव्यवाहस्य दीप्तस्य समिधं ये न जुह्वति ।
अग्निकार्येषु वै तेषां हव्यं नाश्नाति पावकः ।
क्षीरं तु बालवत्सानां ये पिबन्तीह मानवाः ।
न तेषां क्षीरपाः केचिज्जायन्ते कुलवर्धनाः ।
प्रजाक्षयेण युज्यन्ते कुलवंशक्षयेण च ।
एवमेतत्पुरा दृष्टं कुलवृद्धैर्द्विजातिभिः ।
तस्माद्वर्ज्यानि वर्ज्यानि कार्यं कार्यं च नित्यशः ।
भूतिकामेन मर्त्येन सत्यमेतद्ब्रवीमि ते ।
ततः सर्वे महाभागा देवताः समरुद्गणाः ।
ऋषयश्च महाभागाः पृच्छन्ति स्म पितॄंस्ततः ।
पितरः केन तुष्यन्ति मर्त्यानामल्पचेतसाम् ।
अक्षयं च कथं दानं भवेच्चैवोर्ध्वदेहिकम् ।
आनृण्यं वा कथं मर्त्या गच्छेयुः केन कर्मणा ।
एतदिच्छामहे श्रोतुं परं कौतूहलं हि नः ।

पितरः ।

न्यायतो वै महाभागाः संशयः समुदाहृतः ।
श्रूयतां येन तुष्यामो मर्त्यानां साधुकर्मणाम् ।
नीलषण्डप्रमोक्षेण अमावास्यां तिलोदकैः ।
वर्षासु दीपकैश्चैव पितॄणामनृणो भवेत् ।
अक्षयं निर्व्यलीकं च दानमेतन्महाफलम् ।
अस्माकं परितोषश्च अक्षयः परिकीर्त्यते ।
श्रद्दधानाश्च ये मर्त्या आहरिष्यन्ति संततिम् ।
दुर्गात्ते तारयिष्यन्ति नरकात्प्रपितामहान् ।
पितॄणां भाषितं श्रुत्वा हृष्टरोमा तपोधनः ।

-कारणात्). — (L. 122) D_5 (first time) विशां पते (for शचीपते). $D_{4.5}$ (seoond time). $_{6.7}$ एकचित्तः शृणुष्व तान् ($D_{4.5}$ तत्) (for the post. half). — (L. 123) B_{1-3} हव्यवाट्चैव वासव ; D_4 °वाहं च वासवः (for the post. half). — (L. 124) D_{4-7} याश्च (for चैव). D_{4-7} transp. गावः and सृष्टाः. — After line 124, D_5 reads lines 129–130. — $D_{4.6.7}$ ins. after line 124 : D_5 after line 130 :

दुर्वृत्तकलिजन्मानो भूयिष्ठमिह ये नराः ।
[D_5 प्रतिमेहंति ये नराः (for the post. half).]

— $D_{4.5}$ om. lines 125–127. — (L. 125) Dn_2 लोकानां (hypermetric) (for लोकांस्). — (L. 126) B_5 कर्म- (for धर्म-). — $D_{6.7}$ om. line 127. — (L. 128) D_{4-7} transp. सर्वाः and च. Dn_1 ये (for या). — After line 128, $D_{6.7}$ read the substitution for line 131. — (L. 129) B_5 मुच्यते (for च्यवते). — (L. 131) $B_{1.2}$ D_8 चैतेषां ; B_5 नैतेषु (for वै तेषां). B_5 [आ]प्नोति (for [अ]श्नाति). — For line 131, D_{4-7} subst. ($D_{6.7}$ reading it after line 128) :

अग्निहोत्रेषु सर्वेषु हविर्नाश्नन्ति पावकाः ।

— (L. 132) D_{4-7} ये क्षीरं (for क्षीरं तु). Dn_2 -वृद्धानां (for -वत्सानां). D_{4-7} पिबंते दुष्टचा(D_4 °का)रिणः (for the post. half). — (L. 133) $D_{4.6}$ भवंते ; D_7 भवंति (for जायन्ते). — (L. 134) D_5 वर्तते (for युज्यन्ते). — After line 134, D_{4-7} ins. :

पतिसंगमकाले च कन्याविघ्नं करोति यः ।
अपुंस्त्वं लभते सोऽपि जायमानः पुनः पुनः ।
एतानि वर्जयेद्यस्तु श्रद्दधानो जितेन्द्रियः ।
कामपुत्रार्थभागी स वर्धते तु दिने दिने ।
एवमुक्तः सुरेन्द्रस्तु आचार्येण महात्मना ।
प्रत्यगृह्णाद्वचस्तस्य विबुधैः प्रतिपूजितम् ।

— D_{4-7} om. lines 135–137. — (L. 135) D_8 वृत्तं (for दृष्टं). — (L. 139) B_1 D_{4-7} महात्मानः (for °भागाः). B_2 पृच्छंते (for पृच्छन्ति). B_5 मम (for ततः). D_{4-7} सयक्षोरगराक्षसाः (for the post. half). — (L. 140) D_{5-7} -मेधसां (for -चेतसाम्). — (L. 141) D_{4-7} वा (for च). D_{4-7} निर्वाप्यं च (D_7 वा) (for भवेच्चैव). — (L. 142) $B_{2.3}$ अनृणा (for आनृण्यं). B_2 भवेयुः ; $D_{6.7}$ गच्छंति (for गच्छेयुः). D_5 केन गच्छंति कर्मणा (for the post. half). — (L. 143) B_1 $D_{4.5.7}$ इच्छाम्यहं (for °महे). $B_{2.3}$ मे (for नः). — (L. 144) D_8 तत्सर्वं (for संशयः). $Dn_{2}.n_{3}$ समुदाहृताः. $D_{6.7}$ संशयाः समुदाहृताः (for the post. half). — (L. 146) D_5 अमायां तु (for अमावास्यां). — (L. 147) D_{4-7} वर्षासु दीपदानेन (for the prior half). — After line 147, D_8 ins. :

एवमेतत्समुद्दिष्टं लभते फलमुत्तमम् ।

— (L. 148) $B_{1.3}$ फलं महत् ; D_{5-7} सुरोत्तमाः (for महाफलम्). D_4 दानमेवं सुरोत्तम (for the post. half). — (L. 149) D_{4-7} [अ]प्य($D_{4.5}$ अ)क्षयं च भविष्यति (for the post. half). — (L. 150) D_4 [अ]स्ति तं ; D_5 [अ]स्ति मे ; $D_{6.7}$ स्त्विमे (for च ये). D_{4-7} प्रकरिष्यंति ये सदा (for the post. half). — (L. 151) D_8 दुर्गतिं (for दुर्गात्ते). D_{4-7} पितॄन्पितामहांस्ते तु ($D_{4.5}$ °स्तेस्तु) तारयंति दशाव(D_4 °प)रान्. — (L. 153) D_4 -गार्गो ; D_{5-7} -गर्गो (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वृद्धगार्ग्यो महातेजास्तानेवं वाक्यमब्रवीत् ।
के गुणा नीलषण्डस्य प्रमुक्तस्य तपोधनाः ।
वर्षासु दीपदानेन तथैव च तिलोदकैः ।

पितरः ।

नीलषण्डस्य लाङ्गूलं तोयमभ्युद्धरेद्यदि ।
षष्टिं वर्षसहस्राणि पितरस्तेन तर्पिताः ।
यस्तु शृङ्गगतं पङ्कं कूलादुद्धृत्य तिष्ठति ।
पितरस्तेन गच्छन्ति सोमलोकमसंशयम् ।
वर्षासु दीपदानेन शशिवच्छोभते नरः ।
तमोरूपं न तस्यास्ति दीपकं यः प्रयच्छति ।
अमावास्यां तु ये मर्त्याः प्रयच्छन्ति तिलोदकम् ।
पात्रमौदुम्बरं गृह्य मधुमिश्रं तपोधन ।
कृतं भवति तैः श्राद्धं सरहस्यं यथार्थवत् ।
हृष्टपुष्टमनास्तेषां प्रजा भवति नित्यदा ।
कुलवंशस्य वृद्धिस्तु पिण्डदस्य फलं भवेत् ।
श्रद्दधानस्तु यः कुर्यात्पितृणामनृणो भवेत् ।
एवमेष समुद्दिष्टः श्राद्धकालक्रमस्तथा ।
विधिः पात्रं फलं चैव यथावदनुकीर्तितम् ।

Colophon.

भीष्मः ।

केन ते च भवेत्प्रीतिः कथं तुष्टिं तु गच्छसि ।
इति पृष्टः सुरेन्द्रेण प्रोवाच हरिरव्ययः ।
ब्राह्मणानां परीवादो मम विद्वेषणं महत् ।
ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः ।

-गार्ग्यो). D4-7 पितॄन्वाक्यमथाब्रवीत् (for the post.-half). — Before line 154, D4. 5. 7 ins. गर्गः; D6 गार्ग्यः. — (L. 154) D4. 5 ये (for के). B3 विमुक्तस्य; D8 प्रयु° (for प्रमु°). D4-7 विसृष्टस्य महायशाः (for the post. half). — (L. 155) B1-3 -दाने च (for -दानेन). D4-7 वर्षासु दीपकं चैव यश्च द(D5 पश्चाद्य-; D7 यस्य द)द्या-त्तिलोदकं. — After line 155, D4-7 ins. :

प्रत्येकमिह सर्वेषां श्रोतुमिच्छामहे वयम् ।
कारणं कारणं चैव उपचारं च तत्त्वतः ।
पितरः ।
नीलषण्डप्रमोक्षेण वर्धते तु महाफलम् ।
स्वर्गकामश्च विपुलः सर्वकामप्रदस्तदा ।

— D9 resumes. D6. 7 om. the ref. — (L. 156) B1 तु यत्; D4-7. 9 यतः (for यदि). — (L. 157) Dn3 षष्टि- (for षष्टिं). — For line 158, D6. 7. 9 subst. :

योऽस्य शृङ्गगतः पङ्कः कूलमावृत्य तिष्ठति ।

— (L. 159) D4-6. 9 तृप्यंति; D7 तुष्यंति (for गच्छन्ति). D4-7. 9 सोमलोके यथेप्सितं (D4 °तः) (for the post. half). — After line 159, D4-7. 9 ins. :

यथास्य ककुदे पङ्कस्तेन चन्दनरूपिताः ।
पितरो देवलोकस्था मोदन्ते विगतज्वराः ।
तृप्तास्तृप्तिं प्रयच्छन्ति सर्वकामांश्च तस्य वै ।
लोकांश्च विपुलान्पुण्यान्नीलषण्डप्रमोक्षणे ।

[(L. 1) D4. 9 -भूषिताः (for -रू°). — (L. 4) D4. 5 नीलशं(D5 °षं)डप्रमोक्षणं (D5 °णात्) (for the post. half).]

— (L. 160) B1 सोमवच्च (for शशि°). D4-7. 9 वर्षासु दीपकं नित्यं यो ददाति नरोत्तम. — After line 160, D4-7. 9 ins. :

न पश्यति तमो घोरं शशिवद्द्योतते च सः ।
शीतरश्मिप्रभाभिस्तु पितरस्तस्य तर्पिताः ।
तिलोदकं पितृभ्यस्तु यो ददाति दिने दिने ।
मर्त्यलोके च स्वर्गे च पितृभिः सोऽभिपूज्यते ।
नित्यं दीपप्रदो मर्त्यो नित्यं च शुभलक्षणः ।
सूर्यरश्मिप्रभे लोके पितृभिः सह मोदते ।
देवगोष्ठद्विजावासे चत्वरे वा प्रतिश्रये ।
ददाति दीपकं यो वै स गच्छेल्लोकमुत्तमम् ।
अप्सरोगणसंवृष्टो विमानेन महाद्युतिः ।
पितरः सोमलोकस्थास्तस्य प्रीता भवन्ति हि ।
विचरेद्दीपको वीरो द्योतयन्वै दिशो दश ।
धर्षयन्ति न भूतानि पिशाचा न च राक्षसाः ।
एवं तु पितृभिः प्रोक्ते विष्णुं पृच्छन्ति देवताः ।
येन तुष्यामि मर्त्यानां यस्य धर्मः सनातनः ।
यच्च कुर्वन्नरो नित्यं लभते लोकमुत्तमम् ।
तद्गुह्यं सरहस्यं च तत्सर्वं वक्तुमर्हसि ।

[After line 1, D5 reads line 161. — (L. 11) D4 दिशः (for दश). — After line 12, D5 reads lines 162-169. D4 reads lines 13-16 after line 169. — (L. 13) D4. 5 च (for तु). — (L. 14) D4. 5 तुष्यसि (for तुष्यामि). D4 यश्च (for यस्य). — (L. 15) D4. 5 यत् (for च).]

— D6. 7. 9 om. lines 161-172. — (L. 164) V1 यथार्थतः. — (L. 165) Dn3 सत्फला (for नित्यदा). — (L. 169) B1. 2 (marg. as above). 3 पात्रं पात्र- (for विधिः पात्रं). B1 (marg. as above) फलदं च (for फलं चैव). — Colophon. — *Parvan name* : B शांति. — *Sub-parvan* : V1 B1-3 Dn दानधर्म. — *Adhy. name* : Dn3 पितृरहस्यं. — *Adhy. no.* : V1 125; B3 115; Dn1 123. — D4 om. the ref. D4. 5 om. lines 170-171. — (L. 171) Dn1. n2 ईश्वरः (for अव्ययः). — Before line 172, B3 ins. हरिः. — (L. 172) Dn2 भवेत् (for महत्). D4-7. 9 मम विद्वे-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नित्यासिवाद्या विप्रेन्द्रा भुक्त्वा पादौ तथात्मनः ।
तेषां तुष्यामि मर्त्यानां यश्चक्रे च बलिं हरेत् ।
वामनं ब्राह्मणं दृष्ट्वा वराहं च जलोत्थितम् ।
उद्धृतां धरणीं चैव मूर्ध्ना धारयते तु यः ।
न तेषामशुभं किंचित्कल्मषं चोपपद्यते ।
अश्वत्थं रोचनां गां च पूजयेद्यो नरः सदा ।
पूजितं च जगत्तेन सदेवासुरमानुषम् ।
तेन रूपेण तेषां च पूजां गृह्णामि तत्त्वतः ।
पूजा ममैषा नास्त्यन्या यावल्लोकाः प्रतिष्ठिताः ।
अन्यथा हि वृथा मर्त्याः पूजयन्त्यल्पबुद्धयः ।
नाहं तत्प्रतिगृह्णामि न सा तुष्टिकरी मम ।

इन्द्रः ।

चक्रं पादौ वराहं च ब्राह्मणं चापि वामनम् ।
उद्धृतां धरणीं चैव किमर्थं त्वं प्रशंससि ।
भवान्सृजति भूतानि भवान्संहरति प्रजाः ।
प्रकृतिः सर्वभूतानां समर्त्यानां सनातनी ।

भीष्मः ।

संप्रहस्य ततो विष्णुरिदं वचनमब्रवीत् ।
चक्रेण निहता दैत्याः पद्भ्यां क्रान्ता वसुंधरा ।
वाराहं रूपमास्थाय उद्धृता च वसुंधरा ।
वामनं रूपमास्थाय जितो राजा मया बलिः ।
परितुष्टो भवाम्येवं मानुषाणां महात्मनाम् ।
तन्मां ये पूजयिष्यन्ति नास्ति तेषां पराभवः ।
अपि वा ब्राह्मणं दृष्ट्वा ब्रह्मचारिणमागतम् ।
ब्राह्मणायाहुतिं दत्त्वा अमृतं तस्य भोजनम् ।
ऐन्द्रीं संध्यामुपासित्वा आदित्याभिमुखः स्थितः ।
सर्वतीर्थेषु स स्नातो मुच्यते सर्वकिल्बिषैः ।
एतद्वः कथितं गुह्यमखिलेन तपोधनाः ।

षणो भवेत् (for the post. half). — After line 173, $D_{4-7.9}$ ins. :

ब्राह्मणान्द्विषते ये वै तमो घोरं सुदारुणम् ।
पूजनं च द्विजेन्द्राणां स्वर्गमार्गप्रदर्शनम् ।

[(L. 2) $D_{5.7}$ -प्रदर्शकं (for °नम्).]

— D_4 om. lines 174–176. — (L. 174) $D_{6-7.9}$ नित्यभोज्याश्च सर्वशः (for the post. half). — (L. 175) $D_{6.7.9}$ सर्वेषां (for मर्त्यानां). $D_{5-7.9}$ गृहे यस्य (for यश्चक्रे च). — (L. 176) $D_{6-7.9}$ ब्राह्मणं वामनं चैव (for the prior half). $D_{4.6}$ om. the post. half and the prior half of line 177. — After line 176, $D_{7.9}$ ins. :

प्रणम्य शिरसा नित्यं पादौ गृह्णन्ति ये नराः ।

— (L. 177) $D_{5.7.9}$ उद्धृतां च महीं दृष्ट्वा (for the prior half). — After line 177, $D_{4-7.9}$ ins. :

मद्भक्तास्ते नरा नित्यं मम पूजानुकारिणः ।
पूर्णं कुम्भं च मद्यं च वर्धमानं गुरुं नृपम् ।
वन्दते वृषभं चैव गजेन्द्रं च मदोत्कटम् ।
उद्यन्तं भास्करं चैव उदयन्तं निशाकरम् ।
जलौघं च विवर्धन्तं वन्दते शिरसा तदा ।
यस्त्वेवं कुरुते नित्यं श्रद्दधानोऽनसूयकः ।
स विस्मयकरो लोके पितॄणां परमप्रियः ।

[(L. 2) $D_{4.5}$ पूर्ण- (for पूर्णं). — (L. 4) D_5 दृष्ट्वा (for चैव). — (L. 5) D_5 जलौघमिव वर्धते (for the prior half). $D_{6.8.9}$ सदा (for तदा).]

— (L. 178) $B_{1.3.5}$ Dn_3 कलुषं (for कल्मषं). — For line 178, $D_{4-7.9}$ subst. :

न तस्य चाशुभं किंचित्किल्बिषं वा प्रदृश्यते ।

[$D_{6.9}$ हि (for च).]

— B_4 ins. after line 197 : B_5 after line 178 :

ब्रह्महत्यासमं पापं सर्वमेव व्यपोहति ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वापि कदाचन ।

[After line 1, B_4 ins. :

तस्मादैन्द्रीं दिशं तिष्ठन्सर्वपापं व्यपोहति ।]

— After the above, B_4 repeats line 1 followed by lines 2–4 and B_5 repeats lines 1–4 of the star passage after line 200. — $D_{4.6.7.9}$ om. line 179. — (L. 180) B_3 -मानवं (for -मानुषम्). — (L. 181) V_1 $B_{4.5}$ $Dn_{2.n3}$ स्वेन (for तेन). $D_{4-7.9}$ स्वेन रूपेण तस्याहं (for the prior half). $D_{4.6.9}$ सर्वशः ; $D_{5.7}$ नित्यशः (for तत्त्वतः). — (L. 182) B_1 नान्यस्य ; $D_{4-7.9}$ परमा (for नास्त्यन्या). V_1 B_2 (marg.)$_{.4.5}$ $Dn_{2.n3}$ D_8 यया (for यावल्ल्). — $D_{4-7.9}$ om. lines 183–202. — (L. 187) V_1 भजति (for सृ°). B_2 संहरते. — After line 187, $B_{1.5}$ ins. :

कर्मणामप्रयुक्तानां नैव विघ्नः कदाचन ।

— (L. 188) B_2 मर्त्यानां च (for समर्त्यानां). — After line 188, $B_{4.5}$ ins. :

सुराणामसुराणां च त्वमेवैकः परायणम् ।
तद्ब्रूहि वदतां श्रेष्ठ सर्वमेतद्यथातथम् ।

[(L. 2) B_4 यथायथं (for °तथम्).]

After the ref., $B_{4.5}$ ins. :

तेषां तद्वचनं श्रुत्वा देवर्षिपितृभाषितम् ।

— (L. 189) B_1 संप्रहृष्य (for °हस्य). — (L. 191) D_8 आश्रित्य (for आस्थाय). B_1 उद्धृता धरणी मम ; Bom. ed. हिरण्याक्षो निपातितः (for the post. half). — After line 192, $B_{4.5}$ ins. :

क्रमता चापि त्रैलोक्यं पदक्रान्ता वसुंधरा ।

— (L. 196) V_1 $B_{2.3}$ ब्राह्मणाद्याहुतिं दत्त्वा (for the prior half). — After line 196, $B_{4.5}$ ins. :

यदि भास्करसंयुक्तं सलिलं मुञ्चते नरः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

संशयं पृच्छमानानां किं भूयः कथयाम्यहम् ।
बलदेवः ।
श्रूयतां परमं गुह्यं मानुषाणां सुखावहम् ।
अजानन्तो यदबुधाः क्लिश्यन्ते भूतपीडिताः ।
कल्य उत्थाय यो मर्त्यः स्पृशेद्गां वै घृतं दधि ।
सर्षपं च प्रियङ्गुं च कल्मषात्प्रतिमुच्यते ।
भूतानि चैव सर्वाणि अग्रतः पृष्ठतोऽपि वा ।
उच्छिष्टं वापि च्छिद्रेषु वर्जयन्ति तपोधनाः ।
देवाः ।
प्रगृह्यौदुम्बरं पात्रं तोयपूर्णमुदङ्मुखः ।
उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्व्रतम् ।
देवतास्तस्य तुष्यन्ति कामिकं चापि सिध्यति ।
अन्यथा हि वृथा मर्त्याः कुर्वते स्वल्पबुद्धयः ।
उपवासे बलौ चापि ताम्रपात्रं विशिष्यते ।

— (L. 197) D_{3} उपासीत (for °सित्वा). — After line 197, $B_{4.5}$ ins. :

तज्जलं संप्रतिच्छेद्य ऊर्ध्वबाहुः कृताञ्जलिः ।

— B_{5} om. line 198. — (L. 198) Dn_{3} सर्वे (for सर्व-). — $B_{1.4}$ repeat lines 199–200 after the next star passage. — (L. 199) $B_{1.4}$ (both both times) निखिलेन. — (L. 200) $B_{1.4}$ (both both times) वः (for [अ]हम्). — $B_{1.4}$ ins. after line 200 : B_{5} cont. after the above star passage :

बलदेवः ।

शृणुध्वं चापरं वाक्यं सर्वे एव समागताः ।
यत्कृत्वा विप्रराजन्या वैश्या वा लोभमोहिताः ।
पतन्ति नरके घोरे तिर्यग्योनिगतेषु च ।
मुनीनामाश्रमं गत्वा मुक्तः प्रव्रजितो द्विजः ।
क्षत्रियो यदि वा वैश्यो मोक्षं प्राप्य महाफलम् ।
मोहात्तु प्रव्रजेद्यो वै धर्मसेतुमतिक्रमन् ।
चाण्डालीं गच्छते योनिं दिव्यं वर्षशतं हि सः ।
स प्रव्रज्यानिवृत्तश्च वृथाप्रव्रजितश्च सः ।
उभावेतावसंभाव्यौ मिथ्यावादी च यो नरः ।
नैते हव्येषु कव्येषु प्रशस्ता नैव शान्तिषु ।
असुरान्गच्छते कव्यं यद्येते नैक्षकाभवन् ।
प्रतिगृह्य तु लोभेन कष्टात्कष्टतरं व्रजेत् ।
नैते जहति नरकं कल्पान्ते ये कदाचन ।
मोक्षधर्मं समाश्रित्य नैव कार्यं विपश्चिता ।
इदं चाप्यपरं गुह्यं शृणुध्वं संहिताः सुराः ।
अपेतः सर्वधर्मेभ्यो धर्मतः शाश्वतस्तथा ।
ब्राह्मणो नार्हते पूजां न च संसत्सु भोजनम् ।
भुक्त्वा लोभेन वै दातुरात्मनश्च न संशयः ।
हन्ति जातानजातांश्च यश्चैवाप्यनुमन्यते ।
ब्राह्मण्यं हि महल्लोके सृष्टं धात्रा हितार्थिना ।
तल्लब्ध्वा धारयेद्यशादेवं सिद्धिरवाप्यते ।
ब्राह्मणान्येऽवमन्यन्ते ते वै ज्ञेया नराधमाः ।

Colophon.

[$B_{4.5}$ om. the ref. —(L. 1) $B_{4.5}$ (both first time) पापं (for वाक्यं). B_{1} य एवात्र (for सर्वे एव). — (L. 3) $B_{1.4.5}$ (both times) तिर्यग्योनिमथापि वा (B_{5} [second time] च) (for the post. half). — (L. 4) $B_{4.5}$ (second time) कृच्छ्रगतो (for प्रव्राजितो). — (L. 6) $B_{1.4}$ च (for तु). —(L. 8) B_{4} प्रव्रज्याया-; B_{5} संव्रज्याथ (for स प्रव्रज्या-). B_{5} यथा (for वृथा). — (L. 15) B_{4} विबुधाः (for संहिताः). — Colophon. *Parvan name* : $B_{1.4.5}$ शांति. — *Sub-parvan* : $B_{1.4.5}$ दानधर्म. — *Adhy. name* : $B_{1.4.5}$ विष्णुरहस्यं. — *Adhy. no.* : B_{4} 126; B_{5} 116.]

— B_{5} देवल (for बलदेव). — V_{1} om. lines 202–206. — Before line 203, D_{4-7} ins. बलभद्रः. — $D_{6.7}$ read lines 203–206 after line 278. — (L. 203) B $Dn_{2.n3}$ D_{8} कल्यम्; D_{4-6} काल्यम्; D_{7} कालम् (for कल्य). B_{5} वै गां (by transp.); D_{4-6} गां वा. B_{1-3} D_{4-7} मधु (for दधि). — (L. 204) D_{4-7} किल्बिषेण स मु(D_{5} °षात्स प्रमु)च्यते (for the post. half). — (L. 205) D_{4-7} न च हिंसंति भूतानि पुरस्तात्पृष्ठतोपि वा. — After line 205, $D_{4-7.9}$ ins. :

अभिरूपा महात्मानस्ते नराः स्वर्गगामिनः ।
अथ देवगणाः सर्वे सहिताः समरुद्गणैः ।
पृच्छन्ति धर्मगुह्यानि महादेवीं श्रियं सतीम् ।
[(L. 2) D_{9} समरुद्गणाः.]

— After the above, $D_{4-7.9}$ read lines 217–288. — D_{4-7} om. line 206. $D_{6.7.9}$ om. the ref. — (L. 213) D_{8} ह्यफलं (for [अ]त्पफलं). $D_{4.6}$ लभेत् (for भवेत्). — After line 214, $D_{4-7.9}$ ins. :

पितरश्च महाभागा अक्षयं चोपपद्यते ।
नास्ति नाशः कृते पुण्ये नास्ति नाशस्त्वहिंसया ।
नास्ति सत्यस्य नाशो वै नास्ति नाशः शुभाशुभे ।
अक्षयं दुष्कृतं नित्यं सुकृतं नित्यमव्ययम् ।
शुभाशुभकृतं पुण्यं परत्रैवोपभुज्यते ।
लाभालाभौ सुखं दुःखं जीवितं मरणं तथा ।
कालः पुरुषमभ्येति नास्ति काले क्षयोदयौ ।

Colophon.

भीष्मः ।

विष्णोस्तु वचनं श्रुत्वा देवताः प्रतिनन्द्य च ।
बलभद्रं सुसंहृष्टाः पर्यपृच्छन्त धार्मिणः ।

[(L. 2) D_{4} [अ]संशयः (for [अ]हिंसया). —(L. 3) D_{5} [ऽ]स्ति (for वै). — Colophon. *Sub-parvan* : $D_{4-7.9}$ दानधर्म.]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बलिर्भिक्षा तथार्घ्यं च पितॄणां च तिलोदकम् ।
ताम्रपात्रेण दातव्यमन्यथाल्पफलं भवेत् ।
गुह्यमेतत्समुद्दिष्टं यथा तुष्यन्ति देवताः ।
धर्मः ।
राजपौरुषिके विप्रे घाण्टिके परिचारके ।
गोरक्षके वाणिजके तथा कारुकुशीलवे ।
मित्रद्रुह्यनधीयाने यश्च स्याद्वृषलीपतिः ।
एतेषु दैवं पित्र्यं वा न देयं स्यात्कथंचन ।
पिण्डदास्तस्य हीयन्ते न च प्रीणाति वै पितॄन् ।
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।

— After the above, $D_{4.5}$ read 203–205. —(L. 215) D_5 चारके परचारके; D_6 पंढिके विप्रजीविके (for the post. half). — $D_{4.6.7.9}$ om. lines 216–217. — (L. 217) D_5 -द्रुहे (for -द्रुहि). — (L. 218) Dn_2; पैत्र्यं (for पित्र्यं). V_1 वा (for स्यात्). $D_{4.5}$ दत्तं नाश्नंति देवताः (for the post. half). — After line 218, $D_{4-7.9}$ ins. :

इदं चैव परं गुह्यं नराणामल्पमेधसाम् ।
श्राद्धकाले यथा श्राद्धं लुप्यते तन्निबोधत ।
[(L. 1) D_5 [अ]परं (for परं).]

— $D_{4-7.9}$ om. line 219. — (L. 219) B_3 न च प्रीणंति देवताः (for the post. half). — For lines 221–224, $D_{4-7.9}$ subst. :

पितरस्तस्य नश्यन्ति अग्नयश्च महायशाः ।
निराशो यस्य गच्छेत अतिथिर्यस्य दुर्मनाः ।
भ्रूणहत्या कृता तेन अशुभा पापकर्मिणा ।
पितॄणामतिथिर्यस्य व्रजेत्तदिह नार्चितः ।
[(L. 1) D_5 ह्यग्नयश् (for अ°). — (L. 3) $D_{4.5}$ अशुभं पापकर्मिणां (for the post. half).]

$D_{4-7.9}$ cont. :

तस्यायं च परश्चैव लोको नास्ति दुरात्मनः ।
अयं चैव परो धर्मः शुचिसत्यकरो महान् ।
ये सदा मां न पश्यन्ति प्रविशन्ति हुताशनम् ।
याचकाः सलिलं वापि पुनः पुनरभीक्ष्णशः ।
जलं च प्रविशेयुस्तु स तु मां नोपसर्पति ।
ये च पुण्यावकाशेषु पुण्यक्षेत्रेषु मानवाः ।
हरिश्चन्द्रे परिश्चन्द्रे प्रभासेऽमरकण्टके ।
कुरुक्षेत्रे पुष्करे च तथा तुङ्गारपर्वते ।
अन्येषु च यथान्यायं साधयन्तीह कार्यिकाः ।
गोग्रहे स्त्रीग्रहे वापि राष्ट्रोपक्रमणेऽपि वा ।
धर्मयुद्धेषु राज्ञा वा ये नराभिमुखा हताः ।
अपरावर्तिनः शूरा आह्वयन्तः परस्परम् ।
ते न पश्यन्ति मां धीरा गच्छन्ति परमां गतिम् ।
चतुर्दशीमष्टमीं च उभयोः पक्षयोरपि ।
उपवासपरो नित्यं नियतो नियतेन्द्रियः ।
पूर्णे संवत्सरे चैव कुर्याद्ब्राह्मणतर्पणम् ।
मधुपर्कैतिलांश्चैव दत्त्वा मां नोपसर्पति ।
भीष्मः ।
धर्मराजवचः श्रुत्वा सर्वे ते विबुधेश्वराः ।
यक्षराजं धनपतिं पृच्छन्ति सुरसत्तमाः ।
दानमेतत्कथं देयं कथं दत्तं महाफलम् ।
एतद्वै सर्वमाख्याहि यथावदनुपूर्वशः ।
धनदः ।
विशुद्धहृदयो भूत्वा योऽन्नं दद्याद्द्विजातये ।
धर्मद्वारविधिं तस्य प्रवक्ष्यामि यथातथम् ।
दूरादभ्यागतं पात्रं वृत्तिहीनं क्षुधान्वितम् ।
दरिद्रं व्याधितं दीनं कुटुम्बकरकर्शितम् ।
श्रोत्रियं यज्ञशीलं च सर्वज्ञं छिन्नसंशयम् ।
कामादिभिः परित्यक्तं परं पदमुपासकम् ।
बाल्याहिताग्निं स्थविरं वेदाध्ययनतत्परम् ।
ब्रह्मचारी गृहस्थो वा पात्रमेवंविधं विदुः ।
एभ्यो दत्तमनन्तं हि सत्त्वयुक्तेन चेतसा ।
भीष्मः ।
धनेश्वरवचः श्रुत्वा सर्वे देवाः सवासवाः ।
वरुणं नोदयन्तीह ब्रूहि त्वं स्वमनीषितम् ।
वरुणः ।
अल्पं वा बहु वा तोयं निर्मले निचये नराः ।
अवगाह्य पिबन्ते च पवित्रमिति मन्यते ।
विशुद्धचेतसा युक्तास्तेषां पुष्टिं ददाम्यहम् ।
जलाशयानां कर्तारः सर्वभूताभयप्रदाः ।
नित्यं प्रवाहतोयानि नोपरुन्धन्ति सेतुभिः ।
नोत्सृजन्ति पुरीषाणि मूत्राणि ष्ठीवनानि च ।
नित्यं तोयप्रदातारस्तेषां पुष्टिं ददाम्यहम् ।
वरुणस्य वचः श्रुत्वा वज्रपाणिं शतक्रतुम् ।
पृच्छन्ति धर्मगुह्यानि क्रमेण विबुधेश्वराः ।
इन्द्रः ।
ऐन्द्रीं संध्यामुपासीत आदित्याभिमुखस्थितः ।
सर्वतीर्थेषु च स्नातो मुच्यते सर्वकिल्बिषैः ।
अथ सर्वे महाभागा मरुतश्च यशोन्विताः ।
अश्विनौ रूपसंपन्नौ क्रमेण परिपृच्छतः ।
अश्विनौ ।
अश्विनीपौर्णमास्यां तु पुष्पमाल्यानुलेपनः ।
यो ददातीह विप्रेभ्यः स आवां प्रीणयेत हि ।
वीरासनोपवासेन उपवासेन यो निशि ।
तां रात्रिं समतिक्रम्य कुर्याद्ब्राह्मणभोजनम् ।
सर्पिर्विभावसौ दद्याद्दक्षिणां च द्विजातये ।
तस्य धान्यं धनं चैव पुत्राश्चैव गुणान्विताः ।
अभिरूपं च रूपं च जीवितं च महोदयम् ।
सौख्यं च सततं मुख्यं कामभोगांश्च पुष्कलान् ।
वीतरागः सुसंहृष्टो गन्धमाल्यं सुशोभनम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पितरस्तस्य देवाश्च अग्नयश्च तथैव हि ।
निराशाः प्रतिगच्छन्ति अतिथेरप्रतिग्रहात् ।
स्त्रीघ्नैर्गोघ्नैः कृतघ्नैश्च ब्रह्मघ्नैर्गुरुतल्पगैः ।
तुल्यदोषो भवत्येभिर्यस्यातिथिरनर्चितः ।

अग्निः ।

पादमुद्यम्य यो मर्त्यः स्पृशेद्गाश्च सुदुर्मतिः ।
ब्राह्मणं वा महाभागं दीप्यमानं तथानलम् ।
तस्य दोषान्प्रवक्ष्यामि तच्छृणुध्वं समाहिताः ।
दिवं स्पृशत्यशब्दोऽस्य त्रस्यन्ति पितरश्च वै ।
वैमनस्यं च देवानां कृतं भवति पुष्कलम् ।
पावकश्च महातेजा हव्यं न प्रतिगृह्णति ।
आजन्मनां शतं चैव नरके पच्यते तु सः ।
निष्कृतिं च न तस्यापि अनुमन्यन्ति कर्हिचित् ।
तस्माद्गावो न पादेन स्प्रष्टव्या वै कदाचन ।
ब्राह्मणश्च महातेजा दीप्यमानस्तथानलः ।
श्रद्दधानेन मर्त्येन आत्मनो हितमिच्छता ।
एते दोषा मया प्रोक्तास्त्रिषु यः पादमुत्सृजेत् ।

विश्वामित्रः ।

श्रूयतां परमं गुह्यं रहस्यं धर्मसंहितम् ।
परमान्नेन यो दद्यात्पितॄणामौपहारिकम् ।

देवताः पितरश्चैव क्रमेण समरुद्गणाः ।
ऋषयो धर्मगुह्यानि पृच्छन्ति सुसमाहिताः ।
इच्छाम ऋषिभिः सर्वैः पृथक्कारेण भाषितुम् ।
धर्माधर्मकृतं सर्वमृषीणां संप्रवर्तनम् ।
एतच्छ्रुत्वा सुरेन्द्राणां श्लक्ष्णाक्षरपदं वचः ।
ब्रुवन्ति ऋषयः सर्वे परिपृष्टाः शुभाशुभम् ।

वसिष्ठः ।

आस्तिकाः सुव्रता धीराः सत्यसंधा जितेन्द्रियाः ।
देवलोके महीयन्ते श्रद्धधानाश्च ये नराः ।
स्वागतं तेति भाषन्तः सदा वनगतास्तथा ।
अर्चयन्ति यथाशक्त्या ते नराः स्वर्गगामिनः ।

विश्वामित्रः ।

श्रूयतां मे परं गुह्यं पवित्रं धर्मसंहितम् ।
दानं संवत्सरस्यैकं यथा बहुफलं भवेत् ।
परमान्नेन यो दद्यात्पितॄणामनुमासिकम् ।
गजच्छायां तु पूर्वायां कुतुपे दक्षिणामुखः ।
मासि प्रौष्ठपदे यस्तु मघास्योऽन्नं यथेच्छकम् ।
श्रूयतां तस्य दानस्य यादृशो गुणविस्तरः ।
त्रयोदश समास्तेन पितरस्तस्य तर्पिताः ।
प्रयच्छन्ति परां पुष्टिं सर्वकामपुरस्कृताः ।
एतेनैव तु योगेन वस्त्रासनमुपानहौ ।
यो ददाति मघाश्राद्धं भोजनं च किमिच्छकम् ।
द्विर्द्वादशसमास्तस्यां पितरस्तस्य तर्पिताः ।
सर्वकामान्प्रयच्छन्ति परत्र च शुभां गतिम् ।

[(L. 1) D_5 [अ]पि (for [ए]व). — (L. 6) $D_{6.7.9}$ सिद्ध- (for पुण्य-). — D_4 om. lines 8–9. D_7 reads lines 15–17 on marg. — (L. 16) $D_{6.7}$ पूर्ण- (for पूर्णे). — (L. 22) $D_{5.7}$ दत्तं (for दद्याद्). — (L. 23) $D_{4.6.9}$ यथा तथा (for यथातथम्). — (L. 26) D_5 क्रतुशीलं; $D_{6.7.9}$ ऋजु° (for यज्ञ°). — (L. 29) $D_{6.7.9}$ ब्रह्मचारिं गृहस्थं वा (for the prior half). — (L. 33) $D_{4.6.7.9}$ दूषयंति च ये नराः (for the post. half). — (L. 35) D_4 तुष्टिं (for पुष्टिं). — (L. 44) $D_{4.6.9}$ महायशाः (for यशोन्विताः). — (L. 46) D_5 अश्विन्यां (for °नी-). $D_{6.7.9}$ आश्विनीं पूर्णमास्यां तु (for the prior half). — D_9 om. from the post. half of line 47 up to the prior half of line 51. — (L. 61) $D_{7.9}$ यतेंद्रियाः (for जि°). — Lines 65, 68–70 = (var.) lines 237–241. — (L. 71) $D_{4.6.9}$ तेन (for तस्य). — D_4 om. (hapl.) lines 72–75. — (L. 74) D_7 यथेच्छकं (for किमि°). — (L. 75) $D_{6.7.9}$ तेन (for तस्य). — (L. 76) D_5 परां (for शुभां).]

— (L. 225) D_4 भर्तुः (for मर्त्यः). D_9 om. (hapl.) from स्पृशेद् up to दिवं (in line 228). D_8 गां (for गाश्). D_{4-7} स्पृशेद्गावो महायशाः (sic) (for the post. half). — (L. 226) Dn_3 यथानलं; D_{4-7} च पावकं (for तथानलम्). — (L. 227) D_6 om. from दोषान् up to दिवं स्पृ (in line 228). $D_{4.5.7}$ दारुणान्क्रूरकर्मणः (for the post. half). — After line 227, $D_{4.5.7}$ ins.:

तन्निबोधत मे सर्वे महाभागाः सुरोत्तमाः ।

— (L. 228) $D_{4-7.9}$ विकशब्दः (for [अ]शब्दोऽस्य). $D_{4-7.9}$ पितरो वित्रसंति च (for the post. half). — (L. 229) $D_{4-7.9}$ तेन वै (for पुष्कलम्). — (L. 230) $D_{4.6.7.9}$ महाज्वालो (for °तेजा). $D_{4-7.9}$ हविर्न प्रतिगृह्णते (for the post. half). — (L. 231) D_8 शतेन (for शतं च). $D_{4-7.9}$ नरके घोरदर्शने (for the post. half). — After line 231, $D_{4-7.9}$ ins.:

पच्यते क्रूरकर्मा वै जायमानः पुनः पुनः ।
धृष्टायां नानुविन्दन्ति पितरः सह दैवतैः ।

— $D_{4-7.9}$ om. line 232. — (L. 233) $D_{4-7.9}$ स्प्रष्टव्या लोकमातरः (for the post. half). — After line 233, $D_{4-7.9}$ ins.:

दोषाश्च विविधा दृष्टा ये श्रुता विबुधां गणैः ।

[D_4 ये श्रुता विबुधागताः (for the post. half).] — After the above, $D_{4-7.9}$ read lines 317–335. — $D_{4-7.9}$ om. lines 234–276. V_1 B_1 Dn_1 D_3 om.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गजच्छायायां पूर्वस्यां कुतुपे दक्षिणामुखः ।
यदा भाद्रपदे मासि भवते बहुले मघा ।
श्रूयतां तस्य दानस्य यादृशो गुणविस्तरः ।
कृतं तेन महच्छ्राद्धं वर्षाणीह त्रयोदश ।

गावः ।

बहुले समङ्गे ह्यकुतोभये च
क्षेमे च संख्येव हि भूयसी च ।
यथा पुरा ब्रह्मपुरे सवत्सा
शतक्रतोर्वज्रधरस्य यज्ञे ।
भूयश्च या विष्णुपदे स्थिता या
विभावसोश्चापि पथे स्थिता या ।
देवाश्च सर्वे सह नारदेन
प्रकुर्वते सर्वसहेति नाम ।
मन्त्रेणैतेनाभिवन्देत यो वै
विमुच्यते पापकृतेन कर्मणा ।
लोकानवाप्नोति पुरंदरस्य
गवां फलं चन्द्रमसो द्युतिं च ।
एतं हि मन्त्रं त्रिदशाभिजुष्टं
पठेत यः पर्वसु गोष्ठमध्ये ।
न तस्य पापं न भयं न शोकः
सहस्रनेत्रस्य च याति लोकम् ।

भीष्मः ।

अथ सप्त महाभागा ऋषयो लोकविश्रुताः ।
वसिष्ठप्रमुखाः सर्वे ब्रह्माणं पद्मसंभवम् ।
प्रदक्षिणमभिक्रम्य सर्वे प्राञ्जलयः स्थिताः ।
उवाच वचनं तेषां वसिष्ठो ब्रह्मवित्तमः ।
सर्वप्राणिहितं प्रश्नं ब्रह्मक्षेत्रे विशेषतः ।
द्रव्यहीनाः कथं मर्त्या दरिद्राः साधुवृत्तयः ।
प्राप्नुवन्तीह यज्ञस्य फलं केनेह कर्मणा ।
एतच्छ्रुत्वा वचस्तेषां ब्रह्मा वचनमब्रवीत् ।
अहो प्रश्नो महाभागा गूढार्थः परमः शुभः ।
सूक्ष्मः श्रेयांश्च मर्त्यानां भवद्भिः समुदाहृतः ।
श्रूयतां सर्वमाख्यास्ये निखिलेन तपोधनाः ।
यथा यज्ञफलं मर्त्यो लभते नात्र संशयः ।
पौषमासस्य शुक्ले वै यदा युज्येत रोहिणी ।
तेन नक्षत्रयोगेन आकाशशयनो भवेत् ।
एकवस्त्रः शुचिः स्नातः श्रद्दधानः समाहितः ।
सोमस्य रश्मयः पीत्वा महायज्ञफलं लभेत् ।
एतद्वः परमं गुह्यं कथितं द्विजसत्तमाः ।
यन्मां भवन्तः पृच्छन्ति सूक्ष्मतत्त्वार्थदर्शिनः ।

Colophon.

विभावसुः ।

सलिलस्याञ्जलिं पूर्णमक्षताश्च घृतोत्तराः ।
सोमस्योत्तिष्ठमानस्य तज्जलं चाक्षतांश्च तान् ।
स्थितो ह्यभिमुखो मर्त्यः पौर्णमास्यां बलिं हरेत् ।
अग्निकार्यं कृतं तेन हुताश्चास्याग्नयस्त्रयः ।

---

line 236. — (L. 240) Dn_2 भवने (for °ते). — (L. 243) D_3 [अ]कुतोभयं (for °ये). — (L. 245) D_3 [अ]वसत्सा (for सवत्सा). — (L. 247) B_1 वै (for the second या). — (L. 248) $B_{1.3}$ Dn_3 D_3 पथि ; B_4 पदे (for पथे). — (L. 251) V_1 मंत्रैर्घृतेन (for मन्त्रेणैतेन). V_1 B Dn_3 D_3 [अ]भिवंदे(B_5 °रमे)त (for °वन्देत). — (L. 256) B_1 D_3 गोषु (for गोष्ठ-). — (L. 260) V_1 ब्राह्मणं (for ब्रह्माणं). — (L. 261) V_1 $B_{3.4}$ D_3 अतिक्रम्य (for अभि°). — (L. 264) B_3 $Dn_{1.n2}$ -वर्तिनः (for -वृत्तयः). — (L. 265) $B_{2.3}$ $Dn_{1.n2}$ च (for [इ]ह). — After line 265, D_3 ins.:

एतन्मे ब्रूहि तत्त्वेन यथावत्परिपृच्छते ।

— B_5 om. lines 267–270. — (L. 270) V_1 $B_{1.3}$ D_3 मर्त्या (for मर्त्यो). V_1 $B_{1.3}$ D_3 लभंते. — B_{3-5} ins. after line 276 : B_1 before line 277 :

श्रूयतां चापरं गुह्यं मखक्षत्रसुखावहम् ।
पूर्वं स्नात्वा यथान्यायं प्राणायामं समाचरेत् ।
सहस्रगुणितं कृत्वा सावित्रीं वेदमातरम् ।
सायं प्रातर्जपन्विप्रो यमलोकमवाप्नुयात् ।

[(L. 1) $B_{1.5}$ परमं (for चापरं).]
— Colophon. — *Parvan name* : B_{1-4} D_3 शांति. — *Sub-parvan* : V_1 B $Dn_{1.n2}$ दानधर्म. — *Adhy. name* : V_1 $B_{1.2.4.5}$ Dn D_3 देवरहस्यं. — *Adhy. no.* : V_1 126 ; B_5 116 ; Dn_1 124. — $D_{4.5}$ भानुः (for विभावसुः). — After the ref., $D_{4-7.9}$ ins. :

संशृणुध्वं भवन्तो वै यन्मां पृच्छथ तत्त्वतः ।

— (L. 277) $D_{6.7.9}$ पूर्णाम् (for पूर्णम्). D_4 घृतोत्तमाः ; $D_{6.7.9}$ घृतोत्तरां (for °राः). — (L. 278) $D_{4-7.9}$ उद्य- (D_4 °दि)तश्चैव पूर्वेण (for the prior half). B_3 तज्जलं चाक्षयं शुभं ; $D_{4-7.9}$ तज्जलं तांश्च अक्षतान् (for the post. half). — After line 278, $D_{4-7.9}$ ins. :

विक्षिपेत्सुमनास्तत्र श्रद्दधानस्तु मानवः ।

— (L. 279) $D_{4-7.9}$ तत्र (for मर्त्यः). $D_{4-7.9}$ श्रद्धायुक्तो (for पौर्णमास्यां). — (L. 280) Dn_3 [अ]पि (for [अ]स्य). $D_{4-7.9}$ सुप्रीतोहं कृतस्तेन अग्नयश्च त्रयो हुताः. — After line 280, $D_{4-7.9}$ ins. :

ये च धर्माश्रिता लोके वयोवृद्धा महाव्रताः ।
तेषां धर्मफलं साधु धर्मेषु सुमहत्फलम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वनस्पतिं च यो हन्यादमावास्यामबुद्धिमान् ।
अपि ह्येकेन पत्रेण लिप्यते ब्रह्महत्यया ।
दन्तकाष्ठं तु यः खादेदमावास्यामबुद्धिमान् ।
हिंसितश्चन्द्रमास्तेन पितरश्चोद्विजन्ति च ।
हव्यं न तस्य देवाश्च प्रतिगृह्णन्ति पर्वसु ।
कुप्यन्ते पितरश्चास्य कुले वंशोऽस्य हीयते ।

श्रीः ।

प्रकीर्णं भाजनं यत्र पानभाण्डमथासनम् ।
योषितश्चैव हन्यन्ते कश्मलोपहते गृहे ।
देवताः पितरश्चैव उत्सवे पर्वणीषु वा ।
निराशाः प्रतिगच्छन्ति कश्मलोपहताद्गृहात् ।

अङ्गिराः ।

यस्तु संवत्सरं पूर्णं दद्याद्दीपं करञ्जके ।
सुवर्चलामूलहस्तः प्रजा तस्य विवर्धते ।

गार्ग्यः ।

आतिथ्यं सततं कुर्याद्दीपं दद्यात्प्रतिश्रये ।
वर्जयानो दिवास्वप्नं न च मांसानि भक्षयेत् ।
गोब्राह्मणं न हिंस्याच्च पुष्कराणि च कीर्तयेत् ।
एष श्रेष्ठतमो धर्मः सरहस्यो महाफलः ।
अपि क्रतुशतैरिष्ट्वा क्षयं गच्छति तद्धविः ।

— (L. 281) $D_{4.9}$ हिंसति यो; $D_{5.7}$ हिंसयति (for च यो हन्याद्). $D_{5.7}$ ह्यमावास्याम्. — $D_{4-7.9}$ om. (hapl.) lines 282–283. — (L. 282) $B_{2.3}$ भ्रूण- (for ब्रह्म-). — (L. 284) B_{3} [उ]द्वहंति (for [उ]द्विजन्ति). — For line 284, $D_{4-7.9}$ subst. :

सोमस्तु हिंसितस्तेन नास्य तुष्यन्ति देवताः ।

— (L. 285) D_{9} om. from न तस्य up to हीयते (in line 286). D_{4-7} हव्यं च देवतास्तस्य नानुगृह्णंति सर्वशः (D_{4} °तः). — (L. 286) $B_{2.3}$ कुप्यंति. B_{3} तस्य (for चास्य). B_{1} देव-; Dn_{2} D_{8} कुल- (for कुले). D_{4-7} पितरश्चैव हन्यंते (D_{4} :कव्यं वै) कुलवंशश्च हीयते. — D_{4-7} ins. after line 286 : D_{9} after हव्यं (in line 285):

राहोश्चागमकाले तु चन्द्रादित्यौ नमस्यति ।
तस्य व्युष्टिं ददामोऽस्य हृदयेन नमस्यतः ।
दक्षिणाभिमुखो रात्रावुत्तराभिमुखो दिवा ।
नरः प्रस्रवते यस्तु तस्य व्युष्टिं ददाम्यहम् ।
भाषितं रविणा श्रुत्वा शीतरश्मिं महाद्युतिम् ।
पृच्छन्ति हि रहस्यानि श्रोतुकामा दिवौकसः ।

सोमः ।

आविद्यो वा सविद्यो वा न वेदयति यस्तु माम् ।
अपि पर्याप्तविद्यो वा नरके वसते तु सः ।
देवकार्येषु नास्तिक्यो दुराचारो विनश्यति ।
न च पुत्रपशूंस्तस्य स्थावरो नरको ध्रुवः ।
यथाक्रममुपासित्वा सर्वदैवमुपासते ।
पृच्छमाणाः क्रमेणाग्निमर्थयन्ति सुरोत्तमाः ।

[D_{4} om. lines 2–4.]

—D_{4} श्रियः (for श्रीः). — (L. 287) Dn_{1} भिन्न- (for पान-). $D_{4-7.9}$ भस्मभांडयुतं गृहं (for the post. half). — (L. 288) $D_{4-7.9}$ हन्यंते योषितश्चैव (for the prior half). — After line 288, $D_{4-7.9}$ ins. :

नाह्निकं न बलिर्यत्र नोपवासो न शौचता ।
मया त्यक्तं गृहं तत्तु शीघ्रं प्रविशते कलिः
पाप्मच्छन्ने गृहे तस्मिन्विनायकशतैर्युते ।
अपि वर्षशतस्यान्ते भोजनं नैव विद्यते ।
पुंश्चली गृहिणी यत्र न च शौचसमन्विता ।
तद्गृहं सर्वपापैस्तु ग्रस्तं नैव सुखं भवेत् ।
शिष्टाचारो नरो यत्र नित्यं शौचसमन्वितः ।
योषितोऽलंकृता यत्र तत्राहं भवने रता ।
प्रतिश्रुत्य श्रियो वाक्यमभिनन्द्य पुनः पुनः ।
अर्कं विभावसुं देवा नोदयन्ति समाहिताः ।
यत्तु गुह्यं रहस्यं तु धर्मं प्रेत्येह चाक्षयम् ।
मर्त्यानां श्रद्दधानानां तद्ब्रूहि सुमहामते ।

[(L. 2) D_{4} तत्र; D_{5} यत्तु (for तत्तु). $D_{6.7.9}$ क्षिप्रं (for शीघ्रं). — D_{5} om. lines 6–8. D_{4} om. line 9.]

— $D_{4-7.9}$ om. lines 289–290. — (L. 289) B_{3} [अ]पि (for वा). — (L. 290) $B_{1.3}$ D_{8} तस्य (for प्रति-). — (L. 291) B_{2} दीपान् (for दीपं). $D_{4-7.9}$ करंजे दीपकं ददौ (for the post. half). — (L. 292) $D_{4-7.9}$ अक्षतैश्चार्चयेन्नित्यं (for the prior half). B_{3} $D_{4.6.7.9}$ प्रजास् (for प्रजा). — After line 292, $D_{4-7.9}$ ins. :

गौतमः ।

पूजयेन्निम्नगा यश्च स्रोतः प्रतिमुखागतम् ।
यस्तस्य यानं वहति गुणान्वा वदते महान् ।

[L. 1) D_{5} यत्र (for यश्च).]

— After the above, $D_{4-7.9}$ read lines 306–316. — After the ref., $D_{4-7.9}$ ins. :

अहो बहुविधो धर्मः सरहस्यो मनीषिणाम् ।
धर्मगुह्यमिदं पुण्यं मनुष्याणां सुखावहम् ।
शृणुध्वं गदतः सर्वे यथा धर्मो न हीयते ।

— $D_{4-7.9}$ read line 293 after line 295. — (L. 293) $D_{4-7.9}$ आतिथ्यं च यथाशक्त्या दद्याद्दीपकमाश्रये ($D_{5.7}$ °मथाश्रये). — $D_{4-7.9}$ om. line 294. — (L. 294) Bom. ed. -स्वापं (for -स्वप्नं). — (L. 295) $D_{4-7.9}$ हिंसेत (for हिंस्याच्च). $D_{4-7.9}$ सर्वावस्थमनिंदितं (for the

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गजच्छायायां पूर्वस्यां कुतुपे दक्षिणामुखः ।
यदा भाद्रपदे मासि भवते बहुले मघा ।
श्रूयतां तस्य दानस्य यादृशो गुणविस्तरः ।
कृतं तेन महच्छ्राद्धं वर्षाणीह त्रयोदश ।

गावः ।

बहुले समङ्गे ह्यकुतोभये च
क्षेमे च संख्येव हि भूयसी च ।
यथा पुरा ब्रह्मपुरे सवत्सा
शतक्रतोर्वज्रधरस्य यज्ञे ।
भूयश्च या विष्णुपदे स्थिता या
विभावसोश्चापि पथे स्थिता या ।
देवाश्च सर्वे सह नारदेन
प्रकुर्वते सर्वसहेति नाम ।
मन्त्रेणैतेनाभिवन्देत यो वै
विमुच्यते पापकृतेन कर्मणा ।
लोकानवाप्नोति पुरंदरस्य
गवां फलं चन्द्रमसो द्युतिं च ।
एतं हि मन्त्रं त्रिदशाभिजुष्टं
पठेत यः पर्वसु गोष्ठमध्ये ।
न तस्य पापं न भयं न शोकः
सहस्रनेत्रस्य च याति लोकम् ।

भीष्मः ।

अथ सप्त महाभागा ऋषयो लोकविश्रुताः ।
वसिष्ठप्रमुखाः सर्वे ब्रह्माणं पद्मसंभवम् ।
प्रदक्षिणमभिक्रम्य सर्वे प्राञ्जलयः स्थिताः ।
उवाच वचनं तेषां वसिष्ठो ब्रह्मवित्तमः ।
सर्वप्राणिहितं प्रश्नं ब्रह्मक्षेत्रे विशेषतः ।
द्रव्यहीनाः कथं मर्त्या दरिद्राः साधुवृत्तयः ।
प्राप्नुवन्तीह यज्ञस्य फलं केनेह कर्मणा ।
एतच्छ्रुत्वा वचस्तेषां ब्रह्मा वचनमब्रवीत् ।
अहो प्रश्नो महाभागा गूढार्थः परमः शुभः ।
सूक्ष्मः श्रेयांश्च मर्त्यानां भवद्भिः समुदाहृतः ।
श्रूयतां सर्वमाख्यास्ये निखिलेन तपोधनाः ।
यथा यज्ञफलं मर्त्यो लभते नात्र संशयः ।
पौषमासस्य शुक्के वै यदा युज्येत रोहिणी ।
तेन नक्षत्रयोगेन आकाशशयनो भवेत् ।
एकवस्त्रः शुचिः स्नातः श्रद्दधानः समाहितः ।
सोमस्य रश्मयः पीत्वा महायज्ञफलं लभेत् ।
एतद्वः परमं गुह्यं कथितं द्विजसत्तमाः ।
यन्मां भवन्तः पृच्छन्ति सूक्ष्मतत्त्वार्थदर्शिनः ।

Colophon.

विभावसुः ।

सलिलस्याञ्जलिं पूर्णमक्षताश्च घृतोत्तराः ।
सोमस्योत्तिष्ठमानस्य तज्जलं चाक्षतांश्च तान् ।
स्थितो ह्यभिमुखो मर्त्यः पौर्णमास्यां बलिं हरेत् ।
अग्निकार्यं कृतं तेन हुताश्चास्याग्नयस्त्रयः ।

---

line 236. — (L. 240) Dn$_2$ भवने (for °ते). — (L. 243) D$_8$ [अ]कुतोभयं (for °ये). — (L. 245) D$_8$ [अ]वसत्सा (for सवत्सा). — (L. 247) B$_1$ वै (for the second या). — (L. 248) B$_{1.3}$ Dn$_3$ D$_8$ पथि ; B$_4$ पदे (for पथे). — (L. 251) V$_1$ मंत्रैर्घृतेन (for मन्त्रेणैतेन). V$_1$ B Dn$_3$ D$_8$ [अ]भिवंदे(B$_5$ °रमे)त (for °वन्देत). — (L. 256) B$_1$ D$_8$ गोषु (for गोष्ठ-). — (L. 260) V$_1$ ब्राह्मणं (for ब्रह्माणं). — (L. 261) V$_1$ B$_{3.4}$ D$_8$ अतिक्रम्य (for अभि°). — (L. 264) B$_8$ Dn$_{1.n2}$ -वर्तिनः (for -वृत्तयः). — (L. 265) B$_{2.3}$ Dn$_{1.n2}$ च (for [इ]ह). — After line 265, D$_8$ ins.:

एतन्मे ब्रूहि तत्त्वेन यथावत्परिपृच्छते ।

— B$_5$ om. lines 267–270. — (L. 270) V$_1$ B$_{1.3}$ D$_8$ मर्त्या (for मर्त्यो). V$_1$ B$_{1.3}$ D$_8$ लभंते. — B$_{3-5}$ ins. after line 276 : B$_1$ before line 277 :

श्रूयतां चापरं गुह्यं ब्रह्मक्षत्रसुखावहम् ।
पूर्वं स्नात्वा यथान्यायं प्राणायामं समाचरेत् ।
सहस्रगुणितं कृत्वा सावित्रीं वेदमातरम् ।
सायं प्रातर्जपन्विप्रो यमलोकमवाप्नुयात् ।

[(L. 1) B$_{1.5}$ परमं (for चापरं).]

— Colophon. — *Parvan name* : B$_{1-4}$ D$_8$ शांति. — *Sub-parvan* : V$_1$ B Dn$_{1.n2}$ दानधर्म. — *Adhy. name* : V$_1$ B$_{1.2.4.5}$ Dn D$_8$ देवरहस्यं. — *Adhy. no.* : V$_1$ 126 ; B$_5$ 116 ; Dn$_1$ 124. — D$_{4.5}$ भानुः (for विभावसुः). — After the ref., D$_{4-7.9}$ ins. :

संशृणुध्वं भवन्तो वै यन्मां पृच्छथ तत्त्वतः ।

— (L. 277) D$_{6.7.9}$ पूर्णाम् (for पूर्णम्). D$_4$ घृतोत्तमाः ; D$_{6.7.9}$ घृतोत्तरां (for °राः). — (L. 278) D$_{4-7.9}$ उद्य(D$_4$ °दि)तश्चैव पूर्वेण (for the prior half). B$_3$ तज्जलं चाक्षयं शुभं ; D$_{4-7.9}$ तज्जलं तांश्च अक्षतान् (for the post. half). — After line 278, D$_{4-7.9}$ ins. :

विक्षिपेत्सुमनास्तत्र श्रद्दधानस्तु मानवः ।

— (L. 279) D$_{4-7.9}$ तत्र (for मर्त्यः). D$_{4-7.9}$ श्रद्धायुक्तो (for पौर्णमास्यां). — (L. 280) Dn$_3$ [अ]पि (for [अ]स्य). D$_{4-7.9}$ सुप्रीतोहं कृतस्तेन अग्नयश्च त्रयो हुताः. — After line 280, D$_{4-7.9}$ ins. :

ये च धर्माश्रिता लोके वयोवृद्धा महाव्रताः ।
तेषां धर्मफलं साधु धर्मेषु सुमहत्फलम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वनस्पतिं च यो हन्यादमावास्यामबुद्धिमान् ।
अपि ह्येकेन पत्रेण लिप्यते ब्रह्महत्यया ।
दन्तकाष्ठं तु यः खादेदमावास्यामबुद्धिमान् ।
हिंसितश्चन्द्रमास्तेन पितरश्चोद्विजन्ति च ।
हव्यं न तस्य देवाश्च प्रतिगृह्णन्ति पर्वसु ।
कुप्यन्ते पितरश्चास्य कुले वंशोऽस्य हीयते ।

श्रीः ।

प्रकीर्णं भाजनं यत्र पानभाण्डमथासनम् ।
योषितश्चैव हन्यन्ते कश्मलोपहते गृहे ।
देवताः पितरश्चैव उत्सवे पर्वणीषु वा ।
निराशाः प्रतिगच्छन्ति कश्मलोपहताद्गृहात् ।

अङ्गिराः ।

यस्तु संवत्सरं पूर्णं दद्याद्दीपं करञ्जके ।
सुवर्चलामूलहस्तः प्रजा तस्य विवर्धते ।

गार्ग्यः ।

आतिथ्यं सततं कुर्याद्दीपं दद्यात्प्रतिश्रये ।
वर्जयानो दिवास्वप्नं न च मांसानि भक्षयेत् ।
गोब्राह्मणं न हिंस्याच्च पुष्कराणि च कीर्तयेत् ।
एष श्रेष्ठतमो धर्मः सरहस्यो महाफलः ।
अपि क्रतुशतैरिष्ट्वा क्षयं गच्छति तद्धविः ।

— (L. 281) $D_{4.9}$ हिंसति यो ; $D_{5.7}$ हिंसयति (for च यो हन्याद्). $D_{5.7}$ ह्यमावास्याम्. — $D_{4-7.9}$ om. (hapl.) lines 282–283. — (L. 282) $B_{2.3}$ भ्रूण- (for ब्रह्म-). — (L. 284) B_{3} [उ]द्वहंति (for [उ]द्विजन्ति). — For line 284, $D_{4-7.9}$ subst. :

सोमस्तु हिंसितस्तेन नास्य तुष्यन्ति देवताः ।

— (L. 285) D_{9} om. from न तस्य up to हीयते (in line 286). D_{4-7} हव्यं च देवतास्तस्य नानुगृह्णंति सर्वशः (D_{4} °तः). — (L. 286) $B_{2.3}$ कुप्यंति. B_{3} तस्य (for चास्य). B_{1} देव- ; Dn_{2} D_{8} कुल- (for कुले). D_{4-7} पितरश्चैव हन्यंते (D_{4} :कव्यं वै) कुलवंशश्च हीयते. — D_{4-7} ins. after line 286 : D_{9} after हव्यं (in line 285):

राहोश्चागमकाले तु चन्द्रादित्यौ नमस्यति ।
तस्य व्युष्टिं ददामोऽस्य हृदयेन नमस्यतः ।
दक्षिणाभिमुखो रात्रावुत्तराभिमुखो दिवा ।
नरः प्रस्रवते यस्तु तस्य व्युष्टिं ददाम्यहम् ।
भाषितं रविणा श्रुत्वा शीतरश्मिं महाद्युतिम् ।
पृच्छन्ति हि रहस्यानि श्रोतुकामा दिवौकसः ।

सोमः ।

आविद्यो वा सविद्यो वा न वेदयति यस्तु माम् ।
अपि पर्याप्तविद्यो वा नरके वसते तु सः ।
देवकार्येषु नास्तिक्यो दुराचारो विनश्यति ।
न च पुत्रपशूंस्तस्य स्थावरो नरको ध्रुवः ।
यथाक्रममुपासित्वा सर्वदैवमुपासते ।
पृच्छमाणाः क्रमेणाग्निमर्थयन्ति सुरोत्तमाः ।

[D_{4} om. lines 2–4.]

— D_{4} श्रियः (for श्रीः). — (L. 287) Dn_{1} भिन्न- (for पान-). $D_{4-7.9}$ भस्मभांडयुतं गृहं (for the post. half). — (L. 288) $D_{4-7.9}$ हन्यंते योषितश्चैव (for the prior half). — After line 288, $D_{4-7.9}$ ins. :

नाह्निकं न बलिर्यत्र नोपवासो न शौचता ।
मया त्यक्तं गृहं तत्तु शीघ्रं प्रविशते कलिः
पाप्मच्छन्ने गृहे तस्मिन्विनायकशतैर्युते ।
अपि वर्षशतस्यान्ते भोजनं नैव विद्यते ।
पुंश्चली गृहिणी यत्र न च शौचसमन्विता ।
तद्गृहं सर्वपापैस्तु ग्रस्तं नैव सुखं भवेत् ।
शिष्टाचारो नरो यत्र नित्यं शौचसमन्वितः ।
योषितोऽलंकृता यत्र तत्राहं भवने रता ।
प्रतिश्रुत्य श्रियो वाक्यमभिनन्द्य पुनः पुनः ।
अर्कं विभावसुं देवा नोदयन्ति समाहिताः ।
यत्तु गुह्यं रहस्यं तु धर्मं प्रेत्येह चाक्षयम् ।
मर्त्यानां श्रद्दधानानां तद्ब्रूहि सुमहामते ।

[(L. 2) D_{4} तत्र ; D_{5} यत्तु (for तत्तु). $D_{6.7.9}$ क्षिप्रं (for शीघ्रं). — D_{5} om. lines 6–8. D_{4} om. line 9.]

— $D_{4-7.9}$ om. lines 289–290. — (L. 289) B_{3} [अ]पि (for वा). — (L. 290) $B_{1.3}$ D_{8} तस्य (for प्रति-). — (L. 291) B_{2} दीपान् (for दीपं). $D_{4-7.9}$ करंजे दीपकं ददौ (for the post. half). — (L. 292) $D_{4-7.9}$ अक्षतैश्चार्चयेन्नित्यं (for the prior half). B_{3} $D_{4.6.7.9}$ प्रजास् (for प्रजा). — After line 292, $D_{4-7.9}$ ins. :

गौतमः ।

पूजयेत्त्रिस्रगा यश्च स्रोतः प्रतिमुखागतम् ।
यस्तस्य यानं वहति गुणान्वा वदते महान् ।

[L. 1) D_{5} यत्र (for यश्च).]

— After the above, $D_{4-7.9}$ read lines 306–316.
— After the ref., $D_{4-7.9}$ ins. :

अहो बहुविधो धर्मः सरहस्यो मनीषिणाम् ।
धर्मगुह्यमिदं पुण्यं मनुष्याणां सुखावहम् ।
शृणुध्वं गदतः सर्वे यथा धर्मो न हीयते ।

— $D_{4-7.9}$ read line 293 after line 295. — (L. 293) $D_{4-7.9}$ आतिथ्यं च यथाशक्त्या दद्याद्दीपकमाश्रये ($D_{5.7}$ °मथाश्रये). — $D_{4-7.9}$ om. line 294. — (L. 294) Bom. ed. -स्वापं (for -स्वप्नं). — (L. 295) $D_{4-7.9}$ हिंसेत (for हिंस्याच्च). $D_{4-7.9}$ सर्वावस्थमनिंदितं (for the

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

न तु क्षीयन्ति ते धर्माः श्रद्दधानैः प्रयोजिताः ।
इदं च परमं गुह्यं सरहस्यं निबोधत ।
श्राद्धकल्पे च दैवे च तैर्थिके पर्वणीषु च ।
रजस्वला च या नारी श्वित्रिकापुत्रिका च या ।
एताभिश्चक्षुषा दृष्टं हविर्नाश्नन्ति देवताः ।
पितरश्च न तुष्यन्ति वर्षाण्यस्य त्रयोदश ।
शुक्लवासाः शुचिर्भूत्वा ब्राह्मणान्स्वस्ति वाचयेत् ।
कीर्तयेद्भारतं चैव तथा स्यादक्षयं हविः ।

धौम्यः ।

भिन्नभाण्डं च खट्वां च कुक्कुटं शुनकं तथा ।
अप्रशस्तानि सर्वाणि यश्च वृक्षो गृहेरुहः ।
भिन्नभाण्डे कलिं प्राहुः खट्वायां तु धनक्षयः ।
कुक्कुटे शुनके चैव हविर्नाश्नन्ति देवताः ।
वृक्षमूले ध्रुवं सत्त्वं तस्माद्वृक्षं न रोपयेत् ।

जमदग्निः ।

यो यजेदश्वमेधेन वाजपेयशतेन ह ।
अवाक्शिरा वा लम्बेत सत्रं वा स्फीतमाहरेत् ।
न चास्य हृदयं शुद्धं नरकं स ध्रुवं व्रजेत् ।
तुल्यं यज्ञश्च सत्यं च हृदयस्य च शुद्धता ।
शुद्धेन मनसा दत्त्वा सक्तुप्रस्थं द्विजातये ।
ब्रह्मलोकमनुप्राप्तः पर्याप्तं तन्निदर्शनम् ।

Colophon.

---

post. half). — (L. 296) $D_{4-7.9}$ पुण्य- (for श्रेष्ठ-). $D_{4-7.9}$ मनुष्याणां सुखावहः (for the post. half). — Dn_{2} $D_{4-7.9}$ om. lines 297–298. — (L. 299) $D_{4-7.9}$ [ए]व परं (for परमं). — (L. 300) B_{5} [अ]पि (for the third च). $D_{4-7.9}$ श्रद्दधानस्य यज्ञेषु पर्वणीषु तिथीषु च. — (L. 301) B_{1} पूतिका; $D_{4-7.9}$ पूतिला (for [अ]पुत्रिका). — (L. 302) $D_{4-7.9}$ स्पृष्टं चाप्युपहन्यते (for the post. half). — After line 302, $D_{4-7.9}$ ins. :

न तद्देवानुगृह्णन्ति हतं भवति तद्धविः ।

— (L. 303) Dn_{1} [अ]पि (for [अ]स्य). $D_{4-7.9}$ पितरस्तु न चाश्नंति वर्षाणि तु (D_{4} न वर्षाणि; D_{7} वर्षाणि च) चतुर्दश. — After line 303, $D_{4-7.9}$ ins. :

वृथा भवति तच्छ्राद्धं तस्मादेतास्तु वर्जयेत् ।

— (L. 304) B_{3} शुद्ध- (for शुक्ल-). $D_{4-7.9}$ स्नातो (for भूत्वा). — (L. 305) $D_{4-7.9}$ [अ]पि (for [ए]व). — After line 305, $D_{4-7.9}$ ins. :

एवमक्षयतां याति अन्यथा सममेव हि ।
सूकरो यन्निरीक्षेत यन्निरीक्षेत कुक्कुटः ।
यच्छ्वा वै हि निरीक्षेत यच्चैव वृषलीपतिः ।
न देवास्तत्तु भुञ्जन्ति पितरो वा कदाचन ।
न च सुप्लावितं विप्रा हतं भवति तद्धविः ।
येऽऽश्रमेषु निषेवन्ति सेवितानि मनीषिभिः ।
शान्तिं गच्छन्ति ते वीरा ईप्सितांश्च मनोरथान् ।
न कुर्वन्ति यथोक्तानि श्रियस्तेषु मनोरमाः ।
दाम्भिनो लिङ्गिनः क्रूरा व्रजन्ति नरकं हि ते ।
ततो देवगणाः सर्वे ऋषयश्च परंतपाः ।
पितरश्च महात्मानो वृद्धगर्गेण भाषितम् ।
श्रुत्वा प्रीतमनोभिस्ते सर्व एव समाहिताः ।

[(L. 2) D_{4} निरीक्षेत्तु (for the second °क्षेत).]

— After the above, $D_{4-7.9}$ read lines 368–394.

— (L. 306) B_{1} खट्वांगं (for खट्वां च). D_{8} कुक्कुटं च शुनस्तथा (for the post. half). $D_{4-7.9}$ भिन्नं भांडं तथा खट्वां कुक्कुटं श्वानमेव च. — (L. 307) B_{1} सुप्रशस्तानि. $D_{4-7.9}$ चत्वारि (for सर्वाणि). $D_{4-7.9}$ ये च वृक्षाः फलैर्विना (for the post. half). — After line 307, $D_{4-7.9}$ ins. :

गृहद्वारे गृहे वाथ स्थापयेन्न विचक्षणः ।

— (L. 308) $D_{4.5}$ -भांडं (for -भाण्डे). $D_{4-7.9}$ वाहन- (for तु धन-). — (L. 309) $B_{2.5}$ Dn_{3} शुनि वा (for शुनके). $D_{4-7.9}$ श्वाने वै कुक्कुटे चैव (for the prior half). — (L. 310) V_{1} सेवयेत् (for रोप°). $D_{4-7.9}$ तस्मात्तत्परिवर्जयेत् (for the post. half). — After line 310, $D_{4-7.9}$ ins. :

श्रद्दधानेन मर्त्येन वर्जनीयानि नित्यशः ।

— (L. 311) $D_{4-7.9}$ अग्निष्टोमेन वा यजेत (for the post. half). — (L. 312) $D_{5-7.9}$ [अ]व- (for वा). D_{4} अर्वाक्शिरा विलंबेत (for the prior half). — (L. 313) B_{1} चान्य-; Dn_{1} यस्य (for चास्य). $D_{4-7.9}$ हृदयं वाप्यशुद्धस्य ($D_{6.7.9}$ °द्धं स्यान्) (for the prior half). V_{1} चाकाशं (for नरकं). $D_{4-7.9}$ शाश्वतं (for स ध्रुवं). — (L. 314) $D_{4-7.9}$ अल्पं ($D_{6.7.9}$ तुल्यं) सत्यं च यज्ञैश्च यस्य शु($D_{6.7}$ सि)द्धं मनो भवेत. — (L. 315) $D_{4-7.9}$ दत्त्वा शुद्धेन मनसा (for the prior half). — (L. 316) D_{4} ब्रह्मलोके (for °कम्). $D_{4-7.9}$ महत्प्राप्य (for अनुप्राप्तः). Dn_{2} पर्याप्ति (for °प्तं). — After line 316, $D_{4-7.9}$ ins. :

पर्वतः ।

प्रातः प्रभाते संध्यायामुपगृह्य तु पिप्पलम् ।
तिलपात्रं च यो दद्यान्मुच्यते सर्वकिल्बिषैः ।
गन्धान्मूत्रपुरीषेण पयसां च घृतेन च ।
आह्निकं यः प्रकुर्वीत दध्ना चापि सुसंस्कृतम् ।
गां चैव यः स्पृशेन्नित्यं ग्रासमुष्टिं प्रयच्छति ।
निस्तरेत्सप्तरात्रेण प्रवृद्धमपि किल्बिषम् ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वायुः ।

किंचिद्धर्मं प्रवक्ष्यामि मानुषाणां सुखावहम् ।
सरहस्याश्च ये दोषास्ताञ्शृणुध्वं समाहिताः ।
अग्निकार्यं च कर्तव्यं परमान्नेन भोजनम् ।
दीपकश्चापि कर्तव्यः पितॄणां सतिलोदकः ।
एतेन विधिना मर्त्यः श्रद्दधानः समाहितः ।
चतुरो वार्षिकान्मासान्यो ददाति तिलोदकम् ।
भोजनं च यथाशक्त्या ब्राह्मणे वेदपारगे ।
पशुबन्धशतस्येह फलं प्राप्नोति पुष्कलम् ।
इदं चैवापरं गुह्यमप्रशस्तं निबोधत ।
अग्नेस्तु वृषलो नेता हविर्मूढाश्च योषितः ।
मन्यते धर्म एवेति स चाधर्मेण लिप्यते ।
अग्नयस्तस्य कुप्यन्ति शूद्रयोनिं स गच्छति ।
पितरश्च न तुष्यन्ति सह देवैर्विशेषतः ।
प्रायश्चित्तं तु यत्तत्र ब्रुवतस्तन्निबोध मे ।
यत्कृत्वा तु नरः सम्यक्सुखी भवति विज्वरः ।
गवां मूत्रपुरीषेण पयसा च घृतेन च ।
अग्निकार्यं त्र्यहं कुर्यान्निराहारः समाहितः ।

कश्यपः ।

यः पशून्हन्ति वै पापः परत्र हन्यते तु सः ।
ददते पशवो यस्तु तस्य लोके महोदयः ।
यस्तु भुक्तवतां धीरो मेदिनीं परिमार्जयेत् ।
श्रद्धानो भवेन्मर्त्यः सुखसौभाग्यभाग्भवेत् ।
दीर्घमायुर्वयोऽग्र्यं च यशश्च विपुलं भुवि ।
उत्तमां च गतिं लोके तुष्टिं पुष्टिं गुणोदयम् ।
अयं चैव परो धर्मो गुह्यार्थो लोकविश्रुतः ।
यो ददाति हि वै मर्त्यः कन्यां भूषणभूषिताम् ।
तस्याक्षयो भवेल्लोकः शाश्वतः शुभलक्षणः ।
स्वर्गे च लभते वासं सर्वकामपुरस्कृतम् ।
अकृत्वा मूर्ध्नि तोयं यः संक्रमेण तु यो व्रजेत् ।
लङ्घिता देवतास्तेन सलिलं लङ्घितं तदा ।
अक्षेषु न च सज्जेत न च जल्पेत भोजने ।
भुञ्जेद्योऽन्नं शयानश्च रमते तत्र पाप्मना ।
शयनासने न तिष्ठेत ऊर्ध्वपादो नरः सदा ।
अमङ्गल्यमपुष्टीकं वपुस्तेजःप्रणाशकम् ।
पुरस्तात्स्नातमात्रस्य गच्छमानस्य वा पथि ।
मुण्डभग्नशिरोग्रीवः श्रियो ह्यपि श्रियं हरेत् ।
अधौतपादः स्वपिति रात्रौ च दधिभोजनम् ।
श्रद्दधानो न कुर्वीत कलिद्वारं हि तद्भवेत् ।

[(L. 2) D_4 तु (for च). — (L. 4) D_4 च यः (for यः प्र-). $D_{6.9}$ दधिना च (for दध्ना चापि). — (L. 5) $D_{4.6.9}$ तु (for यः). — (L. 12) $D_{6.7.9}$ तुष्टिपुष्टि-. — (L. 17) D_7 च (for तु). D_9 जयेत् (for व्रजेत्). — (L. 18) D_4 तास्ते (for तेन). — (L. 19) $D_{5.7}$ तु (for the second च). $D_{4.5}$ सज्जेत; D_7 जल्पेत्तु (for जल्पेत). — (L. 20) D_7 भजेद् (for भुञ्जेद्). — (L. 21) Prior half hypermetric. — (L. 22) D_7 -प्रणाशनं (for °शकम्). — (L. 23) D_5 पुरतः (for पुरस्तात्).]

— After the above, $D_{4-7.9}$ read lines 338–365. — (L. 317) B_{1-3} कंचिद् (for किं°). $D_{4-7.9}$ मनुष्याणां (for मानुषाणां). — (L. 318) $D_{4-7.9}$ धर्मांस् (for दोषास्). D_4 तान्शृणुष्व समाहितः (for the post. half). — (L. 319) $D_{4-7.9}$ नित्यशः (for भोजनम्). — (L. 320) $D_{6.7.9}$ [उ]प- (for [अ]पि). $B_{1.3}$ D_4 दीपकश्चोपहर्तव्यः; D_5 सदीपश्चोपकर्तव्यः (for the prior half). — (L. 321) $D_{5.7}$ अनेन (for एतेन). $D_{4-7.9}$ बलिं हरेत् (for समाहितः). — (L. 323) $D_{4-7.9}$ चत्वारो (for चतुरो). — After line 322, B_5 ins.:

पितॄणां नियतश्राद्धे दीपकाश्च यथाविधि ।

— B_5 reads line 323 twice. — (L. 323) D_5 यथाशक्ति (for °क्त्या). D_4 ब्राह्मणैर्वेदपारगैः (for the post. half). — (L. 324) D_{4-7} -शतं तेन (for -शतस्येह). D_9 पशुबंधशतं तेन (for the prior half). $D_{4-7.9}$ यष्टं भवति शाश्वतं (for the post. half). — (L. 325) $D_{4-7.9}$ परं (for [ए]वापरं). $D_{4-7.9}$ प्रशस्तं मे (for अप्रशस्तं). D_8 द्विजोत्तम (for निबोधत). — After line 325, $D_{5.7}$ ins.:

द्विजानामल्पबुद्धीनां परलोके सुखावहम् ।
मुच्यमानं तु वृषभं ददतो गां द्विजातये ।
नैवमित्याह यः पापो दोषांस्तस्य निबोधत ।

[(L. 1) D_5 परलोक- (for °के). — (L. 3) D_7 यत् (for यः).]

$D_{4-7.9}$ om. lines 326–327. — (L. 326) B_5 देवताः (for योषितः). — (L. 327) D_8 [इ]ह (for [इ]ति). — (L. 328) D_4 तुष्यंति; D_5 रुष्यंति; $D_{6.7.9}$ तुष्यंते (for कुप्यन्ति). $B_{1.2}$ च (for स). $D_{4-7.9}$ शूद्रयोनौ प्रजायते (for the post. half). — (L. 329) D_8 न संशयः (for विशेषतः). $D_{4-7.9}$ देवा नाश्नंति तद्धविः (for the post. half). — After line 329, $D_{4-7.9}$ ins.:

एते दोषा महान्तस्य मूढस्य तु भवन्ति वै ।

— (L. 330) $D_{4.6.7.9}$ प्रायश्चित्तं प्रवक्ष्यामि दोषाणां तस्य शोधनं. — (L. 331) $D_{4.6.7.9}$ यथा मुच्यति दोषैस्तु (for the prior half). $D_{4-7.9}$ न चाधर्मेण लिप्यते (for the post. half). — (L. 332) D_4 मूत्रे (for मूत्र-). — After line 332, $D_{4-7.9}$ ins.:

दध्ना चैव यथान्यायमेकैकेन त्र्यहं त्र्यहम् ।
एकैकं प्राशतो नित्यं त्र्यहं त्वनशनो भवेत् ।

[D_4 om. line 2. — (L. 2) $D_{7.8}$ अनशनो (for त्व°).]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ततः संवत्सरे पूर्णे प्रतिगृह्णन्ति देवताः ।
हृष्यन्ति पितरश्चास्य श्राद्धकाल उपस्थिते ।
एष ह्यधर्मो धर्मश्च रहस्यः संप्रकीर्तितः ।
मर्त्यानां स्वर्गकामानां प्रेत्य स्वर्गसुखावहः ।

Colophon.

लोमशः ।

परदारेषु ये सक्ता अकृत्वा दारसंग्रहम् ।
निराशाः पितरस्तेषां श्राद्धकाले भवन्ति वै ।
परदाररतिर्यः स्याद्यश्च वन्ध्यामुपासते ।
ब्रह्मस्वं हरते यश्च समदोषा भवन्ति ते ।
असंभाष्या भवन्त्येते पितॄणां नात्र संशयः ।
देवताः पितरश्चैषां नाभिनन्दन्ति तद्धविः ।
तस्मात्परस्य वै दारांस्त्यजेद्वन्ध्यां च योषितम् ।
ब्रह्मस्वं हि न हर्तव्यमात्मनो हितमिच्छता ।
श्रूयतां चापरं गुह्यं रहस्यं धर्मसंहितम् ।
श्रद्दधानेन कर्तव्यं गुरूणां वचनं सदा ।
द्वादश्यां पौर्णमास्यां च मासि मासि घृताक्षतम् ।
ब्राह्मणेभ्यः प्रयच्छेत तस्य पुण्यं निबोधत ।
सोमश्च वर्धते तेन समुद्रश्च महोदधिः ।
अश्वमेधचतुर्भागं फलं सृजति वासवः ।

— (L. 333) D4–7.9 अग्निकार्यं सदा कार्यमेकैकेन त्र्यहं त्र्यहं (D4 परं). — After line 333, D4–7.9 ins. :

एतेन विधिना युक्तो गते मासे तु द्वादशे ।

[D7 अनेन (for एतेन). D6 अनेन विधिना यस्तु (for the prior half).]

— (L. 334) D4–7.9 हविर् (for प्रति-). — (L. 335) D4–7.9 पितरश्चैव संहृष्टाः (for the prior half). — After line 335, D4–7.9 ins. :

हव्यकव्यानि गृह्णन्ति विधिवत्सह दैवतैः ।
व्यपेतकलुषश्चापि श्रीश्चैव भजते नरम् ।
इदं चैव परं गुह्यं सदा यश इति स्मृतम् ।
दैवतेभ्योपहारांस्तु यो ददाति नरोत्तमः ।
गन्धानुलेपनं पुष्पं प्रदीपं गीतवादिनम् ।
जप्यं च शुचिना राजन्प्रतिगृह्णन्ति देवताः ।
शङ्खतूर्यनिनादैश्च उभे संध्ये तु यो नरः ।
स्वगृहे कुरुते शान्तिं तुष्यन्ते तस्य देवताः ।
नित्योपहारं देवेभ्यः प्रयच्छेत समाहितः ।
एषा शान्तिः परा नृणामेतत्परममङ्गलम् ।
परमं पावनानां च वर्धनानां च वर्धनम् ।
आज्यं धूपश्च दीपश्च तथा तूर्यस्य निस्वनः ।
अक्षयं स्वर्गमार्गं च दर्शयन्ति महोदयम् ।
संध्याउपासनं नित्यं अग्निकार्यं परं हि यत् ।
सर्वदोषहरं नृणां सर्वपापविनाशनम् ।
कृत्वा तु देवकार्याणि य उभे कुसुमोदके ।
विक्षिपेन्मम नाम्ना वै तस्य तुष्टिं ददाम्यहम् ।
अनलस्य वचः श्रुत्वा अभिनन्द्य पुनः पुनः ।
धर्मराजं तु तत्त्वेन परिपृच्छन्ति देवताः ।
ब्राह्मणाः के न भोक्तारः पितृकार्ये महात्मनः ।

[(L. 3) D4 परो गृह्यं (for परं गुह्यं). — (L. 5) D5 -वायकं; D7 -वादिकं (for °नम्). — D4 om. (hapl.) lines 7–8. D6 om. lines 7–9. — (L. 9) D7 यः प्रयच्छेत् (for प्रयच्छेत). — (L. 12) D4.6.9 आपो; D7 आज्य- (for आज्यं). — (L. 14) D4 अग्निकार्यहितं यतः (for the post. half). — (L. 16) D5 उभौ (for उभे). — (L. 17) D4 ते (for [अ]हम्). — D4 om. line 20.]

— After the above, D4–7.9 read lines 215 and 218. — (L. 336) B2.3 D8 सरहस्यः (for रहस्यः सं-). — Colophon om. in D4.7.9. — *Parvan name* : B1–4 Dn3 शांति. — *Sub-parvan* : V1 B1.3.5 Dn1.n2 D8 दानधर्म. — *Adhy. name* : B1.2.4.5 वायुरहस्यं; Dn3 देवरहस्यं. — *Adhy. no.* : V1 128; Dn1 125. — D4–7.9 नारदः (for लोमशः). — (L. 338) D4–7.9 सक्ता ये (by transp.) After the prior half, D4–7.9 read the post. half of line 340 and lines 341–342. — (L. 339) D4–7.9 उपस्थिते (for भवन्ति वै). — (L. 340) D4–7.9 om. the prior half. Dn3 परदारे (for °दार-). B2 Dn1.n3 च (for स्याद्). D4–7.9 ये (for यश्च). — (L. 341) D4–7.9 ब्रह्मस्वानां च हर्तारः समं तत्र न (D4.6.9 °ममेतन्न) संशयः. — (L. 342) D4–7.9 त्रयोपि ते (D9 ये) ह्यसंभाष्याः (for the prior half). D4.6 तु न; D7 च न (for नात्र). — After line 342, B5 ins. :

स्नातकानां च विप्राणां ये वसन्तस्तपोधनाः ।
पितरो द्रष्टुमन्येन नार्हन्ति स कदाचन ।

— (L. 343) D4–7.9 देवताश्च न तुष्यंति पूजिता ह्यपि पर्वणि. — (L. 344) D4.6.9 दाराणि; D5.7 दारा हि (for वै दारांस्). — (L. 345) D4 न च; D6.7.9 च न (for हि न). D4–7.9 श्रद्दधानेन सर्वदा (D4.9 °था) (for the post. half). — (L. 347) V1 B Dn1.n3 D8 यथा; Dn2 तथा (for सदा). — (L. 348) D4–7.9 द्वादशीं पूर्णमासीं च (for the prior half). D5–7.9 घृताक्षतान् (for °तम्). — For lines 349–350, D4–7.9 subst. :

ब्राह्मणाय प्रयच्छन्ति तस्य पुण्यफलं शृणु ।
यथा समुद्रः सोमश्च क्षीणो (वृद्धो?) भवति पर्वणि ।
एवमस्य प्रदातारो वर्धन्तीह नरा भुवि ।

[(L. 3) D5 तस्य (for अस्य). D4 वर्धयंति (for वर्धन्तीह).]

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दानेनैतेन तेजस्वी वीर्यवांश्च भवेन्नरः ।
प्रीतश्च भगवान्सोम इष्टान्कामान्प्रयच्छति ।
श्रूयतां चापरो धर्मः सरहस्यो महाफलः ।
इमं कलियुगं प्राप्य मनुष्याणां सुखावहः ।
कल्यमुत्थाय यो मर्त्यः स्नातः शुक्लेन वाससा ।
तिलपात्रं प्रयच्छेत ब्राह्मणेभ्यः समाहितः ।
तिलोदकं च यो दद्यात्पितॄणां मधुना सह ।
दीपकं कृसरं चैव श्रूयतां तस्य तत्फलम् ।
तिलपात्रे फलं प्राह भगवान्पाकशासनः ।
गोप्रदानं च यः कुर्याद्भूमिदानं च शाश्वतम् ।
अग्निष्टोमं च यो यज्ञं यजेत बहुदक्षिणम् ।
तिलपात्रं सहैतेन समं मन्यन्ति देवताः ।
तिलोदकं सदा श्राद्धे मन्यन्ते पितरोऽक्षयम् ।
दीपे च कृसरे चैव तुष्यन्तेऽस्य पितामहाः ।
स्वर्गे च पितृलोके च पितृदेवाभिपूजितम् ।
एवमेतन्मयोद्दिष्टमृषिदृष्टं पुरातनम् ।

Colophon.

भीष्मः ।

ततस्त्वृषिगणाः सर्वे पितरश्च सदेवताः ।
अरुन्धतीं तपोवृद्धामपृच्छन्त समाहिताः ।
समानशीलां वीर्येण वसिष्ठस्य महात्मनः ।
त्वत्तो धर्मरहस्यानि श्रोतुमिच्छामहे वयम् ।
यत्ते गुह्यतमं भद्रे तत्प्रभाषितुमर्हसि ।

अरुन्धती ।

तपोवृद्धिर्मया प्राप्ता भवतां स्मरणेन वै ।
भवतां च प्रसादेन धर्मान्वक्ष्यामि शाश्वतान् ।
सगुह्यान्सरहस्यांश्च तान्शृणुध्वमशेषतः ।
श्रद्दधाने प्रयोक्तव्या यस्य शुद्धं तथा मनः ।
अश्रद्दधानो मानी च ब्रह्महा गुरुतल्पगः ।
असंभाष्या हि चत्वारो नैषां धर्मं प्रकाशयेत् ।

— (L 351) Dn_3 D_6 -चतुर्भाग- (for °र्भागं). $D_{4.5}$ फलं विंदंति मानवाः; $D_{6.7.9}$ फलं विंदति मानवः (for the post. half). — After line 351, $D_{4-7.9}$ ins. :

अगस्त्यः ।

देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च ।
कुलान्यकुलतां यान्ति धर्मस्यातिक्रमेण तु ।
मा ददस्वेति यो ब्रूयाद्गोरग्निब्राह्मणेषु च ।
तिर्यग्योनिशतं गत्वा चण्डालेषु प्रजायते ।
मानुषं लोकमासाद्य परलोकसुखावहन् ।

[(L. 1) D_9 -विनाशे च (for °शेन). — (L. 5) D_4 -सुखावहे.]

— $D_{4-7.9}$ om. lines 352–353. — (L. 352) $B_{2.3}$ [अ]पि जायते (for भवेन्नरः). — (L. 354) $D_{4-7.9}$ श्रूयतां धर्मसर्वस्वं रहस्यं सुम(D_7 तु म)हत्फलं. — $D_{4-7.9}$ om. line 355. — (L. 355) B_3 Dn_1 इदं (for इमं). B_2 मानुषाणां (for मनुष्याणां). $B_{1.3}$ Dn_{2}. n_3 सुखावहं. —(L. 356) D_5 काल्य; $D_{6.7.9}$ काल्यम्; D_8 कल्य (for कल्यम्). $D_{4-7.9}$ स्नातो वै शुक्लवासभृत् (D_4 °ससा) (for the post. half). — (L. 357) $D_{4-7.9}$ ब्राह्मणे वेदपारगे (for the post. half). — D_4 om. from the post. half of line 358 up to the prior half of line 361. —(L. 359) $D_{5-7.9}$ तस्य पुण्यफलं शृणु (for the post. half). —$D_{5-7.9}$ om. line 360. — (L. 362) $D_{4-7.9}$ यजते वा सदाक्षिणं (for the post. half). — (L. 363) B_5 सहितेन (for सहै°). $D_{4-7.9}$ तिलपात्रसहस्रं च (D_7 तु) (for the prior half). B_2 (marg.) सममन्यंत देवताः; B_3 सम्यक्पश्यंति दे° (for the post. half). — (L. 364) $D_{4-7.8}$ च (D_5 तु) यः कुर्याद् (for सदा श्राद्धे). $D_{4-7.9}$ अश्नंति (for मन्यन्ते). — (L. 365) D_4 दीपकेन प्रकाशं च; D_5 दीपकेन कृशरया; $D_{6.7.9}$ दीपकेन कृशर्या च (for the prior half). B_5 तुष्यंति (for तुष्यन्ते). $D_{4-7.9}$ तु-(D_5 हृ)ष्यंति च हसंति च (for the post. half). —After line 365, $D_{4-7.9}$ ins. :

तिलपात्रेण वै श्राद्धं कृतं भवति शाश्वतम् ।
तिलोदकं पितॄणां तु यो ददाति दिने दिने ।
मर्त्यलोके च पितृभिः सोऽस्वर्थं पूज्यते सदा ।

[(L. 3) D_5 [ऽ]पि (for च). D_5 [ऽ]प्यर्थं (for ऽस्वर्थं).]
— $D_{4-7.9}$ om. lines 366–367. — (L. 367) Dn_2 पूर्वम् (for एवम्). V_1 B_4 -जुष्टं (for -दृष्टं). — Colophon. — *Parvan name* : $B_{1.3.4}$ Dn_3 शांति. — *Sub-parvan* : V_1 $B_{1.3-5}$ Dn_{1}. n_2 दानधर्म. — *Adhy. name* : V_1 129; B_5 120; Dn_1 126. — $D_{4-7.9}$ om. line 368. — (L. 368) D_8 पितृगणाः (for त्वृषि°). — (L. 369) $D_{4-7.9}$ परिपृच्छंति धर्मिणः; D_8 समानव्रतचारिणीं (for the post. half). — After line 369, $B_{1.2.5}$ $D_{6-7.9}$ ins. :

भवत्यानितपोवृद्धा समानव्रतचारिणी ।

[B_2 अरुंधती; $D_{4-7.9}$ सततं त्वं (for भवत्याति-).]

— Dn_{1}. n_2 om. lines 370–372. — (L. 370) $B_{4.5}$ वृत्तेन (for वीर्येण). — For line 370, $D_{4-7.9}$ subst. :

समानसारा वीर्येण दैवतैश्च न संशयः ।

— (L. 371) $D_{4-7.9}$ तव (for त्वत्तो). — For line 372, $D_{4-7.9}$ subst. :

यत्ते गुह्यं रहस्यं च धर्मं प्रेत्येह चाक्षयम् ।
सर्वदेवैः समं प्राप्तां तन्नो ब्रूहि यथातथम् ।

— (L. 373) $D_{4-7.9}$ युष्माकं वै प्रसादत्वा (for the post. half). — (L. 374) $D_{4-7.9}$ युष्मदेव (D_5 युष्माकं हि)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अहन्यहनि यो दद्यात्कपिलां द्वादशीः समाः ।
मासि मासि च सत्रेण यो यजेत सदा नरः ।
गवां शतसहस्रं च यो दद्याज्ज्येष्ठपुष्करे ।
न तद्धर्मफलं तुल्यमतिथिर्यस्य तुष्यति ।
श्रूयतां चापरो धर्मो मनुष्याणां सुखावहः ।
श्रद्दधानेन कर्तव्यः सरहस्यो महाफलः ।
कल्यमुत्थाय गोमध्ये गृह्य दर्भान्सहोदकान् ।
निषिञ्चेत गवां शृङ्गे मस्तकेन च तज्जलम् ।
प्रतीच्छेत निराहारस्तस्य धर्मफलं शृणु ।
श्रूयन्ते यानि तीर्थानि त्रिषु लोकेषु कानिचित् ।
सिद्धचारणजुष्टानि सेवितानि महर्षिभिः ।
अभिषेकः समस्तेषां गवां शृङ्गोदकस्य च ।
साधु साध्विति चोद्दिष्टं दैवतैः पितृभिस्तथा ।
भूतैश्चैव सुसंहृष्टैः पूजिता साप्यरुन्धती ।

पितामहः ।

अहो धर्मो महाभागे सरहस्य उदाहृतः ।

प्रसादेन धर्मे वक्ष्यामि ये गुणाः. — (L. 375) $D_{4-7, 9}$ सुगुह्यान्. $D_{4-7, 9}$ समाहिताः (for अशेषतः). — (L. 376) B_3 प्रयोक्तव्यं (for °व्या). $D_{4-7, 9}$ श्रद्धानः प्रमत्तेषु नित्यं श्रेयस्करा हि ये. — (L. 377) $D_{4-7, 9}$ आश्रिते यः (D_9 °तेषु) प्रहर्ता च (for the prior half). — (L. 378) $D_{4-7, 9}$ नरा ह्येते (for हि चत्वारो). B_3 धर्मान् (for धर्मं). $D_{4-7, 9}$ धर्मस्तेषां हि लुप्यते (for the post. half). — (L. 380) $D_{4, 6, 9}$ यो यजेद्दक्षिणावता; $D_{5, 7}$ ये यज्ञे दाक्षिणान्विताः (for the post. half). — (L. 381) $D_{4-7, 9}$ गोसहस्रं च यो दद्यात् (for the prior half). $D_{4-7, 9}$ कार्तिक्यां (for यो दद्याज्). — (L. 382) B_1 च (for तद्). $D_{4-7, 9}$ तत्तु धर्मफलं तस्य (for the prior half). — (L. 383) $D_{4-7, 9}$ इदं (D_5 कर्म) चैव परं गुह्यं (for the prior half). — (L. 384) $D_{4-7, 9}$ श्रूयतां धर्मसंग्रहः (for the post. half). — (L. 385) $D_{4-7, 9}$ काल्य(D_4 °ल)मुत्थाय यो मर्त्यो (for the prior half). — (L. 386) $D_{4-7, 9}$ गवां शृंगेभिषेचेत (for the prior half.). — (L. 387) $D_{4, 6, 9}$ प्रतीच्छेच्च; D_5 यं प्रतीच्छेन् (for प्रतीच्छेत). $D_{4-7, 9}$ पुण्यफलं (for धर्म°). B_2 (marg. as above). $_8$ तस्य धर्मं निबोधत (for the post. half). — (L. 388) $D_{4-7, 9}$ यानि तीर्थानि श्रूयंते (for the prior half). $D_{4-7, 9}$ कृत्स्नशः (for कानिचित्). — (L. 389) $D_{4-7, 9}$ मनीषिभिः (for महर्षिभिः). — (L. 390) $D_{4-7, 9}$ तेषु (for तेषां). — After line 390, $D_{4-7, 9}$ ins.:

अयं वै परमो धर्मो विनीतानां प्रशस्यते ।
सर्वपापहरः श्रीमान्परलोकसुखावहः ।
न व्रतं नोपवासस्तु न दानं न तपो महत् ।
स्त्रीणां धर्मो भवेन्नान्यो भर्तृशुश्रूषणात्परः ।
यो ददाति महादानं धनधान्यमनुत्तमम् ।
भर्तृविप्रियकारिण्या तद्वृथा नरको ध्रुवः ।

[(L. 2) D_9 परलोके (for °क-). — (L. 6) $D_{6, 9}$ भर्तुर् (for भर्तृ-).]

— For line 392, $D_{4-7, 9}$ subst.:

ऋषिभिश्चैव सर्वैस्तु वृद्धगर्गादिभिः सह ।

$D_{4-7, 9}$ om. the ref. — (L. 394) $D_{4-7, 9}$ भद्रं ते (for ते धन्ये). — After line 394, $D_{4-7, 9}$ ins.:

ततो देवा महाभागा ऋषयश्चापि धर्मिणः ।
पृच्छन्ति धर्मगुह्यानि वसूनथ पितॄन्गणान् ।

वसवः ।

देवताभिगमे धूपं दत्त्वा प्रज्वलितेऽनले ।
तं वन्देच्छिरसा यस्तु तस्य पुष्टिप्रदा वयम् ।
नारायणं वर्धमानाद्गवां वा वृद्धिमन्तिकात् ।
यस्तु संप्रस्थितः पश्येत्कुर्यात्तस्य प्रदक्षिणम् ।
तस्य सा सफला यात्रा सर्वकामफलप्रदा ।
धर्मोऽस्य विपुलो मुख्यो जीवितं च महोदयम् ।
यत्र वा तत्र वा सर्पं हतं वाप्यभिनन्द्य च ।
संस्कारयेच्च विधिवत्तस्य धर्मो महान्भवेत् ।
यः सर्पं हनते क्रूरः परत्र हन्यते तु सः ।
भ्रूणहत्याकृतं पापं तस्य वै भवते ध्रुवम् ।
भ्रूणहापि कुमारीं वा पन्नगीं वापि यो हनेत् ।
समो दोषस्तु संभाष्यो नरकं यात्यसौ नरः ।
वसूनां वचनं श्रुत्वा पितरो मुनिभिः सह ।
क्रमेण धर्मगुह्यानि रुद्रान्पृच्छन्ति देवताः ।

रुद्राः ।

आह्निकस्यावसाने तु गवां पादोपसेचनम् ।
तत्तस्य हरते पापं सलिलं मूर्ध्नि पातितम् ।
मृत्तिकां गृह्य यः स्नायान्नद्यास्तूभयकूलतः ।
तस्य सर्वाणि पापानि भवन्ति निहतानि वै ।
शुचिः स्नात्वा नरो यस्तु शुक्लवस्त्रधरः सदा ।
रोचनाकृतमङ्गल्यः श्वेतमाल्यानुलेपनः ।
स हि सर्वाणि पापानि कश्मलान्यशुभानि च ।
निहत्य वपुषा युक्तः हन्तॄणां हरते वपुः ।
विशुद्धकल्मषश्चापि यक्षलोकमनुव्रजेत् ।
स तत्र तेजसा युक्तो यक्षराजेन पूज्यते ।

Colophon.

भीष्मः ।

रुद्राणां वचनं श्रुत्वा परितुष्टा महर्षयः ।
आदित्यास्तमपृच्छन्त तत्रैव समरुद्गणैः ।
यस्य दैवमनायत्तं ब्राह्मणैः सह विग्रहः ।
निष्फलं जीवितं तस्य अधर्मेण च युज्यते ।
सन्ति देवाश्च सन्तश्च ब्राह्मणाः शौचमेव च ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वरं ददामि ते धन्ये तपस्ते वर्धतां सदा ।
यमः ।
रमणीया कथा दिव्या युष्मत्तो या मया श्रुता ।
श्रूयतां चित्रगुप्तस्य भाषितं मम च प्रियम् ।
रहस्यं धर्मसंयुक्तं शक्यं श्रोतुं महर्षिभिः ।
श्रद्दधानेन मर्त्येन आत्मनो हितमिच्छता ।
न हि पुण्यं तथा पापं कृतं किंचिद्विनश्यति ।
पर्वकाले च यत्किंचिदादित्यं चाधितिष्ठति ।
प्रेतलोकं गते मर्त्ये तत्तत्सर्वं विभावसुः ।
प्रतिजानाति पुण्यात्मा तच्च तत्रोपयुज्यते ।
किंचिद्धर्मं प्रवक्ष्यामि चित्रगुप्तमतं शुभम् ।
पानीयं चैव दीपं च दातव्यं सततं तथा ।
उपानहौ च च्छत्रं च कपिला च यथातथम् ।
पुष्करे कपिला देया ब्राह्मणे वेदपारगे ।

अस्ति धर्मश्च सत्यं च दानं च विधिवत्सदा ।
वेदाः सत्यं स्मृतिः सत्यं यस्यैतत्तु मतं सदा ।
श्रद्दधानः स मनुजः स्वर्गलोके महीयते ।
आदित्यानां वचः श्रुत्वा सर्वे समभिनन्द्य च
तत्रैव विबुधाः सर्वे पृष्टवन्तः पितामहम् ।
पितामहः ।
देवतानामृषीणां च पितॄणां मातृभिः सह ।
आदित्यरुद्रसाध्यानां वसूनां च सुरोत्तमाः ।

[(L. 3) D_4 गत्वा प्रज्वलनेन वै (for the post. half). —(L. 4) $D_{5.7}$ तद् (for तं). — (L. 9) $D_{6.9}$ तं हतं चाभिनंद्य च; D_7 हतं तं चाभिनंद्य च (for the post. half). — (L. 11) D_5 ह्न्यते स परत्र ह (for the post. half). — (L. 12) $D_{5.7}$ [ए]व च भवेद् (for वै भवते). — (L. 14) $D_{6.7}$ संभाव्यो (for °ष्यो). —(L. 17) $D_{6.7.9}$ गवां पादावसेचनं (for the post. half). — D_5 om. lines 18–19. — Colophon. *Sub-parvan:* $D_{5-7.9}$ दानधर्म. — *Adhy. name :* $D_{4-7.9}$ देवरहस्यं. — (L. 31) D_4 om. the prior half. D_4 reads from the post half up to the post. half of line 34 after the prior half of line 397. — (L. 32) D_4 अस्ति धर्मस्य शौचस्य (for the prior half). — (L. 35) D_5 सर्वे (for सर्वे). — (L. 38) D_5 आदित्यानां च रुद्राणां (for the prior half).]

$D_{4-7.9}$ om. the ref. — (L. 395) $B_{1.3}$ Dn_3 रमणीयाः. $B_{1.3}$ Dn_3 मया श्रुताः; D_8 श्रुता मया (by transp.). $D_{4-7.9}$ श्रुता युष्माभिरव्ययाः (for the post. half). — (L. 396) $D_{5-7.9}$ च मम (by transp.). — $D_{4-7.9}$ transp. lines 397 and 398. — (L. 397) $D_{5-7.9}$ शक्यमाचरितुं नरैः (for the post. half). — (L. 398) $D_{4-7.9}$ परलोकसुखावहं (for the post. half). — After line 398, $D_{4-7.9}$ ins.:

पितामहवचः श्रुत्वा चित्रगुप्तो महायशाः ।
देवताः प्रणतो भूत्वा भाषते धर्मसंहितम् ।

— (L. 400) Dn_3 [उ]प- (for [अ]धि-). — (L. 401) V_1 B_4 Dn_3 प्रेतलोक-; $B_{2.3}$ Dn_2 °के (for °कं). $D_{4-6.9}$ प्रेतलोकगतस्यापि (for the prior half). $D_{4-7.9}$ पुण्यपापैर् (for तत्तत्सर्वं). — (L. 402) Dn_3 तत्र (for तच्च). $D_{4-7.9}$ प्रजानाति हि (D_4 सुप्रजानां हि; D_5 प्रजानामिह) तत्सर्वं तत्रैव ह्युपभुंजति. — After line 402 $D_{4-7.9}$ ins. :

इहैव यत्कृतं कर्म यथाकालमुपस्थितम् ।
सहस्रसंमितं तत्तु तत्र तस्योपतिष्ठति ।
पर्यायः सर्वभूतेषु मन्तव्यः कालपर्ययात् ।
तत्र शीतं तथैवोष्णं कण्टका नरके बहु ।

[(L. 1) D_5 चैव (for [ए]व यत्). D_4 इहैव तत्कृतं कार्यं (for the prior half). — (L. 2) D_7 तं (for तत्). D_4 -तिष्ठते (for °ति).]

— After the above, $D_{4-7.9}$ read lines 412–413. — $D_{4-7.9}$ om. line 403. — After line 405, $D_{4-7.9}$ ins. :

अग्निहोत्रं च पुण्याख्यं यत्र कौतूहलं हि नः ।
तेषु दानेषु यो धर्मस्तं भवान्वक्तुमर्हति ।
पृथक्कारेण सर्वेषां श्रोतुमिच्छाम तत्त्वतः ।
चित्रगुप्तः ।
तेषु दानेषु ये धर्मास्ताञ्शृणुध्वं समाहिताः ।
श्रद्दधानेषु मर्त्येषु प्रेत्यलोके सुखावहम् ।
नित्यार्जवा ये विनये रताश्च
स्वाध्याययज्ञादिपथे निविष्टाः ।
नित्यप्रदानोद्धरणेषु युक्ता
यमस्य वक्त्रं न समीक्षते नराः ।
अवनितलगमनादिव्यनगां रम्यचित्रसंवीताम् ।
वैतरणीं नाम नदीं सुखेन गच्छन्ति वै मनुजाः ।
प्रियंवदा नित्यमनोविशुद्धा
ये तेषु वेत्रग्रहपङ्कगूढाः ।
सा एव भूयस्त्वतिदुर्विगाहा
कर्मानुरूपा भवतीह पुंसाम् ।
प्रायेण हिंसाभिरताः कृतघ्ना
मित्रद्रुहो नैकृतिकाः शठाश्च ।
ये कूटमानेषु रता मनुष्या-
स्ते पूयशोणितवहाः प्रतरन्ति सर्वे ।
ये धर्मशीला व्रतिनो मनुष्याः
पुण्योदकाः शीतजला हि तेषाम् ।
पिबन्ति ते वै सलिलं हि तत्र

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अग्निहोत्रं च यत्नेन सर्वशः प्रतिपालयेत् ।
अयं चैवापरो धर्मश्चित्रगुप्तेन भाषितः ।
फलमस्य पृथक्त्वेन श्रोतुमर्हन्ति सत्तमाः ।
प्रलयं सर्वभूतैश्च गन्तव्यं कालपर्ययात् ।
तत्र दुर्गमनुप्राप्ताः क्षुत्तृष्णापरिपीडिताः ।
दह्यमाना विपच्यन्ते न तत्रास्ति पलायनम् ।
अन्धकारं तमो घोरं प्रविशन्त्यल्पबुद्धयः ।
तत्र धर्मं प्रवक्ष्यामि येन दुर्गाणि संतरेत् ।
अल्पव्ययं महार्थं च प्रेत्य चैव सुखोदयम् ।
पानीयस्य गुणा दिव्याः प्रेतलोके विशेषतः ।
तत्र पुण्योदका नाम नदी तेषां विधीयते ।
अक्षयं सलिलं तत्र शीतलं ह्यमृतोपमम् ।
स तत्र तोयं पिबति पानीयं यः प्रयच्छति ।
प्रदीपस्य प्रदानेन श्रूयतां गुणविस्तरः ।
तमोऽन्धकारं नियतं दीपदो न प्रपश्यति ।
प्रभां चास्य प्रयच्छन्ति सोमभास्करपावकाः ।
देवताश्चास्य मन्यन्ते विमलाः सर्वतोदिशः ।
द्योतते च यथादित्यः प्रेतलोकगतो नरः ।
तस्माद्दीपः प्रदातव्यः पानीयं च विशेषतः ।
कपिलां ये प्रयच्छन्ति ब्राह्मणे वेदपारगे ।
पुष्करे च विशेषेण श्रूयतां तस्य यत्फलम् ।
गोशतं सवृषं तेन दत्तं भवति शाश्वतम् ।
पापं कर्म च यत्किंचिद्ब्रह्महत्यासमं भवेत् ।
शोधयेत्कपिला ह्येका प्रदत्तं गोशतं यथा ।

यश्चापि तोयस्य हि संप्रदाता ।
तत्र पुण्योदका नाम नदी ह्यमृतवाहिनी ।
अक्षयं ह्यमृतं तत्र पीयते मानवोत्तमैः ।
तत्र तोयकृतैः कामैर्यैः स तृप्तो नरोत्तमः ।
देवतास्तस्य सुप्रीताः प्रयच्छन्ति महोदयम् ।
स्वर्गलोकं च विपुलं सर्वकामपुरस्कृतम् ।
तत्रैव दीयमानस्य श्रूयतां गुणविस्तरः ।
देवतायतने नित्यं द्विजावासे प्रतिश्रये ।
आकाशे चत्वरे वापि यः प्रयच्छति दीपकम् ।
तस्य सोमश्च सूर्यश्च ह्यग्नयश्च प्रभां ददुः ।
देवताश्चानुमन्यन्ते विमलाः सर्वतोदिशः ।
सोमसूर्याग्नितप्ताभ्यां दीपदाश्चोत्तमाः शुभाः ।
प्रदीपयन्ति तं देशं यत्र यत्र स गच्छति ।
दिव्यहंसप्रयुक्तेन विमानेन स गच्छति ।
अप्सरोगणसंवीते स्वर्गलोके महीयते ।

[(L. 1) D_4 अग्निहोत्रे च पुण्यानां (for the prior half). — (L. 2) D_4 ये धर्मास् (for यो धर्मस्). — (L. 3) $D_{4, 5}$ इच्छामि (for °म). — (L. 10) D_5 -संत्रित्रां (for -संवीताम्). — (L. 14) D_5 -दुर्विगाह्या (for °गाहा). — (L. 22) D_4 ये (for ते). — D_4 om. line 24. — (L. 26) D_4 यः सं- ; D_5 सुसं- (for यः स). — D_4 om. from the post. half of line 33 up to the prior half of line 35. — (L. 37) D_4 -संकीर्णे (for -संवीते).]

After the above, $D_{4-7.9}$ read lines 426–434. $D_{5-7.9}$ om. line 406. — (L. 407) B_1 परि (for प्रति-). $D_{5-7.9}$ कृच्छ्रेष्वप्यनुपालयेत् (for the post. half). — After line 407, $D_{4-7.9}$ ins. :

अग्नयोऽप्यनुगच्छन्ति परलोकगतं नरम् ।
तारयन्ति च दुर्गेषु अग्नयो नात्र संशयः ।
देवताश्चोपतिष्ठन्ति अग्निहोत्रेषु जुह्वताम् ।

[D_4 om. line 1. — (L. 2) D_5 ह्यग्नयो (for अ°). — (L. 3) D_5 ह्यग्नि- (for अग्नि-).]

— After the above, $D_{4-7.9}$ read lines 436–439. $D_{4-7.9}$ om. lines 408–411. — (L. 409) B_3 पृथक्चैव (for °क्त्वेन). — (L. 410) B_3 -भूतेन (foo -भूतैश्च). — (L. 412) D_4 कुत एवं परां गतिं ; $D_{5-7.9}$ कुत एव परा गतिः (for the post. half). — After line 413, $D_{4-7.9}$ ins.:

तत्र धर्ममिमं पुण्यं युक्तदानमहोदयम् ।
हृद्या यस्य प्रपा ग्रीष्मे शीततोयाः सुसंस्कृताः ।
अशून्या न च संक्लिष्टाः सुसंमृष्टोपलेपनाः ।
अनेकवस्तुसंयुक्तास्तस्य पुण्यफलं शृणु ।
हरशीर्षच्युता दिव्या सलिलाढ्या विभूषिता ।
त्रिलोकसहिता देवी सा वै नित्यं विधीयते ।
तच्छ्रुत्वा पितरः सर्वे ऋषयश्च सुरैः सह ।
प्रत्यूचुस्तं महात्मानं चित्रगुप्तं महामतिम् ।
अहो बहुविधो धर्मो यस्त्वया समुदाहृतः ।

[(L. 8) D_7 ते (for तं).]

— $D_{4-7.9}$ om. lines 414–425. — (L. 416) Some MSS. प्रेत्यलोके (for प्रेत°). — (L. 420) D_8 दीपस्य वै प्रदाने च (for the prior half). — (L. 421) Dn_3 दीपदानां प्रणश्यति (for the post. half). — (L. 422) B_4 सोमपावकभास्कराः (for the post. half). — (L. 423) Dn_2 [अ]नु- (for [अ]स्य). B_3 विमलाः सर्वदेवताः (for the post. half). — (L. 424) Dn_2 तथा (for यथा). Dn_3 प्रेत्य- (for प्रेत-). D_8 -गते (for -गतो). — D_4 om. (hapl.) lines 426–432. — (L. 426) $D_{5-7.9}$ कपिलां यः प्रयच्छेत (for the prior half). — (L. 427) $D_{5-7.9}$ पुष्करेषु (for °रे च). $D_{5-7.9}$ फलं तस्येह शृण्वथ (for the post. half). — (L. 430) B_5 प्रदातुं गोशतं तथा (for the post. half). — For lines 429–430, $D_{5-7.9}$ subst. :

मुच्यते पापकं कर्म ब्रह्महत्याद्दृते कृतम् ।
विधिवत्कपिलां दत्त्वा शोधयेत्सर्वकिल्बिषात्

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तस्मात्तु कपिला देया कौमुद्यां ज्येष्ठपुष्करे ।
न तेषां विषमं किंचिन्न दुःखं न च कण्टकाः ।
उपानहौ च यो दद्यात्पात्रभूते द्विजोत्तमे ।
छत्रदाने सुखां छायां लभते परलोकगः ।
न हि दत्तस्य दानस्य नाशोऽस्तीह कदाचन ।
चित्रगुप्तमतं श्रुत्वा हृष्टरोमा विभावसुः ।
उवाच देवताः सर्वाः पितॄंश्चैव महाद्युतिः ।
श्रुतं हि चित्रगुप्तस्य धर्मगुह्यं महात्मनः ।
श्रद्दधानाश्च ये मर्त्या ब्राह्मणेषु महात्मसु ।
दानमेतत्प्रयच्छन्ति न तेषां विद्यते भयम् ।
धर्मदोषास्त्विमे पञ्च येषां नास्तीह निष्कृतिः ।
असंभाष्या अनाचारा वर्जनीया नराधमाः ।
ब्रह्महा चैव गोघ्नश्च परदाररतश्च यः ।
अश्रद्दधानश्च नरः स्त्रियं यश्चोपजीवति ।
प्रेतलोकगता ह्येते नरके पापकर्मिणः ।
पच्यन्ते वै यथा मीनाः पूयशोणितभोजनाः ।
असंभाष्याः पितॄणां च देवानां चैव पञ्च ते ।
स्नातकानां च विप्राणां ये चान्ये च तपोधनाः ।

Colophon.

भीष्मः ।
ततः सर्वे महाभागा देवाश्च पितरश्च ह ।
ऋषयश्च महाभागाः प्रमथान्वाक्यमब्रुवन् ।

विशुद्धकल्मषः सोऽपि स्वर्गलोके महीयते ।

— D4–7.9 om. line 431. D4–7.9 transp. lines 432 and 433. —(L. 432) D4–7.9 न तस्य चाशुभं किंचित् (for the prior half). D4–7.9 शूलं (for दुःखं). —(L. 433) D4–7.9 तु (for च). B2 (marg. as above) द्विजातये (for द्विजोत्तमे). D4–7.9 स्नातकाय द्विजाय वै (D4.5 °तये) (for the post. half). — After line 433, D4–7.9 ins.:

महारूपाणि यानानि उपागच्छन्ति तं नरम् ।
कामभोगाश्च विपुला निर्वाणं चोत्तमं परम् ।

[(L. 1) D6.9 om. from the post. half up to the post. half of line 2. D4 उपगच्छंति ये नराः (for the post. half).]

—(L. 434) D4–7.9 छत्रदानैर्न दह्यंति परलोकगता नराः. — After line 434, D5–7.9 ins.:

अन्नदानकृतच्छाया उपागच्छन्ति शाश्वतम् ।

— After the above, D4–7.9 read line 407. D4–7.9 om. line 435. —(L. 435) B5 न शोचंति (for नाशोऽस्तीह). —(L. 436) D4–7.9 -वचः (for -मतं). Dn3 कृष्णलोमा (for हृष्टरोमा). D4–7.9 हृष्टपुष्टास्तपोधनाः (for the post. half). —(L. 437) D4–7.9 समूचुस्तदा सर्वे पितृभिः सहिताः सुराः. —(L. 438) V1 B2–5 Dn3 D8 श्रुतं वश्; B1 Dn2 श्रुतं च; D4–7.9 श्रूयतां (for श्रुतं हि). — After line 438, D4–7.9 ins.:

नृणां श्रेयस्करं नित्यं परवाक्यं सुखावहम् ।

[D4 दिव्यं (for नित्यं).]

—(L. 439) D4–7.9 श्रद्धाना नरा (D5 नरे) ये तु ब्राह्मणेभ्यो मनीषिणः. — After line 439, D4–7.9 ins.:

एवमेतत्प्रशंसन्ति चित्रगुप्तमतं तु ये ।
ते प्राप्नुवन्ति विपुलं फलं प्रेत्यगता नराः ।
अर्जितं च शुभं तत्र उपभोक्ष्यन्ति मानवाः ।
लोकपालास्तदा सर्वे चत्वारो विष्णुना सह ।
पूजयन्तः सुरश्रेष्ठाश्चित्रगुप्तं महामतिम् ।
साधु निष्कल्मषो धर्मो सरहस्य उदाहृतः ।
व्यक्तः सूक्ष्मश्च श्रेष्ठश्च प्रेत्यलोके न संशयः ।
तच्छ्रुत्वा लोकपालानां भाषितं विष्णुना सह ।
चित्रगुप्तस्ततो वाक्यं प्राञ्जलिः प्रत्यभाषत ।
कर्मदोषास्त्विमे पञ्च येषां नास्तीह निष्कृतिः ।
ब्राह्मणान्द्विषते यस्तु गुरुदारांश्च यो व्रजेत् ।
राष्ट्रे कृशश्च यो मर्त्यो भवेद्दुर्भिक्षकाङ्क्षि वै ।
स्त्रियो ये चोपजीवन्ति अश्रद्धेयश्च पञ्चमः ।
एते निष्क्रान्तधर्माणो नीचाचारा दुरात्मनः ।
पच्यमाना यथा मीनाः पूयशोणितभोजनाः ।
निष्कृतिं नाधिगच्छन्ति जायमानाः पुनः पुनः ।
दुष्कृतं ते तु विस्तारमुपभुञ्जन्ति पावकम् ।
नित्यमेव त्वसंभाष्याः पितॄणां सह दैवतैः ।
स्नातकानां तु विप्राणां साधूनां च महात्मनाम् ।
चित्रगुप्तस्य तच्छ्रुत्वा भाषितं बहुविस्तरम् ।
सुप्रीतमनसो देवाः स्वयंभुसहितास्तदा ।
प्रतिगृह्णन्ति ते धर्मं चित्रगुप्तमतं शुभम् ।

Colophon.

[(L. 1) D7 यं (for ये). —(L. 4) D4.6.9 चत्वरे (for चत्वारो). —(L. 7) D6.7.9 प्रेतलोके (for प्रेत्य°). —(L. 14) D4.6.7.9 निराचारा (for नीचा°). — D4 om. (hapl.) lines 15–16. —(L. 17) D5 पातकं; D6 पाचकं (for पावकम्). —(L. 18) D4.6.9 असंभाष्याः. — Colophon. *Sub-parvan*: D5–7.9 दानधर्म. — *Adhy. name*: D4–7.9 देवरहस्यं.]

— D4–7.9 om. lines 440–448. —(L. 445) V1 सर्वे (for ह्येते). B5 -कर्मणा (for -कर्मिणः). —(L. 446) Dn3 प्रोच्यंते (for पच्यन्ते). —(L. 448) D8 [s]पि चान्ये (for चान्ये च). — Colophon. — *Parvan name*: B1.3.4 Dn3 शांति. — *Sub-parvan*: V1 B1.3–5 Dn1.n2 दानधर्म. — *Adhy. name*: V1 B1.2.4.5 Dn1.n2 D8 चित्रगुप्तरहस्यानि. — *Adhy. no.*: V1 130; B5 121; Dn1 127. —(L. 449) D4–7.9 ततः सुरगणाः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भवन्तो वै महाभागा अपरोक्षनिशाचराः ।
उच्छिष्टानशुचीन्क्षुद्रान्कथं हिंसथ मानवान् ।
के च स्मृताः प्रतीघाता येन मर्त्यान्न हिंसथ ।
रक्षोघ्नानि च कानि स्युर्यैर्गृहेषु प्रणश्यथ ।
श्रोतुमिच्छाम युष्माकं सर्वमेतन्निशाचराः ।
प्रमथाः ।
मैथुनेन सदोच्छिष्टाः कृते चैवाधरोत्तरे ।
मोहान्मांसानि खादेथ वृक्षमूले च यः स्वपेत् ।
आमिषं शीर्षतो यस्य पादतो यश्च संविशेत् ।
तत उच्छिष्टकाः सर्वे बहुच्छिद्राश्च मानवाः ।
उदके चाप्यमेध्यानि श्लेष्माणं च प्रमुञ्चति ।
एते भक्ष्याश्च वध्याश्च मानुषा नात्र संशयः ।
एवंशीलसमाचारान्धर्षयामो हि मानवान् ।
श्रूयतां च प्रतीघातान्यैर्न शक्नुम हिंसितुम् ।
गोरोचनासमालम्भो वचाहस्तश्च यो भवेत् ।
घृताक्षतं च यो दद्यान्मस्तके तत्परायणः ।
ये च मांसं न खादन्ति तान्न शक्नुम हिंसितुम् ।
यस्य चाग्निर्गृहे नित्यं दिवा रात्रौ च दीप्यते ।
तरक्षोश्चर्म दंष्ट्राश्च तथैव गिरिकच्छपः ।
आज्यधूमो बिडालश्च च्छागः कृष्णोऽथ पिङ्गलः ।
येषामेतानि तिष्ठन्ति गृहेषु गृहमेधिनाम् ।
तान्यधृष्याण्यगाराणि पिशिताशैः सुदारुणैः ।
लोकानस्मद्विधा ये च विचरन्ति यथासुखम् ।
तस्माद्देतानि गेहेषु रक्षोघ्नानि विशां पते ।
एतद्वः कथितं सर्वं यत्र वः संशयो महान् ।

Colophon.

सर्वे पितरो मुनयस्तथा. — (L. 450) V_1 पितरश् (for ऋषयश्). $D_{4-7.9}$ स्वयंभुवा सह विभो (for the prior half). — (L. 451) $D_{4-7.9}$ भवंतो हि महात्मानो (for the prior half). V_1 ह्यपरोक्ष-; $D_{4-7.9}$ अप्रमेया (for अपरोक्ष-). — After line 451, $D_{4-7.9}$ ins. :

पृच्छाम सरहस्यानि धर्मगुह्यानि तत्त्वतः ।

— (L. 452) $D_{4-7.9}$ उच्छिष्टे वाथ च्छिद्रे वा (for the prior half). $D_{4-7.9}$ ये तु (for कथं). — (L. 454) B_1 गृहे च (for गृहेषु). — For lines 453–455, $D_{4-7.9}$ subst. :

मानुषाणां च ये दोषा वध्यावध्याश्च यादृशाः ।
प्रतिघातं च युष्माकं तत्त्वमाख्यातुमर्हथ ।

— After the ref., $D_{4-7.9}$ ins. :

सर्वमेतत्प्रवक्ष्याम यथा हिंसाम मानुषान् ।
यथोच्छिष्टांश्च छिद्रेषु वध्यावध्याश्च यादृशाः ।
रक्षोघ्नानि च सर्वाणि दुराधर्षाश्च ये नराः ।
प्रतिघातश्च योऽस्माकं श्रूयताममरोत्तमाः ।

— (L. 456) $D_{4-7.9}$ उच्छिष्टो मैथुने यस्तु प्रकुर्वीताधरोत्तरं. — (L. 457) $D_{4-7.9}$ यश्च भक्षयते मांसं (for the prior half). D_8 न च (for च यः). $D_{8.9}$ शयेत् (for स्वपेत्). — (L. 458) $D_{4-7.9}$ शयानस्य सुरोत्तमाः (for the post. half). — After line 458, $D_{4-7.9}$ ins. :

शयने चैव संध्यायां तथा शेते चतुष्पथे ।
देवगोष्ठे शुचिस्थाने अस्तमेति च भास्करे ।

— (L. 460) $D_{4-7.9}$ उदके मेध्यमूत्रे वा (for the prior half). $D_{4.6.9}$ श्लेष्मं चापि ; $D_{5.7}$ श्लेष्माणं वा (for °णं च). $B_{1.5}$ वि- (for प्र-). — B_5 ins. after line 460 :

देवागारे च यस्तिष्ठेदस्तं याते दिवाकरे ।

While $D_{4-7.9}$ ins. after line 460 :

खादमानश्च यो गच्छेच्छोणितार्द्रश्च यो भवेत् ।
सूतिका चापि या नारी तैलाभ्यक्तश्च यो नरः ।

[(L. 2) D_4 भवेत् (for नरः).]

— (L. 461) $D_{4-7.9}$ मनुष्याः शौचवर्जिताः (for the post. half). — (L. 462) $D_{4-7.9}$ भक्षयामो ($D_{6.9}$ °म) नराधमान् (for the post. half). — After line 462, $D_{4-7.9}$ ins. :

अनुच्छिष्टाश्च ये नित्यं ये नित्यं कृतमङ्गलाः ।
भूतैरन्यैः पिशाचैर्वा दुराधर्षा हि ते सदा ।

[(L. 1) $D_{6.7.9}$ अनुच्छिद्रा ह्यच्छिद्राश्च (for the prior half). — (L. 2) D_7 च (for वा).]

— (L. 463) $B_{4.5}$ हि (for च). $D_{4-7.9}$ गृहेभ्यो मंगलैः शुभैः (for the post. half). — $D_{4-7.9}$ om. (hapl.) lines 464–466. — (L. 464) Dn_2 एवं तया (for गोरोचना-). B_2 -समालब्धो ; D_5 °रब्धो (for °लम्भो). — (L. 467) $D_{4-7.9}$ यस्याग्निः सततं गेहे (for the prior half). — After line 469, $D_{4-7.9}$ ins. :

यत्रैतानि सदा गेहे न तं शक्ताः स्म हिंसितुम् ।
नैषा लङ्घयितुं शक्या मर्यादा लोकविश्रुता ।
स्थापिता विबुधैः पूर्वं युष्माभिर्धर्मरक्षिभिः ।

[(L. 1) D_4 ते ; D_5 तु (for तं).]

— $D_{4-7.9}$ om. lines 470–472. — (L. 472) V_1 B D_8 महासुखाः ; Dn_2. n_3 यथासुखाः (for °खम्). — (L. 473) $D_{4-7.9}$ निवासयेत् (for विशां पते). — (L. 474) $D_{4-7.9}$ एतेषु (for एतद्वः). $D_{4-7.9}$ मा भूद्वः संशयोत्र तु (for the post. half). — Colophon. — *Parvan name* : B_{1-4} Dn_3 शांति. — *Sub-parvan* : V_1 $B_{1.3-5}$ Dn_1. n_2 D_8 दानधर्म. — *Adhy. name* : V_1 B Dn D_8 प्रमथानां रहस्यानि. — *Adhy. no.* : V_1 131 ; B_5

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

भीष्मः ।

ततः पद्मप्रतीकाशः पद्मोद्भूतः पितामहः ।
उवाच वचनं देवान्वासवं च शचीपतिम् ।
अयं महाबलो नागो रसातलचरो बली ।
तेजस्वी रेणुको नाम महासत्त्वपराक्रमः ।
अतितेजस्विनः सर्वे महावीर्या महागजाः ।
धारयन्ति महीं कृत्स्नां सशैलवनकाननाम् ।
भवद्भिः समनुज्ञातो रेणुकस्तान्महागजान् ।
धर्मगुह्यानि सर्वाणि गत्वा पृच्छतु तत्र वै ।
पितामहवचः श्रुत्वा ते देवा रेणुकं तदा ।
प्रेषयामासुरव्यग्रा यत्र ते धरणीधराः ।

रेणुकः ।

अनुज्ञातोऽस्मि देवैश्च पितृभिश्च महाबलाः ।
धर्मगुह्यानि युष्माकं श्रोतुमिच्छामि तत्त्वतः ।
कथयध्वं महाभागा यद्वस्तत्त्वं मनीषितम् ।

दिग्गजाः ।

कार्त्तिके मासि चाश्लेषा बहुलस्याष्टमी शिवा ।
तेन नक्षत्रयोगेन यो ददाति गुडौदनम् ।
इमं मन्त्रं जपञ्श्राद्धे यताहारो ह्यकोपनः ।
बलदेवप्रभृतयो ये नागा बलवत्तराः ।
अनन्ता ह्यक्षया नित्यं भोगिनः सुमहाबलाः ।
तेषां कुलोद्भवा ये च महाभूता भुजंगमाः ।
ते मे बलिं प्रयच्छन्तु बलतेजोऽभिवृद्धये ।
यदा नारायणः श्रीमानुज्जहार वसुंधराम् ।
तद्बलं तस्य देवस्य धरामुद्धरतस्तथा ।
एवमुक्त्वा बलिं तत्र वल्मीके तु निवेदयेत् ।
गजेन्द्रकुसुमाकीर्णं नीलवस्त्रानुलेपनम् ।
निर्वपेत्तं तु वल्मीके अस्तं याते दिवाकरे ।
एवं तुष्टास्ततः सर्वे अधस्ताद्भारपीडिता ।
श्रमं तं नावबुध्यामो धारयन्तो वसुंधराम् ।

122; Dn_1 128. — *Śloka no.* : Dn_2 14. — $D_{1-7, 9}$ om. the ref. — (L. 475) $D_{1-7, 9}$ प्रमथैरेवमुक्तस्तु (for the prior half). D_{1-7} पद्मगर्भः (for पद्मोद्भूतः). — (L. 476) $D_{1-7, 9}$ विष्णोः प्रोवाच वचनं वासवश्च शचीपतिः. — (L. 477) $D_{1-7, 9}$ -तलोत्थितः (for -चरो बली). — (L. 478) $D_{1-7, 9}$ दिशागजसदानुगः (for the post. half). — (L. 479) B_3 दिशां (for महा-). $D_{1-7, 9}$ ये च सर्वे महावीर्या महाकाया दिशां गजाः. — (L. 480) $D_{1-7, 9}$ सर्वां (for कृत्स्नां). — For lines 481–484, $D_{1-7, 9}$ subst. :

तानपृच्छत्ततो नागान्रेणुको वै दिशां गजान् ।
धर्मगुह्यानि तेषां च तं वयं नोदयामहे ।
विष्णोः शक्रवचः श्रुत्वा ते वै देवगणास्तदा ।
ऊचुः सर्वे वदस्वेति रेणुकं नागसत्तमम् ।
दिशां गजानां ये धर्माः श्रोतुमिच्छामहे वयम् ।
बाढमित्येव सो नागः प्राञ्जलिः प्रत्यभाषत ।
गच्छामि युष्मद्वचनाद्रसातलतलं सुराः ।
भवतां च प्रसादेन समेष्यामि दिशां गजैः ।
सरहस्याश्च ये धर्माः कथयिष्यन्ति मे सुराः ।

भीष्मः ।

ततो रसातलं प्राप्तो रेणुकस्तान्दिशां गजान् ।
उवाच वचनं धीमान्महातेजा महीधरान् ।

[(L. 3) D_7 तथा (for तदा).]

— (L. 485) V_1 अनुज्ञातैश्च (for °तोऽस्मि). — After line 485, $D_{1-7, 9}$ ins. :

एभिश्च समहाभागैर्वृद्धगर्गादिभिः स्वयम् ।

— (L. 486) $D_{4, 5}$ नान्यथा; $D_{6, 7, 9}$ चान्यथा (for तत्त्वतः). — After line 486, $D_{1-7, 9}$ ins. :

रेणुकेन तथा वृत्तं नागानां समुदाहृतम् ।
धर्मं प्रति कथास्तत्र नागानां परिवर्धिताः ।
विमृश्याथ ततः सर्वे धर्माधर्मविनिश्चयम् ।
प्रत्यूचू रेणुकं सर्वे शृणु धर्मविनिश्चयम् ।
ब्राह्मणः क्षत्रियो वापि वैश्यः शूद्रोऽपि चोरगः ।

[(L. 5) D_5 चानघ (for चोरगः).]

— $D_{1-7, 9}$ om. line 487. $D_{1-7, 9}$ om. the ref. — (L. 488) B_3 मिता; $B_{4, 5}$ शुभा; $D_{4, 5}$ ध्रुवं (for शिवा). — $D_{1-7, 9}$ om. lines 490–497. — (L. 490) V_1 $B_{1, 4}$ Dn_2, n_3 B_2 नित्यं (for श्राद्धे). — (L. 491) नागा ये (by transp.). — Dn_1 om. line 493. — (L. 493) V_1 B Dn_2, n_3 कुलान्वया (for कुलोद्भवा). — (L. 494) V_1 B D_3 प्रतीच्छंतु (for प्रय°). $B_{3, 4}$ -तेजोवि-; B_5 -तेजोति- (for -तेजोऽभि-). — (L. 496) B_2 (marg. as above). $_5$ तदा (for तथा). B_3 धरामुद्धरतस्तदा (for the post. half). — B_3 om. lines 498–501. — (L. 498) $D_{1-7, 9}$ -कुसुमाकीर्णैर्. $D_{1-7, 9}$ -लेपनैः (for °नम्). — (L. 499) D_3 तद् (for तं). B_3 निर्वपेत च वल्मीके (for the prior half). V_1 ह्यस्तं (for अस्तं). $D_{1-7, 9}$ वल्मीके वाथ (D_5 °पि) तद्देशं गच्छत्यस्तं दिवाकरे. — (L. 500) $D_{1-7, 9}$ तेन हृष्टा वयं सर्वे (for the prior half). $D_{1-7, 9}$ धरणी- (for अधस्ताद्). — (L. 501) D_7 श्रमं ततो न बुध्याम (for the prior half). $D_{1-7, 9}$ महीमिमां (for वसुंधराम्). — (L. 502) $D_{4, 5}$ एतं (for एवं). Dn_1 सर्वे; Dn_2 सर्वं (for धर्मं). $D_{4, 5}$ यत्र गच्छंति मानवाः; $D_{6, 7, 9}$ यः प्रयच्छति मानवः (for the post. half). — For lines 503–505, $D_{1-7, 9}$ subst. :

आतिथ्यं कृतमस्माकं यावल्लोकाः प्रतिष्ठिताः ।
यस्तु संवत्सरं पूर्णमेतद्दानं प्रयच्छति ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एवं मन्यामहे धर्मं भारार्ता निरपेक्षिणः ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यद्युपोषितः ।
एवं संवत्सरं कृत्वा दानं बहुफलं लभेत् ।
वल्मीके बलिमादाय तद्धो बहुफलं मतम् ।
ये च नागा महावीर्यास्त्रिषु लोकेषु कृत्स्नशः ।
कृतातिथ्या भवेयुस्ते शतं वर्षाणि तत्त्वतः ।
दिग्गजानां च तच्छ्रुत्वा देवताः पितरस्तथा ।
ऋषयश्च महाभागाः पूजयन्ति स्म रेणुकम् ।

Colophon.

महेश्वरः ।

सारमुद्धृत्य युष्माभिः साधु धर्म उदाहृतः ।
धर्मगुह्यमिदं मत्तः शृणुध्वं सर्व एव ह ।
येषां धर्माश्रिता बुद्धिः श्रद्दधानाश्च ये नराः ।
तेषां स्यादुपदेष्टव्यः सरहस्यो महाफलः ।
निरुद्विग्नस्तु यो दद्यान्मासमेकं गवाह्निकम् ।
एकभक्तं तथाश्नीयाच्छ्रूयतां तस्य यत्फलम् ।
इमा गावो महाभागाः पवित्रं परमं स्मृताः ।
त्रीँल्लोकान्धारयन्ति स्म सदेवासुरमानुषान् ।
तासु चैव महापुण्यं शुश्रूषा च महाफलम् ।
अहन्यहनि धर्मेण युज्यते वा गवाह्निके ।
मया ह्येता ह्यनुज्ञाताः पूर्वमासन्कृते युगे ।
ततोऽहमनुनीतो वै ब्रह्मणा पद्मयोनिना ।
तस्माद्व्रजस्थानगतस्तिष्ठत्युपरि मे वृषः ।
रमेऽहं सह गोभिश्च तस्मात्पूज्याः सदैव ताः ।
महाप्रभावा वरदा वरान्दद्युरुपासिताः ।
ता गावोऽस्यानुमन्यन्ते सर्वकर्मसु यत्फलम् ।
तस्य तत्र चतुर्भागो यो ददाति गवाह्निकम् ।

Colophon.

कार्त्तिकं मासमस्माकं श्रद्धानः समाहितः ।
निर्वाप्यं परमं तेन दत्तं भवति शाश्वतम् ।

— (L. 504) Dn1. n3 एतत् (for एवं). B1. 3 Dn1 भवेत् (for लभेत्). — (L. 505) Dn1 महत् (for मतम्). — (L. 506) D7 om. लोकेषु. D4–7. 9 विश्रुताः (for कृत्स्नशः). — (L. 507) D4–7. 9 त्रिंशद्वर्षाणि रेणुक (for the post. half). — After line 507, D4–7. 9 ins. :

एकेनैव तु दानेन मनुजः सुखभाग्भवेत् ।
प्राप्नोति विपुलं स्वर्गं सर्वकामांश्च पुष्कलान् ।

— For lines 508–509, D4–7. 9 subst. :

दिशां गजानां तद्वाक्यं श्रुत्वा श्रावयतो गजः ।
देवतानां पितॄणां च श्रुत्वा प्रीता भवंस्तदा ।
विबुधाः पितृभिः सार्धं पूजयित्वेदमब्रुवन् ।
एवमेतद्यथात्थ त्वमुरग सत्यमस्तु तत् ।

[(L. 2) D4 तथा (for तदा). — (L. 4) D6. 7. 9 यथार्थत्वम् (for °त्थ त्वम्).]

— Colophon. — *Parvan name* : B1. 3. 4 शांति. — *Sub-parvan* : V1 B1. 3. 5 Dn D4–9 दानधर्म. —*Adhy. name* : V1 B1. 2. 4. 5 Dn D8 दिग्गजानां रहस्यानि; D4. 6. 7. 9 देवरहस्यं; D6 वेदरहस्यं. — *Adhy. no.* : V1 133; B5 123; Dn1 129. — *Śloka no.* : Dn1. n2 18. — Before the ref., D4–7. 9 ins. :

स्कन्दस्य वचनं श्रुत्वा पितरः सह दैवतैः ।
पृच्छन्ति धर्मगुह्यानि महादेवमुमापतिम् ।

—(L. 510) D4–7. 9 सारभूतास्त्विमे धर्माः सरहस्यानुचिंतिताः. —(L. 511) D4–7 इमं (for इदं). D4–7. 9 पुण्यं; D8 यत्नः (for मत्तः). V1 च; B1–3 Dn2 n3 हि (for ह). D4–7. 9 तच्छृणुध्वं समाहिताः (for the post. half). — D4–7. 9 om. lines 512–513. —(L. 512) B2 (marg. as above) विद्याश्रिता (for धर्मा°). B2 (marg. as above). 3 सर्वशः (for ये नराः). —(L. 515) V1 एकभुक्तं (for °भक्तं). D4–7. 9 एकभक्तेन चाश्नीयात्तस्य पुण्यफलं त्विदं (D4 °लान्वितः). — (L. 516) D4–7. 9 महादोग्ध्रीः (for °भागाः). D4–7. 9 पवित्रा लोकमातरः (for the post. half). — (L. 517) D4–7. 9 धारयंति च त्रील्लो(D5. 7 त्रयो लो)कान् (for the prior half). — After line 517, D4–7. 9 ins. :

गावस्तेषां प्रयच्छन्ति सर्वधर्मेषु यत्फलम् ।
गच्छते च गवां लोकं न पुण्यं न च पातकम् ।

[(L. 2) D4. 6. 9 हि (for the second च).]

— D4–7. 9 om. (hapl.) lines 518–526. —(L. 518) B4. 5 तथा (for महा-). —(L. 519) Bom. ed. गवाह्निकः (for °के). —(L. 524) Dn1. n2 वरं (for वरान्). — After line 524, V B Dn2. n3 D8 ins. :

अवन्दिताश्च हिंसेयुस्तस्मात्पूज्यतमा मताः ।

[B5 अपूजिताश्च (for अवन्दि°). B4. 5 स्मृताः (for मताः).]

—(L. 525) B2. 3 -धर्मेषु (for -कर्मसु). —(L. 526) B2 तत्र तस्य (by transp.); Dn3 तस्य तस्य. — Colophon. — *Parvan name* : B1. 3. 4 शांति. — *Sub-parvan* : V1 B3–5 दानधर्म. — *Adhy. name* : V1 B1. 2. 4. 5 महादेवरहस्यानि. — *Śloka no.* : Dn1. n2 9. — Before the ref., D4–7. 9 ins. :

ततः सूर्यप्रतीकाशं रक्तपद्मसमप्रभम् ।
शांकरं नोदयामासुः कार्त्तिकेयं महाद्युतिम् ।
ततः शक्तिधरः श्रीमान्धर्मगुह्यमिदं जगौ ।
सारभूतास्त्विमे धर्मा भवद्भिर्य उदाहृताः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

स्कन्दः ।

समाप्यनुमतो धर्मस्तं शृणुध्वं समाहिताः ।
नीलषण्डस्य शृङ्गाभ्यां गृहीत्वा मृत्तिकां तु यः ।
अभिषेकं त्र्यहं कुर्यात्तस्य धर्मं निबोधत ।
शोधयेदशुभं सर्वमाधिपत्यं परत्र च ।
यावच्च जायते मर्त्यस्तावच्छूरो भविष्यति ।
इदं चाप्यपरं गुह्यं सरहस्यं निबोधत ।
प्रगृह्यौदुम्बरं पात्रं पक्वान्नं मधुना सह ।
सोमस्योत्तिष्ठमानस्य पौर्णमास्यां बलिं हरेत् ।
तस्य धर्मफलं नित्यं श्रद्दधाना निबोधत ।
साध्या रुद्रास्तथादित्या विश्वेदेवास्तथाश्विनौ ।
मरुतो वसवश्चैव प्रतिगृह्णन्ति तं बलिम् ।
सोमश्च वर्धते तेन समुद्रश्च महोदधिः ।
एष धर्मो मयोद्दिष्टः सरहस्यः सुखावहः ।

विष्णुः ।

धर्मगुह्यानि सर्वाणि देवतानां महात्मनाम् ।
ऋषीणां चैव गुह्यानि यः पठेदाह्निकं सदा ।
शृणुयाद्वानसूयुर्यः श्रद्दधानः समाहितः ।
नास्य विघ्नः प्रभवति भयं चास्य न विद्यते ।
ये च धर्माः शुभाः पुण्याः सरहस्या उदाहृताः ।
तेषां धर्मफलं तस्य यः पठेत जितेन्द्रियः ।
नास्य पापं प्रभवति न च पापेन लिप्यते ।

— (L. 527) $D_{4-7.9}$ समा(D_4 तम)प्यनुमतान्धर्मास् (for the prior half). $D_{5-7.9}$ तान् (for तं). D_4 शृणुध्वं सुसमाहिताः (for the post. half). — After line 527, $D_{4-7.9}$ ins. :

आषाढे शुक्लषष्ठ्यां तु रविभूतां धुतोदकान् ।

— (L. 528) $D_{4-7.9}$ गोवृषस्य विषाणाभ्यां मृत्तिकां गृह्य यो नरः. — After line 528, $D_{4-7.9}$ ins. :

प्रकुर्वीताभिषेकं तु तस्य पापं प्रणश्यति ।

— (L. 529) $D_{4-7.9}$ तस्य पुण्यफलं महत् (for the post. half). — B_5 om. (hapl.) 530–532. — (L. 530) B_2 (marg. as above). $_3$ च विंशति (for परत्र च). $D_{4-7.9}$ शोधयेत्पापकं कर्म इहलोके परत्र च. — (L. 531) $D_{4-7.9}$ यावज्जीवति मर्त्यः स तावद्यातति चंद्रवत्. — $D_{4.6.7.9}$ om. line 532. D_5 om. 532–534. — (L. 532) D_8 [ए]व (for [अ]पि). — (L. 533) $D_{6.7.9}$ गृह्य च (for प्रगृह्य). $D_{4-7.9}$ यावकं (for पक्वान्नं). — After line 533, $D_{4.6.7.9}$ ins.. :

श्वेतानि चैव पुष्पाणि साक्षतानि घृतं दधि ।

— (L. 534) $D_{4.6.7.9}$ उदयं तस्य सोमस्य (for the prior half). — (L. 535) $D_{4-7.9}$ दिव्यं (for नित्यं). $D_{4-7.9}$ श्रद्दधानस्य वै सुराः (for the post. half). — For lines 536–537, $D_{4-7.9}$ subst. :

आदित्या वसवो रुद्रा अश्विनौ समरुद्गणाः ।
लोकपालाश्च वायुश्च हुताशः शक्र एव च ।

— After line 538, $D_{4-7.9}$ ins. :

सुप्रीताश्च प्रयच्छन्ति यथेप्सितमरिंदमाः ।
शाश्वतं नाकपृष्ठे च वासं सर्वे विमत्सराः ।
चक्षुष्मतां तु मर्त्यास्ते मृतानां सोम एव च ।
सौम्यतां च ततो यान्ति पौर्णमास्यां तु चन्द्रमाः ।
यच्चास्य दुष्कृतं किंचित्तत्सर्वं व्यपकर्षति ।
पुष्टिं च विपुलां दद्यात्परितुष्टो महोदधिः ।

— $D_{4-7.9}$ om. line 539. $D_{4-7.9}$ om. the ref. — (L. 540) $D_{4-7.9}$ देवतानां च गुह्यानि पितॄणां मातृभिः सह. — (L. 541) $D_{4.7.9}$ ऋषीणां प्रमथानां च (for the prior half). — D_5 om. lines 542–543. — (L. 542) $D_{4.6.7.9}$ श्रद्धानः (for [अ]नसूयुर्यः). D_4 om. from the post. half up to the prior half of line 544. $D_{6.7.9}$ om. 543. — (L. 545) $D_{4-7.9}$ तथा (for तेषां). D_5 यः पठेद्विजितेंद्रियः (for the post. half). — After line 545, $D_{4-7.9}$ ins. :

नैव पापानि चाप्नोति इहलोके परत्र च ।
यत्फलं लभते मर्त्यस्तत्फलं चापि शृण्वतः ।
यथा क्रतुशतैरिष्टं यथा दानं च पुष्करे ।
ब्राह्मणेषु च प्रीतेषु तत्फलं शाश्वतं ध्रुवम् ।
यच्च दुश्चरितं किंचित्पितृभिः पूर्वजैः कृतम् ।
तच्च शोधयते सर्वं वियोनिं न च गच्छति ।
धर्मवृद्धिं च वै देवास्तस्य कुर्युर्मया सह ।
विचरध्वं यथोत्साहमृषयः पितरस्तथा ।
श्रद्धानः पठेद्यस्तु शृणुयाद्वा समाहितः ।
अपुत्रो लभते पुत्रानन्धो लभति चक्षुषी ।
अविद्यो लभते विद्यां ब्राह्मणो वेदपारगः ।
दरिद्रो लभते ह्यर्थाञ्शिल्पं लभति शिल्पितः ।
वणिग्वै लभते लाभं बद्धो मुच्येत बन्धनात् ।
व्याधितो मुच्यते रोगात्कामार्थी काममाप्नुयात् ।
युद्धे जयं च लभते मृतो लभति सद्गतिम् ।

भीष्मः ।

इत्युक्तो लोकनाथेन शंकरेण महात्मना ।
विबुधाः पितरश्चैव ऋषयः समरुद्गणाः ।
एवमस्तु विभो शर्व कृतोऽस्माकमनुग्रहः ।
यस्त्विमं शृणुयान्नित्यं पठेद्वापि समाहितः ।
वयमप्याश्रयान्सर्वे गच्छामोऽन्धकसूदन ।

Colophon.

[(L. 1) $D_{4.6.9}$ च (for [ए]व). — (L. 3) D_5 यथा क्रतुभिरिष्टं च (for the prior half). — (L. 12)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पठेद्वा श्रावयेद्वापि श्रुत्वा वा लभते फलम् ।
भुञ्जते पितरो देवा हव्यं कव्यमथाक्षयम् ।
श्रावयंश्चापि विप्रेन्द्रान्पर्वसु प्रयतो नरः ।
ऋषीणां देवतानां च पितॄणां चैव नित्यदा ।
भवत्यभिमतः श्रीमान्धर्मेषु प्रयतः सदा ।
कृत्वापि पापकं कर्म महापातकवर्जितम् ।
रहस्यधर्मं श्रुत्वेमं सर्वपापैः प्रमुच्यते ।

भीष्मः ।

एतद्धर्मरहस्यं वै देवतानां नराधिप ।
व्यासोद्दिष्टं मया प्रोक्तं सर्वदेवनमस्कृतम् ।
पृथिवी रत्नसंपूर्णा ज्ञानं चेदमनुत्तमम् ।
इदमेव ततः श्राव्यमिति मन्येत धर्मवित् ।
नाश्रद्दधानाय न नास्तिकाय
न नष्टधर्माय न निर्गुणाय ।
न हेतुदुष्टाय गुरुद्विषे वा
नानात्मभूताय निवेद्यमेतत् ।

Colophon.

14A

V_1 B Dn $D_{1, 2, 4-9}$ Cv cont. :

युधिष्ठिरः ।

के भोज्या ब्राह्मणस्येह के भोज्याः क्षत्रियस्य ह ।
तथा वैश्यस्य के भोज्याः के च शूद्रस्य भारत ।

भीष्मः ।

ब्राह्मणा ब्राह्मणस्येह भोज्या ये चैव क्षत्रियाः ।
वैश्याश्चापि तथा भोज्याः शूद्राश्च परिवर्जिताः ।
ब्राह्मणाः क्षत्रिया वैश्या भोज्या वै क्षत्रियस्य ह ।
वर्जनीयास्तु वै शूद्राः सर्वभक्ष्या विकर्मिणः ।
वैश्यास्तु भोज्या विप्राणां क्षत्रियाणां तथैव च ।
नित्याग्नयो विविक्ताश्च चातुर्मास्यरताश्च ये ।
शूद्राणामथ यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम् ।
मलं नृणां स पिबति मलं भुङ्क्ते जनस्य च ।
शूद्राणां यस्तथा भुङ्क्ते स भुङ्क्ते पृथिवीमलम् ।
पृथिवीमलमश्नन्ति ये द्विजाः शूद्रभोजिनः ।
शूद्रस्य कर्मनिष्ठायां विकर्मस्थोऽपि पच्यते ।
ब्राह्मणः क्षत्रियो वैश्यो विकर्मस्थश्च पच्यते ।
स्वाध्यायनिरता विप्रास्तथा स्वस्त्ययने नृणाम् ।
रक्षणे क्षत्रियं प्राहुर्वैश्यं पुष्ट्यर्थमेव च ।
करोति कर्म यद्वैश्यस्तद्गत्वा ह्युपजीवति ।
कृषिगोरक्ष्यवाणिज्यमकुत्सा वैश्यकर्मणि ।
शूद्रकर्म तु यः कुर्यादवहाय स्वकर्म च ।
स विज्ञेयो यथा शूद्रो न च भोज्यः कदाचन ।
चिकित्सकः काण्डपृष्ठः पुराध्यक्षः पुरोहितः ।
सांवत्सरो वृथाध्यायी सर्वे ते शूद्रसंमिताः ।
शूद्रकर्मस्वथैतेषु यो भुङ्क्ते निरपत्रपः ।
अभोज्यभोजनं भुक्त्वा भयं प्राप्नोति दारुणम् ।

D_5 शिल्पगः (for शिल्पितः). — (L. 13) D_4 वणिजो (for °ग्वै). $D_{6, 9}$ लभंते वाणिजो लाभं (for the prior half). — (L. 14) D_5 रोगी (for रोगात्). — (L. 15) $D_{4, 6, 9}$ मर्त्यलोके च सद्गतिं (for the post. half). — (L. 17) D_5 ऋषयश् (for पितरश्). D_5 पितरः (for ऋषयः). — Colophon. *Sub-parvan* : $D_{5, 6, 9}$ दानधर्म. — *Adhy. name* : $D_{4-7, 9}$ देवरहस्यानि.]

पिङ्गलं विकृतं भाति रूपं ते सुभयानकम् ।
भस्मदिग्धं विरूपाक्षं तीक्ष्णदंष्ट्रं जटाकुलम् ।
व्याघ्रोरगत्वक्संवीतं कपिलश्मश्रुसंततम् ।
रौद्रं भयानकं घोरं शूलपट्टससंयुतम् ।
किमर्थमीदृशं रूपं तन्मे शंसितुमर्हसि ।

महेश्वरः ।

तदहं कथयिष्यामि शृणु तत्त्वं समाहिता ।
द्विविधो लौकिको भावः शीतमुष्णमिति प्रिये ।
तयोर्विग्रथितं सर्वं सौम्याग्नेयमिदं जगत् ।
सौम्यत्वं सततं विष्णौ मय्याग्नेयं प्रतिष्ठितम् ।
अनेन वपुषा नित्यं सर्वलोकान्बिभर्म्यहम् ।
रौद्राकृति विरूपाक्षं शूलपट्टससंयुतम् ।
आग्नेयमिति मे रूपं देवि लोकहिते रतम् ।
यद्यहं विपरीतः स्यामेतत्त्यक्त्वा शुभानने ।
तदैव सर्वलोकानां विपरीतं प्रवर्तते ।
तस्मान्मयेदं ध्रियते रूपं लोकहितैषिणा ।
इति ते कथितं देवि किं भूयः श्रोतुमिच्छसि ।

उमा ।

भगवन्देवदेवेश शूलपाणे वृषध्वज ।
किमर्थं चन्द्ररेखा ते शिरोभागे विरोचते ।
श्रोतुमिच्छाम्यहं देव तन्मे शंसितुमर्हसि ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि शृणु कल्याणि कारणम् ।
पुराहं कारणाद्देवि कोपयुक्तः शुचिस्मिते ।
दक्षयज्ञवधार्थाय भूतसंघसमावृतः ।
तस्मिन्क्रतुवधे घोरे यज्ञभागनिमित्ततः ।

$T_{2.3}$ G subst. :

इतश्चरन्ति निघ्नन्तः प्राणिनो भृशमेव च ।
[T_2 तु; G_{1-3} हि (for च).]

— (L. 375) D_{10} T G transp. क्षयं याते and प्राणिहीने. — (L. 376) T_3 $G_{1.3.4}$ च; M_4 ह (for हि). — (L. 377) T_1 मत्वा (for ज्ञात्वा). D_{10} $T_{2.3}$ G_2 ततो (for तदा). — (L. 378) D_{10} $T_{2.3}$ G -हितार्थं (for -दयार्थं). — T_1 om. line 379. — (L. 380) T_1 $G_{1.3}$ तस्माच् (for अ°). T_2 श्मशानं (for °नान्). T_1 G_{1-3} मे वासं (for मेध्यं तु). T_3 कश्चिद् (for किंचिद्). — (L. 381) D_{10} T_3 G M_4 निःसंपातान् (for °तं). — (L. 382) $T_{2.3}$ G च (for तु). $T_{1.3}$ संनिवेशयं (for संन्यवे°). — After line 382, T_1 reads line 392, repeating it in its proper place. — T_1 om. (hapl.) line 383. — (L. 383) D_{10} $T_{2.3}$ G_4 -भूतानां (for -लोकानां). — (L. 384) T_2 शयितुम् (for वसि°). D_{10} अपि नासितुमुत्सहे (for the post. half). — (L. 385) T_1 -निवेशाय (for -निवासाय). — T_1 om. line 386. G_2 om. lines 386–388. — (L. 387) T_2 न चरद्भिर् (for आच°). — T_1 om. lines 389–391. — (L. 389) D_{10} $T_{2.3}$ $G_{3.4}$ अभि-
(for भीम-). — (L. 391) D_{10} आगंतव्यम् (for न गन्त°).
T_2 स्थितः; G_2 स्मृतं; G_4 श्रुतिः (for स्थितिः). — (L.
394) T_2 चरंति (for च घ्नन्ति). T_1 G_2 च (for [इ]ह).
D_{10} $T_{1.3}$ G M_1 कंचन (for किं°). — (L. 395) D_{10}
$T_{2.3}$ G_{2-4} तांस्तु; M_{2-4} तान्स्म (तस्माल्). T_1 निवसामि
(for रमयामि). — After line 396, T_1 ins. an addl.
colophon [*Adhy. no. : 202*]. — (L. 398) D_{10} $T_{2.3}$
G_{3-4} तु (for सु-). — (L. 399) T_1 भयंकरं (for जटा-
कुलम्). — (L. 400) D_{10} $T_{2.3}$ G व्याघ्रोदर- (for °रग-).
$M_{1.3}$ कपिलं (for °ल-). — M_4 om. (hapl.) from रौद्रं
(in line 401) up to सौम्यत्वं सततं (in line 406).
— (L. 402) D_{10} $T_{2.3}$ G M_1 त्वीदृशं (for ई°).
— (L. 403) D_{10} $T_{2.3}$ G_4 समाहिते (for °हिता).
—(L. 405) D_{10} T_2 G_4 नि-; $T_{1.3}$ G_{1-3} हि (for वि-).
— (L. 408) M_3 रौद्राकृतेर् (for °कृति). G_2 शूलपट्टसम-
न्वितं (for the post. half). — (L. 411) D_{10} T_3 तथा
(for तदा). — (L. 415) T_2 चंद्रलेखा (for °रेखा).
— G_2 om. (hapl.) lines 416–418. —T_1 महेशः (for
°श्वरः). — (L. 419) M_4 दक्षयज्ञे (for °यज्ञ-). $T_{1.2}$
G -संघैः (for -संघ-). — After line 419, M_{1-3} ins.:

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

देवा विभ्रंशितास्ते वै येषां भागः क्रतौ कृतः ।
सोमस्तत्र मया देवि कुपितेन भृशार्दितः ।
पश्यंश्चानपराधी सन्पादाङ्गुष्ठेन पीडितः ।
तथा विनिकृतेनाहं सामपूर्वं प्रसादितः ।
तन्मे चिन्तयतश्चासीत्पश्चात्तापः पुनः प्रिये ।
तदाप्रभृति सोमं हि शिरसा धारयाम्यहम् ।
एवं मे पापहानिस्तु भवेदिति मतिर्मम ।
तदाप्रभृति वै सोमो मूर्ध्नि संदृश्यते सदा ।

नारदः ।

एवं ब्रुवति देवेशे विस्मिताः परमर्षयः ।
वाग्भिः साञ्जलिमालाभिरभितुष्टुवुरीश्वरम् ।
नमः शंकर देवेश नमः सर्वजगद्गुरो ।
नमो देवादिदेवाय नमः शशिकलाधर ।
नमो घोरतराद्घोर नमो रुद्र भयंकर ।
नमः शान्ततराच्छान्त नमश्चन्द्रस्य पालक ।
नमः सोमाय देवाय नमस्तुभ्यं चतुर्मुख ।
नमो भूतपते शंभो जह्नुकन्याम्बुशेखर ।
नमस्त्रिशूलहस्ताय पन्नगाभरणाय च ।
नमोऽस्तु विषमाक्षाय दक्षयज्ञप्रदाहक ।
नमोऽस्तु बहुनेत्राय लोकरक्षणतत्पर ।
अहो देवस्य माहात्म्यं महादेवस्य वै कृपा ।
एवं धर्मपरत्वं च देवदेवस्य चार्हति ।
एवं ब्रुवत्सु मुनिषु वचो देव्यब्रवीद्धरम् ।
प्रीत्यर्थं च मुनीनां सा क्षणज्ञा परमं हितम् ।
भगवन्देवदेवेश सर्वलोकनमस्कृत ।
अस्य वै ऋषिसंघस्य मम च प्रियकाम्यया ।
वर्णाश्रमगतं धर्मं वक्तुमर्हस्यशेषतः ।
न तृप्तिरस्ति देवेश श्रवणीयं हि ते वचः ।
सधर्मचारिणी चेयं भक्त्या चेयमिति प्रभो ।
वक्तुमर्हसि देवेश लोकानां हितकाम्यया ।
याथातथ्येन तत्सर्वं वक्तुमर्हसि शंकर ।

Colophon.

महेश्वरः ।

हन्त ते कथयिष्यामि यत्ते देवि मनःप्रियम् ।
शृणु तत्सर्वमखिलं धर्मं वर्णाश्रमाश्रितम् ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चेति चतुर्विधाः ।
ब्रह्मणा विहिताः पूर्वं लोकतन्त्रमभीप्सता ।
कर्माणि च तदर्हाणि शास्त्रेषु विहितानि वै ।
यदि चेदेकवर्णं स्याज्जगत्सर्वं विनश्यति ।
सहैव देवैर्वर्णानि चत्वारि विहितान्युत ।
मुखतो ब्राह्मणाः सृष्टास्तस्मात्ते वाग्विशारदाः ।
बाहुभ्यां क्षत्रियाः सृष्टास्तस्माद्बाहुबलान्विताः ।

अगमं तत्र तं देशं भागार्थं परिपद्रुतः ।

— (L. 420) S (except T_{3} $M_{1.3}$) क्रतुवरे (for °वधे). — (L. 421) $G_{1.3}$ हृतः (for कृतः). — (L. 422) D_{10} T_{2} भयार्दितः (for भृशा°). — (L. 423) D_{10} $T_{2.3}$ G_{4} ताडितः (for पी°). — (L. 425) T_{1} G M तु (for च). D_{10} $T_{2.3}$ G पुरा (for पुनः). — (L. 426) T_{3} वै (for हि). — (L. 427) T_{1} हि (for मे). — T_{3} G_{3} om. the ref. — Before line 431, MSS. ins. ऋषयः. — (L. 431) D_{10} S (except T_{2} $G_{1.4}$) सर्वेश (for देवेश). — T_{1} om. (hapl.) lines 433–434. — (L. 433) T_{2} नमो घोराद्घोरत्तर (for the prior half). D_{10} $T_{2.3}$ G नमो रुद्राय शंकर (for the post. half). — (L. 434) T_{3} शांतकराच् (for °तराच्). — T_{1} om. (hapl.) line 436. — (L. 438) T_{2} M_{4} नमोस्तु विषमे(M_{4} °मो)क्षाय (for the prior half). T_{2} -प्रहारक (-प्रदाहक). — (L. 440) D_{10} S (except T_{1} $G_{1.2}$ M_{2}) अहो (for महा-). — (L. 441) T_{1} अहो (for एवं). G_{2} -पतित्वं (for -परत्वं). T_{1} देवेशस्य प्रजापतेः (for the post. half). — T_{1} om. line 443. — (L. 443) $T_{2.3}$ G संप्रीत्यर्थं (for प्रीत्यर्थं च). T_{3} तु (for सा). — Before line 444, MSS. ins. उमा. — T_{1} om. line 445. — (L. 445) T_{3} G_{1-3} M [ए]व (for वै). — (L. 446) D_{10} $T_{2.3}$ G_{4} -कृतं (for -गतं). — T_{1} om. line 447. — After line 448, T_{1} ins.:

इति संचोदितो देव्या वक्तुमारभत स्वयम् ।

— T_{1} om. lines 449–450. — (L. 449) $G_{1.3}$ M_{4} लोकेश (for देवेश). — After line 449, M_{1-3} ins.:

ब्राह्मणे कीदृशो धर्मः क्षत्रिये कीदृशो भवेत् ।
वैश्ये किंलक्षणो धर्मः शूद्रे धर्मः कथंविधः ।
नारदः ।
इति संचोदितो देवः प्रियया हितकाम्यया ।

— (L. 450) D_{10} S (except G_{2}; T_{1} om.) यथातथ्येन. M_{1-3} वक्तुमेवोपचक्रमे (for the post. half). — Colophon. *Sub-parvan*: D_{10} M_{1-3} दानधर्म. — *Adhy. name*: D_{10} $T_{2.3}$ $G_{2.3}$ उमामहेश्वरसंवादे चंद्रमौलिकथनं; G_{4} M उमामहेश्वरसंवादः. — *Adhy. no.*: D_{10} $T_{2.3}$ $G_{2.4}$ 190; T_{1} M_{4} 183; $G_{1.3}$ M_{1} 184; $M_{2.3}$ 185. — M_{4} om. the ref. T_{1} महेशः (for महेश्वरः). — (L. 451) T_{2} एतत् (for हन्त). — (L. 452) T_{1} धर्मं वर्णाश्रमाश्रयं (for the post. half). — (L. 453) D_{10} $T_{2.3}$ G चतुर्विधं (for °विधाः). — (L. 455) M_{4} शास्त्राणि (for शास्त्रेषु). — (L. 456) D_{10} T_{3} G_{3} यदीदम्; T_{2} तदिदं च; $G_{1.3.4}$ M_{4} यदिदं तु (for यद्दि चेद्). — T_{1} om. line 457. — (L. 457) D_{10} $T_{2.3}$ $G_{1.3.4}$ देवि (for देवैर्). D_{10}

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उदराद्‌द्गता वैश्यास्तस्माद्वार्तोपजीविनः ।
शूद्राश्च पादतः सृष्टास्तस्मात्ते परिचारकाः ।
तेषां धर्मांश्च कर्माणि शृणु देवि समाहिता ।
विप्राः कृता भूमिदेवा लोकानां धारणे कृताः ।
ते कैश्चिन्नावमन्तव्या ब्राह्मणा हितमिच्छुभिः ।
यदि ते ब्राह्मणा न स्युर्दानयोगवहाः सदा ।
उभयोर्लोकयोर्देवि स्थितिर्न स्यात्समासतः ।
लोकेषु दुर्लभं किं तु ब्राह्मणत्वमिति स्मृतम् ।
अबुधो वा दरिद्रो वा पूजनीयः सदैव सः ।
ब्राह्मणं योऽवमन्येत निन्दयेत्क्रोशयेच्च वा ।
प्रहरेत हरेद्वापि धनं तेषां नराधमः ।
कारयेद्धीनकर्माणि कामलोभविमोहनात् ।
स च मामवमन्येत मां क्रोशति च निन्दति ।
मामेव प्रहरेन्मूढो मद्धनस्यापहारकः ।
ममैव प्रेक्षणं कृत्वा नन्दते मूढचेतनः ।
स्वाध्यायो यजनं दानं तस्य धर्म इति स्थितिः ।
कर्माण्यध्यापनं चैव याजनं च प्रतिग्रहः ।
सत्यं शान्तिस्तपः शौचं तस्य धर्मः सनातनः ।
विक्रयो रसधान्यानां ब्राह्मणस्य विगर्हितः ।
अनापदि च शूद्रान्नं वृषलीसंग्रहस्तथा ।
तप एव सदा धर्मो ब्राह्मणस्य न संशयः ।
स तु धर्मार्थमुत्पन्नः पूर्वं धात्रा तपोबलात् ।
तस्योपनयनं धर्मो नित्यं चोदकधारणम् ।
रहस्यश्रवणं धर्मो वेदव्रतनिषेवणम् ।
अग्निकार्यं परो धर्मो नित्यं यज्ञोपवीतिता ।
शूद्रान्नवर्जनं धर्मो धर्मः सत्पथसेवनम् ।
धर्मो नित्योपवासित्वं ब्रह्मचर्यं परं तथा ।
अमृताश्यं परं धर्मो गृहपुष्पबलिस्तथा ।
गृहसंमार्जनं धर्म आलेपनविधिस्तथा ।
अतिथिव्रतता धर्मो धर्मस्त्रेताग्निधारणम् ।
इष्टयः पशुबन्धाश्च विधिपूर्वं परं तपः ।
दंपत्योः समशीलत्वं धर्मो वै गृहमेधिनाम् ।
एष द्विजन्मनो धर्मो गार्हस्थ्ये धर्मधारणम् ।
यस्तु क्षत्रगतो धर्मस्त्वया देवि प्रचोदितः ।
तमहं ते प्रवक्ष्यामि शृणु देवि समाहिता ।
क्षत्रियास्तु तथा देवि प्रजानां पालने स्मृताः ।
यदि न क्षत्रियो लोके जगत्स्यादधरोत्तरम् ।
रक्षणात्क्षत्रियैरेव जगद्भवति शाश्वतम् ।

$T_{2.3}$ G_{1-3} $M_{1.2.4}$ [अ]तः (for [उ]त). — $M_{1.3}$ om. (hapl.) from the post. half of line 458 up to the prior of line 461. — (L. 459) D_{10} $T_{1.2}$ G तस्मात्ते बाहुगर्विताः ; T_3 M_4 °ते बलवत्तराः (M_4 °गर्विताः) (for the post. half). — (L. 460) T_1 G_2 ऊरुभ्याम् (for उद- राद्). M_2 तस्माद्वार्तैव जीविनं (for the post. half). — (L. 461) T_1 तु (for च). D_{10} -चारिणः (for -चारकाः). — (L. 462) $G_{1.3}$ आचार- (for धर्मांश्च). T_1 तेषां च धर्माधर्माणि (for the prior half). — (L. 463) G_{1-3} M स्मृता (for कृता). T_1 विप्राः स्मृता देवभूता (for the prior half). T_1 धृताः (for कृताः). — (L. 466) T_3 भूतिर् (for स्थितिर्). T_2 स्थितं न स्यात्समाहितं (for the post. half). — (L. 468) T_3 स दैवतः (for सदैव सः). T_1 अबुद्धा वा दरिद्रा वा पूजनीयाः सदैव ते. — (L. 469) D_{10} T G ब्राह्मणान्न (for °णं यो). T_1 क्रोधयेच् (for क्रोश°). D_{10} $T_{2.3}$ G निंदे(G_{1-3} °द्या)च्च क्रोधयेच्च वा (for the post. half). — T_1 om. line 471. — (L. 472) D_{10} $T_{2.3}$ G क्रोधयति (for क्रोशति च). T_1 प्राक्रोशति च निंदति (for the post. half). — (L. 473) T_1 एष (for एव). T_1 [अ]पकारकः (for °हारकः). — (L. 474) D_{10} M_2 प्रेषणं (for प्रेक्षणं). T G M_4 मामेव (T_3 ममैष) प्रेषणं कृत्वा (for the prior half). D_{10} $T_{2.3}$ G निंदते (for नन्दते). — (L. 475) T_2 स्मृतिः ; G_{1-3} स्मृतः (for स्थितिः). — (L. 476) G_2 कर्म हि (for कर्माणि). — (L. 479) T_1 -संगमस् (for -संग्रहस्).

— T_2 om. (hapl.) from the post. half of line 480 up to the prior half of line 482. — T_1 om. line 482. — (L. 483) D_{10} T_2 G शास्त्रस्य (for रहस्य-). — (L. 484) $M_{1.3.4}$ परं (for परो). $G_{1.3}$ om. (hapl.) from the post. half up to the prior half of line 487. D_{10} G_2 नित्ययज्ञोपवीतिना (G_2 °तता); $T_{2.3}$ G_4 नित्यं यज्ञोपवीतिना (for the post. half). — (L. 485) T_1 त्रेताग्नि- (for सत्पथ-). — (L. 487) T_1 अनृ- ताशः ; $T_{2.3}$ G_4 गृहस्थस्य (for अमृताश्यं). D_{10} G_2 गृह- स्थस्य परो धर्मो (for the prior half). D_{10} T G गृहस्था- श्रमिणस्तथा (for the post. half). — (L. 488) T_1 $G_{1.3}$ M_4 धर्मम् (for धर्म). G_2 गृहसंपूजनं धर्मम् (for the prior half). — (L. 489) $T_{2.3}$ G -प्रियता (for -व्रतता). T_1 om. the post. half and the prior half of line 490. — D_{10} G_1 om. (hapl.) lines 490-492. — (L. 490) $T_{2.3}$ G_{2-4} इष्टिर्वा (for इष्टयः). G_4 -बंधश्च. $T_{2.3}$ $G_{2.3}$ परंतप ; M परं ततः (for परं तपः). — (L. 491) G_4 हि (for वै). G_{2-4} -मेधिनः (for °नाम्). — (L. 492) $T_{2.3}$ G_{2-4} एवं (for एष). T_2 G_3 गार्हस्थं (for °स्थ्ये). — (L. 493) T_1 त्रयी विद्या- (for त्वया देवि). — (L. 494) $T_{1.2}$ G_3 M तद् (for तम्). — (L. 495) $T_{2.3}$ G ततो (for तथा). D_{10} T G M_4 द्विजानां (for प्र°). G_3 रताः (for स्मृताः). — (L. 496) D_{10} $T_{2.3}$ G क्षत्रिया ; T_1 स्वधुनृपा (for क्षत्रियो). — (L. 499) D_{10} $T_{2.3}$ G_4 दीनानां ; G_{1-3} आर्तानां (for भीतानां).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तस्याप्यध्ययनं दानं यजनं धर्मतः स्मृतम् ।
भीतानां रक्षणं चैव पापानामनुशासनम् ।
सतां संपोषणं चैव करषड्भागजीवनम् ।
उत्साहः शस्त्रजीवित्वं तस्य धर्माः सनातनाः ।
भृत्यानां भरणं धर्मः कृते कर्मण्यमोघता ।
सम्यग्रणधृतो धर्मो धर्मः पौरहितक्रिया ।
व्यवहारस्थितिर्नित्यं गुणमेतन्महीपतेः ।
आर्तहस्तप्रदो राजा धर्मं प्राप्नोत्यनुत्तमम् ।
एवं ते विहिताः पूर्वैर्धर्माः कर्मविधानतः ।
तथैव देवि वैश्याश्च लोकयात्राहिताः स्मृताः ।
अन्ये तानुपजीवन्ति प्रत्यक्षफलदा हि ते ।
यदि न स्युस्तथा वैश्या न भवेयुस्तथा परे ।
तेषामध्ययनं दानं यजनं धर्म इष्यते ।
वैश्यस्य सततं धर्मः पाशुपाल्यं कृषिस्तथा ।
अग्निहोत्रपरिस्पन्दास्त्रयो वर्णा द्विजातयः ।
वाणिज्यं सत्पथे स्थानमातिथेयं सदा भवेत् ।
विप्राणां स्वागतं न्यायो वैश्यधर्मः सनातनः ।
तिलगन्धरसाश्चैव न विक्रेयाः कथंचन ।
वणिक्पथमुपासद्भिर्वैश्यैर्वैश्यपथि स्थितैः ।
सर्वातिथ्यं त्रिवर्गस्य यथाशक्ति दिवानिशम् ।
एवं ते विहिता देवि लोकयात्रा स्वयंभुवा ।
तथैव शूद्रा विहिताः सर्वधर्मप्रसाधकाः ।
शूद्राश्च यदि ते न स्युः कर्मकर्ता न विद्यते ।
त्रयः पूर्वे शूद्रमूलास्तस्मात्कर्मकराः स्मृताः ।
ब्राह्मणादिषु शुश्रूषा दासधर्म इति स्मृतः ।
वार्ता च कारुकर्माणि शिल्पं नाट्यं तथैव च ।
अहिंसकः शुभाचारो दैवतद्विजवन्दकः ।
शूद्रो धर्मफलैरिष्टैः स्वधर्मेणोपयुज्यते ।
एवमादि तथान्यच्च शूद्रकर्म इति स्मृतम् ।
तेऽप्येवं विहिता लोके कर्मयोगाः शुभानने ।
एवं चतुर्णां वर्णानां पुण्यलोकाः परत्र च ।
विहिताश्च तथा दृष्टा यथावद्धर्मचारिणाम् ।
एष वर्णाश्रयो धर्मः कर्म चैव तदर्पणम् ।
कथितं श्रोतुकामायाः किं भूयः श्रोतुमिच्छसि ।

उमा ।

भगवन्देवदेवेश नमस्ते वृषभध्वज ।
श्रोतुमिच्छाम्यहं देव धर्ममाश्रमिणां विभो ।

महेश्वरः ।

अथाश्रमगतं धर्मं शृणु देवि समाहिता ।
आश्रमाणां तु यो धर्मः क्रियते ब्रह्मवादिभिः ।
गृहस्थः प्रवरस्तेषां गार्हस्थ्यव्रतमाश्रितः ।
पञ्चयज्ञक्रिया शौचं दारतुष्टिरतन्द्रिता ।
ऋतुकालाभिगमनं दानयज्ञतपांसि च ।
अविप्रवासस्तस्येष्टं स्वाध्यायश्चाग्निपूजनम् ।
अतिथीनामाभिमुख्यं शक्त्या चेष्टनिमन्त्रणम् ।
अनुग्रहश्च सर्वेषां मनोवाक्कायकर्मभिः ।
एवमादि शुभं चान्यत्कुर्यात्तद्वृत्तवान्गृही ।
एवं संचरतस्तस्य पुण्यलोका न संशयः ।

T_1 om. (hapl.) the post. half and the prior half of line 500. — (L. 500) G_2 संतोषणं (for संपो°). D_{10} $T_{2.3}$ G कर्म- (for कर-). — (L. 501) $T_{2.3}$ G तस्य धर्मः सनातनः (for the post. half). — (L. 502) T_3 भरणे (for °णं). — T_1 om. line 503. — (L. 503) D_{10} $T_{2.3}$ G M_4 गुणयु(D_{10} °य-; T_3 °हि)तो (for रणधृतो). — (L. 504) T_1 गुण एप (for गुणमेतन्). D_{10} $T_{2.3}$ G गुणयुक्तो महीपतिः (for the post. half). — T_1 om. lines 505–510. — (L. 505) D_{10} $T_{2.3}$ $G_{2.4}$ -वित्त- (for -हस्त-). — (L. 506) $T_{2.3}$ G विहितः (for °ताः). M पूर्वं (for पूर्वैर्). D_{10} एवं तैर्विहितैः पूर्वैर् (for the prior half). D_{10} G_2 धर्मकर्म- ; $T_{2.3}$ $G_{1.3.4}$ धर्मः कर्म- ; M_4 धर्माधर्म- (for धर्माः कर्म-). — (L. 510) G_2 उच्यते (for इष्यते). — (L. 511) D_{10} T G M_4 कर्म पशु- (for धर्मः पाशु-). — T_1 om. line 512. — (L. 513) G_2 अतिथेयंत् (for आतिथेयं). D_{10} $T_{2.3}$ $G_{1.3.4}$ आतिथेयत्वमेव च (for the post. half). — (L. 514) G M_4 स्वागत- (for °तं). — (L. 516) T_1 कार्यै (for वैश्यैर्). — M_1 om. lines 517–519. — (L. 517) T_1 निवेदनं (for दिवानिशम्). — T_1 om. line 518. — (L. 520) T_1 G_{1-3} M चेन् (for ते). — (L. 521) T_1 -मुखास् (for -मूलास्). D_{10} $T_{2.3}$ G सर्वे (for तस्माद्). T_3 कर्मकृतः (for °कराः). — (L. 522) G_4 M_3 दान- (for दास-). — T_2 om. (hapl.) lines 523–526. T_1 om. line 523. — (L. 525) T_1 -परो नित्यं ; G_2 -फलैरिष्ट (for -फलैरिष्टैः). T_1 G_2 [ए]व (for [उ]प-). $G_{2.3}$ -पद्यते (for -युज्यते). — T_1 om. (hapl.) lines 526–527. — (L. 527) G_2 कर्मयोग्याः (for °योगाः). — (L. 528) D_{10} T_3 G_3 वर्णलोकाः ; T_3 वर्णा लोकाः (for पुण्यलोकाः). — (L. 529) $T_{1.3}$ यथा (for तथा). M_3 दृष्टं (for दृष्टा). D_{10} $T_{1.2}$ G -चारिणि (for °णाम्). — T_1 om. (hapl.) from the post. half of line 530 up to the prior half of line 535. — (L. 534) D_{10} T_2 G_2 तथा (for अथ). — (L. 536) D_{10} $T_{2.3}$ G M_2 गार्हस्थ्यं धर्ममाश्रितः ; T_1 गार्हस्थ्यं व्रतमास्थितः (for the post. half). — (L. 537) G_2 अयंत्रिता (for अतन्द्रिता). — T_1 om. line 539. — (L. 539) D_{10} $T_{2.3}$ G [इ]ष्टः (for [इ]ष्टं). T_3 स्वाध्यायं चाग्निपूर्वकं (for the post. half). — (L. 542)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तथैव वानप्रस्थस्य धर्माः प्रोक्ताः सनातनाः ।
गृहवासं समुत्सृज्य निश्चित्यैकमनाः शुभैः ।
वन्यैरेव सदाहारैर्वर्तयेदिति च स्थितिः ।
भूमिशय्या जटाः श्मश्रुचर्मवल्कलधारणम् ।
देवतातिथिसत्कारो महाकृच्छ्राभिपूजनम् ।
अग्निहोत्रं त्रिषवणं नित्यं तस्य विधीयते ।
ब्रह्मचर्यं क्षमा शौचं तस्य धर्माः सनातनाः ।
एवं स विगते प्राणे देवलोके महीयते ।
यतिधर्मास्तथा देवि सङ्गांस्त्यक्त्वा यतस्ततः ।
आकिंचन्यमनारम्भः सर्वतः शौचमार्जवम् ।
सर्वत्र भैक्षचर्या च सर्वत्रैव विवासनम् ।
सदा ध्यानपरत्वं च दोषशुद्धिः क्षमा दया ।
तत्त्वानुगतबुद्धित्वं तस्य धर्मविधिर्भवेत् ।
ब्रह्मचारी च यो देवि जन्मप्रभृति दीक्षितः ।
ब्रह्मचर्यपरो भूत्वा संश्रयेद्गुरुमात्मनः ।
सर्वकालेषु सर्वत्र गुरुपूजां समाचरेत् ।
भैक्षचर्याग्निकार्यं च सदा जलनिषेवणम् ।
स्वाध्यायः सततं देवि तस्य धर्मः सनातनः ।
तस्य चेष्टा तु गुर्वर्थमाप्राणान्तमिति स्थितिः ।
गुरोरभावे तत्पुत्रे गुरुवद्वृत्तिमाचरेत् ।
एवं सोऽप्यमलाँल्लोकान्ब्राह्मणः प्रतिपद्यते ।
एष ते कथितो देवि धर्मश्चाश्रमवासिनाम् ।
चातुर्वर्ण्याश्रमे युक्तो लोक इत्येव विद्यते ।
कथितं ते समासेन किं भूयः श्रोतुमिच्छसि ।

Colophon.

उमा ।

भगवन्देवदेवेश त्रिपुरान्तक शंकर ।
अयं त्वृषिगणो देव तपस्तेप इति प्रभो ।
तपसा कर्शिता नित्यं तपोर्जनपरायणाः ।
अस्य किंलक्षणो धर्मः कीदृशश्चागमस्तथा ।
एतदिच्छाम्यहं श्रोतुं तन्मे वद वरप्रद ।

नारदः ।

एवं वदन्त्यां रुद्राण्यामृषयः साधु साध्विति ।
अब्रुवन्हृष्टमनसः सर्वे तद्गतमानसाः ।
शृण्वन्तीमृषिधर्मांस्तु ऋषयश्चाभ्यपूजयन् ।
त्वत्प्रसादाद्वयं देवि श्रोष्यामः परमं हितम् ।
धन्याः खलु वयं सर्वे पादमूलं तवाश्रिताः ।
इति सर्वे तदा देवीं वाचा समभिपूजयन् ।

महेश्वरः ।

न्यायतस्त्वं महाभागे श्रोतुकामा मनस्विनि ।
हन्त ते कथयिष्यामि मुनिधर्मं शुचिस्मिते ।
वानप्रस्थं समाश्रित्य क्रियते बहुधा नरैः ।
बहुशाखो बहुविध ऋषिधर्मः सनातनः ।

T_1 कार्यं (for चान्यत्). $M_{2.3}$ व्रतवान् (for वृत्त°). T_1 गृहस्थेन शुभात्मना (for the post. half). — G_2 om. line 543. — (L. 544) T_1 $G_{1.3}$ M_{1-3} धर्मः प्रोक्तः सनातनः (for the post. half). — T_1 om. line 545. — (L. 545) G_1 M शुभे (for शुभैः). — (L. 546) G_{1-3} समाहारैर् (for सदा°). T_2 श्रुतिः (for स्थितिः). — (L. 548) T_1 -वृद्धाभि- (for -कृच्छ्राभि-). — (L. 549) T_1 नूनं तस्य; T_2 तस्य नित्यं (by transp.). — (L. 550) T_1 तथा (for क्षमा). D_{10} $T_{2.3}$ G तस्य धर्मः सनातनः (for the post. half). — (L. 551) D_{10} T_1 G_{1-3} M सोऽपि (for स वि-). M_{1-3} विधीयते (for मही°). — (L. 552) T_3 M_3 -धर्मस् (for -धर्मास्). D_{10} T_2 G_4 गृहांस् (for सङ्गांस्). T_2 संगं त्यक्त्वा यतव्रतः (for the post. half). — (L. 554) T_2 सर्वतो (for °त्र). $G_{1.3}$ च (for [ए]व). T_1 प्र- (for वि-). — (L. 555) G_{1-3} देह- (for दोष-). — (L. 556) G_2 -बुद्धित्वात् (for °त्वं). T_2 धर्मगतिर् (for °विधिर्). — (L. 558) D_{10} T_3 G साधयेद् (for संश्र°). — T_1 om. line 559. T_2 om. lines 560–564. — (L. 561) G_2 तस्य (for देवि). — (L. 563) T_1 गुरुवृत्तिमथाचरेत् (for the post. half). — (L. 564) T_3 $G_{1.3.4}$ ब्रह्मगः (for ब्रा°). — After line 564, $G_{1.3}$ ins.:

आयुष्कामो द्विजो देवि धारयेद्ब्रह्म नित्यशः ।
मोक्षकामी च यो विप्रो भूतिकामोऽथ वा पुनः ।
पुनरावृत्तिरहितं लोकं संप्रतिपद्यते ।

— (L. 565) D_{10} $T_{2.3}$ मे (for ते). — (L. 566) D_{10} $T_{2.3}$ चतुर्वर्णाश्रमो युक्तो; T_1 G चतुर्णामाश्रमो (T_1 °मे) युक्तो (for the prior half). T_1 om. the post. half and the prior half of line 567. — Colophon. *Sub-parvan*: M_{1-3} दानधर्म. — *Adhy. name*: D_{10} T_2 G_2 उमामहेश्वरसंवादे वर्णाश्रमधर्मलक्षणकथनं; T_3 उमामहेश्वरसंवादे ऋषिचरितं; G_4 वर्णाश्रमलक्षणं; M उमामहेश्वरसंवादः. — *Adhy. no.*: D_{10} T_2 G_4 191; T_1 M_4 184; T_3 192; $G_{1.3}$ M_1 185. — (L. 569) D_{10} $T_{2.3}$ G_{2-4} M तप; T_1 तप्त (for तेप). — T_1 om. line 570. — (L. 570) D_{10} कर्शितं; T_2 G_{1-3} M_4 कर्शितो (for कर्शिता). — (L. 571) T_3 तु (for च). M_2 कीदृशाश्चागमास्तथा (for the post. half). G_{1-3} M_4 -परायणः (for °यणाः). — (L. 573) D_{10} T $G_{1.3.4}$ M_4 ब्रुवंत्यां (for वदन्त्यां). — G_2 om. the ref. — T_1 om. lines 575–579. — (L. 575) T_2 [अ]प्यपूजयन् (for [अ]भ्य°). — Before line 576, G_2 ins. ऋषय ऊचुः. — T_3 om. (hapl.) lines 576–578. — (L. 577) T_2 उपाश्रिताः (for तवा°). — T_1 om. lines — (L. 580) T_2 अहं (for हन्त).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रायशः स्वर्गभोगार्थमृषिभिः क्रियते तपः ।
तथा संचरतां तेषां देवि धर्मविधिं शृणु ।
भूत्वा पूर्वं गृहस्थस्तु पुत्रानृण्यमवाप्य च ।
कलत्रकार्यं संस्थाप्य कारणात्संत्यजेद्गृहम् ।
अवस्थाप्य मनो धृत्वा व्यवसायपुरःसरः ।
निर्द्वंद्वो वा सदारो वा वनवासाय संव्रजेत् ।
देशाः परमपुण्या ये नदीवनसमन्विताः ।
आबाधमुक्ताः प्रायेण तीर्थायतनसंयुताः ।
तत्र गत्वा विधिं ज्ञात्वा दीक्षां कुर्याद्यथाक्रमम् ।
दीक्षित्वैकमना भूत्वा परिचर्यां समाचरेत् ।
काल्योत्थानं च शौचं च सर्वदेवप्रणामनम् ।
शकृदालेपनं काये त्यक्तदोषाप्रमादिता ।
सायं प्रातश्चाभिषेकमग्निहोत्रं यथाविधि ।
कायशौचं च कार्यं च जटावल्कलधारणम् ।
सततं वनचर्या च समित्कुसुमकारणात् ।
नीवारग्रहणं काले शाकमूलोपचायनम् ।
सदायतनशौचं च तस्य धर्माय चेष्यते ।
अतिथीनामाभिमुख्यं तत्परत्वं च सर्वशः ।
पाद्यासनाभ्यां संपूजा तथाहारनिमन्त्रणम् ।
अग्राम्यपचनं काले पितृदेवार्चनं तथा ।
पश्चादतिथिसत्कारस्तस्य धर्माः सनातनाः ।
शिष्टैर्धर्मासने चैव धर्मार्थसहिताः कथाः ।
प्रतिश्रयविभागश्च भूमिशय्या शिलासु वा ।
व्रतोपवासयोगश्च क्षमा चेन्द्रियनिग्रहः ।
दिवा रात्रौ यथायोगं शौचं धर्मार्थचिन्तना ।
एवं धर्माः पुरा दृष्टाः सामान्या वनवासिनाम् ।
एवं वै यतमानस्य कालधर्मो यदा भवेत् ।
तदैव सोऽभिजायेत स्वर्गलोकं शुचिस्मिते ।
तत्र संविहिता भोगाः स्वर्गस्त्रीभिरनिन्दिते ।
परिभ्रष्टो यदा स्वर्गाद्विशिष्टस्तु भवेन्नृपु ।
एवं धर्मः सदा देवि सर्वेषां वनवासिनाम् ।
एतत्ते कथितं सर्वं किं भूयः श्रोतुमिच्छसि ।

उमा ।

भगवन्देवदेवेश ऋषीणां चरितं शुभम् ।
विशेषधर्मानिच्छामि श्रोतुं कौतूहलं हि मे ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि शृणु देवि समाहिता ।
वननित्यैर्वनरतैर्वानप्रस्थैर्महर्षिभिः ।
वनं गुरुमिवालम्ब्य वस्तव्यमिति निश्चयः ।
वीरशय्यामुपासद्भिर्वीरस्थानोपसेविभिः ।
व्रतोपवासैर्बहुभिर्ग्रीष्मे पञ्चतपैस्तथा ।
पञ्चयज्ञपरैर्नित्यं पौर्णमास्यपरायणैः ।
मण्डूकशायैर्हेमन्ते शैवालाङ्कुरभोजनैः ।
चीरवल्कलसंवीतैर्मृगाजिनधरैस्तथा ।
चातुर्मास्यपरैः कैश्चिद्देवधर्मपरायणैः ।
एवंविधैर्वनगतैस्तप्यते सुमहत्तपः ।

581, and 583–584. — (L. 583) $T_{2.3}$ G सर्वं- (for स्वर्ग-). — (L. 586) D_{10} संप्राप्य (for संस्थाप्य). — T_1 om. line 587. — (L. 588) G_2 निर्दारो (for निर्द्वंद्वो). — T_1 om. lines 590–591. — (L. 593) $G_{1.3}$ शौच- देश-; M_4 सर्वभूत- (for सर्वदेव-). T_1 सर्वदेवेषु वंदनं (for the post. half). — T_1 om. line 594. — (L. 594) G_3 M काले (for काये). M_4 om. (hapl.) from the post. half up to the prior half of line 598. T_2 G_3 त्यक्तदोषप्रमादिता; $M_{2.3}$ °रोपाप्रमादिना (for the post. half). — (L. 595) T_1 transp. आभिषेकं and आग्निहोत्रं. D_{10} $T_{2.3}$ G_{1-3} M चाग्निहोत्रं (for अग्नि°). — (L. 596) D_{10} T $G_{2.4}$ काले; $G_{1.3}$ M_1 काल- (for काय-). T_1 स्याज् (for the second च). G_1 -धारिणः (for -धारणम्). — (L. 598) T_3 निवानाश्रयणं काले (for the prior half). — (L. 599) T_1 तथा (for सदा). — (L. 600) D_{10} $T_{2.3}$ G सर्वदा (for °शः). — T_1 om. line 601. — (L. 601) D_{10} $T_{2.3}$ G संपूज्य (for °जा). T_3 [आ]तिथ्याहार- (for तथाहार-). — (L. 602) $G_{1.3}$ M_4 ततः (for तथा). — (L. 603) D_{10} तस्य धर्मः सनातनः (for the post. half). — T_1 om. line 604. — (L. 604) T_3 शिष्टे (for शिष्टैर्). $G_{2.3}$ धर्मासनैश् (for °सने). G_1 शिष्टैः सहासनैश्चैव (for the prior half). — T_1 om. lines 607–608. — (L. 607) D_{10} $T_{2.3}$ $G_{3.4}$ -रात्रं (for रात्रौ). $M_{3.4}$ तथा (for यथा-). M_4 धर्मस्य (for धर्मार्थ-). D_{10} $T_{2.3}$ G शौचं धर्मस्य चिंतनं (for the post. half). — (L. 610) D_{10} $T_{2.3}$ G -जयति (for -जायेत). — (L. 611) D_{10} $T_{2.3}$ $G_{1.3.4}$ संविदिता (for °हिता). — (L. 612) T_1 जायते स सदा नृपु (for the post. half). — (L. 614) $T_{1.2}$ देवि (for सर्वं). — G_2 om. the ref. — (L. 615) T_1 M_2 (*inf. lin.*) ऋषीणां परमं श्रुतं (for the post. half). — G_2 om. the ref. T_1 महेशः (for महेश्वरः). — (L. 618) T_3 वनचरैर् (for °रतैर्). T_1 महात्मभिः (for महार्षिभिः). — (L. 621) D_{10} G_3 बहुलैर् (for °भिर्). T_1 ग्रीष्मे पंचतपोन्वितैः (for the post. half). — T_3 om. (hapl.) lines 622–624. — (L. 622) M_4 पंचभिर्यज्ञपरमैः (for the prior half). — After the prior half, T_1 ins. :

अष्टमीकृत्यपरमैः. वेदोक्ताचारतत्परैः ।

G_1 पौर्णमासी- (for °मास्य-). — T_1 om. line 623. G_4 M_{1-3} om. (hapl.) lines 623–25. — (L. 623) T_3

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एवं कृत्वा शुभं कर्म पश्चाद्याति त्रिविष्टपम् ।
तत्रापि सुमहत्कालं स विहृत्य यथासुखम् ।
जायते मानुषे लोके दानभोगसमन्वितः ।
तपोविशेषसंयुक्ताः कथितास्ते शुचिस्मिते ।

उमा ।

भगवन्सर्वभूतेश तेषु ये दारसंयुताः ।
कीदृशं चरितं तेषां तन्मे शंसितुमर्हसि ।

महेश्वरः ।

य एकपत्नीधर्माणश्चरन्ति विपुलं तपः ।
विन्ध्यपादेषु ये केचिद्ये च नैमिषवासिनः ।
पुष्करेषु च ये चान्ये नदीवनसमाश्रिताः ।
सर्वे ते विधिदृष्टेन चरन्ति विपुलं तपः ।
हिंसाद्रोहविमुक्ताश्च सर्वभूतानुकम्पिनः ।
शान्ता दान्ता जितक्रोधाः सर्वातिथ्यपरायणाः ।
प्राणिष्वात्मोपमा नित्यमृतुकालाभिगामिनः ।
स्वदारसहिता देवि चरन्ति व्रतमुत्तमम् ।
वसन्ति सुखमव्यग्राः पुत्रदारसमन्विताः ।
तेषां परिच्छदारम्भाः कृत्योपकरणानि च ।
गृहस्थवद्विधीयन्ते यथायोगं प्रमाणतः ।
पोषणार्थं च दाराणामग्निकार्यार्थमेव च ।
गावश्च कर्षणं चैव सर्वमेतद्विधीयते ।
एवं वनगतैर्देवि कर्तव्यं दारसंयुतैः ।
ते स्वदारैः समायान्ति पुण्याँल्लोकान्दृढव्रताः ।
पतिभिः सह ये दाराश्चरन्ति विपुलं तपः ।
अव्यग्रभावादैकास्त्यात्ते च गच्छन्ति वै दिवम् ।
एतत्ते कथितं देवि किं भूयः श्रोतुमिच्छसि ।

Colophon.

उमा ।

भगवन्देवदेवेश तेषां कर्मफलं विभो ।
श्रोतुमिच्छाम्यहं देव प्रसादात्ते वरप्रद ।

महेश्वरः ।

वानप्रस्थगतं सर्वं फलपाकं शृणु प्रिये ।
अग्नियोगं व्रजन्ग्रीष्मे नरो द्वादशवार्षिकम् ।
रुद्रलोके हि जायेत विधिदृष्टेन कर्मणा ।
उदवासव्रतं कुर्वन्वर्षकाले दृढव्रतः ।
सोमलोकेऽभिजायेत नरो द्वादशवार्षिकम् ।
काष्ठवन्मौनमास्थाय नरो द्वादशवार्षिकम् ।
मरुतां लोकमास्थाय तत्र भोगैश्च युज्यते ।
कण्टशर्करसंयुक्ते स्थण्डिले संविशेन्मुनिः ।
यक्षलोकेऽभिजायेत सहस्राणि चतुर्दश ।
वर्षाणां भोगसंयुक्तो नरो द्वादशवार्षिकम् ।
वीरासनगतो यस्तु कण्टकाफलकाश्रितः ।
गन्धर्वेष्वभिजायेत नरो द्वादशवार्षिकम् ।
वीरस्थायी चोर्ध्वबाहुर्नरो द्वादशवार्षिकम् ।
देवलोकेऽभिजायेत दिव्यभोगसमन्वितः ।
पादाङ्गुष्ठेन यस्तिष्ठेदूर्ध्वबाहुर्जितेन्द्रियः ।

-शाड्वलैः (for -भोजनैः). — (L. 626) T_3 वनचरैस्; G_2 वने वासैस् (for वनगतैस्). — T_1 om. lines 627–642. — (L. 628) D_{10} $T_{2,3}$ G_{1-3} M सं- (for स). — (L. 631) D_{10} $T_{2,3}$ -लोकेश (for -भूतेश). — T_3 G_1 om. (hapl. ?) lines 433–436. G_2 om. (hapl.) lines 634–636. — (L. 637) G_3 -मोह- (for -द्रोह-). T_2 -कंपनाः (for -कम्पिनः). — (L. 640) G_{1-3} -निरता (for -सहिता). (L. 641) M_{1-3} वने विगतकल्मषाः (for the post. half). — (L. 644) T $G_{1,3,4}$ M स्व- (for च). D_{10} G_2 पोषणार्थे स्वदाराणाम् (for the prior half). — T_1 om. line 646. — (L. 646) D_{10} $T_{2,3}$ G -संग्रहैः (for -संयुतैः). — (L. 647) $G_{1,3}$ तैः (for ते). — (L. 649) T_2 अव्यक्त- (for °ग्र-). D_{10} $T_{2,3}$ ऐकाग्र्यात्; T_1 ऐकांत्यात् (for ऐकास्त्यात्). — (L. 650) M transp. किं and भूयः. — Colophon. *Adhy. name :* D_{10} G_2 ऋषिचरितं; T_2 ऋषिधर्मकथनं; T_3 वालखिल्यचरितं; G_4 ऋषिचर्यां; M उमामहेश्वरसंवादः. — *Adhy. no. :* D_{10} T_2 $G_{2,4}$ 162; T_1 M_4 185; T_3 193; $G_{1,3}$ M_1 186; $M_{2,3}$ 187. — (L. 651) D_{10} T_2 G_{2-4} प्रभो (for विभो). — T_1 महेशः (for महेश्वरः). — (L. 653) T_1 शृणुष्व मे (for शृणु प्रिये). — (L. 654) T_1 M_4 -योगे (M_4 °गं) वने (for -योगं व्रजन्). D_{10} $T_{2,3}$ $G_{2,4}$ ततो (for नरो). — D_{10} T_3 G_4 om. (hapl.) lines 655–657. G_1 om. (hapl.) lines 655–658. — (L. 655) $T_{1,2}$ [ऽ]भि- (for हि). G_3 om. (hapl.) from the post. half of line 655 up to the prior half of line 657. — (L. 656) $T_{1,2}$ उप- (for उद-). T_2 कुर्याद् (for कुर्वन्). T_1 पर्वकाले; T_2 G_3 वर्षा° (for वर्ष°). — (L. 657) G_3 हि (for ऽभि-). T_2 repeats from the post. half up to the prior half of line 659 after the prior half of line 667. — M_1 om. (hapl.) line 658. — After line 659, $M_{2,3}$ ins. :

शष्पं मृगमुखोत्सृष्टं वसमानो मृगैः सह ।
वसुलोकेऽभिजायेत नरो द्वादशवार्षिकम् ।

— (L. 660) D_{10} T_3 G कुश-; T_1 कटु- (for कण्ट-). T_3 G_{1-3} T_2 शर्कराभिरसंयुक्तः (for the prior half). — (L. 661) $G_{1,3}$ हि (for ऽभि-). संविशन् (for °शेन्). — (L. 663) D_{10} वीरस्थान- (for वीरासन-). T_2 कंटकाफलमाश्रितः; T_3 परितः कंटका°; G_2 कटकाफलमा° (for ...). — (L. 664) T_2 ततो (for the post. half).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

इन्द्रलोकेऽभिजायेत सहस्राणि चतुर्दश ।
आहारनियमं कृत्वा मुनिर्द्वादशवार्षिकम् ।
नागलोकेऽभिजायेत संवत्सरगणान्बहून् ।
एवं दृढव्रता देवि वानप्रस्थाश्च कर्मभिः ।
स्थानेषु तेषु तिष्ठन्ति तद्वद्भोगसमन्विताः ।
तेभ्यो भ्रष्टाः पुनर्देवि जायन्ते नृपु भोगिनः ।
वर्णोत्तमकुलेष्वेव धनधान्यसमन्विताः ।
एतत्ते कथितं देवि किं भूयः श्रोतुमिच्छसि ।

उमा ।

एषां यायावराणां तु धर्ममिच्छामि मानद ।
कृपया परयाविष्टस्त्वं मे ब्रूहि महेश्वर ।

महेश्वरः ।

धर्मं यायावराणां तु शृणु भामिनि तत्परा ।
व्रतोपवासशुद्धाङ्गास्तीर्थस्नानपरायणाः ।
धृतिमन्तः क्षमायुक्ताः सत्यव्रतपरायणाः ।
पक्षमासोपवासैश्च कर्शिता धर्मदर्शिनः ।
वर्षशीतातपैरेव कुर्वन्तः परमं तपः ।
कालयोगेन गच्छन्ति शक्रलोकं शुचिस्मिते ।
तत्र ते भोगसंयुक्ता दिव्यगन्धसमन्विताः ।
दिव्यभूषणसंयुक्ता विमानवरमास्थिताः ।
विचरन्ति यथाकामं दिव्यस्त्रीगणसंयुताः ।
एतत्ते कथितं देवि भूयः श्रोतुं किमिच्छसि ।

उमा ।

तेषां चक्रचराणां तु धर्ममिच्छामि वै प्रभो ।

महेश्वरः ।

हन्त ते कथयिष्यामि शृणु शाकटिकं शुभे ।
संवहन्तो धुरं दारैः शाकटानां तु सर्वदा ।
प्रार्थयन्ते यथा ग्राम्याः शकटैर्भैक्षचर्यया ।
तपोर्जनपराधीनास्तपसा क्षीणकल्मषाः ।
पर्यटन्तो दिशः सर्वाः कामक्रोधविवर्जिताः ।
स्ववशादेव ते मृत्युमभिकाङ्क्षन्ति नित्यशः ।
इन्द्रलोके तथा तेषां निर्मिता भोगसंचयाः ।
अमरैः सह ते यान्ति देववद्भोगसंयुताः ।
वराप्सरोभिः संयुक्ताश्चिरकालमनिन्दिते ।
तेनैव कालयोगेन त्रिदिवं यान्ति शोभने ।
तत्र प्रमुदिता भोगैर्विचरन्ति यथासुखम् ।
एतत्ते कथितं देवि किं भूयः श्रोतुमिच्छसि ।

उमा ।

वैखानसानां वै धर्मं श्रोतुमिच्छाम्यहं प्रभो ।

महेश्वरः ।

तेषु वैखानसा नाम वानप्रस्थाः शुभेक्षणे ।
तीव्रेण तपसा युक्ता दीप्तिमन्तः स्वतेजसा ।
सत्यव्रतपराधीनास्तेषां निष्कल्मषं तपः ।
अश्मकुट्टास्तथान्ये च दन्तोलूखलिनस्तथा ।

नरो). T_3 सहस्राणि चतुर्दश (for the post. half). — G_2 om. (hapl.) lines 666–669. — (L. 670) G_2 देव- (for नाग-). — (L. 671) T_1 स्व- (for च). — (L. 672) D_{10} $T_{2, 3}$ G तत्र (for तेषु). D_{10} $T_{2, 3}$ G M_3 तत्तद्भोग- ; T_1 तत्र भोग- (for तद्वद्भोग-). — T_1 G_3 om. the ref. — After the ref., M ins. :

भगवन्देवदेवेश ऋषीणां चरितं श्रुतम् ।

— (L. 676) T येषां ; M_{1-3} तेषां (for एषां). G_2 एषामथावराणां तु (for the prior half). $G_{1, 3}$ वेदितुं (for मानद). — After line 676, T_1 ins. :

वेदितुं देवदेवेश सदा सद्व्रतशालिनाम् ।

— T_1 M om. line 677. — (L. 678) D_{10} त्वं ; G_2 च (for तु). T_3 धर्मं यथा वराणां त्वं (for the prior half). — (L. 679) T_2 तीर्थस्थान- (for °स्नान-). — D_{10} G_4 om. (hapl.) line 680. — (L. 680) M_{1-3} स्मृतिमंतः (for धृति°). — (L. 682) D_{10} T_2 G_4 वर्षैः (for वर्ष-). — (L. 684) M_{1-3} transp. तत्र and ते. — (L. 685) D_{10} $T_{2, 3}$ G M_4 विमानवरसंयु(T_3 °म)ताः (for the post. half). — D_{10} G_3 om. (hapl.) line 686. — (L. 686) M -सेविताः (for -संयुताः). — (L. 687) D_{10} T G_{2-4} किं भूयः श्रोतुमिच्छसि (for the post. half). — (L. 688) D_{10} $G_{2, 4}$ च (for तु). — After line 688, T_1 ins. :

विज्ञातुं देवदेवेश भवद्वचनवर्णितम् ।

— D_{10} महादेवः ; G_2 शिवः (for महेश्वरः). — (L. 689) $T_{2, 3}$ एतत् (for हन्त). — (L. 690) T G शकटानां (for शा°). M_{1-3} अतापसाः ; M_4 तु सर्वथा (for तु सर्वदा). — (L. 691) $T_{2, 3}$ $G_{3, 4}$ -कालं ; G_1 damaged (for ग्राम्याः). D_{10} G_2 प्रार्थयंतो यथाकालं (for the prior half). — (L. 692) T_3 M तपोर्चनपरा धीरास् ; $G_{1, 3}$ °चंनपरा वीरास् (for the prior half). — D_{10} T G om. lines 694–697. M om. lines 698–699. T_1 om. line 700. M_4 om. (hapl.) lines 701–716. — (L. 701) $G_{1, 3}$ शिव (for प्रभो). — T_1 महेशः (for महेश्वरः) — (L. 702) D_{10} $T_{2, 3}$ G M_3 ते वै ; T_1 ते तु (for तेषु). — (L. 704) D_{10} T_3 $G_{1, 2}$ $M_{2, 3}$ -परा धीरास् (for -पराधीनास्). T_1 येषां (for तेषां). — (L. 705) T_2 transp. [अ]न्ये and च. — (L. 706) D_{10} T_2 G_{1-3} उंछवृत्ति(T_2 °त्ता)स् ; G_4 उंछवृत्यस (for °यान्ति). — (L. 707) D_{10} T G -वृत्तयश् (for -व्रतिनश्). G_4 आश्रिताः (for आस्थिताः). — D_{10} T_1 M_3 om. (hapl.) line 709. — (L. 709) T_3 वि- (for सं-). — After line 710,

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शीर्णपर्णाशिनश्चान्ये उञ्छयन्ति तथापरे ।
कपोतव्रतिनश्चान्ये कापोतीं वृत्तिमास्थिताः ।
पशुप्रचारनिरताः फेनपाश्च तथापरे ।
मृगवन्मृगचर्यायां संचरन्ति तथापरे ।
अब्भक्षा वायुभक्षाश्च निराहारास्तथैव च ।
संचरन्ति तपो घोरं व्याधिमृत्युविवर्जिताः ।
स्ववशादेव ते मृत्युमभिकाङ्क्षन्ति नित्यशः ।
इन्द्रलोके तथा तेषां निर्मिता भोगसंचयाः ।
अमरैः सह ते यान्ति देववद्भोगसंयुताः ।
वराप्सरोभिः संयुक्ताश्चिरकालमनिन्दिते ।
एतत्ते कथितं देवि किं भूयः श्रोतुमिच्छसि ।

उमा ।

भगवञ्श्रोतुमिच्छामि वालखिल्यांस्तपोधनान् ।

महेश्वरः ।

धर्मचर्यां तथा देवि वालखिल्यगतां शृणु ।
मृगनिर्मोकवसना निर्द्वंद्वास्ते तपोधनाः ।
अङ्गुष्ठमात्राः सुश्रोणि स्वेष्वेवाङ्गेषु संयुताः ।
ते मृत्युविषयातीतास्तपःसिद्धास्तपोबलाः ।
जिताहारा जितक्रोधाः सर्वभोगेषु निःस्पृहाः ।
तपश्चरणमिच्छन्तो लोकार्थं परमोद्यताः ।
उद्यन्तं सततं सूर्यं स्तुवन्तो विविधैः स्तवैः ।
भास्करस्यैव किरणैः सह संयान्ति नित्यदा ।
द्योतयन्ते दिशः सर्वा धर्मज्ञाः सत्यवादिनः ।
तेष्वेव निर्मलं सत्यं लोकार्थं तु प्रतिष्ठितम् ।
लोकोऽयं धार्यते देवि तेषामेव तपोबलात् ।
महात्मनां तु तपसा सत्येन च शुचिस्मिते ।
क्षमया च महाभागे भूतानां संस्थितिं विदुः ।
प्रजार्थमपि लोकार्थं महद्भिः क्रियते तपः ।
तपसा प्राप्यते सर्वं तपसा प्राप्यते फलम् ।
दुष्प्रापमपि यल्लोके तपसा प्राप्यते हि तत् ।
पञ्चभूतस्थितिश्चैव लोकसृष्टिविवर्धनम् ।
एतत्सर्वं समासेन तपोयोगाद्विनिर्मितम् ।
तस्मादयं ऋषिगणस्तपस्तेप इति प्रिये ।
धर्मान्वेषी तपः कर्तुं यतते सततं प्रिये ।
अमरत्वं वशित्वं च तपसा प्रार्थयेत्सदा ।
एतत्ते कथितं सर्वं शृण्वन्त्यास्ते श्रुतं प्रिये ।
प्रियार्थमृषिसंघस्य लोकानां हितकाम्यया ।

नारदः ।

इति ब्रुवन्तं देवेशमृषयश्चापि तुष्टुवुः ।
भूयः परमकं यत्नं तदाप्रभृति चक्रिरे ।

Colophon.

उमा ।

उक्तस्त्वया त्रिवर्गस्य धर्मः परमकः शुभः ।
सर्वव्यापी तु यो धर्मो भगवंस्तद्ब्रवीहि मे ।

महेश्वरः ।

ब्राह्मणा लोकसंसारे सृष्टा धात्रा गुणार्थिना ।
लोकांस्तारयितुं युक्ता मर्त्येषु क्षितिदेवताः ।
तेषु तावत्प्रवक्ष्यामि धर्मं शुभफलोदयम् ।

D_{10} $T_{2.3}$ G ins. :

केचिच्चरन्ति तद्विष्णोः पादपूजनमुत्तमम् ।
[D_{10} T_3 $G_{2.4}$ सद्विष्णोः (for त°).]

— T_1 om. line 711. — (L. 711) T_2 घोरा (for घोरं). — (L. 712) T_3 $G_{2.4}$ भीपयंति च नित्यशः (for the post. half). — (L. 713) T_3 इति ; G_2 इष्ट- (for इन्द्र-). — (L. 714) D_{10} $T_{2.3}$ G समतां (for सह ते). — (L. 716) D_{10} G_4 एवं (for एतत्). G_2 भूयः श्रोतुं किमिच्छसि (for the post. half). — T_1 महेशः (for महेश्वरः). — T_1 om. line 718. — (L. 720) D_{10} S (except M_{1-3}) तेषु (for °ष्वेषु). G_{1-3} संश्रिताः (for संयुताः). — D_{10} S (except M_{1-3}) om. lines 722–723. — (L. 725) D_{10} $T_{2.3}$ G सहसा (for सह सं-). — (L. 726) D_{10} S (except M_{1-3}) द्योनयंतो (for °यन्ते). — T_1 om. lines 727 and 729–730. — (L. 733) T_1 महत् (for हि तत्). — T_1 om. lines 734–735. — (L. 734) D_{10} T_2 G पंचभूतार्थतत्त्वेन (D_{10} G_2 °त्त्वे च) (for the prior half). T_2 -विवर्धनः (for °नम्). — (L. 735)

T_2 अनिंदिते (for विनिर्मितम्). — (L. 736) T_1 तपस्तस
इति स्मृतः (for the post. half). — D_{10} T_3 G_4 om.
(hapl.) lines 737–739. — (L. 738) T_3 G_{1-3}
शिवत्वं (for वशित्वं). T_1 G_{1-3} प्रापयेत् ; T_3 प्राप्यते (for
प्रार्थयेत्). — (L. 739) T_1 देवि (for सर्वं). T_1 om. the
post. half and the prior half of line 740. — (L. 740)
D_{10} $T_{2.3}$ G प्रजानां (for लोकानां). — G_3 om. the
ref. — (L. 741) D_{10} $T_{2.3}$ G_4 M_1 एवं (for इति).
T_1 [अ]भि- (for [अ]पि). — (L. 742) M_3 परतरं
(for °मकं). D_{10} $T_{2.3}$ G भूयः परतरं यत्नु (for the prior
half). — Colophon. *Sub-parvan* : M दानधर्म.
— *Adhy. name* : D_{10} $T_{2.3}$ G_3 उमामहेश्वरसंवादे वालखि-
ल्यचरितं ; M उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} $T_{2.3}$
$G_{2.4}$ 193 ; T_1 M_4 186 ; $G_{1.3}$ M_1 187 ; $M_{2.3}$ 188.
— M_4 om. lines 743–749. — (L. 743) D_{10} T_3 G_4
च परमः (for परमकः). M_{1-3} शिवः (for शुभः). G_3
धर्मश्च परमं शुभं (for the post. half). — (L. 744)
D_{10} T_3 G_2 [इ]ति (for तु). D_{10} $G_{1.2.4}$ त्वं मर्(D_{10}

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

ब्राह्मणेष्वभयो धर्मः परमः शुभलक्षणः ।
इमे हि धर्मा लोकार्थं पूर्वं सृष्टाः स्वयंभुवा ।
पृथिव्यां सज्जनैर्नित्यं कीर्त्यमानं निबोध मे ।
स्वदारनिरतिर्धर्मो नित्यं जप्यं तथैव च ।
सर्वातिथ्यं त्रिवर्गस्य यथाशक्ति दिवानिशम् ।
शूद्रो धर्मपरो नित्यं शुश्रूषाभिमना भवेत् ।
त्रैविद्यो ब्राह्मणो वृद्धो न चाध्ययनजीवकः ।
त्रिवर्गं तु व्यतिक्रान्तस्तस्य धर्मः सनातनः ।
षट् कर्माणि च प्रोक्तानि सृष्टानि ब्रह्मणा पुरा ।
धर्मिष्ठानि वरिष्ठानि यानि तानि शृणूत्तमे ।
यजनं याजनं चैव दानं पात्रे प्रतिग्रहः ।
अध्यापनमध्ययनं षट्कर्मा धर्मभागृजुः ।
नित्यस्वाध्यायतो धर्मो नित्ययज्ञः सनातनः ।
दानं प्रशस्यते नित्यं ब्राह्मणेषु त्रिकर्मसु ।
अयं परमको धर्मः संवृत्तः सत्सु विद्यते ।
गर्भस्थाने विशुद्धानां धर्मस्य नियमो महान् ।
पञ्चयज्ञविशुद्धात्मा क्रतुनित्योऽनसूयकः ।
दान्तो ब्राह्मणसत्कर्ता सुसंसृष्टनिवेशनः ।
चक्षुर्दो मनदो जिह्वास्निग्धवर्णप्रदः सदा ।
अतिथ्यभ्यागतरतः शेषान्नकृतभोजनः ।
पाद्यमर्घ्यं यथान्यायमासनं शयनं तथा ।
दीपं प्रतिश्रयं चैव यो ददाति स धार्मिकः ।
प्रातरुत्थाय वै पश्चाद्भोजनेन निमन्त्रयेत् ।
सत्कृत्यानुव्रजेद्यश्च तस्य धर्मः सनातनः ।
प्रवृत्तिलक्षणो धर्मो गृहस्थेषु विधीयते ।
तदहं कीर्तयिष्यामि त्रिवर्गेषु च यद्यथा ।
एकेनांशेन धर्मोऽर्थः कर्तव्यो हितमिच्छता ।
एकेनांशेन कामार्थमेकमंशं विवर्धयेत् ।
निवृत्तिलक्षणः पुण्यो धर्मो मोक्षे विधीयते ।
तस्य वृत्तिं प्रवक्ष्यामि तां शृणुष्व समाहिता ।
सर्वभूतदया धर्मो निवृत्तिपरमः सदा ।
क्षुधार्तं पिपासार्तमतिथिं श्रान्तमागतम् ।
अर्चयन्ति वरारोहे तेषामपि फलं महत् ।
पात्रमित्येव दातव्यं सर्वस्मै धर्मकाङ्क्षिभिः ।
आगमिष्यति यत्पात्रं तत्पात्रं तारयिष्यति ।
काले संप्राप्तमतिथिं भोक्तुकामसमुपस्थितम् ।

$G_{2.4}$ तद्ब्र)वीतु ; $M_{1.3}$ तं (M_3 त्वं) ब्रवीहि (for तद्ब्र°). T G_3 भगवांस्तद्ब्र(G_3 °स्त्वं ब्र)वीतु मे (for the post. half). — T_1 महेशः (for °श्वरः). — (L. 745) $T_{2.3}$ $G_{3.4}$ यात्रा (for धात्रा). T_1 गुणान्विताः ; T_2 °र्थिनः (for °र्थिना). — (L. 746) T_1 धारयितुं (for ता°). — T_1 om. line 748. — (L. 748) T_2 [ए]व यो ; T_3 [इ]ह यो ; G_1 [आ]ह यो ; M_{1-3} [इ]व यो (for [अ]भयो). G_3 ब्राह्मणेष्वाह यो धर्मं (for the prior half). — (L. 749) D_{10} $T_{2.3}$ च (for हि). T_1 इमे च धर्मसिद्ध्यर्थं (for the prior half). — (L. 750) D_{10} T_2 $G_{2.4}$ सद्भिर्जैर् (for सज्जनैर्). — (L. 751) T_3 नित्यतृप्तिस (for नित्यं जप्यं). — T_1 om. lines 753–755. — (L. 754) D_{10} -जीविकः (for -जीवकः). G_1 तथाध्ययनजप्यकः (for the post. half). — (L. 755) G_2 $M_{1.4}$ व्यतिक्रांतं (for °क्रान्तस्). D_{10} $T_{2.3}$ $G_{1.3.4}$ त्रिवर्गस्य व्यतिक्रांतं (for the prior half). M_3 यस्य (for तस्य). — (L. 756) D_{10} हि (for च). T_1 विप्रेषु (for प्रोक्तानि). T_1 प्रोक्तानि (for सृष्टानि). — T_1 om. line 757. — (L. 757) G_2 धर्मतीर्थवरिष्ठानि (for the prior half). D_{10} $T_{2.3}$ G तानि (for यानि). — (L. 759) M_4 om. the prior half. $T_{1.2}$ G_4 चाध्ययनं ; G_{1-3} ह्यध्य° (for अध्य°). T_1 सुवृत्तो वेदलक्षणः (for the post. half). — (L. 760) G_{1-3} नित्यः (for नित्य-). — (L. 761) D_{10} T_3 G प्रशंसते (for प्रशस्यते). — T_1 om. line 762. — (L. 762) D_{10} $T_{2.3}$ G एव परो (for परमको). — (L. 763) T_1 गर्भस्थान- (for °स्थाने). T_1 धर्मः स (for धर्मस्य). — T_1 om. lines 764 and 766.

— (L. 766) D_{10} $T_{2.3}$ G चक्षुःश्रोत्रम($T_{2.3}$ °त्रं म)नोजिह्वा- (for the prior half). — (L. 767) G_2 आतिथ्यभागनिरतः (for the prior half). — T_1 om. line 768. — (L. 769) T_1 नित्यं दद्यात्समाहितः (for the post. half). — (L. 770) T_1 सततं (for वै पश्चाद्). D_{10} $T_{2.3}$ G_4 भोजने तु (for °नेन). — After line 770, T_1 ins. :

कृषिगोरक्ष्यवाणिज्यं पाशुपाल्यं तथैव च ।
सर्वातिथ्यं परो धर्मः प्रोक्तो वैश्यस्य नित्यशः ।
शुश्रूषापरमः शूद्र इति वेदविदो विदुः ।

— T_1 om. line 771. — (L. 771) T_3 तु (for च). G_3 एकमंशं विवर्जयेत् (for the post. half). — (L. 772) G_3 निवृत्तिलक्षणः पुण्यो (for the prior half) and धर्मो मोक्षो (for गृहस्थेषु). — T_1 om. lines 773–774. M_1 om. line 773. — (L. 773) G_2 फलं तथा (for च यद्यथा). — (L. 774) G धर्मार्थः ; M_2 (*sup. lin.*) धर्मोऽर्थं (for धर्मोऽर्थः). — (L. 775) D_{10} T_3 कर्मार्थम् ; T_1 धर्मा° (for कामा°). — (L. 776) T_1 धर्मो (for पुण्यो). $M_{2.3}$ मोक्षो (for मोक्षे). — M_{1-3} transp. lines 777 and 778. — (L. 778) D_{10} $T_{2.3}$ G_{1-3} निवृत्तिः (for °त्ति-). T_1 निवृत्तिपरमस्य तु (for the post. half). — After line 778, T_1 ins. :

आत्मन्येवात्मनो भावं समायोज्येत संयतः ।
आत्मभूतो यताहारो मोक्षदृष्टेन कर्मणा ।
पवित्रनित्यो युक्तश्च तस्य धर्मः सनातनः ।
साधारणं तथा धर्मं प्रवक्ष्यामि शुभानने ।

— (L. 780) T_1 अर्चयिष्यंति ये नित्यं (for the prior half).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

चित्तं संभावयेत्तत्र व्यासोऽयं समुपस्थितः ।
तस्य पूजां यथाशक्ति सौम्यचित्तः प्रयोजयेत् ।
चित्तमूलो भवेद्धर्मो धर्ममूलं भवेद्यशः ।
तस्मात्सौम्येन चित्तेन दातव्यं देवि सर्वदा ।
सौम्यचित्तस्तु यो दद्यात्तद्धि दानमनुत्तमम् ।
यथाम्बुबिन्दुभिः सूक्ष्मैः पतद्भिर्मेदिनीतले ।
केदाराश्च तटाकानि सरांसि सरितस्तथा ।
तोयपूर्णानि दृश्यन्ते अप्रतर्क्याणि शोभने ।
अल्पमल्पमपि ह्येतद्दीयमानं विवर्धते ।
पीडयापि च भृत्यानां दानमेव विशिष्यते ।
पुत्रदारा धनं धान्यं न मृतानुगच्छति ।
श्रेयो दानं च भोगश्च धनं प्राप्य यशस्विनि ।
दानेन हि महाभागा भवन्ति मनुजाधिपाः ।
नास्ति भूमिसमं दानं नास्ति दानसमो निधिः ।
नास्ति सत्यात्परो धर्मो नानृतात्पातकं परम् ।
आश्रमे यस्तु तप्येत तपोमूलफलाशनः ।
आदित्याभिमुखो भूत्वा जटावल्कलसंवृतः ।
मण्डूकशायी हेमन्ते ग्रीष्मे पञ्चतपा भवेत् ।
सम्यक्तपश्चरन्तीह श्रद्दधाना वनाश्रमे ।
गृहाश्रमस्य ते देवि कलां नार्हन्ति षोडशीम् ।

उमा ।

गृहाश्रमस्य या चर्या व्रतानि नियमाश्च ये ।
यथा च देवताः पूज्याः सततं गृहमेधिना ।
यच्च परिहर्तव्यं गृहिणा तिथिपर्वसु ।
तत्सर्वं श्रोतुमिच्छामि कथ्यमानं त्वया प्रभो ।

महेश्वरः ।

गृहाश्रमस्य यन्मूलं फलं धर्मोऽयमुत्तमः ।
पादैश्चतुर्भिः सततं धर्मो यत्र प्रतिष्ठितः ।
सारभूतं वरारोहे दध्नो घृतमिवोद्धृतम् ।
तदहं ते प्रवक्ष्यामि श्रूयतां धर्मचारिणि ।
शुश्रूषते यः पितरः मातरं च गृहाश्रमे ।
भर्तारं चैव या नारी अग्निहोत्रं च ये द्विजाः ।
तेषु तेषु च प्रीणन्ति देवा इन्द्रपुरोगमाः ।
पितरः पितृलोकस्थाः स्वधर्मेण स रज्यते ।

उमा ।

मातापितृवियुक्तानां का चर्या गृहमेधिनाम् ।
विधवानां च नारीणां भवानेतद्ब्रवीतु मे ।

महेश्वरः ।

देवतातिथिशुश्रूषा गुरुवृद्धाभिवादनम् ।
अहिंसा सर्वभूतानामलोभः सत्यसंश्रवा ।
ब्रह्मचर्यं शरण्यत्वं शौचं पूर्वाभिभाषणम् ।
कृतज्ञत्वमपैशुन्यं सततं धर्मशीलता ।
दिने द्विरभिषेकं च पितृदैवतपूजनम् ।
गवाह्निकप्रदानं च संविभागोऽतिथिष्वपि ।
दीपं प्रतिश्रयं चैव दद्यात्पाद्यासनं तथा ।
पञ्चमेऽहनि षष्ठे वा द्वादशे वाप्यथाष्टमे ।
चतुर्दशे पञ्चदशे ब्रह्मचारी सदा भवेत् ।
श्मश्रुकर्म शिरोभ्यङ्गमञ्जनं दन्तधावनम् ।

— T_1 om. lines 782–785. — (L. 783) D_{10} $G_{2,4}$ काल- (for काले). G_4 अत्र- (for उप-). — (L. 784) D_{10} $T_{2,3}$ G यत्तं (for चित्तं). $M_{1,2}$ (*sup. lin*). 3 तस्य (for तत्र). M_{1-3} व्यासोयमिति निश्चितः (for the post. half). — (L. 785) D_{10} $T_{2,3}$ G यथाशक्त्या (for °शक्ति). — (L. 786) D_{10} वेत्ति ; T_3 G_4 वित्त- (for चित्त-). T_1 M_4 -मूलं (for -मूलो). T_2 G_2 -मूलो (for -मूलं). — (L. 787) S (except T_3 G_4) सर्वथा (for °दा). — (L. 788) T_2 धर्म- (for तद्धि). — (L. 791) D_{10} T_2 $G_{1,2}$ अ(G_1 ह्य)प्रतर्क्योतिशोभने ; T_3 $G_{3,4}$ ह्यप्रतर्क्याणि शोभने (for the post. half). — (L. 792) D_{10} $T_{2,3}$ G [ए]कं (for [द्]तद्). — T_1 om. (hapl.) line 793. — (L. 793) D_{10} G_4 transp. [अ]पि and च. T_3 भूतानां (for भृत्यानां). — (L. 794) D_{10} T G पुत्र- दार- (for °दारा). — T_1 om. line 795. — (L. 796) T_1 दानेन मनुजा भुवि (for the post half). — (L. 797) D_{10} $T_{2,3}$ G नास्ति भूमौ दानसमं (for the prior half). — Line 798 = 12. 156. 24^{ab}. — T_1 om. lines 799–801. — (L. 802) T_1 तपश्चरंति ये सम्यक् (for the prior half). — (L. 807) D_{10} $T_{1,2}$ $G_{1,3,4}$ विभो ; G_2 [अ]नघ (for प्रभो). — T_1 महेशः ; G_2 ईश्वरः (for महेश्वरः). — T_1 om. lines 809–810. — (L. 810) D_{10} [उ]त्तमं ; M_4 [उ]त्थितं (for [उ]द्धृतम्). — (L. 811) T_1 तम् (for तद्). T_1 शृणु तावत्समाहिता (for the post. half). — After line 811, $G_{1,3}$ ins. :

दंपत्यलंकरिष्णुश्च गृहदानरतिर्नरः ।
कलत्रसौख्यं विन्दन्ति नास्ति तत्र विचारणा ।
स्त्रियो वा पुरुषो वापि दंपतीन्पूजयन्ति ते ।
मनोभिलषितान्कामान्प्राप्नुवन्ति न संशयः ।

— (L. 812) D_{10} शुश्रूषयंते पितरं (for the prior half). — (L. 813) T_1 नारी च (for या नारी). — (L. 814) T_1 प्रीतेषु तेषु प्रीणंति (for the prior half). — T_1 om. line 815. — (L. 815) $G_{1,3}$ हि ; M_4 च (for स). — (L. 818) — T_1 महेशः ; G_3 om. (for महेश्वरः). — M_4 om. T_1 गुरुवृद्धानुवंदनं (for the post. half). — D_{10} om. (hapl.) lines 819–822. — (L. 822) D_{10} अभिषेकश्च. — (L. 823) T_2 माध्याह्निक- — T_1 om. lines 823–824. — (L. 825) D_{10} $T_{2,3}$ G द्वादशेप्यष्टमेथ (for गवा°).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नैतेष्वहःसु कुर्वीत तेष्वलक्ष्मीः प्रतिष्ठिता ।
व्रतोपवासनियमस्तपो दानं च शक्तितः ।
भरणं भृत्यवर्गस्य दीनानामनुकम्पनम् ।
परदारनिवृत्तिश्च स्वदारेषु रतिः सदा ।
शरीरमेकं दंपत्योर्विधात्रा पूर्वनिर्मितम् ।
तस्मात्स्वदारनिरतो ब्रह्मचारी विधीयते ।
शीलवृत्तविनीतस्य निगृहीतेन्द्रियस्य च ।
आर्जवे वर्तमानस्य सर्वभूतहितैषिणः ।
प्रियातिथेश्च क्षान्तस्य धर्मार्जितधनस्य च ।
गृहाश्रमपदस्थस्य किमन्यैः कृत्यमाश्रमैः ।
यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः ।
तथा गृहाश्रमं प्राप्य सर्वे जीवन्ति चाश्रमाः ।
राजानः सर्वपाषण्डाः सर्वे रङ्गोपजीविनः ।
व्यालग्राहाश्च दम्भाश्च चोरा राजभटास्तथा ।
सविद्याः सर्वशिल्पज्ञाः सर्वे चैव चिकित्सकाः ।
दूराध्वानं प्रपन्नाश्च क्षीणपथ्योदना नराः ।
एते चान्ये च बहवस्तर्कयन्ति गृहाश्रमम् ।
मार्जारा मूषिकाः श्वानः सूकराश्च शुकास्तथा ।
कपोतकाकचटकाः सरीसृपनिषेविणः ।
अरण्यवासिनश्चान्ये संघा ये मृगपक्षिणाम् ।
एवं बहुविधा देवि लोकेऽस्मिन्सचराचराः ।
गृहे क्षेत्रे बिले चैव शतशोऽथ सहस्रशः ।
गृहस्थेन कृतं कर्म सर्वैस्तैरुपभुज्यते ।
उपयुक्तं च यत्तेषां मतिमान्नानुशोचति ।
धर्म इत्येव संकल्प्य यत्तु तस्य फलं शृणु ।
सर्वयत्नप्रणीतस्य हयमेधस्य यत्फलम् ।
वर्षे स द्वादशे देवि फलेनैतेन युज्यते ।
आशापाशविमोक्षश्च विद्धि धर्ममनुत्तमम् ।
वृक्षमूलचरो नित्यं शून्यागारनिवेशनम् ।
नदीपुलिनशायी च नदीतीरमनुव्रजन् ।
विमुक्तः सर्वसङ्गेभ्यः स्नेहबन्धेन वै द्विजः ।
आत्मन्येवात्मनो भावं समायोज्येह ते वने ।
आत्मभूतो यताहारो मोक्षदृष्टेन कर्मणा ।
पवित्रनित्यो युक्तश्च तस्य धर्मः सनातनः ।
नैकत्र रमते सक्तो न चैकग्रामगोचरः ।
युक्तोऽप्यटति योऽयुक्तो न चैकपुलिनेशयः ।
एष मोक्षविदां धर्मो वेदोक्तः सत्पथे स्थितः ।

Colophon.

उमा ।

देवदेव नमस्तुभ्यं त्रियक्ष वृषभध्वज ।
श्रुतं मे भगवन्सर्वं त्वत्प्रसादान्महेश्वर ।
संगृहीतं मया तच्च तव वाक्यमनुत्तमम् ।
इदानीमस्ति संदेहो मानुषेष्वेव कश्चन ।
तुल्यपाणिशिरःकायो राजायमिति दृश्यते ।

वा (T_2 °मेपि वा ; T_3 [orig.] °मे तथा) (for the post. half). — (L. 828) T_3 $G_{1.2.4}$ लक्ष्मीः (for [अ]लक्ष्मीः). — T_1 om. line 829. — (L. 832) T_1 विधात्रा निर्मितं पुरा (for the post. half). — (L. 833) T_1 [अ]भि- (for वि-). — (L. 835) $G_{1.3}$ आर्जवे यतमानस्य (for the prior half). — (L. 836) T_2 दांतस्य (for क्षान्तस्य). — With lines 838–839, cf. Manu. 6. 90. — (L. 840) T_1 चापि (for सर्व-). — (L. 841) S (except T_3 M_3) -ग्रहाश् (for -ग्राहाश्). — T_1 om. line 842. — (L. 842) T_2 $G_{1.3.4}$ M_4 -शीलज्ञाः ; T_3 -जीवज्ञाः (for -शिल्पज्ञाः). D_{10} $G_{2.4}$ वै वि- (for चैव). — (L. 843) D_{10} G_{2-4} क्षीणाः ; G_1 दीनाः (for क्षीण-). T_1 क्षीणाः पथ्याशना नराः (for the post. half). — (L. 846) D_{10} T_2 कपोतकाः कर्कटकाः ; T_3 G_2 °तकाः कावटकाः (for the prior half). T_1 om. the post. half and the prior half of line 847. D_{10} $T_{2.3}$ -निषेवणाः (for °विणः). — (L. 847) D_{10} G_4 ते (for ये). — T_1 om. line 848. — (L. 848) D_{10} -चराचरे (for °चराः). — (L. 849) T_3 G_2 गृह- (for गृहे). T_1 तथा चैते ; M_2 (orig.) खले चैव (for बिले चैव). T_2 गृहे क्षेत्रबिले चैव ; G_4 गृहक्षेत्रे खले चैव (for the prior half). G_1 om. from शोऽथ up to हय (in line 853). — (L. 850) D_{10} T G_{2-4} इह (for उप-). M_4 -लभ्यते (for -भुज्यते). — (L. 851) T_1 तथैतेषां (for च यत्तेषां). T_3 कोनु- ; G_4 न तु (for नानु-). — (L. 852) T G_{2-4} यस् (for यत्). M_4 तच्च (for तस्य). — (L. 853) D_{10} T_3 G_{2-4} -यज्ञ- (for -यत्न-). D_{10} $T_{2.3}$ G -मेधेन (for -मेधस्य). — (L. 854) T_3 च ; $G_{1.3}$ यद् (for स). T_1 वर्षे द्वादशके देवि तत्फलेनैव युज्यते. — T_1 om. lines 855–857. — (L. 855) D_{10} $T_{2.3}$ G M_4 -विमोक्षं (for °क्षश्). — (L. 856) G_{1-3} -परो (for -चरो). T_3 -निवेशनः (for °शनम्). — (L. 858) D_{10} $T_{2.3}$ $G_{2.4}$ -बंधेभ्यः (for -सङ्गेभ्यः). T_1 आशापाशविवर्जितः (for the post. half). — T_1 om. lines 859–863. — (L. 859) $G_{1.2}$ तेन वै (for ते वने). — (L. 862) T_2 रक्तो (for सक्तो). T_2 (also as above) न चैकगृहिगोचरः (for the post. half). — (L. 863) D_{10} $T_{2.3}$ G न चैकपुलिनाशयः (for the post. half). — (L. 864) M_{1-3} मोक्षविदो (for °विदां). T_1 सद्वृत्तो मुच्यते चापि (for the prior half). T_1 गृहस्थः (for वेदोक्तः). — Colophon. *Sub-parvan* : M_{1-3} दानधर्मं. — *Adhy. name* : D_{10} T_3 G_2 M उमामहेश्वरसंवादः ; T_2 उमामहेश्वरसंवादे त्रिवर्गकथनं ;

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

केन कर्मविपाकेन सर्वप्राधान्यमर्हति ।
स चापि दण्डयन्मर्त्यान्भर्त्संयन्विधमन्नपि ।
प्रेत्यभावे कथं लोकाल्लँभते पुण्यकर्मणाम् ।
राजवृत्तमहं तस्माच्छ्रोतुमिच्छामि मानद ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि राजधर्मं शुभानने ।
राजायत्तं हि तत्सर्वं लोकवृत्तं शुभाशुभम् ।
महतस्तपसो देवि फलं राज्यमिति स्मृतम् ।
तपोदानमयं राज्यं परं स्थानं विधीयते ।
तस्माद्राज्ञः सदा मर्त्याः प्रणमन्ति यतस्ततः ।
न्यायतस्त्वं महाभागे श्रोतुकामासि भामिनि ।
तस्मात्तस्यैव चरितं जगत्पथ्यं शृणु प्रिये ।
अराजके पुरा त्वासीत्प्रजानां संकुलं महत् ।
तद्दृष्ट्वा संकुलं ब्रह्मा मनुं राज्ये न्यवेशयत् ।
तदाप्रभृति संदृष्टं राज्ञां वृत्तं शुभाशुभम् ।
तन्मे शृणु वरारोहे तस्य पथ्यं जगद्धितम् ।
यथा प्रेत्य लभेत्स्वर्गं यथा वीर्यं यशस्तथा ।
पित्र्यं वा भूतपूर्वं वा स्वयमुत्पाद्य वा पुनः ।
राजधर्ममनुष्ठाय विधिवद्भोक्तुमर्हति ।
आत्मानमेव प्रथमं विनयैरुपपादयेत् ।
अनु भृत्यान्प्रजाः पश्चादित्येष विनयक्रमः ।
स्वामिनं चोपमां कृत्वा प्रजास्तद्वृत्तकाङ्क्षया ।
स्वयं विनयसंपन्ना भवन्तीह शुभेक्षणे ।
तस्मात्पूर्वतरं राजा आत्मानं विनये नयेत् ।
यो विनीतः स्वयं राजा विनयत्येव वै प्रजाः ।
अपहास्यो भवेत्ताहक्स्वदोषस्यानवेक्षणात् ।
विद्याभ्यासैर्वृद्धयोगैरात्मानं विनयं नयेत् ।
विद्या धर्मार्थफलिनी तद्विदो वृद्धसंज्ञिताः ।
इन्द्रियाणां जयो देवि अत ऊर्ध्वमुदाहृतम् ।
अजये सुमहान्दोषो राजानं विनिपातयेत् ।
पञ्चैव स्ववशान्कृत्वा तदर्थान्पञ्च शोषयेत् ।
षड्वर्गमुत्सृज्य यथायोगं ज्ञानेन विनयेन च ।
शास्त्रचक्षुर्नयपरो भूत्वा भृत्यान्समाहरेत् ।
वृत्तश्रुतकुलोपेतानुपधाभिः परीक्षितान् ।
अमात्यानुपधातीतान्सापसर्पाञ्जितेन्द्रियान् ।
योजयेत यथायोगं यथार्हं स्वेषु कर्मसु ।
अमात्या बुद्धिसंपन्ना राष्ट्रं बहुजनप्रियम् ।
दुराधर्षं पुरश्रेष्ठं कोशः कृच्छ्रसहः स्मृतः ।
अनुरक्तं बलं सारमद्वैधं मित्रमेव च ।
एताः प्रकृतयः षट् च स्वामी च नयतत्त्ववित् ।
प्रजानां रक्षणार्थाय सर्वमेतद्विनिर्मितम् ।
आभिः करणभूताभिः कुर्याल्लोकहितं नृपः ।
आत्मरक्षा नृपेन्द्रस्य प्रजारक्षार्थमिष्यते ।
तस्मात्सततमात्मानं संरक्षेदप्रमादवान् ।
भोजनाच्छादनात्स्नानाद्बहिर्निष्क्रमणादपि ।
नित्यं स्त्रीगणसंयोगाद्रक्षेदात्मानमात्मवान् ।
स्वेभ्यश्चैव परेभ्यश्च शस्त्रादपि विषादपि ।
सततं पुत्रदारेभ्यो रक्षेदात्मानमात्मवान् ।
सर्वेभ्य एव स्थानेभ्यो रक्षेदात्मानमात्मवान् ।
प्रजानां रक्षणार्थाय प्रजाहितकरो भवेत् ।

— *Adhy. no.* : D10 T2.3 G2.4 194 ; T1 M4 187 ; G1.3 M1 188 ; M2.3 189. — (L. 865) T1 महादेवं (for नमस्तुभ्यं). T1 त्रिनेत्र ; T2 G3 त्र्यक्ष भो ; G1 त्र्यक्षर (for त्रियक्ष). — T1 om. lines 866–867. — (L. 868) G1.3 मनुष्येषु (for मानुषेषु). D10 T G [इ]ह (for [ए]व). — (L. 869) S (except M1–3) -प्राण- (for -पाणि-). T1 -शिरःस्नायू (for -शिरःकायो). — G2 om. lines 870–873. — (L. 871) T1 सदा (for स च). D10 दंडवान् (for °यन्). D10 T2.3 G4 विविधान् (for विधमन्). — (L. 872) G3 M1–3 -कर्मणा (for °णाम्). — G1–3 om. the ref. T1 महेशः (for °श्वरः). — (L. 874) T1 सनातनं (for शुभानने). — (L. 875) D10 यत् (for तत्). — T1 om. lines 876–879. — (L. 877) T2 तपोदानमयारंभं (for the prior half). — (L. 879) D10 श्रोतुमिच्छसि भामिनि (for the post. half). — With lines 881–882, cf. Manu. 7. 3. — (L. 882) T2.3 G1.2.4 M1.3.4 तं (for तद्). D10 G2.4 न्यवेदयत् (for °शयत्). — (L. 892) T2.3 G2–4 स्वसात् (for त°).

D10 T2.3 G विनयत्येव वै (G4 ते) प्रजाः ; M1–3 त्वात्मानं विनयं नयेत् (for the post. half). — D10 T G om. line 893. M1 om. (hapl.) lines 893–895. — (L. 894) M2.3 [अ]नपेक्षणात् (for [अ]नवे°). — (L. 897) D10 T2 G उदाहृतः (for °हृतम्). — (L. 899) D10 T2.3 G स्ववशे (for °शान्). — (L. 900) D10 -योगाद् (for -योगं). — (L. 901) T3 समाचरेत् (for °हरेत्). — (L. 903) D10 T2.3 G1–3 सोपसर्पा(T2 G2 °र्पा)न् (for साप°). — (L. 904) T2.3 तथायोगं (for यथा°). — (L. 905) G2 अमात्यान्बुद्धिसंपन्नान् (for the prior half). — (L. 906) G1.3 पुरं ; G2 वरं (for पुर-). G4 कृच्छ्रतरः (for °सहः). T3 कोशाः कृच्छ्रसहाः स्मृताः (for the post. half). — (L. 907) D10 T2.3 G M4 सान्नाम् (for सारम्). G मंत्रम् (for मित्रम्). — (L. 908) D10 T3 G विनय-; D10 T2.3 G M4 स्वेषु (for षट् च). — (L. 911) T2.3 G M4 T3 विषय- (for च नय-). — (L. 913) T2.3 भोजनाच्छादनरेंद्रस्य (for नृपेन्द्रस्य). — (L. 917) After नस्नानाद् (for the prior half).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्रजाकार्यं तु तत्कार्यं प्रजासौख्यं तु तत्सुखम् ।
प्रजाप्रियं प्रियं तस्य स्वहितं हि प्रजाहितम् ।
प्रजार्थं तस्य सर्वस्वमात्मार्थं न विधीयते ।
प्रकृतीनां विवादार्थे रागद्वेषौ व्युदस्य च ।
उभयोः पक्षयोर्वादं श्रुत्वा चैव यथातथम् ।
तमर्थं विमृशेद्बुद्ध्या स्वयमा तत्त्वदर्शनात् ।
तद्विद्भिर्बहुभिर्वृद्धैः सहासीनो नरोत्तमैः ।
कर्तारमपराधं च देशकालौ नयानयौ ।
ज्ञात्वा सम्यग्यथाशास्त्रं ततो दण्डं नयेन्नृपु ।
एवं कुर्वंल्लँभेद्धर्मं पक्षपातविवर्जनात् ।
प्रत्यक्षाप्तोपदेशाभ्यामनुमानेन वा पुनः ।
बोद्धव्यं सततं राज्ञा देशवृत्तं शुभाशुभम् ।
चारैः कर्मप्रवृत्त्या च तद्विज्ञाय विचारयन् ।
अशुभं निर्हरेत्सद्यो जोषयेच्छुभमात्मनः ।
गर्ह्यान्विगर्हयेदेव पूज्यान्संपूजयेत्तथा ।
दण्ड्यांश्च दण्डयेद्देवि नात्र कार्या विचारणा ।
पश्चापेक्षं सदा मन्त्रं कुर्याद्बुद्धियुतैर्नरैः ।
कुलवृत्तश्रुतोपेतैर्नित्यं मन्त्रपरो भवेत् ।
कामरागेण वै मूर्खैर्नैव मन्त्रमना भवेत् ।
राजा राष्ट्रहितापेक्षः सत्यधर्माणि कारयेत् ।
सर्वोद्योगं स्वयं कुर्याद्दुर्गादिषु सदा नृपः ।
देशवृद्धिकरान्भृत्यानप्रमादेन कारयेत् ।
देशक्षयकरान्सर्वान्संप्रियानपि वर्जयेत् ।
अहन्यहनि संपश्येदनुजीविगणं स्वयम् ।
सुमुखः सुप्रियो भूत्वा सम्यग्वृत्तं समादिशेत् ।
अधर्म्यं परुषं तीक्ष्णं वाक्यं वक्तुं न चार्हति ।
नरे नरे गुणान्दोषान्सम्यग्वेदितुमर्हति ।
स्वेङ्गितं वृणुयाद्धैर्यान्न कुर्यात्क्षुद्रसंविदम् ।
परेङ्गितज्ञो लोकज्ञो भूत्वा संसर्गमाचरेत् ।
स्वतश्च परतश्चैव परस्परभयादपि ।
अमानुषभयेभ्यश्च स्वाः प्रजाः पालयेन्नृपः ।
लुब्धाः कठोराश्चाध्यक्षा मानवा दस्युवृत्तयः ।
निग्राह्या एव ते राज्ञा संगृहीता यतस्ततः ।
कुमारान्विनयैरेव जन्मप्रभृति योजयेत् ।
तेषामात्मगुणोपेतं यौवराज्ये नियोजयेत् ।
प्रकृतीनां यथा न स्याद्राज्यभ्रंशोद्भवं भयम् ।
एतत्संचिन्तयन्नित्यं तद्विधानं तथार्हति ।
अराजकं क्षणमपि राष्ट्रं न स्याद्धि शोभने ।
आत्मनोऽनुविधानाय यौवराज्यं सदेष्यते ।
कुलजानां च वैद्यानां श्रोत्रियाणां तपस्विनाम् ।
अन्येषां वृत्तयुक्तानां विशेषं कर्तुमर्हति ।
आत्मार्थं राज्यतन्त्रार्थं कोशसंचयमारभेत् ।

---

the prior half, T_3 ins. :

कामक्रोधभयादपि ।
सततं परदारेभ्यो.

— (L. 920) D_{10} T_3 $G_{2.4}$ प्रियाप्रिये (for प्रजाप्रियं). D_{10} $T_{2.3}$ $G_{2.4}$ तु (for हि). — (L. 922) D_{10} T_2 G हि (G_4 च) रक्षार्थं ; T_3 रक्षणार्थं (for त्रिवादार्थं). — (L. 923) T_2 वादान् (for वादं). — (L. 925) D_{10} $T_{2.3}$ G तत्त्वविद्भिश्च वहुभिर् (for the prior half). G_1 वृद्धैः सह ; G_3 वृद्धैर्भावी (for सहासीनो). — (L. 931) T_2 च कर्म- (for कर्मप्र-). $T_{1.2}$ G विचारयेत् (for °रयन्). T_3 तद्विज्ञातुं विचारयेत् (for the post. half). — (L. 932) T_1 $G_{3.4}$ अशुभान् (for °भं). — T_1 om. 933–939. — (L. 935) T_2 बुद्धिहितैर् ; T_3 °युतो (for °युतैर्). — (L. 936) $G_{1.3}$ -तपोपेतैर् (for -श्रुतो°). — (L. 937) D_{10} $T_{2.3}$ G कामकारेण वै मुख्यैर् (for the prior half). D_{10} [ए]वं ; G_2 च (for [ए]व). $G_{1.3}$ मंत्रपरो (for °मना). — (L. 938) $T_{2.3}$ G -हितापेक्षं (for °पेक्षः). M_4 -कर्माणि (for -ध°). — T_3 transp. lines 939 and 940. — (L. 939) T_2 सदा (for स्वयं). D_{10} $T_{2.3}$ G नृपु (for नृपः). — (L. 940) $G_{1.3.4}$ M_4 देशवृत्ति- (for °वृद्धि-). D_{10} यत्नान् ; T_1 विप्रान् (for भृत्यान्). G_4 न प्रमादेन (for अप्र°). D_{10} G_2 अप्रियांश्च विवर्जयेत् (for the post. half). — T_3 reads line 941 twice. — (L. 941) $G_{1.3}$ -प्रियकरान् (for -क्षय°). T_1 विप्रान् (for सर्वान्). T_1 सु- (for सं-). T_2 चापि (for अपि). D_{10} T_3 (both times) G अप्रियांश्च विस(T_3 [first time] °व)र्जयेत् (for the post. half). — T_1 om. line 943. — (L. 943) D_{10} $T_{2.3}$ G_{2-4} M_4 दत्त्वा (for भूत्वा). T_3 वृत्तिं (for वृत्तं). D_{10} $T_{2.3}$ G M_4 समाचरेत् (for °दिशेत्). — After line 944, $T_{2.3}$ G ins. :

असंविश्वास्य वचनं वक्तुं सत्सु न चार्हति ।

[T_3 -विश्वस्य (for -विश्वास्य). T_2 G_4 अस्य विश्वस्य वचनं (for the prior half).]

— (L. 945) $G_{1.2}$ सद्यो ; G_3 समो (for सम्यग्). — (L. 946) T_1 स्वाहितं (for स्वेङ्गितं). T_1 -संगतिं (for -संविदम्). — (L. 947) D_{10} T_3 G लोकेषु ; T_2 भूतेषु (for लोकज्ञो). — (L. 950) D_{10} लुब्धान् ; $G_{3.4}$ वृद्धाः (for लुब्धाः). D_{10} $T_{1.3}$ G M_4 चाप्यस्य ; T_2 हीनाश्च (for चाध्यक्षा). — (L. 951) D_{10} T G M_3 संगृहीत्वा (for °ता). — (L. 953) D_{10} $T_{1.3}$ G यौवराज्येन (for °ज्ये नि-). — (L. 954) D_{10} $T_{2.3}$ G M_4 -भ्रंशो भवेद् (for -भ्रंशोद्भवं). — T_1 om. line 955. — (L. 955) T_2 तदा (for तथा). — (L. 956) D_{10} T G राज्यं (for राष्ट्रं). — (L. 957) G_3 -विनाशाय (for -विधानाय). — (L. 959) D_{10} $T_{2.3}$ $G_{2.4}$ वृत्ति- (for वृत्त-). T_1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

दुर्गाद्राष्ट्रात्समुद्राच्च वणिग्भ्यः पुरुषात्ययात् ।
परात्मगुणसाराभ्यां भृत्यपोषणमाचरेत् ।
वाहनानां विधायाग्रे पोषणं यौधकर्मसु ।
सादरः सततं भूत्वा अपेक्षाव्रतमाचरेत् ।
चतुर्धा विभजेत्कोशं धर्मभृत्यात्मकारणात् ।
आपदर्थं च नीतिज्ञो देशकालवशेन तु ।
अनाथान्व्याधितान्वृद्धान्स्वदेशे पोषयेन्नृपः ।
संधिं च विग्रहं चैव तद्विशेषांस्तथापरान् ।
यथावत्संविमृश्यैव बुद्धिपूर्वं समाचरेत् ।
सर्वेषां स प्रियो भूत्वा मण्डलं सततं चरेत् ।
शुभेष्वपि च कार्येषु न चैकोऽन्तः समाचरेत् ।
स्वतश्च परतश्चैव व्यसनानि विमृश्य तु ।
परेण धार्मिकान्न्यायान्नातीयाद्वेषलोभतः ।
रक्ष्यत्वं वै प्रजाधर्मः क्षत्रधर्मस्तु रक्षणम् ।
कुनृपैः पीडितास्तस्मात्प्रजाः सर्वत्र पालयेत् ।
यात्राकालमवेक्ष्यैव पश्चात्कोपः फलोदयम् ।
तद्युक्ताश्चापदश्चैव प्राग्यानादिति चिन्तयेत् ।
व्यसनेभ्यो बलं रक्षेन्नयतो व्ययतोऽपि वा ।
प्रायशो वर्जयेद्युद्धं प्राणरक्षणकारणात् ।
कारणादेव योद्धव्यं नात्मनः परदोषतः ।
सुयुद्धे प्राणमोक्षश्च तस्य धर्माय इष्यते ।
अभियुक्तो बलवता कुर्यादापद्विधिं नृपः ।
अनुनीय तथा सर्वान्प्रजानां हितकारणात् ।
अन्यप्रकृतियुक्तानां राज्ञां वृत्तविचारिणाम् ।
अन्यांश्चापत्प्रपन्नानां न तान्संयोक्तुमर्हति ।
शुभाशुभं यदा देवि वृत्तं तूभयतः स्मृतम् ।
आत्मैव तच्छुभं कुर्यादशुभं योजयेत्परान् ।
एवमुद्देशतः प्रोक्तमलेपत्वं यथा भवेत् ।
एतदेवं समासेन राजधर्मः प्रकीर्तितः ।
एवं संवर्तमानस्तु दण्डयन्भर्त्सयन्प्रजाः ।
न किल्बिषमवाप्नोति पद्मपत्रमिवाम्भसा ।
एवं संवर्तमानस्य कालधर्मो यदा भवेत् ।
स्वर्गलोके तदा राजा त्रिदशैः सह तोष्यते ।
द्विविधं राजवृत्तं च न्यायमाग्यसमन्वितम् ।
एवं न्यायानुगं वृत्तं कथितं ते शुभेक्षणे ।
राज्यं न्यायानुगं नाम बुद्धिशास्त्रानुगं भवेत् ।
धर्म्यं पथ्यं यशस्यं च स्वर्ग्यं चैव तथा भवेत् ।
दैवपक्ष्ये सति नृपे राज्यं न्यायानुगं भवेत् ।
क्रियन्ते यत्र कर्माणि शास्त्रयुक्तिं विसृज्य वै ।
कर्ता द्वेषवियुक्तश्च तत्र न्यायानुगं भवेत् ।
राज्यं भोगानुगं नाम अयथावत्प्रदृश्यते ।
तत्तु शास्त्रविनिर्मुक्तं सतां कोपकरं भवेत् ।

रक्षणं (for विशेषं). —(L. 960) M_4 -मंत्रार्थं (for -तन्त्रार्थं). D_{10} $T_{2.3}$ G कोशार्थं च समाचरेत् (for the post. half). — T_1 om. (hapl.) lines 961–964. —(L. 961) D_{10} T_2 $G_{2.4}$ दुर्ग- (for दुर्गाद्). —(L. 962) T_2 दुरात्म- (for प°). —(L. 964) M_4 अपेक्षां (for °क्षा-). —(L. 965) T_1 चतुर्विधं भजेत्कोशं (for the prior half). — T_1 om. line 966. —(L. 967) $T_{1.3}$ $G_{1.3.4}$ $M_{1.2}$ व्यथितान् (for व्याधि°). —(L 968) T_1 संधिविग्रहणं चैव यानासनमथैव च. —(L. 969) T_3 G स (for सं-). T_1 भेदं विमृश्य विधिवद् (for the prior half). — T_1 M_1 om. (hapl.) line 971. —(L. 972) $T_{2.3}$ G विसृश्यतः ; Kumbh. ed. and Madras ed. °श्य सः (for °श्य तु). —(L. 973) D_{10} G योगान् ; T_2 लोकान् (for न्यायान्). T_1 प्रायेण धार्मिकन्यायान् (for the prior half). T_1 कुर्याद् (for [अ]तीयाद्). — T_1 om. (hapl.) lines 976–977. —(L. 976) D_{10} $T_{2.3}$ G_4 M_4 यात्राकालेनवे- (T_3 °लानवे)क्ष्यैव ; G_{1-3} °काले च नैवेक्ष्यः (for the prior half). $M_{2.4}$ कोप- (for कोपः). D_{10} $T_{2.3}$ G पश्चात्कोपफलोदयः (for the post. half). —(L. 979) T_2 -कारणं (for °णात्). — G_2 om. (hapl.) lines 980–983. —(L. 981) T_2 धर्मार्थं ; T_3 धर्मोथ (for धर्माय). T_1 चेष्यते (for इ°). —(L. 982) T_2 वापद्विधिं ; G_4 पश्चाद्विधिं (for आप°). T_1 न कुर्यादापदः पदं (for the post. half).

— T_1 om. line 983. —(L. 983) T_2 सर्वं प्राणिनां (for सर्वान्प्रजानां). —(L. 984) T_1 राजा (for अन्य-). M_4 अद्यप्रभृति युक्तानां (for the prior half). T_1 राज्ञां वृत्तिं विचारयेत् (for the post. half). —(L. 985) D_{10} $T_{2.3}$ प्रति- ; G_2 [अ]पि प्र- (for [आ]पत्प्र-). T_1 वृत्तिं चापि प्रपन्नानां (for the prior half). — T_1 om. line 986. —(L. 986) D_{10} $T_{2.3}$ G_2 व्रतञ्चभयसाधनं (sic) ; $G_{1.3.4}$ व्रतं तूभयसाधनं (for the post. half). —(L. 987) T_1 आत्मनश्च शुभं कार्यन् (for the prior half). — T_1 om. (hapl.) line 988. —(L. 988) D_{10} T_3 अलोपत्वं ; T_2 अलोभत्वं (for अलोपत्वं). —(L. 989) D_{10} T G एष देवि (for एतदेवं). —(L. 990) T_2 रक्षयन् (for भर्त्सं°). $G_{1.3}$ भर्त्सयन्दंडयन्प्रजाः (for the post. half). —(L. 991) D_{10} $T_{2.3}$ G निष्कल्मषम् (for न किल्बिषम्). —(L. 993) T_1 मोदते ; G_4 पोष्यते (for तो°). —(L. 996) G_2 M_3 राज- (for राज्यं). —(L. 997) T_3 तदा ; M_4 यथा (for तथा). — D_{10} S (except M_{1-3}) om. (hapl.) lines 999–1000. —(L. 1001) T $G_{1.3}$ भाग्यानुगं (for भोगा°). T_1 विधितः संप्रवर्तते (for the post. half). —(L. 1002) T_1 परलोकाय न क्षमं (for the post. half). —(L. 1003) D_{10} G_2 दुस्तरं ; T_1 विधुरं ; $G_{1.3}$ दुरितं (for दुरन्तं). — T_1 om. (hapl.) line 1004. —(L. 1005) D_{10} $T_{2.3}$ G तत्र (for यत्र).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अधर्म्यमयशस्यं च दुरन्तं च भवेद् ध्रुवम् ।
यत्र स्वच्छन्दतः सर्वं क्रियते कर्म राजभिः ।
यत्र भाग्यवशात्कृत्या लभन्ते न विशेषतः ।
यत्र दण्ड्या न दण्ड्यन्ते पूज्यन्ते वा नराधमाः ।
यत्र सन्तो विहन्यन्ते तत्र भाग्यानुगं भवेत् ।
शुभाशुभं यदा यत्र विपरीतं प्रदृश्यते ।
राशि वासुरपक्षे तु तत्र भाग्यानुगं भवेत् ।
भाग्यानुगे तु राजानो वर्तमाना यथातथा ।
प्राप्याकीर्तिमनर्थं च इहलोके शुभेक्षणे ।
परत्र सुमहाघोरं तमः प्राप्य दुरत्ययम् ।
तिष्ठन्ति नरके देवि प्रलयान्तादिति स्थितिः ।
मोक्षणं दुष्कृतीनां तु विद्यते कालपर्ययात् ।
नास्त्येव मोक्षणं देवि राज्ञां दुष्कृतकारिणाम् ।
एतत्सर्वं समासेन राजवृत्तं शुभाशुभम् ।
कथितं ते महाभागे भूयः श्रोतुं किमिच्छसि ।

Colophon.

उमा ।

देवदेव महादेव सर्वदेवनमस्कृत ।
यानि धर्मरहस्यानि श्रोतुमिच्छामि तान्यहम् ।

महेश्वरः ।

रहस्यं श्रूयतां देवि मानुषाणां सुखावहम् ।
नपुंसकेषु वन्ध्यासु वियोनौ पृथिवीतले ।
उत्सर्गो रेतसस्तेषु न कार्यो धर्मकाङ्क्षिभिः ।
एतेषु बीजं प्रक्षिप्तं न विरोहति वै प्रिये ।
यत्र वा तत्र वा बीजं धर्मार्थी नोत्सृजेत्पुनः ।
नरो बीजविनाशेन लिप्यते भ्रूणहत्यया ।
अहिंसा परमो धर्मः अहिंसा परमं सुखम् ।
अहिंसा धर्मशास्त्रेषु सर्वेषु परमं पदम् ।
देवतातिथिशुश्रूषा सततं धर्मशीलता ।
वेदाध्ययनयज्ञाश्च तपो दानं दमस्तथा ।
आचार्यगुरुशुश्रूषा तीर्थाभिगमनं तथा ।
अहिंसाया वरारोहे कलां नार्हन्ति षोडशीम् ।
एतत्ते परमं गुह्यमाख्यातं परमार्चितम् ।

उमा ।

यदि धर्मस्त्वहिंसायां किमर्थममरोत्तम ।
यज्ञेषु पशुबन्धेषु हन्यन्ते पशवो द्विजैः ।
कथं च भगवन्भूयो हिंसमाना नराधिपाः ।
स्वर्गं सुदुर्गमं यान्ति सदा स्म रिपुसूदन ।
यस्यैव गोसहस्राणि विंशतिः साधिकानि तु ।
अहन्यहनि हन्यन्ते द्विजानां मांसकारणात् ।
समांसं तु स दत्त्वान्नं रन्तिदेवो नराधिपः ।
कथं स्वर्गमनुप्राप्तः परं कौतूहलं हि मे ।
किं नु धर्मं न शृण्वन्ति न श्रद्दधति वा श्रुतम् ।

T_1 $M_{1.3}$ transp. लभन्ते and न. — (L. 1006) D_{10} G_2 वै; T_3 च (for वा). — T_1 om. line 1007. — (L. 1007) T_3 वसंत्यत्र ; $M_{2.3}$ [ऽ]पि हन्यंते (for विहन्यन्ते). $G_{1.3}$ ततो (for तत्र). — D_{10} reads lines 1008–1009 twice. — (L. 1008) D_{10} (both times) $T_{1.3}$ G यथा (for यदा). T_3 तत्र (for यत्र). — T_1 om. lines 1009-1010. — (L. 1009) $G_{1.3.4}$ राशस्तु (for राशि वा). — (L. 1010) G_4 यथातथं (for °तथा). —(L. 1011) M_{1-3} अमानं (for अनर्थं). T_3 प्राप्य लोके शुभं चैव ; G_4 प्राप्य कीर्निमकीर्तिं च (for the prior half). $G_{1.3}$ शुभानने (for शुभेक्षणे). — (L. 1012) T_1 सुमहद् (for सुमहा-). T_1 दुःखं (for तमः). — T_1 om. line 1014. — (L. 1014) T_2 च (for तु). D_{10} G_4 मोक्षं तु (G_4 च) सुकृतीनां च ; T_3 निर्मोक्षं दुष्कृतीनां च (for the prior half). — (L. 1015) G_{1-3} दुष्कर- ; M_4 दुष्कृति- (for दुष्कृत-). — (L. 1017) D_{10} transp. श्रोतुं and किं. $T_{1.3}$ G_2 किं भूयः श्रोतुमिच्छसि (for the post. half). — Colophon. — *Adhy. name :* D_{10} T_2 G_2 M उमामहेश्वरसंवादः ; T_3 राजवृत्तिकथनं. — *Adhy. no.* : D_{10} $T_{2.3}$ $G_{2.4}$ 195 ; T_1 M_4 188 ; $G_{1.3}$ M_1 189 ; $M_{2.3}$ 190. — T_1 महेशः (for महेश्वरः). — (L. 1023) D_{10} $T_{2.3}$ G च (for वि-). — (L. 1024) G_2 बीजार्थं (for वा बीजं). D_{10} G_4 धर्मार्थं (for °र्थी). — (L. 1025) D_{10} T_2 G_4 वध्यते (for लिप्यते). D_{10} $T_{2.3}$ G_4 ब्रह्म- (for भ्रूण-). — T_1 om. (hapl.) line 1027 — (L. 1027) G_4 सर्व- (for धर्म-). G_4 अहिंसा (for सर्वेषु). — T_1 om. (hapl.) line 1030. — (L. 1031) G_1 $M_{2.4}$ नार्हति (for °न्ति). — (L. 1032) T_1 आख्यातं शुभदर्शने (for the post. half). — (L. 1033) D_{10} T_2 [अ]हिंसायाः ; T_1 [अ]हिंसा वै (for [अ]हिंसायां). — (L. 1035) T_1 भूमौ (for भूयो). — (L. 1036) T_3 दुर्गतमं (for सुदुर्गमं). T_3 ते कथं ; $G_{1.3}$ तदा स्म (for सदा स्म). D_{10} $G_{1.4}$ M_{1-3} रिपुसूदनाः. — T_1 transp. lines 1037 and 1038. — (L. 1037) M स्वस्य (for यस्य) — T reads line 1038 twice. — (L. 1038) T_1 (both times). $_2$ द्विजानां गोसवस्य च (T_2 तु) (for the post. half). — (L. 1039) $T_{1.3}$ समाः सहस्रं दत्त्वान्नं ; G_4 मांसं तु स ह दत्त्वान्नं (for the prior half). — (L. 1040) T_2 स्वर्गफलं (for स्वर्गमनु-). — (L. 1041) $G_{1.3}$ धर्मांश्च ; G_2 धर्माणि (for धर्मं न). — (L. 1042) $T_{2.3}$ M मृगयां वै (M_{1-3} ये) (for मृगयायै). $G_{1.3.4}$ मृगयां वै विनिर्गम्य (for the prior half). — T_1 om. line 1043. — (L. 1043) M अशेषेण (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मृगयायै विनिर्गत्य मृगान्घ्नन्ति नराधिपाः ।
एतत्सर्वं विशेषेण विस्तरेण वृषध्वज ।
श्रोतुमिच्छामि भगवंस्तत्त्वमेतन्ममोच्यताम् ।

महेश्वरः ।

बहुमान्यमिदं देवि नास्ति कश्चिदहिंसकः ।
श्रूयतां कारणं चात्र यथानेकविधं भवेत् ।
दृश्यते चापि लोकेऽस्मिन्न कश्चिदविहिंसकः ।
धरणीसंश्रिताञ्जीवान्सुसूक्ष्मांश्चैव मध्यमान् ।
संचरंश्चरणाभ्यां च हन्ति जीवाननेकशः ।
अज्ञानाज्ज्ञानतो वापि ये जीवाः शयनासने ।
उपाविशञ्शयानश्च हन्ति जीवाननेकशः ।
शिरोवस्त्रेषु ये जीवा नराणां स्वेदसंभवाः ।
तांश्च हिंसन्ति सततं दंशांश्च मशकानपि ।
जले जीवास्तथाकाशे पृथिवी जीवमालिनी ।
एवं जीवाकुले लोके कोऽसौ स्याद्यस्त्वहिंसकः ।
स्थूलमध्यमसूक्ष्मैश्च स्वेदवातमहीरुहैः ।
दृश्यरूपैरदृश्यैश्च नानारूपैश्च भामिनि ।
जीवैस्ततमिदं सर्वमाकाशं पृथिवी तथा ।
अन्योन्यं ते च हिंसन्ति दुर्बलान्बलवत्तराः ।
मत्स्या मत्स्यान्ग्रसन्तीह खगांश्चैव खगास्तथा ।
सरीसृपैश्च जीवन्ति कपोताद्या विहंगमाः ।
भूचराः खेचराश्चान्ये क्रव्यादा मांसगृद्धिनः ।
सम्रुद्धाः परमांसैस्तु भक्षेरन्येऽपि चापरैः ।
सत्त्वैः सत्त्वानि जीवन्ति शतशोऽथ सहस्रशः ।
अपीडयित्वा नैवान्यं जीवा जीवन्ति सुन्दरि ।
स्थूलकायस्य सत्त्वस्य खरस्य महिषस्य वा ।
जीवस्यैकस्य मांसेन पयसा रुधिरेण वा ।
तृप्यन्ते बहवो जीवाः क्रव्यादा मांसभोजिनः ।
एको जीवसहस्राणि सदा खादति मानवः ।
अन्नाद्यल्पोपभोगेन धान्यसंज्ञानि यानि तु ।
मांसधान्यैः सबीजैश्च भोजनं परिवर्जयेत् ।
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ।
धान्यानि यो न हिंसेताहिंसकः परिकीर्तितः ।
नाश्नाति यावतो जीवांस्तावत्पुण्येन युज्यते ।
आहारस्य वियोगेन शरीरं परितप्यते ।
तप्यमाने शरीरे तु शरीरं चेन्द्रियाण्यपि ।
वशे तिष्ठन्ति सुश्रोणि नृपाणामिव किंकराः ।
निरुन्धन्निन्द्रियाण्येव स सुखी स विचक्षणः ।
इन्द्रियाणां निरोधेन दानेन च दमेन च ।
नरः सर्वमवाप्नोति मनसा यद्यदिच्छति ।
एतन्मूलमहिंसाया उपवासः प्रकीर्तितः ।
आहारं कुरुते यस्तु भूमिमाक्रमते च यः ।
सर्वे ते हिंसका देवि यथा धर्मेषु दृश्यते ।
यथेहाहिंसको देवि तत्त्वज्ञो ज्ञायते नरः ।
तथा तेऽहं प्रवक्ष्यामि श्रूयतां धर्मचारिणि ।
फलानि जीर्णपर्णानि भस्म वा योऽपि भक्षयेत् ।

विशे°). — (L. 1044) D_{10} G_4 तत्त्वेन ; T_2 G_{1-3} तत्सर्वं ; T_3 सर्वेश (for भगवंस). D_{10} $T_{1.3}$ G M_4 अद्य (for एतन्). T_2 संशयो मेद्य मोच्यतां (for the post. half). — T_1 महेशः ; $T_{2.3}$ G_3 ईश्वरः (for महेश्वरः). — T_1 om. line 1046. — (L. 1046) M_4 नैक- (for [अ]नेक-). — (L 1047) $G_{1.3}$ न हि कश्चिदहिंसकः ; G_2 कश्चिदप्यनहिंसकः (for the post. half). — T_2 om. (hapl.) lines 1048-1055. — (L. 1048) G_3 धरणीं. T_3 G $M_{1.2}$ देवि (for जीवान्). T_1 [अ]पि (for [ए]व). — (L. 1050) T_1 संस्थितः (for ये जीवाः). — (L. 1052) D_{10} शिरोवस्त्रग ये जीवा (for the prior half). — (L. 1055) T_1 वा (for ऽसौ). — (L. 1056) D_{10} $T_{2.3}$ $G_{3.4}$ M_3 -वारि- (for -वात-). — (L. 1058) T_1 जीवतत्त्वम (for जीवैस्ततम्). — (L. 1059) T_1 अपि (for ते च). — (L. 1060) $G_{1.3}$ M_4 मत्स्यान्मत्स्या (by transp.). T_1 च हिंसन्ति (for ग्रसन्तीह). T_3 मत्स्या-गृह्णंति वै मत्स्याः (for the prior half). T_1 खगश्चापि खगांस्तथा (for the post. half). — (L. 1061) T मयूराद्या (for कपोताद्या) — (L. 1062) M_{1-3} भूचरान् (for °राः) T_2 $G_{1.3}$ -गर्द्धिनः (for -गृद्धिनः). — T_1 om. lines 1063-64. — (L. 1063) D_{10} T_3 G_{1-3} ते ; T_2 G_4 च (for ये). G_4 ते परे (for चापरैः). — (L. 1065) T_1 [अ]न्यान् (for [अ]न्यं). — (L. 1066) T_1 om. from the post. half up to the prior half of line 1067. D_{10} T_2 G च (for वा). — (L. 1067) T_1 मांसेन (for पयसा). G_4 च (for वा). — (1068) T_1 तृप्यंति (for °ते). T_2 G_2 -भोजनाः (for -भोजिनः). — (L. 1069) G_4 एवं (for एको). G_2 जीवः (for जीव-). — T_1 om. lines 1070-1071. — (L 1070) M_3 भोग- (for धान्य-). — T_1 reads lines 1072-1073 after line 1077. — (L. 1072) D_{10} T_2 G M_4 तथा (for अथ). — (L. 1073) T_1 सोऽहिंस्रः (for [अ]हिंसकः). — (L. 1074) D_{10} T_3 $G_{2.4}$ जीवस् (for जीवांस्). — (L. 1076) D_{10} G तु ; $T_{1.2}$ च (for [अ]पि). — (L 1078) M_2 [ए]वं (for [ए]व). — T_1 om. lines 1082-1083. — (L. 1081) D_{10} $T_{2.3}$ G एवं (for एतन्). — (L. 1082) G_3 सः (for यः). — Before line 1084, T_1 ins. महेशः. — (L. 1084) D_{10} T_2 G_4 यथैव ; $T_{1.3}$ $G_{1.3}$ तथैव ; G_2 यथा वा (for यथेह). — (L. 1085) D_{10} T_2 यथा (for तथा). D_{10} T_2 G_{1-3} ते तं ; T_1 तेषां ; T_3 G_4

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

आलेख्यमिव निश्चेष्टं तं मन्येऽहमहिंसकम् ।
आरम्भा हिंसया युक्ता धूमेनाग्निरिवावृताः ।
तस्माद्यस्तु निराहारस्तं मन्येऽहमहिंसकम् ।
यस्तु सर्वं समुत्सृज्य दीक्षितो नियतः शुचिः ।
कृत्वा मण्डलमर्यादां संकल्पं कुरुते नरः ।
यावज्जीवमनाशित्वा कालाकाङ्क्षी दृढव्रतः ।
ध्यानेन तपसा युक्तस्तं मन्येऽहमहिंसकम् ।
अन्यथा हि न पश्यामि नरो यः स्यादहिंसकः ।
बहु चिन्त्यमिदं देवि नास्ति कश्चिदहिंसकः ।
यतो यतो महाभागे हिंसा स्यान्महती ततः ।
निवृत्तौ मधुमांसाभ्यां हिंसा त्वल्पतरा भवेत् ।
निवृत्तिः परमो धर्मो निवृत्तिः परमं सुखम् ।
मनसा विनिवृत्तानां धर्मस्य निचयो महान् ।
मनःपूर्वंगमा धर्मा अधर्माश्च न संशयः ।
मनसा बध्यते चापि मुच्यते चापि मानवः ।
निगृहीते भवेत्स्वर्गो विसृष्टे नरको ध्रुवः ।
घातकः शस्त्रमुद्यम्य मनसा चिन्तयेद्यदि ।
आयुःक्षयं गतेऽद्यैषां मृते तु प्रहराम्यहम् ।
इति यो घातको हन्यान्न स पापेन लिप्यते ।
विधिना निहतः पूर्वं निमित्तं स तु घातकः ।
विधिर्हि बलवान्देवि दुस्त्यजं वै पुराकृतम् ।
जीवाः पुराकृतेनैव तिर्यग्योनिसरीसृपाः ।
नानायोनिषु जायन्ते स्वकर्मपरिवेष्टिताः ।
नानाविधविचित्राङ्गा नानावीर्यपराक्रमाः ।
नानाभूमिप्रदेशेषु नानाहाराश्च जन्तवः ।
जायमानस्य जीवस्य मृत्युः पूर्वं प्रजायते ।
सुखं वा यदि वा दुःखं यथा पूर्वं कृतं तथा ।
प्राप्नुवन्ति नरा मृत्युं यदा यत्र च येन च ।
नातिक्रान्तुं हि शक्यं स्यान्निदेशः पूर्वकर्मणः ।
अप्रमत्तः प्रमत्तेषु विधिर्जागर्ति जन्तुषु ।
न हि तस्य प्रियः कश्चिन्न द्वेष्यो न च मध्यमः ।
समः सर्वेषु भूतेषु कालः कालं निरीक्षते ।
गतायुषो ह्याक्षिपति जीवं सर्वस्य देहिनः ।
यथा येन च मर्तव्यं तथा युज्येत मृत्युना ।
अवशो नीयते तत्र मर्तव्यं यत्र येन तु ।
अरण्ये स्वगृहे वापि रात्रौ वाहनि वा तथा ।
यथा येन हि मर्तव्यं नान्यथा म्रियते हि सः ।
दृश्यते न च लोकेऽस्मिन्भूतो भव्योऽपि वा पुनः ।
विज्ञानैर्विक्रमैर्वापि नानामन्त्रौषधैरपि ।
यो हि वञ्चयितुं शक्तो विधेस्तु नियतां गतिम् ।
एष तेऽभिहितो देवि जीवहिंसाविधिक्रमः ।

Colophon.

महेश्वरः ।

श्रूयतां कारणं देवि यथा हि दुरतिक्रमः ।
विधिः सर्वेषु भूतेषु मर्तव्ये समुपस्थिते ।
आयुःक्षयेणोपहताः समागम्य वरानने ।
कीटाः पतंगा बहवः स्थूलाः सूक्ष्माश्च मध्यमाः ।
प्रज्वलत्सु प्रदीपेषु स्वयमेव पतन्ति ते ।

ते सं- (for तेऽहं). — (L. 1086) D_{10} $T_{2.3}$ G मूल- (for जीर्ण-). — (L. 1089) M_{1-3} निरारंभस् (for °हारस्). — T_1 om. lines 1090–1091. G_2 om. (hapl.) lines 1090–1093. — (L. 1090) G_1 हिंसां ; G_4 पूर्वं (for सर्वं). D_{10} $T_{2,3}$ $G_{1,3,4}$ दीक्षित्वा (for °तो). — (L. 1093) D_{10} $T_{1,3}$ धन्येन (for ध्यानेन). — (L. 1094) G_4 तु (for हि). — G_2 om. (hapl.) line 1095. T_1 om. line 1096. — (L. 1097) G_2 अल्पतरा (for त्वल्प°). — (L. 1100) Cf. Dhammapada 1. D_{10} S मनःपूर्वा(G_4 °र्वे)गमा ($G_{1,3}$ °मं) धर्मा (for the prior half). — (L. 1103) M_{1-3} मनमा चिंतयन्यतः (for the post. half). — (L. 1104) D_{10} T_2 G_3 आयुःक्षय- ; T_3 °क्षये (for °क्षयं). D_{10} $T_{1,2}$ G M_4 [ऽ]न्येषां (for ऽद्यैषां). — (L. 1106) D_{10} G_4 विधिर्हि (for विधिना). — (L. 1107) T_3 हि (for वै). — (L. 1108) T_1 जीवाः पुराकृताश्चैव (for the prior half). — (L. 1110) D_{10} नानायुग- ; $G_{1,3,4}$ °युध- ; G_2 °युधा (for °विध-). T_2 -विशुद्धांगा. D_{10} $T_{2,3}$ G -शौर्य- (for -वीर्य-). — (L. 1111) T_1 नानावेषधराश्चैव (for the prior half). — (L. 1112) T_1 पुत्रस्य (for जीवस्य). T_1 उपस्थितः (for प्रजायते). — T_1 om. line 1113. — (L. 1113) G M पूर्व- (for पूर्वं). D_{10} G तु वा ; T_3 त्वया (for तथा). — (L. 1114) D_{10} T_1 यथा (for यदा). — (L. 1115) G_4 तु (for हि). D_{10} T_1 $G_{1,2,4}$ शक्यः (for शक्यं). D_{10} T_2 G_4 निर्देशः (for निदेशः). T_2 G_2 -कर्मणि (for °णः). — (L. 1119) T_1 गतायुषं (for °षो). D_{10} G ह्याक्षिपते (for °ति). T_3 $G_{1,3,4}$ जीवः (for जीवं). — D_{10} om. (hapl.) lines 1120–1124. T G M_4 om. (hapl.) lines 1120–1122. — (L. 1124) G_1 भूत- (for भूतो). T_2. $G_{2,4}$ द्विधा ; T_3 यथा (for ऽपि वा). — (L. 1127) D_{10} $T_{2,3}$ वि- (for ऽभि-). — Colophon. — *Adhy name* : D_{10} $T_{2,3}$ G_2 उमामहेश्वरसंवादे जीवहिंसाविधिः ; M उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} $T_{2,3}$ $G_{2,4}$ 196 ; $G_{1,3}$ M_1 190 ; $M_{2,3}$ 191 ; M_4 189. — T_1 महेशः ; G_2 शिवः (for महेश्वरः). — (L. 1129) T_2 देवेषु (for भूतेषु). — (L. 1130) D_{10} $G_{2,3}$ [उ]पहिताः ; T_1 °गताः ; T_2 °चिताः ; G_1 °रताः (for °हताः). — (L. 1131) T G_{1-3} M_3 स्थूल- (for स्थूलाः). — (L. 1132) T_1 [अ]ग्निदेशेषु (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बहूनां मृगयूथानां नानावननिषेविणाम् ।
यस्तु कालहतस्तेषां स वै कालेन वध्यते ।
सूनार्थं देवि बद्धानां क्षीणायुर्यो निबध्यते ।
अवशो घातकस्याथ हस्तं तदहरेति सः ।
यथा पक्षिगणाः क्षिप्रं विस्तीर्णाकाशगामिनः ।
क्षीणायुषो निबध्यन्ते शक्ता अपि पलायितुम् ।
यथा वारिचरा मीना बहवो बहुजातयः ।
जालं समधिरोहन्ति स्वयमेव विधेर्वशात् ।
शल्यकस्य च जिह्वाग्रं स्वयमारुह्य शोभने ।
आयुःक्षयेणोपहता निपद्यन्ते सरीसृपाः ।
कृषतां कर्षकाणां च नास्ति बुद्धिर्विहिंसने ।
अथैषां लाङ्गलाग्राद्यैर्हन्यन्ते जन्तवोऽक्षयाः ।
पादाग्रेणैव चैकेन यां हिंसां कुरुते नरः ।
मातंगोऽपि न तां कुर्यात्क्रूरो जन्मशतैरपि ।
म्रियन्ते यैर्हि मर्तव्यं न तान्हन्ति कृषीवलः ।
कृषामीति मतिस्तस्य नास्ति चिन्ता विहिंसने ।
तस्माज्जीवसहस्राणि हत्वापि न स लिप्यते ।
विधिना विहितः पूर्वं पश्चात्प्राणी विपद्यते ।
एवं सर्वेषु भूतेषु विधिर्हि दुरतिक्रमः ।
गतायुषा न शक्यं हि मुहूर्तमपि जीवितुम् ।
जीवितव्ये न मर्तव्यं न भूतं न भविष्यति ।
शुभाशुभं कर्मफलं न शक्यमतिवर्तितुम् ।
तथा ताभिश्च मर्तव्यं भोक्तव्याश्चैव तास्तथा ।
रन्तिदेवस्य गावो वै विधेर्हि वशमागताः ।
स्वयमायान्ति गावो वै हन्यन्ते यत्र सुन्दरि ।
गवां वै हन्यमानानां रुधिरप्रभवा नदी ।
चर्मण्वतीति विख्याता खुरशृङ्गास्थिदुर्गमा ।
रुधिरं तां नदीं प्राप्य तोयं भवति शोभने ।
मेध्यं पुण्यं पवित्रं च गन्धवर्णरसैर्युतम् ।
तत्राभिषेकं कुर्वन्ति कृतजप्याः कृताह्निकाः ।
द्विजा देवगणाश्चापि लोकपाला महेश्वराः ।
तस्य राज्ञः सदा सत्रे स्वयमागम्य सुन्दरि ।
विधिना पूर्वदृष्टेन तन्मांसमुपकल्पितम् ।
मन्त्रवत्प्रतिगृह्णन्ति यथान्यायं यथाविधि ।
समांसं च सदा ह्यन्नं शतशोऽथ सहस्रशः ।
भुञ्जानानां द्विजातीनामस्तमेति दिवाकरः ।
गावो यास्तत्र हन्यन्ते राज्ञस्तस्य क्रतूत्तमे ।
पठ्यमानेषु मन्त्रेषु यथान्यायं यथाविधि ।
ताश्च स्वर्गं गता गावो रन्तिदेवश्च पार्थिवः ।
सदा सत्रविधानेन सिद्धिं प्राप्तो नरेश्वरः ।
अथ यस्तु सहायार्थमुक्तः स्यात्पार्थिवैर्नरः ।
भोगानां संविभागेन वस्त्राभरणभूषणैः ।
सहभोजनसंबन्धैः सत्कारैर्विविधैरपि ।
सहायकाले संप्राप्ते संग्रामे शस्त्रमुद्धरेत् ।
व्यूढानीके यथा शस्त्रं सेनयोरुभयोरपि ।
हस्त्यश्वरथसंपूर्णे पदातिबलसंकुले ।
चामरच्छत्रशबले ध्वजचर्मायुधोज्ज्वले ।
शक्तितोमरकुन्तासिशूलपट्टसधारिभिः ।
कूटमुद्गरचापेषुभुसुण्डीमुष्टिमुष्टिभिः ।
भिन्दिपालगदाचक्रप्रासकर्पणधारिभिः ।
नानाप्रहरणैर्योधैः सेनयोरुभयोरपि ।
युद्धशौण्डैः प्रगर्जद्भिर्वृषेषु वृषभैरिव ।

प्रदीपेषु). M_{1-3} वै (for ते). — (L. 1133) T_2 G_2 नानामृग- (for °वन-). — (L. 1134) D_{10} $T_{1,3}$ G_{1-3} -गतस् (for -हतस्). D_{10} T G स वै (G_3 सर्वैः) पाशेन बध्यते (for the post. half). — (L. 1135) T_1 [ऽ]ति- (for नि-). — (L. 1138) T_2 प्र- (for नि-). — (L. 1139) T_2 $G_{1,3,4}$ [अं]बुज-; T_3 [अं]बुनि (for बहु-). — (L. 1141) G_2 शेरते (for शोभने). — (L. 1142) D_{10} $T_{2,3}$ G -बध्यंते ; T_1 -वर्तंते (for -पद्यन्ते). — (L. 1144) T_1 तयैषां ; M_1 अन्येषां (for अथैषां). — (L. 1145) M हि वा (for [ए]व च). — (L. 1147) $T_{2,3}$ G_2 M_3 कृषीवलाः. $G_{1,3}$ न तान्घ्नंति कृषीवलाः (for the post. half). — (L. 1148) D_{10} $T_{2,3}$ G_4 कर्षामि ; T_1 कृष्यामि (for कृषामि). D_{10} $T_{1,3}$ G_{1-3} मनस् ; T_2 विधिस् (for मतिस्). — (L. 1150) D_{10} स हतः ; $T_{2,3}$ G_4 साहितः (for विहितः). — (L. 1152) D_{10} G_4 मुहूर्तं तु (for न शक्यं हि). T_2 $G_{1,3}$ क्षणमप्युपजीवितुं ; G_4 न शक्यमुप° (for the post. half). — (L. 1153) G_4 जीवितं मे (for °तव्ये). — T_1 om. line 1155. — (L. 1156) T_1 हि (for वै). — (L. 1157) T_1 G_2 $M_{1,2,3}$ (also as above). $_4$ हि (for वै). — (L. 1158) T_1 G_{1-3} M_4 -प्रवहा (for -प्रभवा). — (L. 1159) G_2 -संकुला (for -दुर्गमा). — T_1 om. lines 1161 and 1164. T_1 om. the post. half of line 1166 and the prior half of line 1167. — (L. 1167) T_1 मांसमन्नं (for $G_{1,3,4}$ यथा ; G_2 यदा (for सदा). T_1 मांसमन्नं (for शतशोऽथ). — (L. 1168) $M_{1,2,4}$ दिवाकरे (for °रः). T_1 om. the post. half of line 1169 and the prior half of line 1170. — (L. 1172) D_{10} T_2 G नरोत्तमः ; T_1 वरानने (for नरेश्वरः). — (L. 1173) T_1 M_4 सन् (for स्यात्). — T_1 om. (hapl.) lines 1176–1177 and om. lines 1180–1188. — (L. 1180) D_{10} $T_{2,3}$ G $M_{1,2,3}$ (also as above). $_4$ -शूलमुद्गरपाणिभिः (for the post. half). — (L. 1182) D_{10} $T_{2,3}$ G M भिंडिपाल-. D_{10} T_3 G -कर्पट- ; T_2 -मुद्गर- (for -कर्पण-). — (L. 1186) D_{10} $T_{2,3}$ G_5 तु (for च). — (L. 1189) D_{10} T_2 G

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शङ्खदुंदुभिनादेन नानातूर्यरवेण च ।
हयहेषितशब्देन कुञ्जराणां च बृंहितैः ।
योधानां सिंहनादैश्च घण्टानां शिञ्जितस्वनैः ।
दिशश्च विदिशश्चैव समन्ताद्बधिरीकृताः ।
ग्रीष्मान्तेषु विगर्जद्भिर्नभसीव बलाहकैः ।
रथनेमिखुरोद्धूतैररुणै रणरेणुभिः ।
कपिलाभिरिवाकाशे छाद्यमाने समन्ततः ।
प्रवृत्ते शस्त्रसंपाते योधानां तत्र सेनयोः ।
तेषां प्रहारक्षतजं रक्तचन्दनसप्रभम् ।
ते स्रवन्तः स्वगात्रेभ्यस्तरन्ते रणमूर्धनि ।
पलाशाशोकपुष्पाणां जंगमा इव राशयः ।
रणे समभिवर्तन्त उद्यतायुधपाणयः ।
शोभमाना रणे शूरा आह्वयन्तः परस्परम् ।
हन्यमानेष्वभिघ्नत्सु शूरेषु रणसंकटे ।
पृष्ठं दत्त्वाथ ये तत्र नायकस्य नराधमाः ।
अनाहता निवर्तन्ते नायके वाप्यभीप्सति ।
ते दुष्कृतं प्रपद्यन्ते नायकस्याखिलं नराः ।
यच्चास्ति सुकृतं तेषां युज्यते तेन नायकः ।
अहिंसा परमो धर्म इति येऽपि नरा विदुः ।
संग्रामेषु न युध्यन्ते भृताश्चैवानुरूपतः ।
नरकं यान्ति ते घोरं भर्तृपिण्डापहारिणः ।
यस्तु प्राणान्परित्यज्य प्रविशेदुद्यतायुधः ।
संग्राममग्निप्रतिमं पतंगा इव निर्भयम् ।
सत्त्वमाविशते तत्र ज्ञात्वा योधस्य निश्चयम् ।
आविष्टश्चैव सत्त्वेन निर्घृणो जायते नरः ।
प्रहारैर्नन्दयेद्देवि सत्त्वेनाधिष्ठितो हि सः ।
प्रहारव्यथितश्चैव न वैक्लव्यमुपैति सः ।
यस्तु स्वं नायकं रक्षन्नतिघोरे रणाङ्गणे ।
तापयन्नरिसैन्यानि सिंहो मृगगणानिव ।
आदित्य इव मध्याह्ने दुर्निरीक्ष्यो रणाजिरे ।
निर्दयो यस्तु संग्रामे प्रहरत्युद्यतायुधः ।
यजते स तु पूतात्मा संग्रामेण महाक्रतुम् ।
वर्म कृष्णाजिनं तस्य दण्डकाष्ठं धनुः स्मृतम् ।
रथो वेदी ध्वजो यूपः कुशाश्च रथरश्मयः ।
मानो दर्पस्त्वहंकारस्त्रयस्त्रेताग्नयः स्मृताः ।
प्रतोदश्च स्रुवस्तस्य उपाध्यायोऽस्य सारथिः ।
स्रुग्भाण्डं चापि यत्किंचिद्यज्ञोपकरणानि च ।
आयुधान्यस्य तत्सर्वं समिधः सायकाः स्मृताः ।
स्वेदस्रावश्च गात्रेभ्यः क्षौद्रं तस्य यशस्विनः ।
पुरोडाशा नृशीर्षाणि रुधिरं चाहुतिः स्मृतम् ।
तूणश्चैव चरुर्ज्ञेयो वसोर्धारा वसा स्मृता ।
क्रव्यादा भूतसंघाश्च तस्मिन्यज्ञे द्विजातयः ।
तेषां भक्षान्नपानानि हता नृगजवाजिनः ।
भुञ्जते ते यथाकामं यथा यज्ञे किमिच्छके ।
निहतानां तु योधानां वस्त्राभरणभूषणम् ।
हिरण्यं च सुवर्णं च यद्वै यज्ञस्य दक्षिणा ।
यस्तत्र हन्यते देवि गजस्कन्धगतो नरः ।
ब्रह्मलोकमवाप्नोति रणेष्वभिमुखो हतः ।

[इ]व (for वि-). — (L. 1193) D_{10} $T_{2.3}$ G -संनिभं (for -सप्रभम्). — (L. 1194) D_{10} T_3 $G_{1.3.4}$ तेषाम(D_{10} T_3 G_1 °मा)स्राणि गात्रेभ्यः; T_1 प्रस्रवतश्च गा°; G_2 तेषामास्रवगा° (for the prior half). D_{10} T_2 $G_{1.3.4}$ स्रवंते (for तरन्ते). — T_1 om. lines 1197–1198. — (L. 1198) G_4 शूरेण (for शूरेषु). — (L. 1199) D_{10} T G_{1-3} M_4 च; G_4 तु (for [अ]थ). — T_1 om. line 1200. — (L. 1200) $G_{1.3}$ अनाहूता. T_3 om. (hapl.) from the post. half up to the prior half of line 1204. D_{10} T_2 G न (for वा). — (L. 1201) T_2 दुष्करं (for दुष्कृतं). — (L. 1203) T_1 ये च; G_2 केचिन् (for येऽपि). — (L. 1204) D_{10} T G भृत्याश्; M_4 हताश् (for भृताश्). — (L. 1207) M निर्भयाः (for निर्भयम्). D_{10} T G पतंग इव निर्भयः (for the post. half). — T_1 om. lines 1208–1212. — (L. 1208) D_{10} $T_{2.3}$ G स्वर्गम् (for सत्त्वम्). D_{10} $G_{1.4}$ ज्ञात्वा; T_3 यत्र (for तत्र). D_{10} G_4 सोऽपि (for ज्ञात्वा). T_2 यो यस्य गतिनिश्चयं (for the post. half). — (L. 1209) D_{10} $T_{2.3}$ G सघृणो (for निर्घृणो). — (L. 1210) T_2 (also as above) नरः (for हि सः). — (L. 1212) D_{10} $T_{2.3}$ G रक्षेद् (for रक्षन्). T_2 M रणाकरे (for रणाङ्गणे). — (L. 1214) G_{1-3} स सूर्य (for आदित्य). — (L. 1215) D_{10} T_2 G प्रहरन्; T_1 प्रहरेद् (for प्रहरति). — (L. 1216) T_2 $G_{1.3.4}$ M_4 यस् (for स). T_2 धर्मात्मा (for पूतात्मा). — (L. 1217) T $G_{1.3}$ M_4 चर्म (for वर्म). D_{10} $T_{1.3}$ G दंत- (for दण्ड-). — (L. 1218) D_{10} $T_{1.2}$ G वेदिर् (for वेदी). (L. 1219) $T_{2.3}$ G_2 M_3 मनो- (for मानो). T_2 तस्य (for त्रयस्). — $M_{1.3}$ om. (hapl.) lines 1220–1222. — (L. 1220) D_{10} G_4 तपस् (for स्रुवस्). D_{10} $T_{2.3}$ G हि; M_4 च (for ऽस्य). — (L. 1222) $G_{1.3.4}$ साधकाः (for सायकाः). — T_1 om. line 1223. — (L. 1223) D_{10} T_2 $G_{1.3.4}$ -स्रवं (for -स्रावश्). — (L. 1224) D_{10} T G_{1-3} स्मृताः; G_4 तथा (for स्मृतम्). — (L. 1226) T_2 $M_{1.3}$ क्रव्याद- (for °दा). — T_1 om. lines 1227–1228. — (L. 1227) D_{10} T_3 G_4 भक्तान्न- (for भक्षान्न-). M_4 स्मृता (for हता). — (L. 1228) G_1 च (for ते). D_{10} किमिच्छतां; $G_{1.3.4}$ °ति (for °के). — (L. 1229) G च (for तु). T_1 वीराणां (for योधानां). G_3 om.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रथमध्यगतो वापि हयपृष्ठगतोऽपि वा ।
हन्यते यस्तु संग्रामे शक्रलोके महीयते ।
स्वर्गे हन्ता पूज्यते तैर्हतस्तत्रैव पूज्यते ।
द्वावेतौ सुखमेधेते हन्ता यश्चैव हन्यते ।
तस्मात्संग्राममासाद्य प्रवर्तव्यमभीतवत् ।
निर्भयो यस्तु संग्रामे प्रहरेदुद्यतायुधः ।
राज्ञो वल्लभतामेति कुलं भावयते स्वकम् ।
यथा नदीसहस्राणि प्रविष्टानि महोदधिम् ।
तथा सर्वे न संदेहो धर्मो धर्मभृतां वरे ।
प्रविष्टा राजधर्मेण आचार्यविनयस्तथा ।
वेदोक्ताश्चैव ये धर्माः पाषण्डेषु च कीर्तिताः ।
तथैव मानवा धर्मा धर्माश्चान्ये तथापरे ।
देशजातिकुलानां च ग्रामधर्मास्तथैव च ।
ये धर्माः पार्वतीयेषु ये धर्माः पत्तनादिषु ।
तेषां पूर्वप्रवृत्तानां कर्तव्यं परिरक्षणम् ।
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हन्तव्यः पार्थिवेन विशेषतः ।
प्रजाः पालयते यत्र धर्मेण वसुधाधिपः ।
षट्कर्मनिरता विप्राः पूज्यन्ते पितृदेवताः ।
नैव तस्मिन्ननावृष्टिर्न रोगा नाप्युपद्रवाः ।
धर्मशीलाः प्रजाः सर्वाः स्वधर्मनिरते नृपे ।
एष्टव्यः सततं देवि युक्ताचारो नराधिपः ।
छिद्रज्ञश्चैव शत्रूणामप्रमत्तः प्रतापवान् ।
शूद्राः पृथिव्यां बहवो राज्ञां बहुविनाशकाः ।
तस्मात्प्रमादं सुश्रोणि न कुर्यात्पण्डितो नृपः ।
तेषु मित्रेषु त्यक्तेषु तथा मर्त्येषु हस्तिषु ।
विस्रम्भो नोपगन्तव्यः स्नानपानेषु नित्यशः ।
राज्ञो वल्लभतामेति कुलं भावयते स्वकम् ।
यस्तु राष्ट्रहितार्थाय गोब्राह्मणकृते तथा ।
बन्दिग्राहाय मित्रार्थे प्राणांस्त्यजति दुस्त्यजान् ।
सर्वकामदुघां धेनुं धरणीं लोकधारिणीम् ।
ससमुद्रान्तां वरारोहे सशैलवनकाननाम् ।
दद्याद्देवि द्विजातिभ्यो वसुपूर्णां वसुंधराम् ।
न तत्समं वरारोहे प्राणत्यागी विशिष्यते ।
सहस्रमपि यज्ञानां यजते यदि चर्द्धिमान् ।
यज्ञैस्तस्य किमाश्चर्यं प्राणत्यागः सुदुष्करः ।
तस्मात्सर्वेषु यज्ञेषु शस्त्रयज्ञो विशिष्यते ।
एवं संग्रामयज्ञास्ते यथातत्त्वमुदाहृताः ।

Colophon.

महेश्वरः ।

मृगयात्रां तु वक्ष्यामि शृणु तां धर्मचारिणि ।
मृगान्हत्वा महीपालो यथा पापैर्न लिप्यते ।
निर्मानुषामिमां सर्वां मृगा इच्छन्ति मेदिनीम् ।
भक्षयन्ति च सस्यानि शासितव्या नृपेण ते ।
दुष्टानां शासनं धर्मः शिष्टानां परिपालनम् ।
कर्तव्यं भूमिपालेन नित्यं कार्येषु चार्जवम् ।
स्वर्गं मृगाश्च गच्छन्ति स्वयं नृपतिना हताः ।
यथा गावो ह्यगोपालास्तथा राष्ट्रमनायकम् ।
तस्माद्वंशास्तु देवानां गन्धर्वोरगरक्षसाम् ।
राज्ये नियुक्ता राष्ट्रेषु प्रजापालनकारणात् ।
अशिष्टशासने चैव शिष्टानां परिपालने ।
तेषां चर्यां प्रवक्ष्यामि श्रूयतामनुपूर्वशः ।
यथा प्रचरतां तेषां पार्थिवानां यशस्विनि ।
राष्ट्रं धर्मो धनं चैव यशः कीर्तिश्च वर्धते ।

(hapl.) from the post half of line 1234 up to the prior half of line 1238. — (L. 1235) D_{10} T $G_{1.2.4}$ स्वर्गे हताः प्रपूज्यंते (for the prior half). D_{10} $T_{2.3}$ $G_{1.2.4}$ हंता त्वत्र (for हतस्तत्र). — G_2 om. lines 1237–1256. — (L. 1238) T_1 $G_{1.3}$ M प्रहरति (for °रेद्). — D_{10} T $G_{1.3.4}$ M_4 om. line 1239 — (L. 1241) D_{10} T_2 धर्मे धर्मभृतां वरं ; $T_{1.3}$ $G_{1.3}$ धर्माधर्मभृतां वरे ($G_{1.3}$ °रं) (for the post. half) — T_1 om. line 1242. — (L. 1242) D_{10} T_2 $G_{1.3.4}$ आचार- (for °र्य-). T_1 om. (hapl.) from the post. half of line 1243 up to the prior half of line 1244. — (L. 1244) $G_{1.3.4}$ च (for [प]र). D_{10} $T_{2.3}$ मानुषा (for मानवा). D_{10} T_2 G_4 [इ]तरे (for [अ]परे). T_1 धर्माश्चैव तु मानवाः (for the post. half). — (L. 1245) T_1 देशजाः कुलजाश्चैव (for the prior half). — (L. 1246) D_{10} T_1 ये धर्माः पट्टनादिषु (for the post. half). — Lines 1248–1249 = (var.) Manu. 8. 15. — T_1 om. line 1251. — (L. 1251) G_3 स्वकर्म- (for षट्कर्म-). — (L. 1253) $G_{1.3}$ सत्यधर्मरतैर्नृपैः (for the post. half). — (L. 1254) T_1 यष्टव्यः (for एष्टव्यः). G_3 एष्टव्यं देवि सततं (for the prior half). — T_1 om. lines 1255–1260. — (L. 1258) $G_{1.3}$ भृत्येषु (for मर्त्येषु). — (L. 1262) T_1 प्राणत्यागः सुदुष्करः (for the post. half). — G_1 om. lines 1266–1269. — (L. 1270) D_{10} T G यथार्थं स(T_1 °वत्स)मुदाहृताः (for the post. half.). — Colophon. — *Adhy. name :* $T_{2.3}$ $M_{1.2.4}$ उमामहेश्वरसंवादः. — *Adhy. no. :* T_1 G_3 M_1 191 ; $T_{2.3}$ G_4 197 ; $M_{2.3}$ 192 ; M_4 190. — M_1 om. (hapl. ?) from the post. half of line 1272 up to the prior half of line 1276. — (L. 1273) T_1 गच्छंति (for इच्छन्ति). — (L. 1278) $M_{1.4}$ अराजकं (for अनायकम्). — T_1 om lines 1281-1284. — (L. 1282) T_3 चैषां (for चर्यां). — T_3 om. lines 1283-1287.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नृपाणां पूर्वमेवायं धर्मो धर्मभृतां वरे ।
सभाप्रपातटाकानि देवतायतनानि च ।
ब्राह्मणावसथाश्चैव कर्तव्या नृपसत्तमैः ।
ब्राह्मणा नावमन्तव्या भस्मच्छन्ना इवाग्नयः ।
कुलमुत्सादयेयुस्ते क्रोधाविष्टा द्विजातयः ।
ध्मायमानो यथा ह्यग्निर्निर्दहेत्सर्वमिन्धनम् ।
तथा क्रोधाग्निना विप्रा दहेयुः पृथिवीमिमाम् ।
न हि विप्रेषु क्रुद्धेषु राज्यं भुञ्जन्ति भूमिपाः ।
परिभूय द्विजान्मोहाद्वातापिनहुषादयः ।
सबन्धुमित्रा नष्टास्ते दग्धा ब्राह्मणमन्युभिः ।
शरीरं चापि शक्रस्य कृतं भगनिरन्तरम् ।
ततो देवगणाः सर्वे इन्द्रस्यार्थे महामतिम् ।
प्रसादं कारयामासुः प्रणामस्तुतिवन्दनैः ।
तेन प्रीतेन सुश्रोणि गौतमेन महात्मना ।
तच्छरीरं तु शक्रस्य सहस्रभगचिह्नितम् ।
कृतं नेत्रसहस्रेण क्षणेनैव निरन्तरम् ।
छित्त्वा मेषस्य वृषणौ गौतमेनाभिमन्त्रितौ ।
इन्द्रस्य वृषणौ भूत्वा क्षिप्रं वै श्लेषमागतौ ।
एवं विप्रेषु क्रुद्धेषु देवराजः शतक्रतुः ।
अशक्तः शासितुं राज्यं किं पुनर्मानुषो भुवि ।
क्रोधाविष्टो दहेद्विप्रः शुष्केन्धनमिवानलः ।
भस्मीकृत्य जगत्सर्वं सृजेदन्यजगत्पुनः ।
अदेवानपि देवान्स कुर्याद्देवानदेवताः ।
तस्मान्नोत्पादयेन्मन्युं मन्युप्रहरणा द्विजाः ।
महत्स्वप्यपराधेषु शासनं नार्हति द्विजः ।
न च शस्त्रनिपातानि न च प्राणैर्वियोजनम् ।
दृश्यते त्रिषु लोकेषु ब्राह्मणानामनिन्दिते ।
क्रोधाश्च विपुला घोराः प्रसादाश्चाप्यनुत्तमाः ।
तस्मान्नोत्पादयेत्क्रोधं नित्यं पूज्या द्विजातयः ।
दृश्यते न स लोकेऽस्मिन्भूतो वाथ भविष्यति ।
क्रुद्धेषु यो वै विप्रेषु राज्यं भुङ्क्ते नराधिपः ।
न चैवोपहसेद्विप्रान्न चैवोपालभेच्च तान् ।
कालमासाद्य कुप्येच्च काले कुर्यादनुग्रहम् ।
संप्रहासश्च भृत्येषु न कर्तव्यो नराधिपैः ।
लघुत्वं चैव प्राप्नोति आज्ञा चास्य निवर्तते ।
भृत्यानां संप्रहासेन पार्थिवः परिभूयते ।
अयाच्यानि च याचन्ति अवक्तव्यं ब्रुवन्ति च ।
पूर्वमप्युचितैर्लाभैः परितोषं न यान्ति ते ।
तस्माद्भृत्येषु नृपतिः संप्रहासं विवर्जयेत् ।
न विश्वसेदविश्वस्ते विश्वस्ते च न विश्वसेत् ।
सगोत्रेषु विशेषेण सर्वोपायैर्न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं हन्याद्वृक्षमिवाशनिः ।
प्रमादाद्धन्यते राजा लोभेन च वशीकृतः ।
तस्मात्प्रमादं लोभं च न कुर्यान्न च विश्वसेत् ।
भयार्तानां परित्राता दीनानुग्रहकारकः ।
तस्मात्कृत्यविशेषज्ञो नित्यं राष्ट्रहिते रतः ।
सत्यसंधः स्थितो राज्ये प्रजापालनतत्परः ।
अलुब्धो न्यायवादी च षड्भागं चोपजीवति ।
कार्याकार्यविशेषज्ञः सर्वं धर्मेण पश्यति ।
स्वराष्ट्रेषु दयां कुर्यादकार्यं न प्रवर्तते ।
ये चैवैनं प्रशंसन्ति ये च निन्दन्ति मानवाः ।
शत्रुं च मित्रवत्पश्येदपराधविवर्जितम् ।
अपराधानुरूपेण दुष्टं दण्डेन शासयेत् ।
धर्मः प्रवर्तते तत्र यत्र दण्डरुचिर्नृपः ।

— (L. 1289) D_{10} T_1 मूलम् (for कुलम्). — (L. 1290) T_3 धार्यमाणो (for ध्मायमानो). T_1 वह्निर् (for ह्यग्निर्). T_1 M दहेत्सर्वमपींधनं (for the post. half). — (L. 1292) G_{1-3} न हि क्रुद्धेषु विप्रेषु (for the prior half). — (L. 1293) T_3 यथा हि (for वातापि-). — (L. 1296) $G_{1.3}$ M_4 -मुनिं (for -मतिम्). — (L. 1297) D_{10} G_2 प्रमादं कामयामासुः (for the prior half). $G_{1.3.4}$ प्रसाद- (for प्रणाम-). — (L. 1299) T_2 -निर्मितं (for -नचिह्नितम्). — (L. 1301) $G_{1.3}$ [अ]स्य मेष- (for मेषस्य). — (L. 1304) D_{10} मानुषा (for °षो). — (L. 1316) D_{10} T $G_{1.3.4}$ [अ]प- (for [उ]प-). T_1 विद्वान् (for विप्रान्). — (L. 1317) $G_{1.3}$ कुप्याच्च् (for कुप्येच्च्). — (L. 1319) T_1 तस्य (for चास्य). — (L. 1321) G_2 अयुद्धानि (for अयाच्यानि). — (L. 1322) T_1 कृतैर् (for पूर्वम्). $G_{1.3.4}$ पूर्वमप्यर्पितैर्लोभैः (for the prior half). — (L. 1323) T_1 परिहासं विसर्जयेत् (for the post. half).

— Line 1324 = (var.) 12. 136. 138^{ab}; 136. 318*, line 1. — (L. 1324) M_{1-3} अविश्वस्तं (for °स्ते). D_{10} T G_{1-3} $M_{1.3}$ न च (by transp.); G_4 नाति-; M_4 om. — G_2 om. (hapl.) lines 1325–1328. — Line 1326 = (var.) 12. 136. 138^{cd}. — (L. 1326) T_1 विश्वस्ताद् (for विश्वासाद्). — (L. 1328) $M_{1.3}$ प्रसादं (for प्रमादं). T_3 च कुर्यान्न (for कुर्यान्न च). — (L. 1329) D_{10} T G_{2-4} M_4 भयत्राता (for परि°). $T_{2.3}$ $G_{3.4}$ -कारणात् (for -कारकः). — T_1 om. line 1330. — (L. 1330) D_{10} T_2 G कार्याकार्य- (for तस्मात्कृत्य-). D_{10} om. the post. half and the prior half of line 1331. — (L. 1332) T_1 षड्भागकृतजीविनः (for the post. half). — (L. 1333) $T_{2.3}$ $G_{2.4}$ M_{1-3} सर्व- (for सर्वं). — (L. 1334) $G_{2.3}$ अकार्ये (for °र्यं). T_1 प्रवर्तयेत् (for °र्तते). — (L. 1337) G_2 दुष्टान् (for दुष्टं). — (L. 1338) T_1 [illegible] प्रवर्तते (for the post. half).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नाधर्मो विद्यते तत्र यत्र राजा क्षमान्वितः ।
अशिष्टशासनं धर्मः शिष्टानां परिपालनम् ।
वध्यांश्च घातयेद्यस्तु अवध्यान्परिरक्षति ।
अवध्या ब्राह्मणा गावो दूतश्चैव पिता तथा ।
विद्यां ग्राहयते यश्च ये च पूर्वोपकारिणः ।
स्त्रियश्चैव न हन्तव्या यश्च सर्वातिथिर्नरः ।
धरणीं गां हिरण्यं च सिद्धान्नं च तिलान्घृतम् ।
ददन्नित्यं द्विजातिभ्यो मुच्यते राजकिल्बिषात् ।
एवं चरति यो नित्यं राजा राष्ट्रहिते रतः ।
तस्य राष्ट्रं धनं धर्मो यशः कीर्तिश्च वर्धते ।
न च पापैर्न चानर्थैर्युज्यते स नराधिपः ।
षड्भागमुपयुञ्जन्यः प्रजा राजा न रक्षति ।
स्वचक्रपरचक्राभ्यां धनैर्वा विक्रमेण वा ।
निरुद्योगो नृपो यश्च परराष्ट्रनिघातने ।
स्वराष्ट्रं निष्प्रतापस्य परचक्रेण हन्यते ।
यत्पापं परचक्रस्य परचक्राभिघातने ।
तत्पापं सकलं राजा हतराष्ट्रः प्रपद्यते ।
मातुलं भागिनेयं वा मातरं श्वशुरं गुरुम् ।
पितरं वर्जयित्वैकं हन्याद्धातकमागतम् ।
स्वस्य राष्ट्रस्य रक्षार्थं युध्यमानस्तु यो हतः ।
संग्रामे परचक्रेण श्रूयतां तस्य या गतिः ।
विमाने तु वरारोहे अप्सरोगणसेविते ।
शक्रलोकमितो याति संग्रामे निहतो नृपः ।
यावन्तो लोमकूपाः स्युस्तस्य गात्रेषु सुन्दरि ।
तावद्वर्षसहस्राणि शक्रलोके महीयते ।
यदि वै मानुषे लोके कदाचिदुपपद्यते ।
राजा वा राजमात्रो वा भूयो भवति वीर्यवान् ।
तस्माद्यत्नोऽनुकर्तव्यः स्वराष्ट्रपरिपालने ।
व्यवहारश्च चारश्च सततं सत्यसंधता ।
अप्रमादः प्रमोदश्च व्यवसायेऽप्यचण्डता ।
भरणं चैव भृत्यानां वाहनानां च पोषणम् ।
योधानां चैव सत्कारः कृते कर्मण्यमोघता ।
श्रेय एव नरेन्द्राणामिह चैव परत्र च ।

Colophon.

महेश्वरः ।

पशवः पशुबन्धेषु ये हन्यन्तेऽध्वरेषु च ।
यूपे निबद्धा मन्त्रैश्च यथान्यायं यथाविधि ।
मन्त्राहुतिविपूतास्ते स्वर्गं यान्ति यशस्विनि ।
तर्पिता यज्ञभागेषु तेषां मांसैर्वरानने ।
अग्नयस्त्रिदशाश्चैव लोकपालाः सहेश्वराः ।
तेषु तुष्टेषु जायेत तस्य यज्ञस्य यत्फलम् ।
तेन संयुज्यते देवि यजमानो न संशयः ।
सपत्नीकः सपुत्रः स स पितृभ्रातृभिः सह ।
ये तत्र दीक्षिता देवि सर्वे स्वर्गं प्रयान्ति ते ।
एतत्ते सर्वमाख्यातं भूयः श्रोतुं किमिच्छसि ।

उमा ।

भगवन्सर्वभूतेश शूलपाणे महाद्युते ।
श्रोतुमिच्छाम्यहं वृत्तं सर्वेषां गृहमेधिनाम् ।
कीदृशं चरितं तेषां त्रिवर्गसहितं प्रभो ।
प्रत्यायतिः कथं तेषां जीवनार्थमुदाहृतम् ।

— (L. 1339) T_1 G_2 M वर्तेत (for विद्यते). — T_1 om. line 1341. — (L. 1342) D_{10} $T_{1.3}$ $G_{3.4}$ दूताश् (for दूतश्). T_3 [अ]पि (for [ए]व). — (L. 1343) G_2 श्रावयते (for ग्राह°). — (L. 1346) T_1 मुच्यते महतो भयात् (for the post. half). — T_1 om. lines 1349–1351. — (L. 1349) M_4 [ऽ]सौ (for स). — (L. 1350) $G_{1.3}$ M_4 -युंजानः (for -युञ्जन्यः). — (L. 1351) D_{10} T_2 $G_{1.3.4}$ धर्मैर् (for धनैर्). — G_3 om. (hapl.) from the post. half of line 1352 up to the prior half of line 1354. D_{10} T_2 om. (hapl.) lines 1353–1354. T_1 om. (hapl.) line 1354. — (L. 1354) T_3 $G_{1.3.4}$ M परराष्ट्राभिघातने (for the post. half). — (L. 1355) T_3 यत् (for तत्). — (L. 1356) T_1 $G_{1.3}$ $M_{1.4}$ च (for वा). — (L. 1358) $M_{1.3}$ तस्य (for स्वस्य). T_1 राज्यस्य (for राष्ट्रस्य). — (L. 1360) G_{1-3} M विमानेन (for °ने तु). T_1 G_{1-3} M -सेवितः (for °ते). — (L. 1362) $G_{1.3}$ च (for स्युस्). — (L. 1365) $M_{2.3}$ राजपुत्रो (for °मात्रो). — (L. 1366) D_{10} T G M_4 तस्माद्यत्नेन कर्तव्यं (for the prior half). D_{10} T G $M_{1.4}$ -पालनं (for °ने). — (L. 1367) T_1 व्यवहारविचारश्च (for the prior half). — (L. 1368) T_3 M_1 प्रमादश् (for प्रमोदश्). T_1 [अ]तंद्रिता (for [अ]चण्डता). — (L. 1371) T_1 एवं श्रेयो (for श्रेय एव). — Colophon. — *Adhy. name :* D_{10} $T_{2.3}$ G_3 उमामहेश्वरसंवादे राष्ट्ररक्षणफलवर्णनं ; M उमा-महेश्वरसंवादः. — *Adhy. no. :* D_{10} $T_{2.3}$ $G_{2.4}$ 198 ; $G_{1.3}$ M_1 192 ; $M_{2.3}$ 193 ; M_4 191. — T_1 महेशः (for महेश्वरः). — (L. 1373) D_{10} T_3 G निबध्य (for निबद्धा). — (L. 1374) T_1 -विधूतास् (for -विपू°). — (L. 1375) T_3 -भक्षेषु (for -भागेषु). — (L. 1377) G_3 om. (hapl.) तुष्टेषु. $G_{1.3}$ तद् (for यद्). T_1 यज्ञ-भागस्य यत्फलं (for the post. half). — T_1 om. lines 1379–1381. — (L. 1379) D_{10} $T_{2.3}$ G च (for स). D_{10} $T_{2.3}$ G पित्रा च ; M_4 स पित्रा (for स पितृ-). — (L. 1381) D_{10} $T_{2.3}$ G किं भूयः श्रोतुमिच्छसि (for the post. half). — T_1 om. lines 1382–1388. — (L. 1383) G_{1-3} -वासिनां (for -मेधिनाम्). — T_3 $G_{1.3}$ om. (hapl.) the post. half of line 1384 and the prior

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वर्तमानाः कथं सर्वे प्राप्नुवन्त्युत्तमां गतिम् ।
एतत्सर्वं समासेन वक्तुमर्हसि मानद ।
महेश्वरः ।
न्यायतस्त्वं महाभागे श्रोतुकामासि भामिनि ।
प्रायशो लोकसद्वृत्तमिष्यते गृहवासिनाम् ।
तेषां संरक्षणार्थाय राजानः संस्मृता भुवि ।
सर्वेषामथ मर्त्यानां वृत्तिं सामान्यतः शृणु ।
विद्या वार्त्ता च सेवा च कारुत्वं नाट्यता तथा ।
इत्येते जीवनार्थाय मर्त्यानां विहिताः प्रिये ।
अपि जन्मफलं तावन्मानुषाणां विशेषतः ।
विहितं तत्स्ववृत्तेन तन्मे निगदतः शृणु ।
कर्मक्षेत्रं हि मानुष्यं भोगदुःखयुताः परे ।
सर्वेषां प्राणिनां तस्मान्मानुष्ये वृत्तमिष्यते ।
विद्यायोगस्तु सर्वेषां पूर्वमेव विधीयते ।
कार्याकार्यं विजानाति विद्यया देवि नान्यथा ।
विद्यया स्फीयते ज्ञानं ज्ञानात्तत्त्वविदर्शनम् ।
दृष्टतत्त्वो विनीतात्मा सर्वार्थस्य च भाजनम् ।
शक्यं विद्याविनीतेन लोके संजीवनं सुखम् ।
आत्मानं विद्यया तस्मात्पूर्वं कृत्वा तु भाजनम् ।
वश्येन्द्रियो जितक्रोधो भूत्वात्मानं तु भावयेत् ।
भावयित्वा तथात्मानं पूजनीयः सतामपि ।
कुलानुवृत्तं वृत्तं वा पूर्वमेव समाश्रयेत् ।
इष्यते गृहवासाय दारकर्म यथापुरम् ।
यदि चेद्विद्यया चैव वृत्तिं काङ्क्षेदथात्मनः ।
राजविद्यां तु वादेऽपि लोकविद्यामथापि वा ।
तीर्थतश्चापि गृह्णीयाच्छुश्रूषादिगुणैर्युतः ।
ग्रन्थतश्चार्थतश्चैव दृढीकुर्यात्प्रयत्नतः ।
एवं विद्याफलं देवि प्राप्नुयान्नान्यथा नरः ।
न्यायाद्विद्याफलं चेच्छेदधर्मं तत्र वर्जयेत् ।
यदि चेद्वार्त्तया वृत्तिं काङ्क्षेत विधिपूर्वकम् ।
क्षेत्रे जलोपपन्ने च तद्योग्यां कृषिमाचरेत् ।
वाणिज्यं वा यथाकालं कुर्यात्तद्देशयोगतः ।
मूल्यमर्थं प्रयासं च विचार्यैव फलोदयौ ।
पशुसंजीवकश्चैव देशे गाः पोषयेद्ध्रुवम् ।
बहुप्रकारा बहवः पशवस्तस्य साधकाः ।
यः कश्चित्सेवया वृत्तिं काङ्क्षेत मतिमान्नरः ।
यतात्मा श्रवणीयानां भवेद्धि संप्रयोजकः ।
बुद्ध्या वा कर्मयोगाद्वा योधनाद्वा समाश्रयेत् ।
मार्गतस्तु समाश्रित्य तदा तत्संप्रियो भवेत् ।
यथा यथा स तुष्येत तथा संतोषयेत तम् ।
अनुजीविगुणोपेतः कुर्यादात्मार्थमाश्रितः ।
विप्रियं नाचरेत्तस्य एषा सेवा समासतः ।
विप्रयोगात्पुरा तेन गतिमन्यां न लक्षयेत् ।
कारुकर्म च नाट्यं च प्रायशो नीचयोनिषु ।

half of line 1385. —(L. 1385) T_{2} G_{4} तेषु (for तेषां). —(L. 1388) G_{1-3} सु- (for त्वं). —(L. 1389) T_{1} -मेधिनां (for -वासिनाम्). —(L. 1390) D_{10} G M_{3} संस्कृता (for संस्मृता). —(L. 1391) $G_{1.3}$ एत्र (for अथ). T_{1} वर्णानां (for मर्त्यानां). G_{3} वृत्तं (for वृत्तिं). —(L. 1392) T_{1} कुशीदं कारवं तथा (for the post. half). —(L. 1393) G_{4} तथा (for प्रिये). —(L. 1394) T_{1} मनुष्याणां (for मानुषाणां). —(L. 1395) D_{10} T G_{2-4} तन्मे शृणु समाहिता (for the post. half). —(L. 1396) T_{2} $G_{1.3.4}$ सुख- (for भोग-). T_{1} भोगयुक्तास्तथापरे (for the post. half). —(L. 1397) D_{10} $T_{2.3}$ G वृत्तिर् (for वृत्तम्). —(L. 1398) $M_{2.3}$ -योगं (for -योगस्). —(L. 1399) T G_{2-4} विजानंति (for °नाति). G_{3} om. from the post. half up to the prior half of line 1403. —(L. 1400) T_{1} [अ]न्वीयते (for स्फी°). T_{3} ज्ञानं (for ज्ञानात्). T_{1} -निदर्शनं (for -विदर्शनम्). —(L. 1401) T_{1} असौ लोके (for दृष्टतत्त्वो). $G_{1.3}$ भामिनि (for भाजनम्). —(L. 1402) D_{10} T_{3} $G_{1.3.4}$ M_{4} शुभं (for सुखम्). T_{1} संप्राप्तुं जीवनं शुभं (for the post. half). — T_{1} om. line 1403. —(L. 1404) D_{10} T_{3} G M_{4} भूतात्मानं (for भूत्वा°). —(L. 1405) D_{10} T_{3} G M_{4} तदा (for तथा). —(L. 1406) T_{1} पूर्वमात्मानमाश्रयेत् (for the post. half). — T_{1} om. line 1407. —(L. 1407) D_{10} $T_{2.3}$ G इत्येनत्कुलवासाय (for the prior half). D_{10} T_{2} G यथा पुरा; M_{4} यथाकुलं (for °पुरम्). —(L. 1409) D_{10} T_{3} G -विद्यानु- (for -विद्यां तु). —(L. 1411) D_{10} $T_{2.3}$ G दृढं; M_{4} गृही- (for दृढी-). —(L. 1413) M_{1-3} न्याय- (for न्यायाद्). $G_{1.3.4}$ -फलानि (for -फलं च). —(L. 1414) D_{10} $T_{2.3}$ G यदिच्छेद् (for यदि चेद्). —(L. 1415) G_{1-3} तद्योगात्; G_{4} तद्योगां (for तद्योग्यां). —(L. 1416) T_{1} हि (for वा). —(L. 1417) T_{1} व्ययाव्ययौ; T_{2} $G_{1.3}$ M व्ययोदयौ (for फलोदयौ). D_{10} $G_{2.4}$ विचार्यौ च व्ययोदयौ; T_{3} °र्थाथ व्ययाव्ययौ (for the post. half). —(L. 1418) D_{10} $T_{1.2}$ G -संजीवनं (for °वकश्च). T_{3} देवि (for देशे). —(L. 1420) T_{2} कांक्षते; $G_{1.2}$ आकांक्षेन् (for काङ्क्षेत). G_{3} आकांक्षिद्भूतिमान्नरः (for the post. half). —(L. 1422) T_{2} संप्र- (for कर्म-). M_{1-3} योधत्वाद् (for °नाद्). G_{4} समाचरेत् (for °श्रयेत्). —(L. 1423) D_{10} $T_{1.3}$ $G_{1.2.4}$ M_{4} तदा (T_{1} तथा; M_{4} सदा) तत्संप्रयोजयेत् (for the post. half). —(L. 1424) D_{10} $T_{2.3}$ G_{1-3} संतोषयेत्तु (for °येत). G_{4} तथा तत्संप्रतोषयेत् (for the post. half). —(L. 1425) $T_{2.3}$ $G_{1.3.4}$ M_{4} आश्रितं (for °तः).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तयोरपि यथायोगं न्यायतः कर्मवेतनम् ।
आजीवेभ्योऽपि सर्वेभ्यश्चार्जवाद्वेतनं हरेत् ।
अनार्जवादाहरतस्तत्तु पापाय कल्पते ।
सर्वेषां पूर्वमारम्भांश्चिन्तयेन्नयपूर्वकम् ।
आत्मशक्तिमुपायांश्च देशकालौ च शक्तितः ।
कारणानि प्रवासं च प्रक्षेपं च फलोदयम् ।
एवमादीनि संचिन्त्य दृष्ट्वा दैवानुकूलताम् ।
अतःपरं समारम्भेद्यत्रात्महितमाहितम् ।
वृत्तिमेवं समासाद्य तां सदा परिपालयेत् ।
दैवमानुषविघ्नेभ्यो न पुनर्भ्रश्यते यथा ।
पालयन्वर्धयन्भुञ्जंस्तां प्राप्य न विनाशयेत् ।
क्षीयते गिरिसंकाशमश्नतो ह्यनपेक्षया ।
आजीवेभ्यो धनं प्राप्य चतुर्धा विभजेद्बुधः ।
धर्मायार्थाय कामाय आपत्प्रशमनाय च ।
चतुर्ष्वपि विभागेषु विधानं शृणु शोभने ।
यज्ञार्थं चान्नदानार्थं दीनानुग्रहकारणात् ।
देवब्राह्मणपूजार्थं पितृपूजार्थमेव च ।
कुलार्थं संनिवासार्थं क्रियानित्यैश्च धार्मिकैः ।
एवमादिषु चान्येषु धर्मार्थं संत्यजेद्धनम् ।
धर्मकार्ये धनं दद्यादनवेक्ष्य फलोदयम् ।
ऐश्वर्यस्थानलाभार्थं राजवाल्लभ्यकारणात् ।
वार्त्तायां च समारम्भे भृत्यमित्रपरिग्रहे ।
आवाहे च विवाहे च पुत्राणां वृत्तिकारणात् ।
अर्थोदयसमावाहावनर्थस्य विघातने ।
एवमादिषु चान्येषु अर्थार्थं विभजेद्धनम् ।
अनुबन्धं फलं हेतुं दृष्ट्वा वित्तं परित्यजेत् ।
अनर्थं बाधते ह्यर्थो अर्थं चैव फलान्युत ।
नाधनाः प्राप्नुवन्त्यर्थान्नरा यत्नशतैरपि ।
तस्माद्धनं रक्षितव्यं दातव्यं च विधानतः ।
शरीरपोषणार्थाय आहारस्य विशेषणे ।
नटगान्धर्वसंयोगे कामयात्राविहारयोः ।
मनःप्रियाणां संयोगे प्रीतिदाने तथैव च ।
एवमादिषु चान्येषु कामार्थं विसृजेद्धनम् ।
ये पुरा मनुजा देवि लब्धा मानयुता भृशम् ।
दर्पाहंकारसंयुक्ताः केवलात्मपरायणाः ।
तादृशा मनुजा देवि पुनर्जन्मनि शोभने ।
कारवो नटगन्धर्वाः संभवन्ति यथा तथा ।
नापिता बन्दिनश्चैव तथा वैतालिकाः प्रिये ।
एवंभूतास्त्वधोवृत्तिं जीवन्त्याश्रित्य मानवाः ।
परप्रसादनकरास्ते परैः कृतवेतनाः ।
परावमानस्य फलं भुञ्जते पौर्वदेहिकम् ।

उमा ।

भगवन्देवदेवेश मानुषेष्वेव केचन ।
दासभूताः प्रदृश्यन्ते सर्वकर्मकरा भृशम् ।
आघातभर्त्सनसहाः पीड्यमानाश्च सर्वशः ।
केन कर्मविपाकेन तन्मे शंसितुमर्हसि ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि शृणु कल्याणि कारणम् ।
ये पुरा मनुजा देवि परेषां वित्तहारकाः ।
ऋणवृद्धिकरं कुर्याद्न्यासदत्तं तथैव च ।
निक्षेपकारणाद्दत्तं परेषां द्रव्यहारिणः ।
प्रमादाद्विस्मृतं नष्टं परेषां धनहारकाः ।
वधबन्धपरिक्लेशैर्दासत्वे कुर्वतेऽपरान् ।
तादृशा मरणं प्राप्ता दण्डिता यमशासनैः ।
कथंचित्प्राप्य मानुष्यं तत्र ते देवि सर्वथा ।
दासभूता भवन्त्येव जन्मप्रभृति मानवाः ।
तेषां कर्माणि कुर्वन्ति येषां ते धनहारकाः ।
आ समाप्तेः स्वपापस्य कुर्वन्तीति विनिश्चयः ।
पशुभूतास्तथा चान्ये भवन्ति धनहारकाः ।
तत्तथा क्षीयते कर्म तेषां पूर्वापराधजम् ।
अतोऽन्यथा न तच्छक्यं कर्म हातुं सुरासुरैः ।
किं तु मोक्षविधिस्तेषां सर्वथा तत्प्रसादनम् ।
अयथावन्मोक्षकामः पुनर्जन्मनि चेष्यते ।
मोक्षकामी यथान्यायं कुर्वन्कर्माणि सर्वशः ।
भर्तुः प्रसादमाकाङ्क्षेदाघातान्सर्वदा सहन् ।
प्रीतिपूर्वं तु यो भर्त्रा मुक्तो मुक्तः स्वपापतः ।
तथाभूतान्कर्मकरान्सदा संपोषयेत्पतिः ।
यथार्हं कारयेत्कर्म दण्डं कारणतः क्षिपेत् ।
वृद्धान्बालांस्तथा क्षीणान्पालयन्धर्ममाप्नुयात् ।
इति ते कथितं देवि किं भूयः श्रोतुमिच्छसि ।

Colophon.

D_{10} शोभने; $T_{2,3}$ G ताः स्त्रियः; M_4 ते नराः (for ताः प्रिये). — (L. 2002) D_{10} $T_{2,3}$ G अलक्षणसमायुक्ताः; M_4 एवंलक्षणसंयुक्ताः (for the prior half). — After the ref., T_2 ins.:

भगवन्प्रमदा लोके एकपुत्रा मृतप्रजाः ।
स्त्रीप्रजायै प्रजायन्ते तन्मे ब्रूहि पितामह ।
महादेवः ।
शृणु देवि प्रवक्ष्यामि रहस्यं शास्त्रविश्रुतम् ।
मनुजे पशुपुत्रादि ऋणयोगात्प्रजायते ।
तद्वायुस्तु न गृह्णाति कृत्वा यो न ददाति च ।
तत्र प्रजायते [कन्या] दत्त्वा हृत्वा प्रयान्ति ये ।

— (L. 2005) D_{10} $T_{2,3}$ G_2 -रतास्तथा; T_1 -करा नराः; $G_{1,2,4}$ -करास्तथा (for -रता जनाः). — (L. 2008) $G_{1,3}$ क्रोधलोभ- (for केवलात्म-). — (L. 2009) D_{10} T G मानुषा (for मनुजा). — (L. 2010) T_3 G_2 अपरे (for कारवो). — T_1 om. line 2012. — (L. 2012) T_2 तु ये वृत्तिं (for त्वधोवृत्तिं). $G_{1,3}$ जीवंतो भुवि मानवाः (for the post. half). — (L. 2013) D_{10} $T_{2,3}$ $G_{3,4}$ -प्रमाधन- (for °दन-). T_2 M -परास् (for -करास्). D_{10} G_2 -वेदनाः (for -वेतनाः). — (L. 2015) T_1 भगवन्मानुषाः केचिन् (for the prior half). M मानवाः (for केचन). — (L. 2016) D_{10} T_3 G $M_{1,4}$ -कर्मपरा (for °करा). T_1 नीचकर्मरता भृशं (for the post. half). — T_1 om. line 2019. — (L. 2021) T_1 $G_{1,3}$ $M_{1,2}$ -कृतं कुर्यात् (for -करं कुर्यान्). — (L. 2022) D_{10} -कारिणा (for -कारणाद्). D_{10} T G M_4 परद्रव्यापहारिणः (for the post. half). — T_2 om. (hapl.) lines 2024–2030. — (L. 2024) $G_{2,3}$ -क्लेशाद् (for -क्लेशैर्). D_{10} T_3 G दासत्वं (for °त्वे). — T_1 om. line 2026. — (L. 2027) T_3 G_4 भविष्यंति (for भवन्त्येव). — G_2 M_{1-3} om. (hapl.) lines 2029–2030. M_4 reads line 2030 twice. — (L. 2030) M_4 (second time) वृक्ष- (for पशु-). T_1 कुर्वंति; M_4 (both times) फलंति (for भवन्ति). — (L. 2032) T_1 अन्यथा हि (for अतोऽन्यथा). D_{10} T G M_4 भोक्तुं (for हातुं). — (L. 2036) G_4 आयासान् (for आघातान्). D_{10} T_2 G_{1-3} आयामान्सर्वथा सहन् (for the post. half). — (L. 2037) D_{10} T_2 G_3 स पावनः (for स्वपापतः). — (L. 2038) T_2 G_{1-3} $M_{3,4}$ संतोषयेत् (for संपो°). — (L. 2039) T_1 धर्मकारणपूर्वकं (for the post. half). — (L. 2040) D_{10} क्षुधा- (for तथा). — T_1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उमा ।

भगवन्मानुषेष्वेव मानुषाः समदर्शनाः ।
चण्डाला इव दृश्यन्ते स्पर्शमात्रेण दूषकाः ।
नीचकर्मकरा देव सर्वेषां मलहारकाः ।
दुर्गताः क्लेशभूयिष्ठा विरूपा दुष्टचेतसः ।
केन कर्मविपाकेन तन्मे शंसितुमर्हसि ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि त्वमेकाग्रमनाः शृणु ।
ये पुरा मनुजा घोरा अतिमानयुता भृशम् ।
आत्मसंभावनायुक्ताः स्तब्धा दर्पसमन्विताः ।
प्रणामं न तु कुर्वन्ति गुरूणामपि पापकाः ।
ये स्वधर्मार्पणं कार्यमतिमानाच्च कुर्वते ।
परान्संनामयन्त्येव आज्ञयात्मनि ये बलात् ।
ऋद्धियोगात्परांश्चित्यमवमन्यन्ति मानवान् ।
पानपाः सर्वभक्षाश्च परुषाः कटुका नराः ।
एवंयुक्तसमाचारा दण्डिता यमशासनैः ।
कथंचित्प्राप्य मानुष्यं चण्डालाः संभवन्ति ते ।
नीचकर्मरताश्चैव सर्वेषां मलहारकाः ।
परेषां वन्दनपरास्ते भवन्त्यवमानिताः ।
विरूपाः पापयोनिस्थाः स्पर्शनादपि वर्जिताः ।
कुवृत्तिमुपजीवन्ति भूत्वा ते रजकादयः ।
पुरातिमानदोषात्तु भुञ्जते स्वकृतं फलम् ।
तानप्यवस्थाकृपणांश्चण्डालानपि बुद्धिमान् ।
न च निन्देन्नातिकुप्येद्भुञ्जते स्वकृतं फलम् ।
चण्डाला अपि तां जातिं शोचन्तः शुद्धिमाप्नुयुः ।

उमा ।

भगवन्मानुषाः केचिदाशापाशशतैर्वृताः ।
परेषां द्वारि तिष्ठन्ति प्रतिषिद्धाः प्रवेशने ।
द्रष्टुं ज्ञापयितुं चैव न लभन्ते च यत्नतः ।
केन कर्मविपाकेन तन्मे शंसितुमर्हसि ।

महेश्वरः ।

ये पुरा मनुजा देवि ऐश्वर्यस्थानसंयुताः ।
संविदं तु न कुर्वन्ति परैरैश्वर्यमोहिताः ।
द्वाराणि न ददत्येव द्वेषलोभादिभिर्वृताः ।
अवस्थामोहसंयुक्ताः स्वार्थमात्रपरायणाः ।
लुब्धा भोगयुता वापि सर्वेषां निष्फला भृशम् ।
अपि शक्ता न कुर्युर्ये परानुग्रहकारणात् ।
निर्दयाश्चैव निर्द्वारा भोगैश्वर्यगतिं प्रति ।
एवंयुक्तसमाचाराः पुनर्जन्मनि शोभने ।
यदि चेन्मानुषं जन्म लभेरंस्ते तथाविधाः ।
दुर्गता दुरवस्थाश्च कर्मव्याक्षेपसंयुताः ।
अभिधावन्ति ते सर्वे तमर्थमभिवेदिनः ।
राज्ञां वा राजमात्राणां द्वारि तिष्ठन्ति वारिताः ।
कर्म विज्ञापितुं भद्रे न लभन्ते कथंचन ।
प्रवेष्टुमपि ते द्वारि बहिस्तिष्ठन्ति काङ्क्षया ।

उमा ।

भगवन्मानुषे लोके मानुषेषु बहुष्वपि ।
सहसा नष्टसर्वस्वा भ्रष्टकोशपरिग्रहाः ।
दृश्यन्ते मानुषाः केचिद्राजचोरोदकादिभिः ।
केन कर्मविपाकेन तन्मे शंसितुमर्हसि ।

---

om. line 2041. — (L. 2041) D_{10} T_2 G M_4 भूयः श्रोतुं किमिच्छसि (for the post. half). — Colophon. — *Sub-parvan* : M_3 दानधर्म. — *Adhy. name* : D_{10} $T_{2.3}$ $G_{2.4}$ M_{1-3} उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} $T_{2.3}$ $G_{2.4}$ 205; T_1 $G_{1.3}$ $M_{1.2}$ 199; M_3 200; M_4 127. — (L. 2043) G_2 -मात्रे वि- (for -मात्रेण). D_{10} स्पर्शमात्रे विदूषिताः; T_1 स्पर्शमात्रविदूषिताः; $T_{2.3}$ $G_{1.3.4}$ स्पर्शमात्रेपि दूषिताः (for the post. half). — (L. 2044) D_{10} $T_{1.2}$ G M_4 -रता (for -करा). $G_{1.3.4}$ -हारिणः (for -हारकाः). — T_1 om. line 2047. — (L. 2047) D_{10} $T_{2.3}$ G M_4 तद् (for त्वम्). — (L. 2048) D_{10} T G M_4 देवि (for घोरा). — (L. 2050) D_{10} $T_{2.3}$ G_4 पामराः (पापकाः). — T_1 om. lines 2051–2052. — (L. 2051) M_{1-3} इति मानं (for अतिमानान्). — (L. 2052) M_{1-3} चाज्ञया (for आ°). — (L. 2053) D_{10} बुद्धि- (for ऋद्धि-). — (L. 2057) $G_{1.3}$ M -कराश्च (for -रताश्च). — (L. 2058) T_1 परेषां वचने युक्तास् (for the prior half). D_{10} T_2 G_{2-4} M_4 ते भवंत्यवमानिताः (M_4 °ताः); T_1 ते भवंत्यपमानिताः (for the post. half). — T_1 om. line 2059. — (L. 2059) D_{10} $T_{2.3}$ G स्पर्शनादिविवर्जिताः (for the post. half). — T_1 om. line 2061. D_{10} G_4 M_{1-3} om. (hapl.) lines 2062–2063. — (L. 2063) T_3 न निंदेन्नातिकुप्येत (for the prior half). — (L. 2065) T_1 आशापाशेन मोहिताः (for the post. half). — (L. 2070) D_{10} $T_{2.3}$ G संवादं (for संविदं). G_1 परैश्वर्यविमोहिताः (for the post. half). — T_1 om. (hapl.) line 2071. — (L. 2071) D_{10} T_3 $G_{2.4}$ लोभमोहादिभिर्वृताः; T_2 द्वेषलोभादिमोहिताः (for the post. half). — (L. 2073) T_1 लब्ध्वा धनं भोगयुताः (for the prior half). — (L. 2074) T_1 परानुग्रहसंततः (for the post. half). — T_1 om. lines 2075, 2077, and 2078. — (L. 2082) D_{10} T_2 G M_4 ते द्वारं; T_1 च द्वारं (for ते द्वारि). — (L. 2083) D_{10} T G M_4 भगवन्मानुषाः केचिन् (for the prior half). — (L. 2084) D_{10} नष्टकोश-; T_1 भ्रष्टराज- (for °कोश-). — (L. 2085) D_{10} राजचोराधकादिभिः; $M_{1.3.4}$ °चोरोदकाग्निभिः (for the post.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

महेश्वरः ।
ये पुरा मनुजा देवि आसुरं भावमाश्रिताः ।
परेषां वृत्तिनाशं तु कुर्वते द्वेषलोभतः ।
उत्कोचनपराश्चैव पिशुनाश्च तथाविधाः ।
परद्रव्यहरा घोराश्चौर्याद्वान्येन कर्मणा ।
निर्दया निरनुक्रोशाः परेषां वृत्तिनाशकाः ।
नास्तिकानृतभूयिष्ठाः परद्रव्यापहारिणः ।
एवंयुक्तसमाचारा दण्डिता यमशासनैः ।
निरयस्थाश्चिरं कालं तत्र दुःखसमन्विताः ।
यदि चेन्मानुषं जन्म लभेरंस्ते तथाविधाः ।
तत्रस्थाः प्राप्नुवन्त्येव सहसा द्रव्यनाशनम् ।
कष्टं च प्राप्नुवन्त्येव कारणाकारणादपि ।
नाशं विनाशं द्रव्याणामुपघातांश्च सर्वशः ।
उमा ।
भगवन्मानुषाः केचिद्बान्धवैः सहसा पृथक् ।
कारणाकारणादेव सहसा प्राणनाशनम् ।
शस्त्रेण वान्यथा वापि प्राप्नुवन्ति वधं नराः ।
केन कर्मविपाकेन तन्मे शंसितुमर्हसि ।
महेश्वरः ।
ये पुरा मनुजा देवि घोरकर्मरता नराः ।
आसुराः प्रायशो मूर्खाः प्राणिहिंसाप्रिया भृशम् ।
निर्दयाः प्राणिहिंसायां तथा प्राणविघातकाः ।
विश्वस्तघातकाश्चैव तथा सुप्तविघातकाः ।
प्रायशोऽनृतभूयिष्ठा नास्तिका मांसभोजिनः ।
एवंयुक्तसमाचाराः प्राणिधर्मगताः पुनः ।
दण्डिता यमदण्डेन निरयस्थाश्चिरं प्रिये ।
तिर्यग्योनिं पुनः प्राप्य तत्र दुःखपरिक्षयात् ।
यदि चेन्मानुषं जन्म लभेरंस्ते तथाविधाः ।
तत्र ते प्राप्नुवन्त्येव वधबन्धान्यथा तथा ।
आढ्या वा दुर्गता वापि भुञ्जते स्वकृतं फलम् ।
सुप्ता मत्ताश्च विश्वस्तास्तथा ते प्राप्नुवन्त्युत ।
प्राणाबाधकृतं दुःखं बान्धवैः सहसा पृथक् ।
पुत्रदारविनाशं वा शस्त्रेणान्येन वा वधम् ।
उमा ।
भगवन्मानुषाः केचिद्राजभिर्नीतिकोविदैः ।
दण्ड्यन्ते मानुषे लोके मानुषाः सततं भुवि ।
केन कर्मविपाकेन तन्मे शंसितुमर्हसि ।
महेश्वरः ।
ये पुरा मनुजा देवि मनुजांश्चेतरांश्च वा ।
क्लिष्टयानेन निघ्नन्ति प्राणान्प्राणिषु निर्दयाः ।
असुरा घोरकर्माणः क्रूरदण्डवधप्रियाः ।
ये दण्डयन्त्यदण्ड्यांस्तु राजानः कोपमोहिताः ।
हिंसाविहाराः पुरुषा मांसादा नास्तिकाः शुभे ।
केचित्स्त्रीपुरुषघ्नाश्च गुरुघ्नाश्च तथा प्रिये ।
एवंयुक्तसमाचाराः प्राणिधर्मगताः पुनः ।
दण्डिता यमदण्डेन निरयस्थाश्चिरं प्रिये ।
पूर्वदेहकृतं कर्म भुञ्जते तदिह प्रजाः ।
इहैव यत्कृतं कर्म तत्परत्र फलत्युत ।

half). — G_2 शिवः (for महेश्वरः). — (L. 2087) M_{1-3} आसुरीं वृत्तिमाश्रिताः (for the post. half). — (L. 2091) $G_{1.3}$ परनिष्पत्तिनाशकाः (for the post. half). — T_1 om. line 2092. — (L. 2093) T_3 -सादनैः (for -शासनैः). — T_1 om. line 2094. — (L. 2095) G_2 लभंते (for लभेरंस्). T_2 $M_{1.3}$ चेत् (for ते). — M om. (hapl.) the post. half of line 2096 and the prior half of line 2097. T_1 om. lines 2097–2098. — (L. 2097) D_{10} T_3 G_4 तत्प्राप्नुवंति ; T_2 तत्राप्नु° (for च प्राप्नु°). — (L. 2098) D_{10} $G_{2.4}$ -घातं (for -घातांश्). — T_1 om. lines 2099–2100. — (L. 2100) D_{10} $T_{2.3}$ G कारणादेव सर्वेषां (for the prior half). — (L. 2101) T_1 नरा वधं (by transp.). — (L. 2103) G_{1-3} स्मृताः (for नराः). — T_1 om. lines 2105–2106. — (L. 2105) $T_{2.3}$ $G_{1.3.4}$ प्राणि- (for प्राण-). — T_3 om. (hapl.) line 2106. — (L. 2107) $G_{1.3}$ M_4 प्रायेण (for प्रायशो). D_{10} T G M_4 -भोजनाः (for -भोजिनः). — (L. 2108) $T_{1.3}$ $G_{1.3.4}$ कालधर्मं ; T_2 कालधर्म- (for प्राणि°). — T_1 om. line 2109. — (L. 2110) G_3 तिर्यग्योनिगतो भूत्वा (for the prior half). — (L. 2111) M_{1-3} चेत् (for ते). — T_1 om. lines 2114–2116. — (L. 2117) G राजनीतिविशारदैः (for the post. half). — (L. 2118) D_{10} G_{1-3} मानुषे (D_{10} °षाः) सर्वतोभयाः ; T G_4 °षाः सर्वतो भुवि (for the post. half). — (L. 2120) T_1 om. the post. half and the prior half of line 2121. D_{10} $T_{2.3}$ G मानुषां($T_{2.3}$ G_2 °षा)श्चेतराणि वा (for the post. half). — (L. 2121) T_1 मूर्खाः (for प्राणान्). G_3 निर्भयाः (for निर्दयाः). — G_1 om. (hapl.) line 2122. — (L. 2122) M ये पुरा (for असुरा). — T_1 om. line 2123. — (L. 2124) D_{10} $T_{2.3}$ G हिंसाहंकारपरुषा (for the prior half). D_{10} G शुभाः ; M_4 प्रिये (for शुभे). — T_1 om. lines 2125–2126. M_4 om. (hapl.) line 2125. — (L. 2126) D_{10} $T_{2.3}$ G प्राणिधर्मं ; G_2 प्राणधर्मं (for प्राणिधर्म-). — (L. 2127) T_1 पुनर्जन्मनि शोभने (for the post. half). — After line 2127, T_1 ins. :

दण्ड्यन्ते राजभिस्तीक्ष्णैर्दण्डैर्नीतिपुरःसरम् ।

— (L. 2128) D_{10} $T_{2.3}$ G पूर्वजन्म- ; T_1 इहैव यत् (for पूर्वदेह-). — (L. 2129) D_{10} T_3 G_4 कर्म कृतं (by

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एषा व्यवस्थितिर्देवि मानुषेष्वेव दृश्यते ।
न ऋषीणां न देवानाममरत्वात्तपोबलात् ।
तैरेकेन शरीरेण भुज्यते कर्मणः फलम् ।
न तथा मानुषाणां स्यादन्तर्धाय भवेद्धि तम् ।

उमा ।

किमर्थं मानुषा लोके दण्ड्यन्ते पृथिवीश्वरैः ।
कृतापराधमुद्दिश्य हन्ता हर्तायमित्युत ।
पुत्रार्थी पुत्रकामेष्ट्या इहैव लभते सुतान् ।
तेनैव हि शरीरेण भुञ्जानाः कर्मणां फलम् ।
दृश्यन्ते मानुषे लोके तद्भवाननुमन्यते ।
एतन्मे संशयस्थानं तत्त्वं शंसितुमर्हसि ।

महेश्वरः ।

स्थाने संशयितं देवि तत्त्वं शृणु समाहिता ।
कर्म कर्मफलं चेति युगपद्भुवि नेष्यते ।
यत्त्वयाभिहितं देवि हन्ता हर्तायमित्यपि ।
तेषां तत्पूर्वकं कर्म दण्ड्यते यत्र राजभिः ।
दैहिकं दुष्कृतं तेषां हेतुर्भवति शासने ।
अपराधापदेशेन राजा दण्डयति प्रजाः ।
इहलोके व्यवस्थार्थं राजभिर्दण्डनं स्मृतम् ।
उद्वेजनार्थं शेषाणामपराधं समुद्दिशन् ।
पुराकृतफलं दण्डो दण्ड्यमानस्य तद् ध्रुवम् ।
प्रागेव च मया प्रोक्तं तत्र निःसंशया भव ।

उमा ।

भगवन्भुवि मर्त्यानां दण्डितानां नरेश्वरैः ।
दण्डेनैव तु तेनेह पापनाशो भवेन्न वा ।
एतन्मया संशयितं तद्भवांश्छेत्तुमर्हति ।

महेश्वरः ।

स्थाने संशयितं देवि शृणु तत्त्वं समाहिता ।
ये नृपैर्दण्डिता भूमावपराधापदेशतः ।
यमलोके न दण्ड्यन्ते तत्र ते यमदण्डनैः ।
अदण्डिता वा ये मिथ्या मर्त्या वा दण्डिता भुवि ।
तान्यमो दण्डयत्येव स हि वेद कृताकृतम् ।
नातिक्रमेद्यमं कश्चित्कर्म कृत्वेह मानुषः ।
राजा यमश्च कुर्वाते दण्डमात्रं तु शोभने ।
उभाभ्यां यमराजभ्यां दण्डितोऽदण्डितोऽपि वा ।
पश्चात्कर्मफलं भुङ्क्ते नरके मानुषेषु वा ।
नास्ति कर्मफलच्छेत्ता कश्चिल्लोकत्रयेऽपि च ।
इति ते कथितं सर्वं निर्विशङ्का भव प्रिये ।

उमा ।

किमर्थं दुष्कृतं कृत्वा मानुषा भुवि नित्यशः ।
पुनस्तत्कर्मनाशाय प्रायश्चित्तानि कुर्वते ।
सर्वपापहरं चेति हयमेधं वदन्ति च ।
प्रायश्चित्तानि चान्यानि पापनाशाय कुर्वते ।
तस्मान्मे संशयो जातस्त्वं तं छेत्तुमिहार्हसि ।

महेश्वरः ।

स्थाने संशयितं देवि शृणु तत्त्वं समाहिता ।
संशयो हि महानेष पूर्वेषां च मनीषिणाम् ।
द्विधा तु क्रियते पापं सद्भिश्चासद्भिरेव च ।
अभिसंधाय वा नित्यमन्यथा वा यदृच्छया ।
केवलं चाभिसंधाय संरम्भाच्च करोति यत् ।
कर्मणस्तस्य नाशस्तु न कथंचन विद्यते ।
अभिसंधिकृतस्येह नैव नाशोऽस्ति कर्मणः ।

---

transp.). — (L. 2130) T_{1} येषां; $G_{1.2}$ एषां (for एषा). — (L. 2131) D_{10} $T_{1.3}$ G M_{1-3} चर्षीणां (for ऋषीणां). D_{10} G M_{4} अमृतत्वात्; T_{2} अमृताच्च (for अमरत्वात्). — (L. 2133) T_{1} क्षीयते बहुजन्मभिः (for the post. half). — (L. 2138) D_{10} $T_{2.3}$ $G_{1.3.4}$ M_{4} मानुषा (for °षे). D_{10} T $G_{1.3.4}$ नानु- (for अनु-). — (L. 2139) D_{10} T_{3} $G_{1.3.4}$ तन्मे त्वं छेत्तुमर्हसि; $T_{1.2}$ तन्मे छेत्तुं त्वमर्हसि (for the post. half). — (L. 2140) T_{2} शृणु तत्त्वं (by transp.). — (L. 2141) T_{3} $G_{1.3}$ M_{1} कर्माकर्म- (for कर्म कर्म-) — G_{2} om. lines 2142–2144. — (L. 2142) D_{10} $G_{1.3}$ M [अ]भिहिता (for °हितं). T_{1} $G_{1.3.4}$ M_{1} [उ]त (for [अ]पि). — (L. 2144) $M_{1.2.4}$ दैविकं (for दैहिकं). D_{10} T $G_{1.3.4}$ देवि कर्मकृतं नै- ($T_{1.3}$ $G_{1.3}$ ने)षां (for the prior half). — (L. 2146) T_{3} व्यवस्थानं; $G_{1.3.4}$ °स्थानं (for °स्थार्थं). — T_{1} om. line 2147. — (L. 2147) T_{2} G_{1-3} परं धर्मं (for अप-राधं). — (L. 2151) T_{2} कृतेन (for तु तेन). — (L. 2152) G_{1} शंसितव्यं (for संशयितं). — T_{1} om. line 2153. — (L. 2156) $G_{1.3}$ M_{4} तस्यां ये (for ये मिथ्या). — (L. 2157) D_{10} T G $M_{1.2.4}$ मिथ्या (for मर्त्या). — (L. 2160) T_{1} पीडितो T_{1} तथानयौ (for कृताकृतम्). — (L. 2162) T_{2} G_{3} कर्मफलं. — T_{1} (for दण्डितो). — (L. 2162) T_{2} G_{3} कर्मफलं. — T_{1} om. line 2163. — T_{1} ins. after line 2165; M after line 2167 :

नास्ति कर्मक्षयश्चेति श्रुतं मे भगवद्वचः ।

— T_{1} om. lines 2166–2168. — (L. 2168) G_{2} [ऽ]-त्रास्ति (for जातम्). D_{10} $T_{2.3}$ G_{4} तस्मान्मया संशयितं (for the prior half). — T_{1} om. line 2169. — (L. 2170) T_{1} [ऽ]यं; M मे (for हि). — (L. 2171) T_{2} G_{2} विधात्रा; $G_{1.3}$ द्विधात्र (for द्विधा तु). — (L. 2173) T_{1} क्रियते च (for च करोति). — M_{1-3} repeat lines 2174–2180 after line 2224. — (L. 2175) D_{10} $T_{2.3}$ G M_{1-3} (last three first time).4 [ए]व (for [इ]ह). D_{10} वि- (for [ए]व). — (L. 2176)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अश्वमेधसहस्रैर्वा प्रायश्चित्तशतैरपि ।
अन्यथा यत्कृतं पापं प्रमादाद्वा यदृच्छया ।
प्रायश्चित्ताश्वमेधाभ्यां शोधनात्तु प्रणश्यति ।
लोकसंव्यवहारार्थं प्रायश्चित्तादिरिष्यते ।
विद्ध्येवं पापके कार्ये निर्विशङ्का भव प्रिये ।
इति ते कथितं देवि किं भूयः श्रोतुमिच्छसि ।

उमा ।

भगवन्देवदेवेश मानुषाश्चेतरा अपि ।
म्रियन्ते बहुधा लोके कारणाकारणादपि ।
केन कर्मविपाकेन तन्मे शंसितुमर्हसि ।

महेश्वरः ।

ये पुरा मनुजा देवि कारणाकारणादपि ।
यथासुभिर्वियोज्यन्ते प्राणिनः प्राणिनिर्दयैः ।
तथैव ते प्राप्नुवन्ति यथैवात्मकृतं फलम् ।
विषदस्तु विषेणैव शस्त्रैः शस्त्रेण घातकः ।
एवमेव यथा लोके मानुषा घ्नन्ति मानुषान् ।
कारणैरेव ते तेन तथा स्वप्राणनाशनम् ।
प्राप्नुवन्ति पुनर्देवि नास्ति तत्र विचारणा ।
इति ते कथितं सर्वं पापकर्मफलं प्रिये ।
भूयस्तव समासेन कथयिष्यामि तच्छृणु ।
सत्यप्रमाणकरणं नित्यमव्यभिचारि च ।
यैः पुरा मनुजैर्देवि यस्मिन्काले यथा कृतम् ।
येनैव कारणेनापि कर्म यत्तु शुभाशुभम् ।
तस्मिन्काले तथा देवि तेनैव करणेन ते ।
प्राप्नुवन्ति नराः प्रेत्य निःसंदेहं शुभाशुभम् ।
इति सत्यं विजानीहि लोकतन्त्रविधिं प्रति ।
कर्म कृत्वा नरो भोक्ता स नास्ति दिवि वा भुवि ।
न शक्यं कर्म चाभोक्तुं सदेवासुरमानुषैः ।
कर्मणा ग्रथितो लोक आदिप्रभृति वर्तते ।
एतदुद्देशतः प्रोक्तं कर्मपाकफलं प्रिये ।
यदन्यच्च मया नोक्तं यस्मिंस्ते कर्मसंग्रहे ।
बुद्धितर्केण तत्सर्वं तथा वेदितुमर्हसि ।
कथितं श्रोतुकामायाः किं भूयः श्रोतुमिच्छसि ।

Colophon.

उमा ।

भगवन्सर्वलोकेश लोकपालनमस्कृत ।
प्रसादात्ते महादेव श्रुता मे कर्मणां गतिः ।
संगृहीतं च तत्सर्वं तत्त्वतोऽमृतसंनिभम् ।
कर्मणा ग्रथितं सर्वमिति वेद्मि शुभाशुभम् ।
गोवत्सवच्च जननीं निम्नं सलिलवत्तथा ।
कर्तारं स्वकृतं कर्म नित्यं तमनुधावति ।
कृतस्य कर्मणश्चेह न नाशोऽस्तीति निश्चयः ।

M_{1-3} (all second time) -सहस्रेण (for °स्रैर्वा). — (L. 2178) M_{1-3} (all second time) प्रायश्चित्तादिभिः पुण्यैः (for the prior half). D_{10} $T_{2.3}$ G_{1-3} श्रेयसा तव ; G_{4} तेजसा तव (for शोधनात्तु). — (L. 2179) T_{1} प्रायश्चित्तं विधीयते (for the post. half). — T_{1} om. lines 2180–2181. — (L. 2180) M_{1-3} (all second time) अंतरे च त्वदिष्यते (for the post. half). — (L. 2181) D_{10} $T_{2.3}$ G_{1-3} भूयः श्रोतुं किमिच्छसि (for the post. half). — G_{4} om. the ref. — (L. 2182) $G_{1.3}$ [इ]तरेऽपि वा ; G_{4} [इ]तरे अपि (for °रा अपि). — (L. 2183) D_{10} $T_{2.3}$ G मानुषा (for बहुधा). — (L. 2186) D_{10} T G M_{4} वियुज्यंते (for वियो°). T_{2} $G_{1.2}$ प्राणिभिः (for °नः). — (L. 2187) D_{10} T_{3} G_{4} तथैव ; G_{1-3} तदेव (for यथैव). — (L. 2188) D_{10} T G M_{4} घातकाः (for °कः). — (L. 2190) D_{10} S कारणेनैव तेनाथ (T_{2} तेनैव ; M ते तेन) (for the prior half). — (L. 2192) G_{4} देवि (for सर्वं). D_{10} T G M_{4} कर्मपाक- (for पापकर्म-). — T_{1} om. line 2194. — (L. 2194) D_{10} T_{2} G M_{4} -करणात् (for °णं). — (L. 2197) T_{1} शुभं वान्यत् (for तथा देवि). D_{10} T G M_{4} कारणेनैव तेन तु ($G_{1.3}$ ते) (for the post. half). — (L. 2199) D_{10} $T_{2.3}$ G M_{4} प्र- (for वि-). D_{10} T_{3} G लोके तत्र (for लोकतन्त्र-). — (L. 2200) D_{10} T G M_{4} -कर्ता (for कृत्वा). T_{1} नान्यो (for स न). — After line 2200, T_{1} ins. :

नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ।

— (L. 2201) D_{10} $T_{2.3}$ G_{4} वा भोक्तुं (for चाभोक्तुं). — T_{4} om. line 2203. — (L. 2203) G_{2} प्राप्तं (for प्रोक्तं). D_{10} T_{2} G M_{4} प्रति (for प्रिये). — T_{1} om. lines 2204–2205. — (L. 2204) M यच्च हि (for अन्यच्च). G_{2} प्रोक्तं (for नोक्तं). T_{2} धर्म- (for कर्म-). — (L. 2205) T_{2} -तत्त्वेन (for -तर्केण). $G_{1.3}$ तत्त्वं (for तथा). — (L. 2206) D_{10} T_{2} G M भूयः श्रोतुं किमिच्छसि (for the post. half). — Colophon. — *Adhy. name* : D_{10} T_{3} G_{2} M उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} T_{2} $G_{2.4}$ 206 ; T_{1} $G_{1.3}$ M_{1} 200 ; T_{3} 205 ; $M_{2.3}$ 201 ; M_{4} 198. — (L. 2207) T_{1} M देव- (for सर्व-). T_{3} -देवेश (for -लोकेश). T_{3} नमोस्तु ते (for -नमस्कृत). — T_{1} om. line 2208. — (L. 2209) T_{1} त्वया प्रोक्तं (for च तत्सर्वं). — (L. 2210) T_{2} G वेद (for वेद्मि). — (L. 2211) G_{3} गोवत्सवत्सजननीं (for the prior half). — G_{2} om. lines 2212–2217. — (L. 2212) T_{1} om. (hapl) from the post. half up to the prior half of line 2220. T_{2} G_{4} तद् (for तम्). — (L. 2213) T_{2} तनश्च (for कृतस्य). $G_{1.3}$ [ए]व (for [इ]ह). D_{10} $T_{2.3}$ G transp. न and नाशो. — (L. 2214) D_{10} G_{4}

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अशुभस्य शुभस्यापि तदप्यवगतं मया ।
भूय एव महादेव वरद प्रीतिवर्धन ।
कर्मणां गतिमाश्रित्य संशयान्मोक्तुमर्हसि ।

महेश्वरः ।

यत्ते विवक्षितं देवि गुह्यमप्यसितेक्षणे ।
तत्सर्वं निर्विशङ्का त्वं पृच्छ मां शुभलक्षणे ।

उमा ।

एवं व्यवस्थिते लोके कर्मणा वृषभध्वज ।
कृत्वा तत्पुरुषः कर्म शुभं वा यदि वेतरत् ।
कर्मणः स्वकृतस्येह कदा भुङ्क्ते फलं पुनः ।
इह वा प्रेत्य वा देव तन्मे शंसितुमर्हसि ।

महेश्वरः ।

स्थाने संशयितं देवि तद्धि गुह्यतमं शृणु ।
त्वत्प्रियार्थं प्रवक्ष्यामि देवगुह्यं शुभानने ।
पूर्वदेहकृतं कर्म भुञ्जते तदिह प्रजाः ।
इहैव यत्कृतं पुंसां तत्परत्र फलिष्यति ।
एषा व्यवस्थितिर्देवि मानुषेष्वेव दृश्यते ।
देवानामसुराणां च अमरत्वात्तपोबलात् ।
एकेनैव शरीरेण भुज्यते कर्मणां फलम् ।
मानुषैर्न तथा देवि अन्तरं त्वेतदिष्यते ।

Colophon.

उमा ।

भगवन्भगनेत्रघ्न मानुषाणां विचेष्टितम् ।
सर्वमात्मकृतं चेति श्रुतं मे भगवन्मतम् ।
लोके ग्रहकृतं सर्वं मत्वा कर्म शुभाशुभम् ।
सदैव ग्रहनक्षत्रं प्रायशः पर्युपासते ।
एतं मे संशयं देव तद्गतं छेत्तुमर्हसि ।

महेश्वरः ।

स्थाने संशयितं देवि शृणु तत्त्वविनिश्चयम् ।
नक्षत्राणि ग्रहाश्चैव शुभाशुभनिवेदकाः ।
मानवानां महाभागे न तु कर्मकराः स्वयम् ।
प्रजानां तु हितार्थाय शुभाशुभविधिं प्रति ।
अनागतमतिक्रान्तं ज्योतिश्चक्रेण बोध्यते ।
किं तु तत्र शुभं कर्म सुग्रहैस्तन्निवेद्यते ।
दुष्कृतस्याशुभैरेव समवायो भवेदिति ।
तस्माद्धि ग्रहवैषम्ये वैषम्यं कुरुते जनः ।
ग्रहसाम्ये शुभं कुर्याज्जात्यां जात्यां पुराकृतम् ।
केवलं ग्रहनक्षत्रं न करोति शुभाशुभम् ।
सर्वमात्मकृतं कर्म लोकवादो ग्रहा इति ।
पृथग्ग्रहाः पृथक्कर्ता कर्त्रा स्वं भुज्यते फलम् ।
इति ते कथितं सर्वं विशङ्कां जहि शोभने ।

उमा ।

भगवन्त्रिविधं कर्म कृत्वा जन्तुः शुभाशुभम् ।

[उ]पगतं (for [अ]व°). — Before line 2215, D10 ins. उमा. — (L. 2215) G2 महाभाग (for °देव). — (L. 2216) G4 संशयं (for °यान्). D10 छेत्तुम (for मोक्तुम्). — G2 शिवः (for महेश्वरः). — (L. 2218) D10 T3 G2 तत्सर्वं निर्विशंकार्थ (for the prior half). — (L. 2219) M3 व्यवसिते (for °स्थिते). D10 T2.3 G M4 कर्मणां (for °णा). — (L. 2220) T1 च (for the second वा). — T1 om. line 2221. — (L. 2221) T2 तदा (for कदा). — (L. 2222) T1 [आ]प्नोति (for देव). — (L. 2223) T2 M4 गुह्यतमं (for संशयितं). D10 T3 G M1-3 नृपु (for शृणु). — (L. 2224) D10 गुह्यं देवि; T2.3 G2.4 M2 देवि गुह्य (for देवगुह्यं). G1.3 देवि गुह्यं शुभाशुभं (for the post. half). — M1-3 om. lines 2225–2230. — (L. 2226) G2 [ए]व लिप्यते; G4 फलिष्यते (for °ति). — T1 om. (hapl.) lines 2228–2230. — (L. 2229) T2 M4 भुंजते (for भुज्यते). — (L. 2230) T2 मानुषाणां (for °षैर्न). T3 अंतरे (for अन्तरं). G1 इष्यति (for °ते). M4 फलमंतरधीयते (for the post. half). — Colophon. — *Adhy. name* : D10 T2.3 G2 M4 उमामहेश्वरसंवादः; M1-3 उमामहेश्वरसंवादे गुह्याधिकारे प्रायश्चित्तविषयनिश्चयः. — *Adhy. no.* : D10 T2 G2.4 207; T3 206; G1.3 M1 201; M2.3 202; M4 199. — (L. 2231) G2 भगवन्देवदेवेश (for the prior half). — (L. 2232) T1 ग्रह- (for आत्म-). T1 हि (for मे). T1 मया (for मतम्). — T1 om. line 2233. — (L. 2233) G3 ग्रहगतं (for °कृतं). M4 लोके गर्भकृतं कर्म (for the prior half). — (L. 2234) D10 T G M4 तदा (for सदा). — (L. 2235) D10 T G एष मे संशयो देव (for the prior half). D10 T3 G1-3 तन्मे त्वं (for तद्गतं). T2 तन्मे शंसितुमर्हसि; G4 तन्मे छेत्तुं त्वमर्हसि (for the post. half). — (L 2236) G2 -विनिश्चितं (for °श्चयम्). — M1 om. lines 2240–2245. — (L. 2240) M1-3 विद्यते (for बोध्यते). — (L. 2241) T1 ग्रहैस्तु वि- (for सुग्रहैस्तन्). T3 निबोध्यते (for निवेद्यते). — (L. 2242) M1-3 इह (for इति). — (L. 2243) T1.2 D10 T2 G विषमं (for वैषम्यं). T1 वैषम्यं (for °म्ये). — (L. 2244) ह्यशुभं कुरुते नरः (for the post. half). D10 T2.3 G1.2.4 G3 जात्यात्मानं (for जात्यां जात्यां). — T1 ज्ञात्वात्मा(T3 °दा)नं तथाकृतं (for the post. half). — T1 om. line 2247. — (L. 2247) D10 प्रकल्प्यंते (for पृथक्कर्ता). — (L. 2248) G4 देवि (for सर्वं). T1 शंकां जहि शुभानने (for the post. half). — (L. 2249) T3 द्विविधं (for त्रि°). — (L. 2250) T1 तयोः पूर्वं च कतरं (for the prior half). — (L. 2251) D10 G त्वम् (for इह). — G1.3 om. the ref. — (L. 2254) M1-3 [ए]-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

किं तयोः पूर्वकतरं भुङ्क्ते जन्मान्तरे पुनः ।
एष मे संशयो देव तं मे छेत्तुमिहार्हसि ।
महेश्वरः ।
स्थाने संशयितं देवि तत्ते वक्ष्यामि तत्त्वतः ।
अशुभं पूर्वमित्याहुरपरे शुभमित्यपि ।
मिथ्या तदुभयं प्रोक्तं केवलं तद्ब्रवीमि ते ।
मानुषे तु पदे कर्म युगपद्भुज्यते सदा ।
यथाकृतं यथायोगमुभयं भुज्यते क्रमात् ।
भुञ्जानाश्चैव दृश्यन्ते क्रमशो भुवि मानवाः ।
ऋद्धिं हानिं सुखं दुःखमभयं भयमेव च ।
दुःखान्यनुभवन्त्याढ्या दरिद्राश्च सुखानि च ।
यौगपद्याच्च भुञ्जाना दृश्यन्ते लोकसाक्षिकम् ।
नरके स्वर्गलोके च न तथा संस्थितिः प्रिये ।
नित्यं दुःखं हि नरके स्वर्गे नित्यं सुखं तथा ।
शुभाशुभानामाधिक्यात्कर्मणा तत्र सेव्यते ।
निरन्तरं सुखं दुःखं स्वर्गे च नरके भवेत् ।
तत्रापि सुमहत्कृत्वा पूर्वमल्पं पुनः शुभे ।
एतत्ते सर्वमाख्यातं भूयः श्रोतुं किमिच्छसि ।
उमा ।
भगवन्प्राणिनो लोके म्रियन्ते केन हेतुना ।
जाता जाता न तिष्ठन्ति तन्मे शंसितुमर्हसि ।
महेश्वरः ।
तदहं ते प्रवक्ष्यामि शृणु तत्त्वं समाहिता ।
आत्मकर्मक्षयाद्देहं यथा मुञ्चन्ति तच्छृणु ।
शरीरात्मसमाहारो जन्तुरित्यभिधीयते ।
तत्रात्मानं नित्यमाहुरनित्यं क्षेत्रमुच्यते ।
तत्तु कालवशाल्लोके जीर्णं भवति शोभने ।
कालश्छिनत्ति चायूंषि दिनमासर्तुहायनैः ।
कालः पचति भूतानि कालेनाकुलितं जगत् ।
कालं नातिक्रमेरन्हि सदेवासुरमानवाः ।
यथाकाशे न तिष्ठेत द्रव्यं किंचिदचेतनम् ।
तथा धावति कालोऽयं क्षणं किंचिन्न तिष्ठति ।
एवं कालेन संक्रान्तं शरीरं जर्जरीकृतम् ।
अकर्मयोग्यं संशीर्णं त्यक्त्वा देही ततो व्रजेत् ।
नित्यस्यानित्यसंत्यागाल्लोके तन्मरणं विदुः ।
न च नित्यस्य जीवस्य विनाशो विद्यते शुभे ।
स पुनर्जायतेऽन्यत्र शरीरं नवमाविशन् ।
एवं लोकगतिर्नित्यमादिप्रभृति वर्तते ।
उमा ।
भगवन्प्राणिनां बाला दृश्यन्ते मरणं गताः ।
अतिवृद्धाश्च जीवन्तो दृश्यन्ते चिरजीविनः ।
केवलं कालमरणं न प्रमाणं महेश्वर ।
तस्मान्मे संशयं ब्रूहि प्राणिनां जीवकारणम् ।
महेश्वरः ।
शृणु तत्कारणं देवि निर्णयस्त्वेक एव सः ।
जीर्णत्वमात्रं कुरुते कालो देहं न पातयेत् ।
जीर्णे कर्मणि संघातः स्वयमेव विशीर्यते ।
पूर्वकर्मप्रमाणेन जीवितं मृत्युरेव वा ।
यावत्पूर्वकृतं कर्म तावज्जीवति मानवः ।
तद्वत्कालवशाद्बाला म्रियन्ते भोगसंक्षयात् ।

तद् (for तद्). — (L. 2255) T_1 देवि (for कर्म). — (L. 2257) M_{1-3} मानुषाः (for मानवाः). — T_1 om. line 2258. — (L. 2258) D_{10} वृद्धिं (for ऋद्धिं). D_{10} $T_{2,3}$ G तत्सर्वमु(T_3 °म)भयं भयं (for the post. half). — (L. 2259) T_1 दुःखस्य शुभजातानि दरिद्राः प्राप्नुवंति च. — (L. 2260) T_2 युगपद्यच्च (for यौगपद्याच्च). G_{1-3} M_1 -साक्षिकाः (for °कम्). — T_1 om. line 2261. — (L. 2262) D_{10} सत्यं (for नित्यं). — (L. 2263) D_{10} T G M_4 आधिक्यं (for °क्यात्). — T_1 om. lines 2264–2265. — (L. 2265) D_{10} T_3 G M_2 भुक्त्वा ; M_4 पश्चात् (for कृत्वा). G_2 पूर्वकल्पं (for °मल्पं). T_2 शुभं (for शुभे). — (L. 2266) D_{10} T G किं भूयः श्रोतुमिच्छसि (for the post. half). — (L. 2267) G_3 प्राणिनां (for °नो). — (L. 2268) M_4 जातु (for the second जाता). — (L. 2269) D_{10} G_2 सत्यं ; $T_{1,2}$ $G_{1,3,4}$ M_4 सर्वं (for तत्त्वं). — T_1 om. line 2270. — (L. 2270) G_2 देवि (for देहं). — (L. 2271) T_1 -समाहाराज्ज (for °हारो). — (L. 2272) T_1 अनित्यो देह उच्यते (for the post. half). — After line 2272, D_{10} T G M_4 read lines 2279–2281, and om. lines 2273–2275. — (L. 2276) $G_{1,3}$ M_4 -मानुषाः (for -मानवाः). — T_1 om. line 2277. — (L. 2278) $G_{1,3}$ किंचन (for किंचिन्न). — (L. 2279) T_1 संप्राप्तं (for संक्रान्तं). T_1 मर्मरी- (for जर्जरी-). G_3 शरीरं जन्मजन्मानि (for the post. half). — (L. 2280) D_{10} T_3 G_4 संकीर्णं (for संशीर्णं). T_1 कर्मयोगेन सम्तीर्णं (for the prior half). — (L. 2281) T_1 -संयोगाल्ल (for -संत्या°). — D_{10} T G M_4 om. line 2282. — (L. 2284) D_{10} -गतं (for -गतिर्). — D_{10} om. lines 2285–22×6. — (L. 22×5) T G M_1 प्राणिनो (for °नां). — (L. 2289) M_4 निर्दिष्टस्त्वेकमेव तत (for the post. half) — (L. 2290) D_{10} क्षीणत्व- (for जी°). — (L. 2291) $G_{1,3}$ संघाते (for °तः). T_1 जीर्णे तु कर्मसंघाते (for the prior half). — (L. 2292) T_2 -प्रकारेण (for -प्रमाणेन). D_{10} T_2 G $M_{3,4}$ मृत्युम (for मृत्युर्). — (L. 2293) T_1 पूर्वं (for पूर्व-). T_1 om. the post. half and the prior half of

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

जीवन्ति चिरवृद्धाश्च तथा कर्मप्रमाणतः ।
इति ते कथितं देवि निर्विशङ्का भव प्रिये ।

उमा ।

भगवन्केन वृत्तेन भवन्ति चिरजीविनः ।
अल्पायुषो नराः केन तन्मे शंसितुमर्हसि ।

महेश्वरः ।

शृणु तत्सर्वमखिलं गुह्यं पथ्यतरं नृणाम् ।
ये नरा वृत्तसंपन्ना भवन्ति चिरजीविनः ।
अहिंसा सत्यवचनमक्रोधः क्षान्तिरार्जवम् ।
गुरूणां नित्यशुश्रूषा वृद्धानामपि पूजनम् ।
शौचं चाकार्यसंत्यागः सदा पथ्यस्य भोजनम् ।
एवमादि शुभं वृत्तं नराणां दीर्घजीविनाम् ।
तपसा ब्रह्मचर्येण रसायननिषेवणात् ।
उदग्रसत्त्वा बलिनो भवन्ति चिरजीविनः ।
स्वर्गे वा मानुषे वापि चिरं तिष्ठन्ति धार्मिकाः ।
अपरे पापकर्माणः प्रायशोऽनृतवादिनः ।
हिंसाप्रिया गुरुद्विष्टा निष्क्रियाः शौचवर्जिताः ।
नास्तिका घोरकर्माणः सततं मांसपानपाः ।
पापाचारा गुरुद्वेषाः कोपनाः कलहप्रियाः ।
एवमेवाशुभाचारास्तिष्ठन्ति निरये चिरम् ।
तिर्यग्योनौ तथात्यन्तमल्पं तिष्ठन्ति मानुषे ।
तस्मादल्पायुषो मर्त्यास्तादृशाः संभवन्ति ते ।
अगम्यदेशगमनादपथ्यानां च भोजनात् ।
आयुःक्षयो भवेन्नॄणामायुःक्षयकरा हि ते ।
भवन्त्यल्पायुषस्तैस्तैरन्यथा चिरजीविनः ।
एतत्ते कथितं सर्वं भूयः श्रोतुं किमिच्छसि ।

Colophon.

उमा ।

भगवन्देवदेवेश श्रुतं मे परमं हितम् ।
आत्मनो जातिसंबन्धं ब्रूहि स्त्रीपुरुषान्तरे ।
स्त्रीप्राणः पुरुषप्राण एकः स पृथगेव वा ।
एष मे संशयो देव तं मे छेत्तुं त्वमर्हसि ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि शृणु सर्वं समाहिता ।
पुंस्त्वं स्त्रीत्वमिति प्राणे स्थितिर्नास्ति शुभेक्षणे ।
निर्विकारी सदैवात्मा स्त्रीत्वं पुंस्त्वं न चात्मनि ।
कर्मप्रकारेण तथा जात्यां जात्यां प्रजायते ।
अकर्ता चाविकारी च नित्यश्च पुरुषः स्मृतः ।
स्त्रीशरीरकृतं कर्म स्त्रीभावेनोपभुज्यते ।
पुरुषेण कृतं कर्म पुरुषेणैव भुज्यते ।
एवं प्रसज्यते लोके भावैकत्वेन भूयशः ।
शरीरं कर्मनानात्वाद्दृश्यते विपरीतवत् ।
कृत्वा तु पौरुषं कर्म स्त्री पुमानपि जायते ।
स्त्रीभावयुक्पुमान्कृत्वा कर्मणा प्रमदा भवेत् ।

उमा ।

भगवन्सर्वलोकेश कर्मात्मा न करोति चेत् ।
कोऽन्यः कर्मकरस्तत्र देहे तद्वक्तुमर्हसि ।

---

line 2294. — (L. 2294) D_{10} $T_{2.3}$ $G_{1.3.4}$ तत्र कर्म- ; G_2 तत्तत्कर्म- (for तद्वत्काल-). — (L. 2295) D_{10} T G M_4 चिरं जीवंति वृद्धाश्च (for the prior half). — T_3 om. (hapl.) lines 2298–2300. — (L. 2298) T_1 केचित् (for केन). — (L. 2299) T_3 पथ्यकरं (for °तरं). — (L. 2300) D_{10} $T_{1.3}$ G M_4 येन वृत्तेन संपन्ना (for the prior half). — M_4 om. (hapl.) lines 2301–2306. — (L. 2302) T_2 द्विज- (for नित्य-). — (L. 2303) T_3 $G_{1.3.4}$ शौचाद् (for शौचं च). — (L. 2304) D_{10} $T_{2.3}$ $G_{2.4}$ -गुणं (for शुभं). — D_{10} G_2 om. lines 2307–2309. — (L. 2307) T_1 स्वर्गे मानुष्यलोके वा (for the prior half). — (L. 2310) T_1 सततं (for नास्तिका). T_1 नास्तिका (for सततं). — T_1 om. lines 2311–2312. — (L. 2311) D_{10} T_3 G -द्विष्टाः (for -द्वेषाः). — (L. 2312) D_{10} नरके (for निरये). — (L. 2313) G नित्यम् (for [अ]त्यन्तम्). D_{10} $T_{2.3}$ G अल्पास्तिष्ठंति मानवाः (for the post. half). — (L. 2316) M_4 -क्षयकृन्नॄिर् (for -क्षयो भवेन्). — T_1 om line 2317. — (L. 2317) M_4 बालाश्च (for अन्यथा). — (L. 2318) D_{10} $T_{2.3}$ G एवं (for एतत्). T_1 एतत्ते सर्वमाख्यातं (for the prior half). D_{10} T_1 भूयः किं (T_1 किं भूयः) श्रोतुमिच्छसि (for the post. half). — Colophon. — *Adhy. name :* D_{10} T_3 M_3 उमामहेश्वर-संवादः ; T_3 $G_{3.4}$ उमामहेश्वरसंवादे आयुःक्षयलक्षणं ; M_{1-3} उमामहेश्वरसंवादे गुह्याधिकरणं. — *Adhy. no. :* T_1 201 ; T_2 G_2 208 ; T_3 207 ; $G_{1.3.4}$ $M_{1.2.4}$ 202 ; M_3 203. — (L. 2319) D_{10} T G देवदेव महादेव श्रुतं मे (T_1 श्रुतं ते ; T_3 शृणु तं) भगवन्निदं. — (L. 2320) T_1 -पुरुषांतरं. — (L. 2321) G_{1-3} स्त्रीप्राणाः पुरुषप्राणा (for the prior half). T_1 G_{1-3} एकतः ; M एकन्तु (for एकः स). — (L. 2322) T_3 शंसितुम् (for छेत्तुं त्वम्). — (L. 2323) M_4 समाहितं. — (L. 2324) D_{10} T G $M_{2.4}$ स्त्रीत्वं पुंस्त्वम् (by transp.). — (L. 2325) D_{10} T G निर्विकारः (for °कारी). T_3 चात्मनः (for °नि). — D_{10} T G om. lines 2327–2331. — (L. 2332) M_4 पौरिकं (for पौरुषं). T_2 कृत्वात्म-पुरुषं कर्म ; G_{1-3} कृत्वा कर्म पुमान्स्त्री वा (for the prior half). — (L. 2333) G_{1-3} $T_{1.2}$ M_3 अपि- (for अपि). T_1 स्त्रीभावयुक्तस्तु पुमान् (for स्त्रीभावं यद (for °वयुक्).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

महेश्वरः ।
शृणु भामिनि कर्तारमात्मा हि न च कर्मकृत् ।
प्रकृत्या गुणयुक्तेन क्रियते कर्म नित्यशः ।
शरीरं प्राणिनां लोके यथा पित्तकफानिलैः ।
व्याप्तमेव त्रिभिर्दोषैस्तथा व्याप्तं गुणैस्त्रिभिः ।
सत्त्वं रजस्तम इति गुणास्त्वेते शरीरिणः ।
प्रकाशात्मकमेतेषां सत्त्वं सततमिष्यते ।
रजो दुःखात्मकं तत्र तमो मोहात्मकं स्मृतम् ।
त्रिभिरेतैर्गुणैः सर्वं लोके कर्म प्रवर्तते ।
सत्यं प्राणिदया शौचं श्रेयः प्रीतिः क्षमा दमः ।
एवमादि तथान्यच्च कर्म सात्त्विकमिष्यते ।
दाक्ष्यं कर्मपरत्वं च लोभो भोगविधिं प्रति ।
कलत्रसङ्गो माधुर्यं नित्यमैश्वर्यलुब्धता ।
रजसश्चोद्भवं चैतत्कर्म नानाविधं सदा ।
अनृतं चैव पारुष्यं श्रुतिविद्वेषता भृशम् ।
हिंसापरत्वं नास्तिक्यं निद्रालस्यभयानि च ।
तमसश्चोद्भवं चैतत्कर्म पापयुतं सदा ।
तस्माद्गुणमयः सर्वः कार्यारम्भः शुभाशुभः ।
तस्मादात्मानमव्यग्रं विद्ध्यकर्तारमव्ययम् ।
सात्त्विकाः पुण्यलोकेषु राजसा मानुषे पदे ।
तिर्यग्योनौ च नरके तिष्ठेयुस्तामसा नराः ।

उमा ।
किमर्थमात्मा भेद्यः सन्देहे शस्त्रेण वा हते ।
स्वयं प्रणश्यते देही तन्मे शंसितुमर्हसि ।

महेश्वरः ।
तदहं ते प्रवक्ष्यामि शृणु कल्याणि कारणम् ।
एतन्नैयायिकैश्चापि मुह्यते सूक्ष्मबुद्धिभिः ।
कर्मक्षये तु संप्राप्ते प्राणिनां देहधारिणाम् ।
उपद्रवो भवेद्देहे येन केनापि हेतुना ।
तन्निमित्तं शरीरी तु शरीरं प्राप्तसंक्षयम् ।
अपयाति परित्यज्य ततः कर्मवशेन सः ।
देहक्षतेऽपि नैवात्मा वेदनाभिर्न चाल्यते ।
तिष्ठेत्कर्मफलं यावद्व्रजेत्कर्मक्षये पुनः ।
आदिप्रभृति लोकेऽस्मिन्नेवमात्मगतिः सदा ।
एतत्ते कथितं देवि भूयः श्रोतुं किमिच्छसि ।

Colophon.

उमा ।
भगवन्देवदेवेश कर्मणैव शुभाशुभम् ।
यथायोगं फलं जन्तुः प्राप्नोतीति विनिश्चयः ।
परेषां विप्रियं कुर्वन्यथा संप्राप्नुयाच्छुभम् ।
यद्येतदस्ति चेद्देव तन्मे शंसितुमर्हसि ।

महेश्वरः ।
तदप्यस्ति महाभागे अभिसंधिफलं नृणाम् ।
हितार्थं दुःखमन्येषां कृत्वाशुभमवाप्नुयात् ।
दण्डयन्भर्त्सयन्राजा प्रजाः पुण्यमवाप्नुयात् ।

---

the prior half). — (L. 2334) $G_{1.3}$ M_4 कर्मात्मानं ; G_2 कर्मणा न (for कर्मात्मा न). G_2 च (for चेत्). T_1 आत्मा वा अथ देहे वा भजते कर्मकर्तृतां. — (L. 2335) T_1 [ऽ]त्र (for ऽन्यः). D_{10} T G देहे तन्मे त्वं (for तत्र देहे तद्). — (L. 2339) D_{10} T G त्रिभिर्गुणैः (by transp.). — T_1 om. lines 2340–2345. — (L. 2340) D_{10} T_{2-4} G चैव (for इति). — (L. 2343) D_{10} G युक्तं ; T_2 नित्यं (for सर्वं). D_{10} तेन (for लोके). — (L. 2344) T_2 M_2 शौर्यं (for श्रेयः). M_4 दया (for दमः). — (L. 2345) T_3 $G_{1.3}$ M_3 उच्यते (for इष्यते). G_4 सात्त्विकं कर्म उच्यते (for the post. half). — (L. 2346) D_{10} T_3 G मोहो ; T_2 मोहं- (for भोग-). — (L. 2348) M [उ]द्भवस्य (for °वं च). T_1 रजसश्चाद्भुतं चैव (for the prior half). — M_4 om. (hapl.) lines 2349–2351. — (L. 2350) D_{10} T_2 G हिंसा सत्यं च ; T_2 हिंसात्वं चैव (for °परत्वं). — G_2 om. lines 2351–2354. — (L. 2351) T_1 $M_{1.2}$ [उ]द्भवति (for [उ]द्भवं च). T_1 पापकरं (for °युतं). D_{10} T_3 $G_{1.3.4}$ तथा (for सदा). — (L. 2352) T_1 M_4 तस्माद्गुणमयं सर्वं (for the prior half). D_{10} $T_{2.3}$ G_1 शुभाशुभं. — (L. 2354) M_4 सर्वं- (for पुण्य-). T_2 -लोके तु (for -लोकेषु). T_1 राजसा मानुषेषु वै ; M_4 मानुषा राजसाः पदे (for the post. half). — $G_{3.4}$ om. the ref. — (L. 2356) $T_{2.3}$ G भिन्नेऽस्मिन् (for भेद्यः सन्). — (L. 2357) D_{10} T G स्वयं प्रयास्यति तदा (for the prior half). — (L. 2359) $G_{1.3}$ निर्णायकैश् ; G_2 निर्णायिकैश् ; G_4 निर्मा° (for नैया°). — (L. 2360) T_2 $G_{1.3.4}$ प्राणिनां जन्मकारि- (T_3 °धर्मि)णां (for the post. half). — (L. 2362) T_1 G_2 शरीरं (for °री). D_{10} $T_{2.3}$ G M_4 प्राप्य (for प्राप्त-). T_1 स तदा प्राप्य संक्षयं (for the post. half). — (L. 2364) M_{1-3} देहे (for देह-). D_{10} $T_{1.3}$ G M_4 -क्षये (for -क्षते). T_1 च (for न). G_{1-3} बाध्यते (for चाल्यते). — (L. 2365) T_1 कर्मक्षयं (for °ये). — (L. 2366) G_2 आदि- (for आत्म-). D_{10} T_1 $G_{1.3.4}$ M स्मृता ; T_3 तदा (for सदा). — (L. 2367) D_{10} T G किं भूयः श्रोतुमिच्छसि (for the post. half). — Colophon. — *Sub-parvan* : M दानधर्म. — *Adhy. name* : D_{10} $T_{2.3}$ G_2 उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} T_2 $G_{2.4}$ 209 ; T_1 202 ; T_3 208 ; $G_{1.3}$ $M_{1.4}$ 203. — (L. 2368) M_4 सर्व- (for देव-). — (L. 2369) T_1 -योगबलं (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गुरुः संतर्जयञ्शिष्यान्भर्ता भृत्यजनं स्वकम् ।
उन्मार्गप्रतिपन्नांश्च शास्ता धर्मफलं लभेत् ।
चिकित्सकश्च दुःखानि जनयन्हितमाप्नुयात् ।
यज्ञार्थं पशुहिंसां च कुर्वन्नपि न हिंसकः ।
एवमन्ये सुमनसो हिंसकाः स्वर्गमाप्नुयुः ।
एकस्मिन्निहतेऽभद्रे बहवः सुखमाप्नुयुः ।
तस्मिन्हते भवेद्धर्मः कुत एव तु पापकम् ।
अभिसंधेरजिह्मत्वाच्छुद्धे धर्मस्य गौरवात् ।
एतत्कृत्वा तु पापिष्ठान्दोषान्न प्राप्नुयात्क्वचित् ।

उमा ।

भगवन्सर्वमर्त्यानां ज्ञानी भवति सत्तमः ।
किमवेक्ष्य तदुत्पन्नं ज्ञानं तस्य फलं च यत् ।
कृत्रिमं तत्स्वभावं वा तन्मे शंसितुमर्हसि ।

नारदः*।

एतच्छ्रुत्वा महादेवो जगौ ज्ञानस्य संभवम् ।

महेश्वरः ।

स्थावरं जंगमं चेति जगद्द्विविधमुच्यते ।
चतस्रो जातयस्तत्र प्रजानां क्रमशो यथा ।
तेषामुद्भेदजा वृक्षा लता वल्ल्यश्च वीरुधः ।
दंशयूकादयश्चान्ये स्वेदजाः कृमिजातयः ।
पक्षिणश्छिद्रकर्णाश्च प्राणिनस्त्वण्डजाः स्मृताः ।
मृगव्यालमनुष्यांश्च विद्धि तेषां जरायुजान् ।
एवं चतुर्विधां जातिमात्मा संश्रित्य तिष्ठति ।
स्पर्शेनैकेन्द्रियेणात्मा तिष्ठत्युद्भेदजेषु वै ।
शरीरस्पर्शरूपाभ्यां क्लेदजेष्वपि तिष्ठति ।
पञ्चभिश्चेन्द्रियद्वारैर्जीवन्त्यण्डजरायुजाः ।
तथा भूम्यम्बुसंयोगाद्भवन्त्युद्भेदजाः प्रिये ।
शीतोष्णयोस्तु संयोगाज्जायन्ते क्लेदजाः प्रिये ।
अण्डजाश्चापि संयोगाज्जायन्ते क्षेत्रबीजयोः ।
शुक्रशोणितसंयोगात्संभवन्ति जरायुजाः ।
जरायुजानां सर्वेषां मानुषं पदमुत्तमम् ।
सकलैरिन्द्रियैर्मर्त्याः संयुक्ता जल्पिनस्तथा ।
भयं रतिश्च चित्तं तद्विद्यते मृगपक्षिषु ।
धर्माधर्मौ च विज्ञानं नैव पक्षिमृगादिषु ।
बुद्धिः सत्त्वं धृतिर्लज्जा ज्ञानं विज्ञानमेव च ।
ऊहापोहौ च मर्त्येषु गुणा नानाविधाः स्मृताः ।
मानुषं हि पदं तस्माद्विशिष्टमिह लक्ष्यते ।
महता धर्मकार्येण प्राप्यते जन्म मानुषम् ।
अतः परं तमोत्पत्तिं शृणु देवि समाहिता ।
द्विविधं हि तमो लोके शार्वरं देहजं तथा ।
ज्योतिर्भिश्चाग्निना लोके नाशं गच्छति शार्वरम् ।
देहजं तु तमो घोरं तैः समस्तैर्न शाम्यति ।
तमसस्तस्य नाशार्थं नोपायमधिजग्मिवान् ।
तपश्चकार विपुलं लोककर्ता पितामहः ।
चतुरस्तु समुद्भूता वेदाः साङ्गाः सहोत्तराः ।

-योगं फलं). — T_1 om. lines 2370 2383. — (L. 2371) D_{10} $T_{2.3}$ G यद्येतदस्मिंश्चेद्देहे (T_3 °श्चोद्देशे) (for the prior half). — (L. 2372) D_{10} $T_{2.3}$ G -बलान् (for -फलं). — (L. 2373) D_{10} $T_{2.3}$ G [अ]सुखम् (for [अ]शुभम्). — D_{10} om. (hapl.) line 2374. M_4 om. (hapl.) lines 2374–2377. — (L. 2374) T_2 जनान् (for प्रजाः). — (L. 2375) D_{10} $T_{2.3}$ $G_{1.2.4}$ -जनान्स्वकान् (for -जनं स्वकम्). G_2 भक्तान्पुण्यजनान्स्वकान् (for the post. half). — (L. 2378) T_3 -हिंसाश्च (for -हिंसां). D_{10} $T_{2.3}$ G लिप्यते (for हिंसकः). — (L. 2381) D_{10} $T_{2.3}$ G पातकं (for पापकम्). — $G_{1.3.4}$ read line 2382 twice. — (L. 2382) D_{10} अगुह्यत्वाच् (for अजिह्म°). G_1 (first time). $_{2.3.4}$ (last two first time) अहिंसतेति हत्वा तु (for the prior half). M शुभे (for शुद्धे). G_1 (first time). $_{2.3.4}$ (last two first time) कर्मणि (for धर्मस्य). — (L. 2383) D_{10} G पापेभ्यो (for पापिष्ठान्). D_{10} T_3 G_4 न दोषं. G_{1-3} न दोषं प्राप्नुयुः क्वचित् (for the post. half). — For line 2384, D_{10} T G subst. :

चतुर्विधानां जन्तूनां कथं [illegible]

—D_{10} T G Kumbh. and Madras eds. om. lines 2386–2387. M om. the ref. (नारदः*). — (L. 2389) D_{10} T G योनयस् (for जात°). — (L. 2390) D_{10} T G M_4 उद्भिदजा (for उद्भे°). — (L. 2391) T_1 दंदशूकादयश्चान्ये (for the prior half). — (L. 2392) G_3 चंद्र- (for छिद्र-). T_1 पक्षिणः क्षुद्रकर्माणः (for the prior half). T_1 दताः ; $T_{2.3}$ $G_{3.4}$ M_1 मताः (for स्मृताः). — (L. 2393) T_1 मृगांश्चैव (for मृगव्याल-). T_1 चैतान् (for तेषां). — (L. 2395) T_2 स्वांशेन (for स्पर्शेन). — (L. 2396) D_{10} T G_{2-4} स्वेदजेषु (for क्ले°). M [द]त्र (for [अ]पि). G_1 स्वेदजेष्ववतिष्ठते (for the post. half). — T_1 om. (hapl.) the post. half of line 2398 and the prior half of line 2399. — (L. 2399) D_{10} T G स्वेदजाः (for क्ले°). M प्रजाः (for प्रिये). — (L. 2400) D_{10} T G transp. संयोगाज् and जायन्ते. D_{10} T G क्षेत्र- (for क्षेत्र-). — (L. 2401) Kumbh. and Madras eds. शुक्र- (for शुक्र-). — D_{10} T G om. lines 2403–2409. — (L. 2410) M श्रुतोत्पत्तिं (for तमो°). — M_4 om. from शार्वरं in the post. half (of line 2411) up to ज्योतिर्भिश्च (in line 2412). — (L. 2412) D_{10} T G M_4 तमो (for [अ]ग्निना). — (L. 2413) D_{10} T $G_{3.4}$

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तान्ँल्लब्ध्वा मुमुदे ब्रह्मा लोकानां हितकारणात् ।
देहजं तत्तमो घोरमभूत्तेनैव नाशितम् ।
कार्याकार्यमिदं चेति वाच्यावाच्यमिदं त्विति ।
यदि चेन्न भवेल्लोके श्रुतं चारित्रदेशिकम् ।
पशुभिर्निर्विशेषं तु चेष्टन्ते मानुषास्त्विति ।
यज्ञादीनां समारम्भः श्रुतेनैव विधीयते ।
यज्ञस्य फलयोगेन देवलोकः समृध्यते ।
प्रीतियुक्ताः पुनर्देवा मानुषाणां फलन्त्युत ।
एवं नित्यं प्रवर्धेते रोदसी च परस्परम् ।
लोकसंधारणं तस्माच्छ्रुतमित्यवधारय ।
ज्ञानाद्विशिष्टं जन्तूनां नास्ति लोकत्रयेऽपि च ।
सहजं तत्प्रधानं स्यादपरं कृत्रिमं श्रुतम् ।
उभयं यत्र संपन्नं भवेत्तत्र तु शोभनम् ।
संप्रगृह्य श्रुतं सर्वं कृतकृत्या भवन्त्युत ।
उपरीव च मर्त्यानां देववत्संप्रकाशते ।
कामं क्रोधं भयं दर्पमज्ञानं चैव बुद्धिजम् ।
तच्छ्रुतं नुदति क्षिप्रं यथा वायुर्बलाहकान् ।
अल्पमात्रं कृतो धर्मो भवेज्ज्ञानवतां महान् ।
महानपि कृतो धर्मो ह्यज्ञानान्निष्फलो भवेत् ।
परावरज्ञो भूतानां ज्ञानवांस्तत्त्वविद्भवेत् ।
एवं श्रुतफलं सर्वं कथितं ते शुभेक्षणे ।

उमा ।

भगवन्मानुषाः केचिज्जातिस्मरणसंयुताः ।
किमर्थं तेऽभिजायन्ते जानन्तः पौर्वदेहिकम् ।
एतन्मे तत्त्वतो देव मानुषेषु वदस्व भोः ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि कारणं शृणु शोभने ।
ये मृताः सहसा मर्त्या जायन्ते सहसा पुनः ।
तेषां पौराणिकोऽभ्यासः कंचित्कालं स तिष्ठति ।
तस्माज्जातिस्मरा लोके जायन्ते बोधसंयुताः ।
तेषां विवर्धतां संज्ञा स्वप्नवत्सा प्रणश्यति ।
परलोकस्य चास्तित्वे मूढानां कारणं च तत् ।

उमा ।

भगवन्मानुषाः केचिन्मृता भूत्वा हि संप्रति ।
निवर्तमाना दृश्यन्ते देहेष्वेव पुनर्नराः ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि कारणं शृणु शोभने ।
प्राणैर्वियोज्यमानानां बहुत्वात्प्राणिनां क्षये ।
तथैव नामसामान्याद्यमदूता नृणां भुवि ।
वहन्ति ते कचिन्मोहादन्यांस्त इति यामिकाः ।
निर्विकारं हि तत्सर्वं यमो वेद कृताकृतम् ।
तस्मात्संयमिनीं प्राप्य यमेनैते विमोक्षिताः ।
पुनरेव निवर्तन्ते शेषं भोक्तुं स्वकर्मणः ।
स्वकर्मण्यसमाप्ते तु न म्रियन्ते हि मानवाः ।

उमा ।

भगवन्सुप्तमात्राणां मर्त्यानां स्वप्नदर्शनम् ।

लोके; $G_{1,3}$ लोकैस् (for घोरं). T_1 ज्योतिर्भिन्नं हि नश्यति (for the post. half). — (L. 2415) D_{10} T G चचार (for चकार). — (L. 2416) D_{10} T G M_4 चरतस् (for चतुरस्). T_1 सहेतराः (for सहोत्तराः). — (L. 2417) D_{10} T G -काम्यया (for -कारणात्). — (L. 2418) G_{1-3} M_4 तु (for तत्). D_{10} T_2 $G_{1,3,4}$ भूनैरेव विनाशितं; T_1 ततस्तैरेव नश्यति; T_3 वेदैरेव विनाशितं (for the post. half). — (L. 2420) M लभेल् (for भवेल्). T_1 G_2 -दर्शनं (for -देशिकम्). — (L. 2421) D_{10} $T_{2,3}$ G अपि; T_1 भुवि (for त्विति). — (L. 2423) T_1 -भोगेन (for -योगेन). — (L. 2424) D_{10} T G भवंति (for फलन्ति). — (L. 2425) T_1 प्रमोदेते (for प्रवर्धेते). — (L. 2426) M_4 -संधारणात् (for °रणं). T_2 श्रुनाद् (for श्रुतम्). T_2 $G_{1,2}$ [उ]प- (for [अ]व-). — (L. 2428) T_1 G_4 स्मृतं (for श्रुतम्). — (L. 2430) D_{10} $T_{1,2}$ $G_{1,3,4}$ कृतकृत्यो भवत्युत (for the post. half). — (L. 2431) D_{10} $T_{2,3}$ G [उ]परि (for [इ]व च). — (L. 2432) T_3 कामक्रोध-; $G_{3,4}$ कामक्रोधं (for कामं क्रोधं). G_2 धर्मम् (for दर्पम्). — D_{10} T_1 om. (hapl.) line 2436. — (L. 2437) D_{10} T_3 $G_{1,3,4}$ शुभ-; T_1 श्रुते (for श्रुत-). — G_4 om. the ref. — (L. 2439) D_{10} T G अभि- (for तेऽभि-). T_1 पूर्वदैहिकं (for पौर्वदे°). — M om. line 2440. — (L. 2441) D_{10} T G शृणु तत्त्वं समाहिता (for the post. half). — (L. 2443) T_1 धर्मः; G_{1-3} M_{1-3} बोधः; M_4 [ऽ]भ्यासात् (for °सः). T_1 G_2 किंचित्कालं (for कंचि°). — (L. 2445) $G_{1,3}$ सं- (for वि-). T_1 $G_{1,3,4}$ सं- (for सा). — (L. 2446) M_4 परस्यैकस्य नास्तित्वे (for the prior half). D_{10} T_3 लोकानां (for मूढानां). — (L. 2447) T_1 मानवाः (for मानुषाः). — (L. 2449) M_4 भामिनि (for शोभने). — (L. 2450) T_2 वधे (for क्षये). — (L. 2451) D_{10} $T_{2,3}$ G प्रति (for भुवि). — (L. 2452) T_1 निर्दंत्येते (for वहन्ति ते). D_{10} T $G_{1,3,4}$ अन्यत(D_{10} T_1 °न्यं स)त्वं तु धार्मि(T_1 यामि)काः; G_2 अथ मर्त्यास्तु धार्मिकाः; M_4 अन्यस्त्वं चेति यामिकाः (for the post. half). — (L. 2453) D_{10} धर्मो (for यमो). — (L. 2454) $T_{1,3}$ $G_{1,3,4}$ $M_{1,3,4}$ संयमनीं (for °मिनीं). D_{10} $T_{1,2}$ G [ए]केन (for [ए]ते वि-). T_3 यमेनैकेन तोषिताः (for the post. half). — (L. 2456) T_3 G_4 निवर्तंते (for न म्रियन्ते). G_{1-3} पुनर्जीवंति मानुषाः (for the post. half). — T_1 om. (hapl.) lines 2457–2462. — (L. 2457)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

किं तत्स्वभावमन्यद्वा तन्मे शंसितुमर्हसि ।

महेश्वरः ।

सुप्तानां तु पुनश्श्रेष्ठा स्वप्न इत्यभिधीयते ।
अनागतमतिक्रान्तं पश्यते संचरन्मनः ।
निमित्तं च भवेत्तस्मात्प्राणिनां स्वप्नदर्शनम् ।
एवं ते कथितं सर्वं भूयः श्रोतुं किमिच्छसि ।

Colophon.

उमा ।

भगवन्सर्वभूतेश लोके कर्मक्रियापथे ।
दैवात्प्रवर्तते सर्वमिति केचिद्व्यवस्थिताः ।
अपरे चेष्टया चेति दृष्ट्वा प्रत्यक्षतः क्रियाम् ।
पक्षभेदे द्विधा चास्मिन्संशयस्थं मनो मम ।
तत्त्वं वद महादेव श्रोतुं कौतूहलं हि मे ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि शृणु तत्त्वं समाहिता ।
न दैवं कुरुते कर्म लोके देवि शुभाशुभम् ।
लक्ष्यते द्विविधं कर्म मानुषाणां शुभानने ।
पुराकृतं तयोरेकमैहिकं च परं तथा ।
अदृष्टं पौर्विकं कर्म तद्दैवमिति लक्ष्यते ।
ऐहिकं दृष्टकरणं तन्मानुषमिति स्मृतम् ।
मानुषं च क्रियामात्रं दैवात्संभवते फलम् ।
एवं तदुभयं सर्वं मानुषं विद्यते नृषु ।
लौकिकं तत्प्रवक्ष्यामि दैवमानुषनिर्मितम् ।
कृषौ तु दृश्यते कर्म कर्षणं वपनं तथा ।
रोपणं चैव लवनं यच्चान्यत्पौरुषं स्मृतम् ।
काले वृष्टिः सुवापश्च प्ररोहः पक्तिरेव च ।
एवमादि तु यच्चान्यत्तद्दैवमिति स्मृतम् ।
प्रवापः पौरुषं कर्म सिद्धिर्दैवमिति स्मृतम् ।
दैवादसिद्धिश्च भवेद्दुष्कृतं चास्ति पौरुषे ।
सुयत्नाल्लभते कीर्तिं दुर्यत्नादयशस्तथा ।
एवं लोकगतिर्देवि आदिप्रभृति वर्तते ।

उमा ।

भगवन्सर्वभूतेश सुरासुरनमस्कृत ।
कथमात्मा सदा गर्भं संविशेत्कर्मकारणात् ।
तन्मे वद महादेव तद्धि गुह्यं परं मम ।

महेश्वरः ।

शृणु भामिनि तद्गुह्यं गुह्यानां परमं प्रिये ।
देवगुह्यादपि परमात्मगुह्यमिति स्मृतम् ।
देवासुरास्तत्र विदुरात्मनो हि गतागतम् ।

D_{10} T_2 G M_4 -मात्रेण (for -मात्राणां). D_{10} T_2 प्राणिनां (for मर्त्यानां). — G_2 om. (hapl.) lines 2458–2461. —(L. 2459) D_{10} $T_{2,3}$ $G_{1,3,4}$ सनश्श्रेष्ठा (for पुन°). —(L. 2461) M_4 -दर्शने (for °नम्). — (L. 2462) D_{10} T_3 G देवि (for सर्वं). D_{10} किं भूयः श्रोतुमिच्छसि (for the post. half). — Colophon om. in T_1. — *Adhy. name* : D_{10} T_2 G_2 उमामहेश्वरसंवादे जातिस्मरणलक्षणं ; T_3 M उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} T_2 $G_{2,4}$ 210 ; T_3 209 ; $G_{1,3}$ M_1 204 ; $M_{2,3}$ 205 ; M_4 202. — (L. 2463) T_1 -लोकेश (for -भूतेश). T_3 -फले (for -पथे). T_1 सर्वलोकनमस्कृत (for the post. half). — (L. 2465) T_1 [अ]पि (for [इ]ति). — (L. 2467) T_1 परं (for वद). — (L. 2469) D_{10} $T_{2,3}$ $G_{2,4}$ तदेवं ; T_1 सदैवं ; $G_{1,3}$ तद्दैवं (for न दैवं). T_3 om. (hapl.) from the post. half up to the prior half of line 2472. — (L. 2470) D_{10} T_2 G मानुषेष्वेव तच्छृणु (for the post. half). — G_2 om. lines 2471–2475. — (L. 2471) T_1 द्वयोर् (for तयोर्). D_{10} त्वितरत् ; T_1 ह्यपरं ; T_2 $G_{1,3,4}$ त्वितरं (for च परं). — (L. 2472) D_{10} $T_{1,2}$ $G_{1,3,4}$ अदृष्टपूर्वं यत्कर्म (for the prior half). — (L. 2473) D_{10} T $G_{1,3,4}$ निहीनं (for ऐहिकं). — T_1 om. (hapl.) lines 2474–2478. — (L. 2475) D_{10} $T_{2,3}$ $G_{1,3,4}$ कर्म (for सर्वं). D_{10} वृद्धिमत् ; $T_{2,3}$ $G_{1,3,4}$ सिद्धि तत् (for विद्यते). — (L. 2477) M_4 मर्दनं (for वपनं). — After line 2477, M_4 reads line 2481. T_1 M_4 read line 2478 after line 2505. D_{10} $T_{2,3}$ G repeat lines 2478–2480 after line 2505. — (L. 2478) T_1 रोपणं कर्षणं चैव ; M_4 शोधनं लक्षणं चैव (for the prior half). — After the prior half, M_4 ins. :

लवणं मर्दनं च यत् ।

एवमादीह यत्कर्म.

— (L. 2479) D_{10} G (all both times) सुवापं (for °पश्च). — (L. 2480) T_1 प्ररोहोत्पत्तिरेव च (for the post. half). — (L. 2480) After the prior half, M_4 ins. :

*** क्रियया प्रियं ।

स्वयंभूरमानुष्यं.

$G_{1,3}$ (both both times) M_1 तत्तद्दैवम् ; M_3 तत्तु दैवम् (for तद्दैवतम्). — D_{10} T G om. (hapl.) line 2481 — (L. 2481) M_4 प्रयत्नं (for प्रवापः). — G_2 om. (hapl.) lines 2482–2489. — (L. 2482) $G_{1,3}$ [अ]पि ; M_4 [अ]त्र (for [अ]स्ति). T_1 मानुषे (for पौरुषे). — After line 2484, T_1 ins. an addl. colophon [*Adhy. no.* : 203]. M_3 reads lines 2506–2546 after line 2484. $M_{1,3}$ read lines 2485–2506 after line 2546. — (L. 2485) D_{10} T $G_{1,3,4}$ -लोकेश (for -भूतेश). M_4 भगवन्देवदेवेश (for the prior half). — (L. 2487) T_3 महाभाग (for °देव). D_{10} $T_{2,3}$ $G_{1,3,4}$ मतं (for मम). — (L. 2488) D_{10} $T_{1,3}$ $G_{1,3,4}$ M_3 सर्वं (for गुह्यं). M_4 शृणु ते कथयिष्यामि

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अदृश्यो हि स देवानां शैघ्र्यात्सौक्ष्म्याच्चिराश्रयात् ।
अतिमात्रातिमायानामात्ममाया सदेष्यते ।
सोऽयं चतुर्विधां जातिं संविशत्यात्ममायया ।
मैथुनं शोणितं बीजं दैवं चाप्यत्र कारणम् ।
बीजशोणितसंयोगो यदा संभवते शुभे ।
तदात्मा विशते गर्भमेवमण्डजरायुजे ।
शीतोष्णयोस्तु संयोगे स्वेदजेष्ववतिष्ठति ।
बीजभूमिजलानां तु योगादुद्भिद्जेषु च ।
एवं संयोगकाले तु आत्मा गर्भत्वमेयिवान् ।
कललाज्जायते पिण्डं पिण्डात्पेश्यर्बुदं भवेत् ।
व्यक्तिभावं गते चैव कर्म त्वाश्रयते क्रमात् ।
एवं स्त्रीपुरुषसंयोगं पौरुषं विद्धि भामिनि ।
अपत्यलाभो यच्चान्यत्तद्दैवमिति संस्मृतम् ।
एवं विवर्धमानेन कर्मात्मा सह वर्तते ।
एवमात्मगतिं विद्धि यन्मां पृच्छसि सुव्रते ।
पञ्चभूतस्थितिश्चैव ज्योतिषामयनं तथा ।
अबुद्धिगम्यं यन्मर्त्यैर्हेतुभिर्वा न विद्यते ।
तादृशं कारणं दैवं शुभं वा यदि वेतरत् ।
यादृशं चात्मना शक्यं तत्पौरुषमिति स्मृतम् ।
केवलं फलनिष्पत्तिरेकेन न तु शक्यते ।
पौरुषेण च दैवेन युगपद्ग्रथितं प्रिये ।
तयोः समाहितं कर्म शीतोष्णं युगपत्तथा ।
पौरुषं तु तयोः पूर्वमारब्धव्यं विजानता ।
आत्मना नैव शक्यं हि न तथा कीर्तिमाप्नुयात् ।
खननान्मथनाल्लोके जलाग्निप्रापणं यथा ।
तथा पुरुषकारे तु दैवसंपत्समाहिता ।
नरस्याकुर्वतः कर्म दैवसंपन्न लभ्यते ।
तस्मात्सर्वसमारम्भो दैवमानुषनिर्मितः ।
असुरा राक्षसाश्चैव मन्यन्ते लोकनायकाः ।
न पश्यन्ते च ते पापाः केवलं मांसभक्षकाः ।
प्रच्छादितं हि तत्सर्वं गुह्यकामा हि देवताः ।
तदहं ते प्रवक्ष्यामि देवगुह्यं पुरातनम् ।
आदिकाले प्रजाः सर्वाः कृत्वा कर्म शुभाशुभम् ।
भुञ्जते पश्यमानास्ते वृत्तान्तं लोकयोर्द्वयोः ।
यथैवात्मकृतं विद्युर्देशान्तरगता नराः ।
विद्युस्तथैवान्तकाले स्वकृतं पौर्वदेहिकम् ।
एवं व्यवस्थिते लोके सर्वे धर्मपराभवन् ।
अचिरेणैव कालेन स्वर्गः संपूरितस्तदा ।
देवानामपि संबाधं दृष्ट्वा ब्रह्माप्यचिन्तयत् ।
संचरन्ते कथं देवा मानुषाः प्रविशन्ति हि ।
इत्येवमनुचिन्त्यैष मानुषान्सममोहयत् ।
तदाप्रभृति ते मर्त्या न विदुस्ते पुरातनम् ।

(for the prior half). — (L. 2490) T_3 हिताहितं (for गतागतम्). — (L. 2491) D_{10} T G सदैवात्मा (for स देवानां). G_{1-3} जनैः (for शैघ्र्यात्). — (L. 2494) D_{10} $T_{1,3}$ $G_{1,3,4}$ चैव; T_2 G_2 एव (for चापि). — T_1 om. lines 2495–2498. D_{10} $T_{2,3}$ G M_4 om. lines 2497–2498. — After line 2499, M_{1-3} read lines 2502–2503. — (L. 2500) T G M_1 कलिलाज् (for कल°). T_3 पेश्यंबुदं; M_4 वै बुद्बुदं (for पेश्यर्बुदं). T_1 पिंडाज्जंतुः प्रजायते (for the post. half). — (L. 2501) D_{10} $T_{2,3}$ G_{1-3} M_1 व्यक्तिभावगतं (T_2 °वं गतं; G_3 °वगतिं; M_1 °वगते) चैव; T_1 त्यक्तभोगमिमं चैव (for the prior half). — D_{10} T G M_4 (hapl.) om. lines 2502–2503. — (L. 2502) Prior half hypermetric. — (L. 2504) D_{10} $T_{1,2}$ G वर्धते (for वर्तते). T_3 कर्मणात्मा स वर्धते (for the post. half). — (L. 2505) D_{10} T_3 $G_{2,4}$ -गतं (for -गतिं). G_2 मे (for मां). D_{10} $T_{2,3}$ $G_{3,4}$ सुप्रभे; $G_{1,3}$ शोभने (for सुव्रते). — After line 2505, $M_{2,3}$ read lines 2547–2548. G_1 om. lines 2506–2509. — (L. 2506) D_{10} -स्थितिं; T_2 -स्मृतिं (for -स्थितिश्). — T_1 om. line 2509. — (L. 2510) G_2 किमलं (for केवलं). — (L. 2511) D_{10} $T_{2,3}$ G M_4 [प]न (for च). $G_{1,3}$ कथितं; M_{1-3} ग्रथिताः (for °तं). — T_1 om. line 2512. — (L. 2512) M_4 यत्तत्त्च् (for कर्म). — T_1 om. line 2514. — (L. 2514) D_{10} T_2 हि न; T_3 G तु न (for नैव). M_4 अनारब्धं तु शक्यं हि (for the prior half). $T_{2,3}$ तथा कीर्तिमवाप्नुयात् (for the post. half). — (L. 2515) $G_{3,4}$ खननं (for °नान्). D_{10} T_2 G_1 तथा (for यथा). — (L. 2517) D_{10} T_1 कुर्वतः (for [अ]कु°). D_{10} T_2 G_2 लिप्यते (for लभ्यते). — (L. 2519) D_{10} -नाशकाः; $T_{2,3}$ G M_4 -नाशनाः (for -नायकाः). T_1 न मन्यंते च दैवतं (for the post. half). — T_1 om. lines 2520–2546. — (L. 2520) M_4 पश्यंति. D_{10} $T_{2,3}$ G पश्यंते न च ($G_{1,3}$ च न) ते पापाः (for the prior half). D_{10} $T_{2,3}$ G -भक्षणाः (for °काः). — (L. 2521) D_{10} $T_{2,3}$ G गूढमाया (for गुह्यकामा). — (L. 2522) M_4 एवं विद्धि शुभाचारे (for the prior half). D_{10} T_3 G $M_{2,3}$ देवि (for देव-). — (L. 2523) D_{10} $T_{2,3}$ G नराः सर्वे (for प्रजाः सर्वाः). — (L. 2524) T_2 G_{1-3} M_4 विभज्य पच्यमानास्ते (for the prior half). $G_{1,3,4}$ वृत्तांताद् (for वृत्तान्तं). — (L. 2526) M_3 विदुस् (for विद्युस्). — (L. 2527) G -रता (for -परा). D_{10} $T_{2,3}$ सर्वधर्मरताभवन् (for the post. half). — (L. 2528) T_2 सदा (for तदा). — (L. 2529) T_3 प्राचिंतयत् (for [अ]प्यचिन्तयत्). — (L. 2530) T_3 G_4 संचरंति; G_2

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कामक्रोधौ च तत्काले मानुषेषु न्यपातयत् ।
ताभ्यामभिहता मर्त्याः स्वर्गलोकं न लेभिरे ।
पुराकृतस्याविज्ञानात्कामक्रोधाभिपीडनात् ।
नैतदस्तीति मन्वाना विकारांश्चक्रिरे पुनः ।
अकार्यादीन्महादोषानारभन्तात्मकारणात् ।
विस्मृत्य धर्मकार्याणि परलोकभयं तथा ।
एवं व्यवस्थिते लोके कश्मलं समपद्यत ।
लोकानां चैव वेदानां क्षयायैव तदा प्रिये ।
नरकाः पूरिताश्चासन्प्राणिभिः पापकारिभिः ।
पुनरेव तु तद्दृष्ट्वा लोककर्ता पितामहः ।
अचिन्तयत्तमेवार्थं लोकानां हितकारणात् ।
समत्वेन कथं लोको वर्तेतेति मुहुर्मुहुः ।
चिन्तयित्वा तदा ब्रह्मा ज्ञानेन तपसा प्रिये ।
अकरोज्ज्ञानदृश्यं तु परलोकं न चक्षुषा ।

उमा ।

भगवन्मृतमात्रस्तु योऽयं जात इति स्मृतः ।
तथैव दृश्यते जातस्तत्रात्मा तु कथं भवेत् ।
गर्भादावेव संविष्ट आत्मेति भगवन्मतम् ।
एष मे संशयो देव तन्मे छेत्तुं त्वमर्हसि ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि शृणु तत्त्वं समाहिता ।
अन्यो गर्भगतो भूत्वा तत्रैव निधनं गतः ।
पुनरन्यच्छरीरं तदाविश्य भुवि जायते ।
तत्कचिन्नैव सर्वत्र दैवयोगं तु तद्भवेत् ।
सूतिकाया हितार्थं च मोहनार्थं च देहिनाम् ।
यमकर्मविधानं तदित्येवं विद्धि शोभने ।
कौक्षमात्रं तु नरकं भुक्त्वा केचित्प्रयान्ति हि ।
माया सा यामिका नाम यजन्ममरणान्तरे ।
इति ते कथितं देवि भूयः श्रोतुं किमिच्छसि ।

उमा ।

भगवन्सर्वभूतेश लोकनाथ वृषध्वज ।
नास्त्यात्मा कर्मभोक्तेति मृतो जन्तुर्न जायते ।
स्वभावाज्जायते सर्वं यथा वृक्षफलं तथा ।
यथोर्मयः संभवन्ति तथैव जगदाकृतिः ।
तपोदानादि यत्कर्म तत्रात्मा दृश्यते वृथा ।
नास्ति पौनर्भवं जन्म इति केचिद्व्यवस्थिताः ।
परोक्षवचनं श्रुत्वा न प्रत्यक्षस्य दर्शनात् ।
तत्सर्वं नास्ति वास्तीति संशयस्थास्तथापरे ।
पक्षभेदान्तरे चास्मिंस्तत्त्वं मे वक्तुमर्हसि ।
उक्तं भगवता यत्तु तत्तु लोकस्य संस्थितिः ।

नारदः ।

प्रश्नमेतं तु पृच्छन्त्यां रुद्राण्यां परिषत्तदा ।
कौतूहलयुता श्रोतुं समाहितमनाभवत् ।

°रंतः (for °रन्ते). D10 T2.3 G स्वर्गं (for देवा). — (L. 2531) D10 T2.3 G M4 [ए]त्र (for [ए]ष). — (L. 2532) G3 om. (hapl.) from the post. half up to the prior half of line 2534. D10 T2.3 G1.2.4 पुराकृतं (for °तनम्). — (L. 2533) D10 T2.3.4 [ए]त्र पातयत् (for न्यपा°). — (L. 2534) T3 अपि (for अभि-). G1 -गता (for -हता). T2 तदाप्रभृति ते मर्त्याः (for the prior half). D10 T2.3 G पेदिरे (for लेभिरे). — (L. 2535) D10 T2 G M4 -पीडिताः (for -पीडनात्). — (L. 2537) D10 T2 G M4 अकार्यादि- ; T3 आहार्यादि- (for अकार्यादीन्). G2 -महादोषं (for महादोषान्). D10 T2.3 G1.3.4 आहरंति ; G2 आहरंती (for आरभन्त). — (L. 2538) M2.3 विस्मृता (for °त्य). T2 -लोकं यथा (for -लोकभयं). — (L. 2539) M1 व्यवासिते (for °स्थिते). — (L. 2540) D10 T2.3 G देवानां (for वेदानां). — M4 om. (hapl.) lines 2541–2545. — (L. 2542) D10 T2.3 G तान् (for तद्). — (L. 2544) D10 T2.3 G M1 लोके (for लोको). — (L. 2546) D10 T2.3 G तत् (for तु). — (L. 2547) D10 यज् (for ऽयं). — T2 om. line 2548. — (L. 2549) D10 T2.3 तु (for [इ]ति). D10 यथा ; T G1–3 मम (for मतम्). — (L. 2550) M1.3 एतत्ते ; M2.4 एतं मे (for एष मे). T2 G2 संशयं (for °यो). T1 तत्त्वं छेत्तुमिहार्हसि (for the post. half). — (L. 2553) T1 G1.3.4 M2 अन्य- (for अन्यच्). D10 T2.3 G M4 प्रविश्य (for आ°). — G2 om. lines 2554–2557. — (L. 2554) D10 T G1.3.4 तत्त्वविन्नैव सर्वस्तु (for the prior half). D10 T1.2 G1.3.4 M4 दैवयोगस् (for °योगं). D10 T2.3 G1.3.4 सं- (for तद्). — (L. 2556) D10 T2.3 G1.3.4 समकर्मविधानत्वाद् (for the prior half). — T1 om. line 2557. — (L. 2557) D10 T2.3 G1.3.4 कांक्षमाणांस् ; M4 कुक्षिगात्रं (for कौक्ष°). — (L. 2558) D10 T2.3 G1.3.4 सं- (for सा). T1 यामा या यमिका नाम (for the prior half). — (L. 2559) T1 G2.4 किं भूयः श्रोतुमिच्छसि ; T3 भूयः किं श्रोतुमि° (for the post. half). — (L. 2560) D10 T2.3 G -लोकेश (for -भूतेश). — (L. 2564) T G M1.2.4 -दानानि (for °दि). D10 तत्र यद् ; T2.3 G1.3.4 अत्र तद् (for तत्रात्मा). T1 M3 यथा ; T3 तथा ; G1.3 [ऽ]थ वा (for वृथा). G2 तत्र दृश्यति ते वृथा (for the post. half). — G2 om. lines 2566–2569. — (L. 2566) M1 परोक्षं (for परोक्ष-). G1.3 प्रत्यक्षस्य च ; M प्रत्यक्षस्यास्य (for न प्रत्यक्षस्य). — (L. 2567) D10 T G1.3.4 M4 न (for वा). — (L. 2568) T1 सर्वं (for तत्त्वं). — D10 T2 G1–3 M4 om. the ref. — (L. 2570) D10 T2.3

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

महेश्वरः ।

नैतदस्ति महाभागे यद्वदन्तीह नास्तिकाः ।
एतदेवाभिशस्तानां श्रुतिविद्वेषिणां मतम् ।
सर्वमर्थं श्रुतं दृष्टं यन्मयोक्तं मया तव ।
तदाप्रभृति मर्त्यानां श्रुतमाश्रित्य पण्डिताः ।
कामान्संछिन्द्य परिघान्धृत्वा वै परमासिना ।
अभियान्त्येव ते स्वर्गं पश्यन्तः कर्मणां फलम् ।
एवं श्रद्धाफलं लोके परतः सुमहत्फलम् ।
बुद्धिः श्रद्धा च शुश्रूषा कारणानि हितैषिणाम् ।
तस्मात्स्वर्गाभिगन्तारः कतिचित्त्वभवन्नराः ।
अन्ये करणहीनत्वान्नास्तिक्यं भावमाश्रिताः ।
श्रुतविद्वेषिणो मूर्खा नास्तिका दृढनिश्चयाः ।
निष्क्रियाश्च निरन्नाद्याः पतन्त्येवाधमां गतिम् ।
नास्तीति वै पुनर्जन्म कवयोऽप्यत्र मोहिताः ।
नाधिगच्छन्ति तन्नित्यं हेतुवादशतैरपि ।
एषा ब्रह्मकृता माया दुर्विज्ञेया सुरासुरैः ।
किं पुनर्मानुषैर्लोके ज्ञातुकामैः स्वकर्मभिः ।
केवलं श्रद्धया देवि श्रुतिमात्रनिविष्टया ।
तदस्तीत्येव मन्तव्यं तथा हि तमवाप्नुयात् ।
वेदगुह्येषु चान्येषु हेतुर्देवि निरर्थकः ।
बधिरान्धवदेवात्र वर्तितव्यं हितैषिणा ।
एतत्ते कथितं सर्वं देवगुह्यं प्रजाहितम् ।
त्वत्प्रीत्यर्थमिदं गुह्यमवाच्यमपि भाषितम् ।

Colophon.

उमा ।

भगवन्सर्वभूतेश त्रिपुरार्दन शंकर ।
कीदृशा यमदण्डास्ते कीदृशाः परिचारकाः ।
कथं मृतास्ते गच्छन्ति प्राणिनो यमसादनम् ।
कीदृशं भवनं तस्य कथं दण्डयति प्रजाः ।
एतत्सर्वं महादेव श्रोतुमिच्छाम्यहं प्रभो ।

महेश्वरः ।

शृणु कल्याणि तत्सर्वं यत्तद्देवि मनःप्रियम् ।
दक्षिणस्यां दिशि शुभे यमस्य सदनं महत् ।
विचित्रं रमणीयं च नानाभावसमन्वितम् ।
पितृभिः प्रेतसंघैश्च यमदूतैश्च संततम् ।
प्राणिसंघैः सुबहुभिः कर्मवश्यैस्तु पूरितम् ।
तत्रास्ते दण्डयन्नित्यं यमो लोकहिते रतः ।
मायया सततं वेत्ति प्राणिनां यच्छुभाशुभम् ।
मायया संहरंस्तत्र प्राणिसंघान्यतस्ततः ।
तस्य मायामयाः पाशा न वेद्यन्ते सुरासुरैः ।
को हि मानुषमात्रस्तु वेत्ता तच्चरितं महत् ।
एवं हि शासतस्तस्य यमस्य परिचारकाः ।
गृहीत्वा संनयन्त्येव प्राणिनः क्षीणकर्मिणः ।
येन केनापदेशेन अपदेशस्तदुद्भवः ।

G पृच्छंत्या (for पृच्छन्त्यां). D_{10} T_{2} G रुद्राण्या (for °ण्यां). T_{3} रुद्राण्या शंकरोवदत् (for the post. half). — T_{1} महेशः (for °श्वरः). — (L. 2572) T_{2} ह ; $G_{1.3.4}$ हि ; G_{2} च (for [इ]ह). — (L. 2573) D_{10} $T_{2.3}$ G_{4} श्रुत- (for श्रुति-). — (L. 2574) M_{4} तत्समर्थं (for सर्वमर्थं). — (L. 2575) G_{1-3} सर्वेषां (for मर्त्यानां). — (L. 2576) D_{10} संभिद्य (for संछिन्द्य). T_{1} परितो ; T_{2} भगवान् (for परिघान्). M_{4} कामक्रोधौ समाच्छिद्य (for the prior half). D_{10} $T_{2.3}$ G_{4} धृत्वा वै (D_{10} G_{4} ये) परमासनाः ; M_{4} परिघो धृतिनासिना (for the post. half). — (L. 2577) D_{10} T G_{1-3} कर्मणः (for °णां). — (L. 2578) T_{3} -भवं (for -फलं). G_{2} भोगे (for लोके). T_{2} एवं श्रुत्वा परं लोके (for the prior half). M_{4} परत्र (for °तः). — (L. 2579) D_{10} $T_{2.3}$ G विनय' ; T_{1} नियमः (for शुश्रूषा). — (L. 2581) T_{2} G_{2} कारण- (for क°). — (L. 2582) $M_{1.3}$ श्रुति- (for श्रुत-). — (L. 2583) D_{10} T G निरत्नाद्याः (for °द्याः). — (L. 2584) D_{10} T G M_{4} अस्तीति (for इति वै). M_{4} यत्र (for ऽप्यत्र). — (L. 2585) T_{2} ते (for तन्). G_{2} हेतुमद्दर्शनैरपि (for the post. half). — T_{1} om. line 2587. — (L. 2587) D_{10} $T_{2.3}$ G मानवैर् (for मानुषैर्). D_{10} $T_{2.3}$ G कुबुद्धिभिः (for स्वकर्मभिः). — (L. 2589) D_{10} $T_{2.3}$ G ततोस्ति (for तदस्ति). T_{3} यथा (for तथा). — (L. 2590) T_{1} [अ]र्थेषु (for [अ]न्येषु). — (L. 2592) D_{10} T_{2} G देवि (for सर्वं). D_{10} T_{3} G_{4} ऋषि- ; M_{4} वेद- (for देव-). G_{4} सनातनं (for प्रजाहितम्). — D_{10} T G om. (hapl.) line 2593. — Colophon. — *Adhy. name* : D_{10} T_{2} G_{2} उमामहेश्वरसंवादः ; T_{3} उमामहेश्वरसंवादे जातिस्मरणलक्षणम् ; M_{1-3} उमामहेश्वरसंवादे तदपगुह्याधिकरणम्. — *Adhy. no.* : D_{10} T_{2} $G_{2.4}$ 211 ; T_{1} 204 ; T_{3} 210 ; $G_{1.3}$ M_{1} 205 ; $M_{2.3}$ 206 ; M_{4} 203. — (L. 2594) D_{10} $T_{2.3}$ $G_{1.3}$ M_{4} -लोकेश (for -भूतेश). T_{1} $G_{2.4}$ भगवन्देवदेवेश (for the prior half). G_{2} त्रिपुरांतक (for °रार्दन). — (L. 2597) T_{3} दंडयते (for °यति). — (L. 2598) G_{2} तत्त्वतः (for [अ]हं प्रभो). — T_{1} महेशः ; G_{3} शिवः (for महेश्वरः). — (L. 2601) G_{2} -राग- (for -भाव-). — T_{1} om (hapl.) line 2603. — (L. 2603) D_{10} T_{3} G M_{3} च (for तु-). — M_{1-3} om. (hapl.) line 2605. — (L. 2607) T_{2} तस्य मायाश्च पाशाश्च (for the prior half). T_{1} भिद्यंते (for वे°). — (L. 2608) T_{3} om. from मात्रस्तु up to पदेशे (in the prior half of line 2611). $G_{1.2}$ -मात्रं (for -मात्रस्). D_{10} T_{2} G

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कर्मणा प्राणिनो लोक उत्तमाधममध्यमाः ।
यथार्हं तान्समादाय नयन्ति यमसादनम् ।
धार्मिकानुत्तमान्विद्धि स्वर्गीयास्ते यथामराः ।
नृषु जन्म लभन्ते ये कर्मणा मध्यमाः स्मृताः ।
तिर्यङ्नरकगन्तारो ह्यधमास्ते नराधमाः ।
पन्थानस्त्रिविधा दृष्टा सर्वेषां गतिजीविनाम् ।
रमणीयं निराबाधं दुर्दर्शमिति नामतः ।
रमणीयं तु सन्मार्गं पताकाध्वजसंकुलम् ।
धूपितं सिक्तसंमृष्टं पुष्पमालाभिसंकुलम् ।
मनोहरं सुखस्पर्शं गच्छतामेव तद्भवेत् ।
निराबाधं यथा लोके सुप्रशस्तं तथा भवेत् ।
तृतीयं तत्तु दुर्दर्शं दुर्गन्धि तमसावृतम् ।
परुषं शर्कराकीर्णं श्वदंष्ट्राबहुलं भृशम् ।
कृमिकीटसमाकीर्णं गच्छतामतिदुर्गमम् ।
मार्गैरेभिस्त्रिभिर्नित्यमुत्तमाधममध्यमान् ।
संनयन्ति यथा काले तन्मे शृणु शुचिस्मिते ।
उत्तमानन्तकाले तु यमदूताः सुसंयताः ।
नयन्ति सुखमादाय रमणीयपथेन वै ।

उमा ।

भगवंस्तत्र चात्मानं त्यक्तदेहं निराश्रयम् ।
अदृश्यं कथमादाय संनयन्ति यमान्तिकम् ।

महेश्वरः ।

शृणु भामिनि तत्सर्वं त्रिविधं देहधारणम् ।
कर्मवश्यं भोगवश्यं दुःखवश्यमिति प्रिये ।
मानुषं कर्मवश्यं स्यात्स्वर्गीयं भोगसाधनम् ।
तृतीयं यातनावश्यं शरीरं मायया कृतम् ।
यमलोके न चान्यत्र दृश्यते यातनायुतम् ।
शरीरैर्यातनावश्यैर्जीवमामुच्य भामिनि ।
नयन्ति यामिकास्तत्र प्राणिनो मायया मृतान् ।
मध्यमानथ वेषेण मध्यमेन पथा तथा ।
चण्डालवेषास्त्वधमान्गृहीत्वा भर्त्स्य तर्जनैः ।
आकर्षन्तस्तथा पाशैर्दुर्दर्शेन नयन्ति तान् ।
त्रिविधानेवमादाय नयन्ति यमसादनम् ।
धर्मासनगतं दक्षं भ्राजमानं स्वतेजसा ।
लोकपालं सभाध्यक्षं तथैव परिषद्वृतम् ।
दर्शयन्ति महाभागे यामिकास्तान्निवेद्य ते ।
पूजयन्दण्डयन्कांश्चित्तेषां शृण्वञ्शुभाशुभम् ।
व्यापृतो बहुसाहस्रैस्तत्रास्ते सततं यमः ।
गतानां तु यमस्तेषामुत्तमानभिपूजया ।
अभिसंगम्य विधिवत्पृष्ट्वा स्वागतकौशलम् ।
प्रस्तुत्य सत्कथां तेषां लोकं संदिशते यमः ।
यमेनैवमनुज्ञाता यान्ति पश्चात्त्रिविष्टपम् ।
मध्यमानां यमस्तेषां श्रुत्वा कर्म यथातथम् ।
जायन्तां मानुषेष्वेव इति संदिशते च तान् ।
अधमान्पापसंयुक्तान्यमो नावेक्षतेऽगतान् ।
यमस्य पुरुषा घोराश्चण्डालसमदर्शनाः ।
यातना यापयन्त्येताँल्लोकपालस्य शासनात् ।

देवस्य; T_1 वेत्तास्य (for वेत्ता तच्). — (L. 2609) D_{10} T_2 G M_4 संवसतस्; M_{1-3} संशास° (for हि शास°). — (L. 2610) T_1 तान् (for सं-). — (L. 2611) D_{10} T_3 G_4 त्वपदेशस्; M_{1-3} ह्यप° (for अप°). T_2 G_{1-3} समुद्भवः (for तदुद्भवः). M_4 त्वपदेशं तदुद्भवेत् (for the post. half). — (L. 2612) G_2 प्राणिनां (for °नो). D_{10} लोका (for लोक). — (L. 2613) G_2 तत् (for तान्). — (L. 2614) D_{10} T G M_2 स्वर्गिणस् (for स्वर्गीयास्). M_4 यथा स्मृताः (for यथामराः). — M_4 om. (hapl.) line 2615. — (L. 2615) M_{1-3} वै (for ये). G_2 मानुषाः (for मध्यमाः). — (L. 2618) $G_{1.3}$ दुर्दर्शमिव नारकं (for the post. half). — (L. 2622) T_1 तथा (for यथा). D_{10} $T_{2.3}$ G_4 लोकं (for लोके). D_{10} $T_{2.3}$ G कृतं; T_1 यथा (for तथा). — (L. 2623) D_{10} T G यत् (for तत्). — (L. 2624) T_1 $G_{1.3}$ M -पूर्णं (for -कीर्णं). $G_{1.3}$ -बहुलायुतं (for °लं भृशम्). — (L. 2626) D_{10} $T_{2.3}$ G एव; M एवं (for एभिस्). — (L. 2628) $G_{1.3}$ उत्तमाधमकाले तु; M_4 °नां तु कालेन (for the prior half). T_2 सुसंवृताः (for °यताः). — (L. 2629) G_2 -पदेन (for -पथेन). — (L. 2630) T_2 गताश्रयं (for निराश्रयम्). — G_2 om. lines 2631–2634. — T_1 महेशः (for °श्वरः). — (L. 2632) G_4 देहि (for देह-). D_{10} T $G_{1.3.4}$ M_2 -कारणम् (for -धा°). — (L. 2633) T_1 अथापरं (for इति प्रिये). — (L. 2634) D_{10} $T_{2.3}$ $G_{1.3.4}$ द्वितीयं; T_1 स्वकीयं (for स्वर्गीयं). — T_1 om. (hapl.) line 2636. — (L. 2637) D_{10} G_{2-4} जीवान् (for जीवम्). — (L. 2639) T_1 मध्यमेन (for °मान्). $G_{1.3.4}$ घोरा- (for अथ). — (L. 2644) M_3 नराध्यक्षं; M_4 धना° (for सभा°). — (L. 2645) G_2 धार्मिकास् (for यामि°). T_1 तु (for ते). — (L. 2647) $T_{2.3}$ तं (for तान्). — (L. 2648) T_2 -पूजयेत्; $G_{1.3.4}$ T_1 नियतं (for सततं). — G_2 आत्मवानतिपूजया (for the post. half). — (L. 2649) D_{10} T G $M_{2.4}$ -संगृह्य (for -संगम्य). — (L. 2650) D_{10} $T_{2.3}$ G सत्कृतं; T_1 संगतं (for सत्कथां). — (L. 2652) G_2 पच्यमानां (for मध्यमानां). $G_{1.3}$ समस् (for यमस्). — (L. 2654) D_{10} T G -पूजयन् (for -पूजया). M_4 पाद- (for पाप-). — (L. 2656) D_{10} $T_{1.3}$ G प्रापयंति (for या°). T_2 प्रापयंत्येव तान्सर्वान् (for the prior

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

छिन्दन्तश्च नुदन्तश्च प्रकर्षन्ते यतस्ततः ।
क्रोशतः पातयन्त्येतान्मिथो गर्तेष्ववाङ्मुखान् ।
संघातिन्यः शिलाश्चैषां पतन्ति शिरसि प्रिये ।
अयोमुखाः काकबला भक्षयन्ति सुदारुणाः ।
असिपत्रवने घोरे चारयन्ति तथापरान् ।
तीक्ष्णदंष्ट्रास्तथा श्वानः कांश्चित्तत्र दशन्ति वै ।
तत्र वैतरणी नाम नदी ग्राहसमाकुला ।
दुष्प्रवेशा च घोरा च मूत्रशोणितवाहिनी ।
तस्यां संमज्जयन्त्येतांस्तृषितान्पाययन्ति तान् ।
आरोपयन्ति वै कांश्चित्तत्र कण्टकशल्मलीम् ।
यन्त्रचक्रेषु तिलवत्पीड्यन्ते तत्र केचन ।
अङ्गारेषु च दह्यन्ते तथा दुष्कृतकारिणः ।
कुम्भीपाकेषु पच्यन्ते भर्ज्यन्ते सघृतेषु वै ।
पाठ्यन्ते तरुवच्छस्त्रैः पीड्यन्ते लोचनादिषु ।
भिद्यन्तेऽथाङ्गशः शूलैस्तुद्यन्ते सूक्ष्मसूचिभिः ।
एवं त्वया कृतो दोषस्तदर्थं दण्डनं त्विदम् ।
वाचैवं घोषयन्ति स्म दण्ड्यमानान्समन्ततः ।
एवं ते यातनाः प्राप्य शरीरैर्यातनावशैः ।
प्रसहन्तश्च तद्दुःखं स्मरन्तः स्वापराधजम् ।
क्रोशन्तश्च रुदन्तश्च न मुच्यन्ते कथंचन ।
स्मरन्तस्तत्र तप्यन्ते पापमात्मकृतं फलम् ।
एवं बहुविधा दण्डा भुज्यन्ते पापकारिभिः ।
यातनाश्च तथा भुक्त्वा पच्यन्ते नरके पुनः ।
अपरे यातना भुक्त्वा मुच्यन्ते तत्र किल्बिषात् ।
पापदोषक्षयकरा यातना संस्मृता नृणाम् ।
बहुतप्तं यथा लोहं निर्मलं तत्तथा भवेत् ।

Colophon.

उमा ।

भगवंस्ते कथं तत्र दण्ड्यन्ते नरकेषु वै ।
कति ते निरया घोराः कीदृशास्ते महेश्वर ।

महेश्वरः ।

शृणु भामिनि तत्सर्वं पञ्चैते नरकाह्वयाः ।
भूमेरधस्ताद्विहिता घोरा दुष्कृतकर्मणाम् ।
प्रथमं रौरवं नाम शतयोजनमायतम् ।
तावत्प्रमाणं विस्तीर्णं तामसं पापपीडितम् ।
भृशं दुर्गन्धि परुषं कृमिभिर्दारुणैर्युतम् ।
अतिघोरमनिर्देश्यं प्रतिकूलं यतस्ततः ।
ते चिरं तत्र तिष्ठन्ति न तत्र शयनासने ।

---

half). G_2 -शासन- (for -पालस्य). — (L. 2657) D_{10} T $G_{1.3.4}$ भिंदंतश्च तु(D_{10} रु)दंतश्च ; G_2 विंदंतश्च नदंतश्च (for the prior half). — (L. 2658) T G_{1-3} M_4 क्रोशंतः (for क्रोशतः). T_1 अथो (for मिथो). — (L. 2659) T_2 संयामिन्यः (for संघातिन्यः). T_2 [ए]त्र (for [ए]षां). — (L. 2660) $T_{2.3}$ अधोमुखाः (for अयो°). D_{10} T G M_4 कंकबला (G °टा) (for काकबला). — (L. 2661) M_4 -वंटे (for -वने). G_{1-3} [अ]त्रशान् (for [अ]परान्). — (L. 2662) D_{10} T_3 G_4 ह्यदंनि (for दशन्ति). — (L. 2665) T_3 तस्याः (for तस्यां). D_{10} T $G_{1.2.4}$ [ए]ते (for [ए]तांस्). G_2 तस्यां संमज्जयंत्येते (for the prior half). T_1 वारयंति (for पाय°). $G_{1.3}$ ते (for तान्). G_2 घोरे तान्भावयंति ते (for the post. half). — (L. 2666) T_1 $G_{3.4}$ -शाल्मलीं (for -श°). — (L. 2667) T_1 यंत्रचक्रेषु बहुधा (for the prior half). — (L. 2668) $G_{1.3}$ M_4 दृश्यंते (for दह्यन्ते). T_3 -चारिणः (for -का°). — (L. 2669) T_1 -पाके तु (for -पाकेषु). T_1 om. from the post. half up to the prior half of line 2670. T_2 पच्यंते ; T_3 भज्यंते ; M_4 भिद्यंते (for भर्ज्यन्ते). D_{10} $T_{2.3}$ $G_{1.3.4}$ सिकतासु ; G_2 स्वकृतेन (for सघृतेषु). — (L. 2670) D_{10} T G पीड्यंते (D_{10} T_3 $G_{1.3.4}$ पाटिनः) क्रकचादिभिः (for the post. half). — (L. 2671) D_{10} T G भागशः (for ऽथाङ्गशः). M केचित् (for शूलैस्). G_2 -बुद्धिभिः (for -सूचिभिः). — (L. 2672) T_3 त्वदर्थं (for त°). D_{10} T G इति (for इदम्). — (L. 2673) T_1 वाचैव दंडयंतस्ते (for the prior half). D_{10} T G M_4 दंड्यमानाः (for °मानान्). — (L. 2674) D_{10} T_3 G M_4 यातनां (for °नाः). — (L. 2677) $G_{1.3}$ पच्यंते (for तप्यन्ते). D_{10} T G भृशं (for फलम्). — (L. 2678) T_1 एवं बहुविधो दंडो ; T_2 एवं बहुविधान्दंडान् (for the prior half). — (L. 2679) T_2 प्रभुंजतः ; G_{1-3} [अ]नुभूयैव (for तथा भुक्त्वा). D_{10} T_3 G_4 यातनाभिश्च पा(D_{10} प)च्यंते (for the prior half). D_{10} T_3 G_4 नरकेषु पुनः पुनः (for the post. half). — (L. 2680) T_1 G_{1-3} यातनां (for °ना). G_2 कल्मषात् (for किल्बि°). — (L. 2681) $G_{1.2}$ स्मार्यंते (for संस्मृता). — (L. 2682) D_{10} $T_{2.3}$ G अमलं ; T_1 अतुलं (for निर्मलं). — Colophon. — *Adhy. name* : D_{10} T_2 उमामहेश्वरसंवादे नरकविवरणं ; T_3 M_4 उमामहेश्वरसंवादः ; G_4 यातनानुभवप्रकारः ; M_{1-3} उमामहेश्वरसंवादे यातनाभेदवर्णनम्. — *Adhy. no.* : D_{10} T_2 $G_{3.4}$ 212 ; T_1 205 ; T_3 211 ; $G_{1.3}$ M_1 206 ; $M_{2.3}$ 207 ; M_4 204. — (L. 2683) M_4 कथितं (for ते कथं). T_1 दंड्यंते यमार्किकरैः (for the post. half). — (L. 2684) D_{10} T G नरका (for निरया). T_3 वद प्रभो (for महेश्वर). — T_1 महेशः (for °श्वरः). — (L. 2685) M ते (for [ए]ते). D_{10} T G पंच ते ($G_{1.4}$ °चैते) नरकाः स्मृताः (for the post. half). — (L. 2686) T_1 विविधा (for विहिता). — (L. 2689) Some Mss. क्रिमिभिर् (for कृ°). M_4 वृतं (for युतम्). G_2 क्रिमिदुर्वारणैर्युतं (for the post. half). — T_1 om. line 2690.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कृमिभिर्भक्ष्यमाणाश्च विस्रगन्धसमायुताः ।
एवंप्रमाणमुद्विग्ना यान्ति तिष्ठन्ति तत्र ते ।
यातनाभ्यो दशगुणं नरके दुःखमिष्यते ।
तत्र चात्यन्तिकं दुःखमिति विद्धि शुभेक्षणे ।
क्रोशन्तश्च रुदन्तश्च वेदनास्तत्र भुञ्जते ।
भ्रमन्ति दुःखमोक्षार्थं त्राता कश्चिन्न विद्यते ।
दुःखस्यान्तरमात्रं तु द्वारं वा न च लभ्यते ।
महारौरवसंज्ञं तु द्वितीयं नरकं प्रिये ।
तस्माद्द्विगुणितं विद्धि माने दुःखे च रौरवात् ।
तृतीयं नरकं तत्र कण्टकावनसंज्ञितम् ।
ततो द्विगुणितं तं च पूर्वाभ्यां दुःखमानयोः ।
महापातकसंयुक्ता घोरास्तस्मिन्विशन्ति हि ।
अग्निकुण्डमिति ख्यातं चतुर्थं नरकं प्रिये ।
एतद्द्विगुणितं तस्माद्यथानिष्टसुखं तथा ।
तत्र दुःखं हि सुमहदमानुषमिति स्मृतम् ।
भुञ्जते तत्र तत्रैव दुःखं दुष्कृतकारिणः ।
पञ्चकष्टमिति ख्यातं पञ्चमं नरकं प्रिये ।
तत्र दुःखमनिर्देश्यं महाघोरं यथातथम् ।
पञ्चेन्द्रियैरसह्यत्वात्पञ्चकष्टमिति स्मृतम् ।
भुञ्जते तत्र तत्रैव दुःखं दुष्कृतकारिणः ।
अमानुषार्हं तद्दुःखं महाभूतैस्तु भुज्यते ।
अतिघोरं चिरं कृत्वा महाभूतानि यान्ति तम् ।
पञ्चकष्टेन हि समं नास्ति दुःखं तथाविधम् ।
दुःखस्यान्तमिति प्राहुः पञ्चकष्टं सदा प्रिये ।
एवं ते तेषु तिष्ठन्ति प्राणिनो दुःखभागिनः ।
अन्ये च नरकाः सन्ति अवीचिप्रमुखाः प्रिये ।
क्रोशन्तश्च रुदन्तश्च वेदनार्ता भृशातुराः ।
केचिद्भ्रमन्ति वेष्टन्ते केचिद्धावन्ति चातुराः ।
आधावन्ते निवार्यन्ते शूलहस्तैर्यतस्ततः ।
रुजार्दितास्तृषायुक्ताः प्राणिनः पापकारिणः ।
क्रोशन्तश्च नदन्तश्च न मुच्यन्ते कथंचन ।
कृमिभिर्भक्ष्यमाणाश्च वेदनार्तास्तृषान्विताः ।
संस्मरन्तः स्वकं कर्म कृतमात्मापराधजम् ।
शोचन्तस्तत्र तिष्ठन्ति यावत्पापक्षयं प्रिये ।
एवं भुक्त्वा तु नरकं मुच्यन्ते पापसंक्षयात् ।

उमा ।

भगवन्कतिकालं ते तिष्ठन्ते नरकेषु वै ।
एतद्वेदितुमिच्छामि तन्मे ब्रूहि महेश्वर ।

महेश्वरः ।

शतं सहस्रं वर्षाणामादिं कृत्वा हि जन्तवः ।
तिष्ठन्ति नरकावासाः प्रलयान्तमिति स्थितिः ।

— (L. 2690) M_4 -रूरं (for कूलं). D_{10} $T_{2,3}$ G ततस् (for य°). — (L. 2691) T_1 पापिष्ठाम् (for ते चिरं). M_4 तेषु (for the first तत्र). — (L. 2692) D_{10} $T_{2,3}$ G चिष्ठा-; T_1 M_4 विष- (for विस्र-). — T_1 om. line 2693. — (L. 2693) D_{10} $T_{2,3}$ G यावत् (for यान्ति). G_4 यत्र (for तत्र). —T_1 reads lines 2695–2697 twice. — (L. 2695) D_{10} T_3 G इष्यते च (for इति विद्धि). T_2 इष्यते शुभलक्षणे (for the post. half). — (L. 2696) T_1 (both times) वेदनां; M_4 यातनास् (for वेद°). — (L. 2697) $T_{2,3}$ G ज्ञाता (for त्राता). — T_1 om. (hapl.) line 2698. — (L. 2702) D_{10} $T_{2,3}$ G_{1-3} M_{1-3} तच्च; T_1 M_4 तत्र (for तं च). G_2 पूर्णं स्याद् (for पूर्वाभ्यां). T_1 मानदुःखयोः (for दुःखमानयोः). — T_1 om. (hapl.) lines 2705–2708. M_3 om. lines 2705-2709. — (L. 2706) T_2 ततो (for तत्र). — T_2 G_2 om. (hapl.) lines 2708–2711. — (L. 2708) T_3 नरकं पंचमं प्रिये (for the post. half). — (L. 2709) T_1 यथातथा (for °तथम्). — (L. 2710) T_1 $G_{1,3,4}$ असाध्यत्वात् (for असह्य°). — M_2 om. line 2711. — (L. 2711) T_3 तत्रैवं (for °व). — (L. 2712) D_{10} T $G_{1,3,4}$ अमानुषार्हजं दुःखं; G_2 °षा भृशं दुःखं (for the prior half). G_2 om. the post. half. — (L. 2714) D_{10} T_3 $G_{1,3,4}$ M_1 तथापरं; G_2 तथा समं (for तथाविधम्). — (L. 2715) D_{10} $T_{2,3}$ G दुःखस्थानमिति (T_2 °नं सदा) प्राहुः (for the prior half). — (L. 2716) D_{10} T_2 G_4 त्वेतेषु; T_1 ते तत्र; T_3 G_{1-3} चैतेषु (for ते तेषु). — M_3 om. (hapl.) from the post. half of line 2718 up to the prior half of line 2722. — T_1 om. (hapl.) line 2719. — (L. 2719) D_{10} $T_{2,3}$ G केचिद्भ्रमं-तश्चेष्टंते (for the prior half). — (L. 2720) D_{10} $T_{2,3}$ G आधावंतो; T_1 आवार्यंते (for आधावन्ते). T_1 इतस्ततः (for यत°). — (L. 2721) T_1 क्षुधार्दितास् (for रुजा°). — (L. 2722) D_{10} T G यावत्पूर्वकृतं तावत् (for the prior half). — T_1 om. line 2723. — (L. 2723) $G_{1,3}$ वेदनामपराधजां (for the post. half). — $G_{1,3}$ om. (hapl.) line 2724. — (L. 2724) D_{10} T $G_{2,4}$ पापं (for कर्म). T_1 स्वीयम (for कृतम्). — T_1 om. line 2726. — (L. 2726) G_{1-3} नरः कर्म (for तु नरकं). — (L. 2727) D_{10} तु (for ते). D_{10} T G_{1-3} M_3 तिष्ठंति (for तिष्ठन्ते). D_{10} ते (for वै). — After line 2727 T_1 (marg.) ins.:

मानुषाः पापकर्माणो वक्तुमर्हसि मे प्रिय ।

— D_{10} $T_{1,3}$ $G_{3,4}$ M_{1-3} om. line 2728. — T_1 महेशः (for °श्वरः). — (L. 2729) D_{10} T G शतं व (T_3 °तव) र्षसहस्राणाम् (G_3 °णि) (for the prior half). $G_{1,3,4}$

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उमा ।
भगवंस्तेषु ते कुत्र तिष्ठन्तीति वद प्रभो ।
महेश्वरः ।
रौरवे शतसाहस्रं वर्षाणामिति संस्थितिः ।
मानुषघ्नाः कृतघ्नाश्च तथैवानृतवादिनः ।
जारचोराश्च नारी च सर्वतश्चापचारिणी ।
उत्कोचकाश्च पिशुना वर्णसंभेदकारकाः ।
तादृशाः परिपच्यन्ते रौरवे नरके नराः ।
देशघ्नाश्चैव राजघ्नाः पितृमातृविघातिनः ।
राजा चान्यायतः शास्ता साक्षित्वेऽनृतवादिनः ।
बहुघ्नाश्च कुलघ्नाश्च भ्रूणघ्ना गुरुघातिनः ।
विश्वस्तघातकाश्चैवमात्मघ्नाः कोपकारणात् ।
पतिघ्न्यः प्रमदा मोहाद्यज्ञविघ्नकराश्च ये ।
द्वितीये द्विगुणं कालं पच्यन्ते तादृशा नराः ।
महापातकयुक्तास्तु तृतीये दुःखमाप्नुयुः ।
एतावन्मानुषसहं परमन्येषु लक्ष्यते ।
यक्षा विद्याधराश्चैव काद्रवेयाश्च किंनराः ।
गन्धर्वा भूतसंघाश्च तेषां पापयुता भृशम् ।
चतुर्थे परिपच्यन्ते यावद्युगविपर्ययः ।
सहन्तस्तादृशं घोरं पञ्चकष्टे च यादृशम् ।
तादृग्विधस्य दुःखस्य अयोग्यान्विद्धि मानुषान् ।
एवं ते नरकान्भुक्त्वा तत्र क्षपितकल्मषाः ।
नरकेभ्यो विमुक्ताश्च जायन्ते कृमिजातिषु ।
उद्भेदजेषु वा केचित्तत्रापि क्षीणकल्मषाः ।
पुनरेव प्रजायन्ते मृगपक्षिषु शोभने ।
मृगपक्षिषु तद्भुक्त्वा लभन्ते मानुषं पदम् ।
उमा ।
नानाजातिषु केनैव जायन्ते पापकारिणः ।
महेश्वरः ।
तदहं ते प्रवक्ष्यामि यत्त्वमिच्छसि भामिनि ।
सर्वथात्मा कर्मवशान्नानाजातिषु दृश्यते ।
यश्च मांसप्रियो नित्यं कङ्कगृध्रान्स संस्पृशेत् ।
सुरापः सततं मर्त्यः सूकरत्वं व्रजेद् ध्रुवम् ।
अभक्ष्यभक्षणो मर्त्यः काकजातिषु संस्पृशेत् ।
परोद्वेगकरो नित्यं व्यालजातिषु जायते ।
आत्मघ्नो यो नरः कोपात्प्रेतजातिषु तिष्ठति ।
पैशुन्यात्परिवादाच्च कुक्कुटत्वं समश्नुयात् ।
नास्तिकश्चैव यो मूर्खो मृगजातिं स गच्छति ।
हिंसाविहारस्तु नरः कृमिकीटेषु जायते ।
अत्र मानयुतो नित्यं प्रेत्य गर्दभतां व्रजेत् ।
असत्यं परुषं वाक्यं यो वदेन्मत्स्यतां व्रजेत् ।
अगम्यागमनाच्चैव परदाराभिमर्शनात् ।

[आ]दि- (for हि). G_2 महीं गत्वा हि जंतवः (for the post. half). — (L. 2730) G_2 स्मृताः (for स्थितिः). — D_{10} G_4 om. the ref. — (L. 2731) D_{10} T_1 M_{1-3} के (for ते). D_{10} $T_{2.3}$ $G_{2.4}$ तत्र (for कुत्र). $G_{1.3}$ भगवन्केषु के तत्र (for the prior half). — T_1 महेशः ; $G_{2.3}$ om. (for महेश्वरः). — D_{10} T G om. lines 2734–2741. $M_{1.3}$ om. lines 2737–2738. M_2 reads line 2742 twice. — (L. 2742) T_3 द्वितीयं (for °ये). M_2 (first time) तृतीयं त्रिगुणं कालं (for the prior half). — (L. 2743) T_3 -संयुक्तास् (for -युक्तास्तु). — (L. 2744) $M_{1.3}$ वक्ष्यते (for ल°). — (L. 2745) D_{10} यक्ष- (for यक्षा). — (L. 2746) D_{10} $G_{2.4}$ गंधर्व- (for गन्धर्वा). T_1 तेषां पापमुदाहृतं (for the post. half). — (L. 2747) G_2 -तप्यंते (for -पच्यन्ते). D_{10} $T_{2.3}$ G_{2-4} तादृशा नरकाः स्मृताः (for the post. half). — T_1 om. lines 2748–2749. — (L. 2748) M_{1-3} दुःखं (for घोरं). D_{10} T_3 $G_{2.4}$ पंचकष्टे तु ; T_2 $G_{1.3}$ °कष्टेषु (for °कष्टे च). — (L. 2749) D_{10} $T_{2.3}$ G तत्रास्य (D_{10} G_4 अत्रास्य ; T_3 तत्रापि) चिरदुःखस्य (for the prior half). D_{10} ह्ययोग्यान् ; $T_{2.3}$ $G_{1.3.4}$ ह्य($G_{1.3}$ अ)-योन्यान् ; G_2 ह्ययोन्यान् (for अयोग्यान्). — T_1 G_3 om. lines 2751–2752. — (L. 2752) D_{10} T_2 $G_{1.2.4}$ अत्र (for तत्र). — (L. 2755) T_2 जायंते (for केनैव). T_2 केन वै (for जायन्ते). — T_1 महेशः (for °श्वरः). — (L. 2756) T_1 श्रोतुमर्हसि (for यत्त्वमिच्छसि). D_{10} G शोभने (for भामिनि). — T_3 reads line 2757 twice. — (L. 2757) D_{10} $T_{1.2.3}$ (second time) सर्वदात्मा ; T_3 (first time) सर्वमात्मा (for °थात्मा). D_{10} $T_{2.3}$ (second time) $G_{1.2.4}$ -वशो (for -वशान्). D_{10} $T_{1.3}$ (second time) G M_2 जायते ; $T_{2.3}$ वर्तते (for दृश्यते). — T_1 om. lines 2758–2760. — (L. 2758) D_{10} T_2 G काक- (for कङ्क-). G_2 -गृध्रादि (for °न्स). — (L. 2759) T_2 नित्यं (for मर्त्यः). — (L. 2760) D_{10} $T_{2.3}$ G जायते (for संस्पृशेत्). — D_{10} T_1 G om (hapl.) line 2761. T_3 reads lines 2761–2765 after line 2771. — For line 2761, T_2 subst.:

परापकारको नित्यं व्यालकादिषु जायते ।

— (L. 2762) M_{1-3} -वर्गेषु (for -जातिषु). T_1 जायते (for तिष्ठति). — (L. 2763) D_{10} T_1 G अवाप्नुयात् (for समश्नु°). — (L. 2764) T_2 -जातिषु (for -जातिं स). — (L. 2766) D_{10} T G अति- (for अत्र). — D_{10} T_3 G M_1 om. (hapl.) line 2767. — (L. 2767) T_1 M_2 मर्त्यतां (for मत्स्यतां). — (L. 2768) D_{10} T_3 G परदारनिषेवणात् ; T_1 मूषकत्वं व्रजेन्नरः (for the post. half). — T_1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मूषिकत्वं व्रजेन्मर्त्यो नास्ति तत्र विचारणा ।
कृतघ्नो मित्रघाती च सृगालवृकजातिषु ।
गुरुघ्नः पितृघाती च स्थावरेष्ववतिष्ठति ।
वाचिकैः पक्षिमृगतां मानसैरन्यजातिताम् ।
शरीरजैः कर्मदोषैर्याति स्थावरतां नरः ।
एवमाद्यशुभं कृत्वा नरा निरयमाश्रिताः ।
तांस्तान्भावान्प्रपद्यन्ते स्वकृतस्यैव कारणात् ।
एवं जातिषु निर्दग्धाः प्राणिनः पापकारिणः ।
कथंचित्पुनरुत्पद्य लभन्ते मानुषं पदम् ।
बहुकृत्वोऽतिसंतप्तं लोहं शुचितमं यथा ।
बहुदुःखाभिसंतप्तस्तथात्मा शुध्यते मलात् ।
तस्मात्सुदुर्लभं चेति विद्धि जन्म सुमानुषम् ।

Colophon.

उमा ।

भगवन्देवदेवेश शूलपाणे वृषध्वज ।
श्रुतं मे परमं गुह्यं प्रसादात्ते वरप्रद ।
श्रोतुं भूयोऽहमिच्छामि प्रजानां हितकारणात् ।
शुभाशुभमिति प्रोक्तं कर्म सर्वं समासतः ।
तन्मे विस्तरशो ब्रूहि शुभाशुभविधिं प्रति ।
अशुभं कीदृशं कर्म प्राणिनोऽधो निपातयेत् ।
शुभं कर्म कथं देव प्रजानामूर्ध्वतो नयेत् ।
एतन्मे वद देवेश श्रोतुकामास्मि कीर्तय ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि तत्सर्वं शृणु शोभने ।
सुकृतं दुष्कृतं चेति द्विविधः कर्मविस्तरः ।
तयोर्यद्दुष्कृतं कर्म तच्च संजायते त्रिधा ।
मनसा कर्मणा वाचा बुद्धिमोहसमुद्भवम् ।
मनःपूर्वं तु वाक्कर्म वर्तते वाङ्मयं ततः ।
जायते वै क्रियायोगमेवं चेष्टाक्रमं प्रिये ।
अभिद्रोहोऽभ्यसूया च परार्थे चक्षुषा स्पृहा ।
शुभाशुभानां मर्त्यानां वर्तनं विपरीततः ।
धर्मकार्ये यदश्रद्धा पापकर्मणि हर्षणम् ।
एवमाद्यशुभं कर्म मनसा पापमुच्यते ।
अनृतं यच्च परुषमबद्धवचनं कटु ।
असत्यं परिवादश्च पापमेतत्तु वाङ्मयम् ।
अगम्यागमनं चैव परदारनिषेवणम् ।
वधबन्धपरिक्लेशैः परप्राणोपतापनम् ।
चौर्यं परेषां द्रव्याणां हरणं नाशनं तथा ।

om. line 2769. — (L. 2770) M_4 -मृग- (for -वृक-). — (L. 2771) T_1 पुत्र- (for पितृ-). D_{10} $T_{2.3}$ G कृतघ्नः पु(·G_2 मि)त्रघाती च (for the prior half). D_{10} $T_{1.3}$ G [अ]धि-; T_2 च (for [अ]व-). — D_{10} $T_{2.3}$ G M om. lines 2772–2773. — (L. 2774) D_{10} T G नरा निरयगामिनः (for the post. half). — (L. 2775) T_2 तां तां योनिं; T_3 तांस्तान्गर्भान् (for °न्भावान्). D_{10} तांस्तान्संप्रतिपद्यंते (for the prior half). — (L. 2776) D_{10} T_3 G निर्देश्याः (for निर्दग्धाः). — (L. 2777) T_1 कथंचित्सुकृतादेव (for the prior half). — (L. 2778) D_{10} T G बहुशश्चाग्निसंक्रांतं (for the prior half). D_{10} T_3 G शुचिमयं; T_1 शुचि भवेद्; T_2 शुचितरं (for °तमं). T_3 तथा (for यथा). — (L. 2779) G_3 M_4 -संतप्तं (for °प्तस्). M_{1-3} शोध्यते (for शु°). T_1 बलात् (for मलात्). D_{10} T_3 G M_4 तथात्मा शोध्यते बलात् (M_4 महान्) (for the post. half). — (L. 2780) G_2 सुदुर्बलं (for °र्लभं). T_1 देति (for चेति). M_4 सुदुर्लभं चेति विद्धि (for the prior half). M_4 फलं (for विद्धि). — Colophon. *Sub-parvan* : M_{1-3} दानधर्म. — *Adhy. name* : D_{10} T_3 G_2 M_{1-3} उमामहेश्वरसंवादः; T_2 उमामहेश्वरसंवादे नरकविशेषाः. — *Adhy. no.* : D_{10} T_3 $G_{2.4}$ 213; T_1 206; T_2 212; $G_{1.3}$ M_1 207; $M_{2.3}$ 208; M_4 205. — G_2 om. the ref. T_1 om. from the post. half of line 2781 up to the prior half of line 2782. T_1 om. lines 2784–2785. — (L. 2784) D_{10} $T_{2.3}$ G स्वं स्वं (for सर्वं). — (L. 2786) T_2 यन्; T_3 G_1 यो (for ऽधो). — (L. 2787) D_{10} $T_{2.3}$ G_{1-3} वापि; G_4 चापि (for कर्म). D_{10} T G भवेत् (for नयेत्). — T_1 महेशः (for °श्वरः). — (L. 2790) D_{10} T G द्विविधं कर्मविस्तरं (for the post. half). — (L. 2792) D_{10} कर्मणा मनसा (by transp.). D_{10} T_2 G_2 -समुद्भवात् (for °द्भवम्). — (L. 2793) D_{10} T_3 G_{1-3} $M_{2.4}$ वा कर्म; T_2 तत्कर्म (for वाक्कर्म). M_{1-3} तथा (for ततः). M_4 वर्तेते वाङ्मयात्तथा (for the post. half). — (L. 2794) M_4 -योगाद् (for -योगम्). D_{10} T_3 G अनु चेष्टाः (for एवं चेष्टा-). T_3 $G_{1.3.4}$ M_4 क्रमः (for -क्रमं). — (L. 2795) D_{10} T G परार्थेषु च वै स्पृहा (for the post. half). — T_1 om. line 2796. — (L. 2796) D_{10} G वर्तनं परिवारितः; T_2 °नं विपरीतकं (for the post. half). — (L. 2797) T_1 तथाश्रद्धा; G_3 यदाश्रद्धा; M_4 तु याश्रद्धा (for यदश्रद्धा). — (L. 2799) T_1 M_4 पारुष्यम्; G_2 वचनम् (for परुषम्). T_1 अयुक्त-; $G_{1.3}$ अबद्धं (for °द्ध-). T_2 अबंधं यच्च शंकरि; G_2 अबद्धं परुषं कटु (for the post. half). $M_{1.3}$ असत्यं — (L. 2800) M_4 असत्त्वं (for °त्यं). — (L. 2802) M_4 परिवादं च (for the prior half). — (L. 2804) T_1 परतापोपताडनं (for the post. half).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अभक्ष्यभक्षणं चैव व्यसनेष्वभिषङ्गता ।
दर्पात्स्तम्भाभिमानाच्च परेषामुपतापनम् ।
अकार्याणां च करणमशौचं पानमेव च ।
दौःशील्यं क्षुद्रसंपर्कः साहाय्यं पापकर्मणि ।
अधर्म्यमयशस्यं च कार्यं तस्य निषेवणम् ।
एवमाद्यशुभं चान्यच्छारीरं पापमुच्यते ।
मानसाद्वाङ्मयं पापं विशिष्टमिति वक्ष्यते ।
वाङ्मयादपि वै पापं शारीरं गण्यते बहु ।
एवं पापयुतं कर्म पातयेत्त्रिविधं नरम् ।
परोपतापजननमत्यन्तं पापकं स्मृतम् ।
द्विविधं तत्कृतं पापं कर्तारं नरकं नयेत् ।
पातकं त्वपि यत्कर्म करणाद्बुद्धिपूर्वकम् ।
सापदेशमवश्यं तु कर्तव्यमिति यत्कृतम् ।
कथंचित्तत्कृतमपि कर्ता तेन न लिप्यते ।
अवश्यभावदेशेन प्रतिहन्येत कारणम् ।

उमा ।

भगवन्पापकं कर्म यथा कृत्वा न लिप्यते ।
अनृतं धर्मयुक्तं च तन्मे शंसितुमर्हसि ।

महेश्वरः ।

यो नरोऽनपराधी सन्नात्मप्राणस्य रक्षणात् ।
शत्रुमुद्यतशस्त्रं वा पूर्वं तेन हतोऽपि वा ।
प्रतिगत्य नरो हिंस्यान्न स पापेन लिप्यते ।
चोराटविकसंत्रस्तास्तत्प्रतीकारचेष्टया ।
तान्प्रतिघ्नन्नरो हिंस्यान्न स पापेन लिप्यते ।
वृत्तिघ्नं तु नरो हिंस्यान्न स पापेन लिप्यते ।
ग्रामार्थं भर्तृपिण्डार्थं दीनानुग्रहकारणात् ।
वधबन्धपरिक्लेशान्कुर्वन्पापात्प्रमुच्यते ।
दुर्भिक्षे चात्मवृत्त्यर्थमेकायनगतस्तथा ।
अकार्यं वाप्यभक्ष्यं वा कृत्वा पापैर्न लिप्यते ।
व्याधितो रोगमोक्षार्थमभक्ष्येण न लिप्यते ।
अनृतं धर्मयुक्तं च दाक्षिण्यात्स्त्रीषु भाषितम् ।
आत्मप्राणभयाद्युक्तं मोक्षार्थं चाप्यधार्मिकात् ।
विवाहकरणे चैव लौकिकेनानृतं ब्रुवन् ।
संस्तम्भनार्थं त्रस्तानामनृतेन न लिप्यते ।
विधिरेष गृहस्थानां प्रायेणैवोपदिश्यते ।
अवाच्यं वाप्यकार्यं वा देशकालवशेन तु ।
बुद्धिपूर्वं नरः कुर्वंस्तत्प्रयोजनमात्रया ।
किंचिद्वा लिप्यते पापैरथ वा न च लिप्यते ।
एवं देवि विजानीहि नास्ति तत्र विचारणा ।

परेषां व्यसनक्रिया (for the post. half). — T_1 om. line 2805. — (L. 2805) T_3 स्तंभाभिमानाच्च ; M_4 °भिमानश्च (for °मानाच्च). M_4 -तापनात् (for °नम्). — (L. 2806) D_{10} T G अशौचं पान(T_2 °प)सेवनं (for the post. half). — (L. 2807) D_{10} T G पाप- (for क्षुद्र-). $T_{2.3}$ -संपर्कं (for °र्कः). T_1 आवासः पापकर्मणां (for the post. half). — (L. 2808) $G_{1.3}$ कामं (for कार्यं). — (L. 2810) T_2 M_4 मनसा (for मानसाद्). D_{10} $T_{2.3}$ G M_4 लक्ष्यते (for व°). T_1 वरिष्ठमिति लक्षये (for the post. half). — After line 2810, D_{10} $T_{2.3}$ $G_{1.3.4}$ M_4 read line 2822, repeating it in its proper place, while G_2 reads line 2822. — (L. 2811) D_{10} T G पापाच्च (for पापं). — (L. 2812) D_{10} S त्रिविधं पातयेन्नरं (for the post. half). — T_1 om. lines 2813-2818. — (L. 2813) D_{10} T_3 G परापकारजननम् ; T_2 परतापकरं पापम् ; M_4 परोपघातजननम् (for the prior half). D_{10} $T_{2.3}$ G पापकं (for पापकं). — (L. 2814) D_{10} $T_{2.3}$ G त्रिविधं (for द्वि°). D_{10} T_3 G पापकं (for नरकं). — (L. 2815) D_{10} $T_{2.3}$ $G_{1.2.4}$ चापि ; G_3 नापि (for त्वपि). D_{10} T_3 G कर्मणा ; T_2 कर्मणां ; M_4 कारणं (for करणाद्). — (L. 2816) M_4 अपि (for इति). — (L. 2817) T_2 G स (for न). — (L. 2818) D_{10} $T_{2.3}$ G अवश्यं पापदेशेन (for the prior half). — (L. 2819) D_{10} कर्म (for कृत्वा). — After line 2819, T_3 ins. :

पापस्यावरणे वापि तद्दोषश्च महेश्वर ।

— D_{10} T $G_{1.3.4}$ om. line 2820. G_2 om. (hapl.) lines 2820–2823. — T_1 महेशः (for महेश्वरः). — (L. 2821) G_4 [ऽ]परो (for नरो). D_{10} $T_{2.3}$ $G_{1.2.4}$ च (for सन्). D_{10} $T_{2.3}$ $G_{1.3.4}$ स्वात्म- (for आत्म-). $M_{1.2}$ कारणात् (for रक्ष°). — (L. 2823) D_{10} T_1 $G_{1.3.4}$ प्रतिहन्यात् ; $T_{2.3}$ °हन्य (for °गत्य). T_1 यस्तु (for हिंस्यात्). — D_{10} $G_{2.4}$ om. (hapl.) lines 2824–2826. — (L. 2824) T_3 चोरादधिकसंत्रस्तास् ; $G_{1.3}$ चोरा अधिकसंत्रस्तास् (for the prior half). — For line 2824, T_1 subst. :

ये संत्रासकराश्चोरास्तथैवाटविकाश्च ये ।

— (L. 2825) $T_{2.3}$ $G_{1.3}$ यः प्रजघ्नन् ; M यः प्रति° (for तान्प्रति°). T_1 यस्तु ; $G_{1.3}$ हन्यात् (for हिंस्यात्). — After 2825, T_2 reads 2836 repeating it in its proper place. $T_{1.3}$ $G_{1.3}$ om. (hapl.) line 2826. — (L. 2828) M_4 घ्नंत (for कुर्वन्). — (L. 2829) M_4 दुर्भिक्षं (for °क्षे). — (L. 2830) $G_{1.3}$ अपि (for वापि). D_{10} $T_{1.3}$ G पापान् ; T_2 पापं (for पापैर्). — After line 2830, M_4 reads line 2836. D_{10} T G om. (hapl.) lines 2831–2835. — (L. 2831) M_4 बाधितो दोषमोक्षार्थे (for the prior half). — (L. 2833) M_3 नर्म- (for धर्म-). — (L. 2835) M_4 दृप्तानाम् (for त्रस्ता°). — (L. 2837) $T_{1.2}$ अकार्यं वाप्यवाच्यं वा (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उमा ।

भगवन्पानदोषांश्च पेयापेयत्वकारणम् ।
एतदिच्छाम्यहं श्रोतुं तन्मे वद महेश्वर ।

महेश्वरः ।

हन्त ते कथयिष्यामि पानोत्पत्तिं शुचिस्मिते ।
पुरा सर्वेऽभवन्मर्त्या बुद्धिमन्तो नयानुगाः ।
शुचयः सुभगाचाराः सर्वे सुमनसः प्रिये ।
एवंभूते तदा लोके प्रेष्यत्वं न परस्परम् ।
प्रेष्याभावान्मनुष्याणां कर्मारम्भो ननाश ह ।
उभयोर्लोकयोर्नाशं दृष्ट्वा कर्मक्षयात्प्रभुः ।
यज्ञकर्म कथं लोके वर्ततेति पितामहः ।
आज्ञापयत्सुरान्देवि मोहयस्वेति मानुषान् ।
तमसः सारमुद्धृत्य पानं बुद्धिप्रणाशनम् ।
न्यपातयन्मनुष्येषु पापदोषावहं प्रिये ।
तदाप्रभृति तत्पीत्वा मुहुर्मुहुर्मानुषा भुवि ।
कार्याकार्यमजानन्तो वाच्यावाच्यं गुणागुणम् ।
केचिद्धसन्ति तत्पीत्वा प्ररुदन्ति तथा परे ।
नृत्यन्ति मुदिताः केचिद्गायन्ति च शुभाशुभम् ।
कलहं कुर्वतेऽभीक्ष्णं प्रहरन्ति परस्परम् ।
केचिद्धावन्ति सहसा प्रस्खलन्ति पतन्ति च ।
अयुक्तं बहु भाषन्ते यत्रक्वचन शेरते ।
नग्ना विक्षिप्य गात्राणि नष्टसंज्ञा मृता इव ।
एवं बहुविधान्पापान्कुर्वन्ति हतचेतसः ।
ये पिबन्ति महामोहं पानं पापयुता नराः ।
धृतिं लज्जां च बुद्धिं च पानं पीतं प्रणाशयेत् ।
तस्मान्नराः संभवन्ति निर्लज्जा निरपत्रपाः ।
बुद्धिसत्त्वैः परिक्षीणास्तेजोहीना मलान्विताः ।
पीत्वा पीत्वा तृषायुक्ताः पानपाः संभवन्ति च ।
पानकामाः पानकथाः पानकालाभिकाङ्क्षिणः ।
पानार्थं कर्मवश्यास्ते संभवन्ति नराधमाः ।
पानकामास्तृषायोगाद्बुद्धिसत्त्वपरिक्षयात् ।
पानपानां प्रेष्यकराः पानपास्त्वभवन्भृशम् ।
तदाप्रभृति वै लोके नीचैः पानवशैर्नरैः ।
कारयन्ति च कर्माणि बुद्धिमन्तस्त्वपानपाः ।
कारुत्वमथ दासत्वं प्रेष्यतामेत्य पानपाः ।
सर्वकर्मकराश्चासन्पशुवद्रज्जुबन्धिताः ।
पानपास्तु मदान्धत्वात्तदा बुद्धिप्रणाशनात् ।
कार्याकार्यस्य चाज्ञानाद्यथेष्टकरणात्स्वयम् ।
विदुषामविधेयत्वात्पापमेवाभिपद्यते ।
परिभूतो भवेल्लोके मद्यपो मित्रभेदकः ।
सर्वकालमशुद्धश्च सर्वभक्षस्तथाभवत् ।
विशिष्टैर्ज्ञातिभिर्द्वेष्यः सततं कलिभावनः ।

the prior half). T1 om. from the post. half of line 2838 up to the prior half of line 2839. — (L. 2839) T2 आलिप्यते (for वा लि°). T1 न स पापेन लिप्यते; M4 अथ वाचा न लिप्यते (for the post. half). T1 om. from the post half of line 2841 up to the prior half of line 2842. — (L. 2843) T2 अहं (for हन्त). — (L. 2845) D10 T1. 3 G सुशुभाचाराः; T2 च शुभा° (for सुभगा°). D10 T2. 3 G1-3 चोन्मनसः (for सुम°). — (L. 2846) D10 T G प्रेष्यकृत् (for °त्वं). — (L. 2848) G4 नृपः (for प्रभुः). — (L. 2849) T2 तथा (for कथं). T3 एवंभूते तदा लोके (for the prior half). — T1 om. line 2850. — (L 2851) T2 प्राण- (for पानं). — (L. 2852) T1 सर्व- (for पाप-). — (L. 2853) D10 T2. 3 G2. 4 तत्पानात्; T1 पानेन; G1. 3 तत्पानं (for तत्पीत्वा). D10 T2. 3 G मानवा (for मानुषा). — (L. 2855) M4 वदंति (for हसन्ति). D10 T G प्रनृत्यंति (for प्ररु°). M4 प्रिये (for परे). — (L. 2856) T1 om. from the post. half up to the prior half of line 2857. D10 T3 G1. 3. 4 M4 शुभाशुभान् (for °शुभम्). — (L. 2857) D10 T2 G कलिं त (for कलहं). T3 कलिं कुर्वंति तेऽभीक्ष्णं (for the prior half). — (L. 2858) D10 T2. 3 G M1-3 क्वचिद् (for के°). T1 तथापरे (for पतन्ति च). — (L. 2859) D10 T2. 3 G शोभने (for शेरते).

— (L. 2860) D10 T G नष्टज्ञाना इवा(G2 उपा)सते (for the post. half). — (L. 2861) D10 T G भावान् (for पापान्). D10 भ्रांत-; T1 हत- (for हत-) T2. 3 G कुर्वंति भ्रांत(T2 °ति)चेतनाः (for the post. half). — (L. 2865) T1 -सत्त्व- (for -सत्त्वैः). T2 मदान्विताः (for मला°). — (L 2867) T2 -पराः (for -कथाः). G3. 4 पानकालाभिलाषिणः; M4 °कामाभिकांक्षिताः (for the post. half). — T1 om. (hapl.) lines 2868-2869. — (L. 2869) M1. 4 केचित्सत्त्व- (for बुद्धिसत्त्व-). — (L. 2870) D10 T G पानदानां (for °पानां). D10 T G पानपाः सहसाभवन् (for the post. half). — (L. 2871) D10 T G दीनैः (for नीचैः). T1 पापरतैर्; T2 पापवशैर् (for पान°). — (L. 2872) D10 T G तु (G4 च) पानपाः (G1. 3 °दाः) (for त्वपानपाः). — D10 om. (hapl.) line 2873. — (L. 2874) M1 सर्वकाम- (for °कर्म-). T3 -पीडिताः; G1. 3 -बंधिनः (for -बन्धिताः). — T1 om. lines 2875-2880. — (L. 2875) D10 G2. 4 सुधां दत्त्वा; T2 G1. 3 सुरां पीत्वा; T3 सुरां दत्त्वा (for मदान्धत्वात्). — (L. 2876) M4 यथेष्टं कारिणः स्वयं (for the post. half). — (L. 2877) G1 अपि हेयत्वात्; G4 अभिधेयत्वात् (for अविधे°). — (L. 2879) T2 अबुद्धिश्च; T3 G2. 4 अशुद्धिश्च (for °शुद्धश्). T2 G1. 3 भवेत् (for [अ]भवत्). — (L. 2880) D10 T2. 3 G विनष्टो ज्ञाति(D10 जाति-; G2. 3 ज्ञान)विद्वेष्यः

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कटुकं परुषं घोरं वाक्यं वदति सर्वतः ।
गुरूनतिवदेन्मत्तः परदारान्प्रधर्षयेत् ।
संविदं कुरुते शौण्डैर्न शृणोति हितं क्वचित् ।
एवं बहुविधा दोषाः पानपे सन्ति शोभने ।
केवलं नरकं यान्ति नास्ति तत्र विचारणा ।
तस्मात्तद्वर्जितं सद्भिः पानमात्महितैषिभिः ।
यदि पानं न वर्जेरन्सन्तश्चारित्रकारणात् ।
भवेदेवं जगत्सर्वं निर्मर्यादं च निष्क्रियम् ।
तस्माद्बुद्धेर्हि रक्षार्थं सद्भिः पानं विवर्जितम् ।
इति ते दुष्कृतं सर्वं त्रिविधं कथितं प्रिये ।

Colophon.

महेश्वरः ।

विधानं सुकृतस्यापि भूयः शृणु शुचिस्मिते ।
प्रोच्यते तत्त्रिधा देवि सुकृत च समासतः ।
यदौपरमिकं चैव सुकृतं निरुपद्रवम् ।
तथैव सोपकरणं तावता सुकृतं विदुः ।
निवृत्तिः पापकर्मभ्यस्तदौपरमिकं प्रिये ।
मनोवाक्कायजा दोषाः शृणु मे वर्जनाच्छुभम् ।
त्रैविध्यदोषोपरमे यस्तु दोषव्यपेक्षया ।
स तु प्राप्नोति सकलं सर्वदुष्कृतवर्जनात् ।
व्रतवद्वर्जयेद्दोषान्युगपत्पृथगेव वा ।
तथा धर्ममवाप्नोति दोषत्यागो हि दुष्करः ।
दोषसाकल्यसंत्यागान्मुनिर्भवति मानवः ।
सौकर्यं परधर्मस्य कार्यारम्भाद्वतेऽपि च ।
आत्मना स्थापनामात्राल्लभ्यते सुकृतं परम् ।
अहो नृशंसाः पच्यन्ते मानुषाः स्वल्पबुद्धयः ।
ये तादृशं न बुध्यन्ते आत्माधीनं च निर्व्ययम् ।
दुष्कृतत्यागमात्रेण पदमूर्ध्वं हि लभ्यते ।
पापभीरुत्वमात्रेण दोषाणां परिवर्जनात् ।
सुशोभनं भवेद्देवि किमु धर्मव्यपेक्षया ।
इत्यौपरमिकं देवि सुकृतं कथितं तव ।
श्रुताच्च वृद्धसंयोगादिन्द्रियाणां च निग्रहात् ।
संतोषाच्च धृतेश्चैव शक्यते दोषवर्जनम् ।
तदेव यम इत्याहुर्दोषसंयमनं प्रिये ।
यमधर्मेण धर्मोऽस्ति नान्यः शुभतरः शुभे ।
यमधर्मेण यतयः प्राप्नुवन्त्युत्तमां गतिम् ।
ईश्वराणां प्रभवतां दरिद्राणां च वै नृणाम् ।
सफलो दोषसंत्यागो दानादपि शुभादपि ।
तपो दानं महादेवि दोषमल्पं विनिर्दहेत् ।

(for the prior half). D_{10} $T_{2.3}$ G -भावगः (for °नः). M_4 सर्वं तत्कलहाग्रहः (for the post. half). —(L. 2881) D_{10} $T_{2.3}$ G M_{1-3} परुषं कटुकं घोरं (for the prior half). D_{10} $T_{2.3}$ G सर्वशः; T_1 पानपः (for सर्वतः). —(L. 2882) T_1 मर्त्यैः; T_2 मुक्तः (for मत्तः). —(L. 2883) T_1 धूर्तैर् (for शौण्डैर्). —(L. 2887) D_{10} T_2 $G_{2.4}$ न वर्तेरन्; T_1 सत्यजे° (for न वर्जे°). $G_{1.3}$ यदि पापान्न वर्तेरन् (for the prior half). —(L. 2888) D_{10} T_3 G एतज्; $T_{1.2}$ एव (for एवं). D_{10} T_2 $G_{2.4}$ अमर्यादं (for निर्म°). — T_1 om. lines 2889–2890. —(L. 2889) D_{10} वृद्धैर्; T_3 बुधैर् (for बुद्धेर्). —(L. 2890) G_4 देवि (for सर्वं). T_2 $G_{1.3}$ कथितं त्रिविधं प्रिये; G_4 त्रिविधं दुष्कृतं प्रिये (for the post. half). — Colophon. — *Sub-parvan* : M_{2-4} दानधर्म. — *Adhy. name* : D_{10} $T_{2.3}$ G_2 M_1 उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} T_2 $G_{2.4}$ 214; T_1 207; T_3 213; $G_{1.3}$ M_1 208; $M_{2.3}$ 209; M_4 206. — T_1 महेशः (for °श्वरः). —(L. 2892) $G_{1.3}$ त्रिविधं (for तत्त्रिधा). T_2 ते (for च). — T_1 om. lines 2893–2895. —(L. 2893) $G_{1.3}$ M_2 (*inf. lin.*) औपरमितं (for °कं). —(L. 2894) M_4 तपसा (for तावता). —(L. 2895) M_2 (*inf. lin.*) औपरमितं (for °कं). —(L. 2896) T_2 G_{1-3} $M_{1.4}$ मनोवाक्कायजान्दोषान् (for the prior half). — For line 2896, T_1 subst. :

वाङ्मनःकायजं चेति सुकृतं त्रिविधं स्मृतम् ।

—(L. 2897) T_1 यश्च; M_4 नित्यं (for यस्तु). —(L. 2898) T_1 सुकृतं (for सकलं). $T_{1.2}$ $G_{1.3.4}$ सर्वं (for सर्व-). M_3 -वर्जनं (for -वर्जनात्). —(L. 2900) T_1 स तु (for तथा). T_2 तथा कर्माण्यवाप्नोति (for the prior half). —(L. 2901) G_2 मत्तो (for मुनिर्). — T_1 om. line 2902. —(L. 2902) D_{10} सौकर्यं (for °र्यं). D_{10} $T_{2.3}$ G पश्य (for पर-). —(L. 2903) T_1 आत्मवत्; M_{1-3} °नः (for °ना). D_{10} T_3 G_2 आत्मोपलब्धोपरमाल्ल; T_2 आत्मोपसर्पोपरमाल्ल: $G_{1.3.4}$ आत्मा च लब्धोपरमो (for the prior half). D_{10} $T_{2.3}$ $G_{2.4}$ लभेत; T_1 $G_{1.3}$ लभते (for लभ्यते). T_1 फलं; M_4 पदं (for परम्). —(L. 2904) $G_{1.3}$ त्वल्प- (for स्वल्प-). —(L. 2905) T G_4 एतादृशं (for ये ता°). M_4 कुर्वन्ति (for बुध्यन्ते). D_{10} T_3 G निर्व्यथाः; T_1 निर्दयाः; T_2 निवृत्ताः (for निर्व्ययम्). — T_1 om. lines 2906–2908. —(L. 2908) D_{10} T G सुशोभनो (for °भनं). T_2 $G_{1.3}$ ऋजु- (for किमु). —(L. 2909) $G_{1.3.4}$ कथितं सुकृतं तव (for the post. half). —(L. 2910) T_2 श्रुत्वा (for श्रुताच्). —(L. 2911) T_1 पश्यते (for शक्यते). —(L. 2912) D_{10} $T_{2.3}$ G धर्मम्; M यमस्य (for यम). — T_1 om. (hapl.) line 2913. —(L. 2913) $G_{1.3}$ शुभकरः (for °तरः). D_{10} $T_{2.3}$ G प्रिये (for शुभे). —(L. 2915) T_1 भवेन्नृणां; G_4 नृणां प्रिये (for च वै

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सुकृतं यामिकं प्रोक्तं पथ्यं निरुपसाधनम् ।
सुखाभिसंधिर्लोकानां सत्यं शौचमथार्जवम् ।
व्रतोपवासः प्रीतिश्च ब्रह्मचर्यं दमः शमः ।
एवमादि शुभं कर्म सुकृतं नियमाश्रितम् ।
शृणु तेषां विशेषांश्च कीर्तयिष्यामि भामिनि ।
सत्यं स्वर्गस्य सोपानं पारावारस्य नौरिव ।
नास्ति सत्यात्परं दानं नास्ति सत्यात्परं तपः ।
यथा श्रुतं यथा दृष्टमात्मना यद्यथा कृतम् ।
तथा तस्याविकारेण वचनं सत्यलक्षणम् ।
यच्छलेनाभिसंयुक्तं सत्यरूपं मृषैव तत् ।
नित्यमेव प्रवक्तव्यं पारावर्यं विजानता ।
दीर्घायुश्च भवेत्सत्यात्कुलसंतानपालकः ।
लोकसंस्थितिपालश्च भवेत्सत्येन मानवः ।

उमा ।

कथं संधारयन्मर्त्यो व्रतं शुभमवाप्नुयात् ।

महेश्वरः ।

पूर्वमुक्तं तु यत्पापं मनोवाक्कायकर्मभिः ।
व्रतवत्तस्य संत्यागस्तदौपरमिकं व्रतम् ।
तेन धर्ममवाप्नोति व्रतवत्परिपालयन् ।
मङ्गलं शुभकर्माणि व्रतेनैव समाचरेत् ।
नरो धर्ममवाप्नोति शुभसंजोषणं व्रतम् ।
यद्यदात्मप्रियं नित्यं मनोवाक्कायकर्मभिः ।
व्रतवत्तस्य संत्यागस्तपोव्रतमिति स्थितम् ।
त्याज्यं वा यदि वा जोष्यमव्रतेन वृथा चरन् ।
तथा फलं न लभते तस्माद्धर्मं व्रताच्चरेत् ।
शुद्धकायो नरो भूत्वा स्नात्वा तीर्थे यथाविधि ।
पञ्च भूतानि चन्द्रार्कौ संध्ये धर्मं यमं पितॄन् ।
आत्मनैनं तथात्मानं निवेद्य व्रतवच्चरेत् ।
व्रतमा मरणाद्वापि कालच्छेदेन वा चरेत् ।
शाकादिषु व्रतं कुर्यात्तथा पुष्पफलादिषु ।
ब्रह्मचर्यं व्रतं कुर्यादुपवासं तथा व्रतम् ।
एवमन्येषु बहुषु व्रतं कार्यं हितैषिणा ।
व्रतभङ्गो यथा न स्याद्रक्षितव्यं तथा बुधैः ।
व्रतभङ्गो महत्पापमिति विद्धि शुभेक्षणे ।
औषधार्थं यदज्ञानाद्गुरूणां वचनादपि ।
अनुग्रहार्थं बन्धूनां व्रतभङ्गो न दुष्यते ।
व्रतापवर्गकालेषु देवब्राह्मणपूजनम् ।
नरेण तु यथाशक्ति कार्यं सिद्धिं तथाप्नुयात् ।

उमा ।

कथं शौचविधिस्तत्र तन्मे शंसितुमर्हसि ।

महेश्वरः ।

बाह्यमाभ्यन्तरं चेति द्विविधं शौचमिष्यते ।
मानसं सुकृतं यत्तच्छौचमाभ्यन्तरं स्मृतम् ।
सदाहारविशुद्धिश्च कायप्रक्षालनं च यत् ।
बाह्यं शौचं भवेदेतत्तथैवाचमनादि च ।
मृच्चैव शुद्धदेशस्था गोशकृन्मूत्रमेव च ।
द्रव्याणि गन्धयुक्तानि यानि पुष्टिकराणि च ।
एतैः संमार्जयेत्कायमम्भसा च पुनः पुनः ।
अक्षोभ्यं यत्प्रकीर्णं च नित्यस्रोतश्च यज्जलम् ।
प्रायशस्तादृशे मज्जेदन्यथा चापि वर्जयेत् ।

नृणाम्). — (L. 2917) $G_{1.3}$ M महदपि (for महादेवि). D_{10} $T_{2.3}$ G M_4 हि निर्हरेत्; M_{1-3} हि निर्दहेत् (for विनिर्द°). T_1 दोषं सर्वं विनिर्हरेत् (for the post. half). — (L. 2918) D_{10} $T_{2.3}$ G चोक्तं (for प्रोक्तं). T_1 om. from the post. half up to the prior half of line 2919. D_{10} $T_{2.3}$ G वक्ष्ये (for पथ्यं). — (L. 2919) T_1 तथा; M_4 उत (for अथ). — (L. 2920) T_1 M_{1-3} व्रतोपवासं (for °वासः). — (L. 2922) T_1 शोभने (for भामिनि). — (L. 2923) M_4 संयानं (for सोपानं). — T_1 om. lines 2925–2951. — (L. 2926) D_{10} $T_{2.3}$ G विकारेण (for [अ]वि°). — (L. 2927) D_{10} $T_{2.3}$ G M_2 शीलेन (for छ°). — (L. 2928) D_{10} $T_{2.3}$ G सत्यम् (for नित्यम्). — (L. 2929) M_4 -कारकः (for -पालकः). — D_{10} T_3 G M_1 om. (hapl.) lines 2933–2937. T_2 om. lines 2934–2935. — (L. 2936) T_2 तेन (for नरो). T_2 -संजोषणाद् (for °षणं). — (L. 2938) D_{10} $T_{2.3}$ G $M_{3.4}$ स्मृतं (for स्थितम्). — (L. 2940) D_{10} $T_{2.3}$ G वृथा (for व्रताच्). — (L. 2942) G_3 समौ (for यमं). — (L. 2943) D_{10} $T_{2.3}$ G [ए]व (for [ए]वं). — (L. 2944) T_2 हरणाद् (for मर°). D_{10} $T_{2.3}$ $G_{1.2.4}$ [आ]हरेत् (for चरेत्). M_4 om. (hapl) from the post. half of line 2945 up to the prior half of line 2946. — (L. 2946) D_{10} $T_{2.3}$ G उपवासव्रतं G_{2-4} M_1 ब्रह्मचर्य- (for °चर्यं). D_{10} $T_{2.3}$ G उपवासव्रतं तथा (for the post. half). — (L. 2951) T_2 भूतानां (for बन्धूनां). — (L. 2952) D_{10} T_2 G M_1 -काले तु; T_3 -कालेपि (for -कालेषु). — (L. 2953) D_{10} $T_{2.3}$ G यथा विद्धि (for यथाशक्ति). T_3 कार्य- (for कार्यं). D_{10} T_2 G कार्यसिद्धि यथा(D_{10} °द्धिमवा)प्नुयात् (for the post. half). — T_1 महेशः; G_2 शिवः (for महेश्वरः). — (L. 2955) T_3 M_4 अभ्यंतरं (for आ°). G_3 [इ]व (for [इ]ति). — (L. 2956) T_2 मनसा (for मानसं). — (L. 2957) T_1 -प्रतपनं (for -प्रक्षालनं). — (L. 2958) D_{10} $T_{2.3}$ G बाह्य- (for बाह्यं). T_1 [आ]चमनादिकं; T_2 $G_{1.3}$ °दिषु; G_2 °दि वा (for °नादि च). — (L. 2959) $G_{1.3}$ शुभ- (for शुद्ध-). — (L. 2963) D_{10} T_3 G वि- (for [अ]-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

त्रिराचमनकं श्रेष्ठं निष्फेनैर्निर्मलैर्जलैः ।
तथा विण्मूत्रयोः शुद्धिरद्भिर्बहुमृदा भवेत् ।
तदैव जलसंशुद्धिर्यत्संशुद्धं तु संस्पृशेत् ।
शकृता भूमिशुद्धिः स्याल्लोहानां भस्मना स्मृता ।
तक्षणं घर्षणं चैव दारवाणां विशोधनम् ।
दहनं मृन्मयानां च मर्त्यानां कृच्छ्रधारणम् ।
शेषाणां देवि सर्वेषामातपेन जलेन च ।
ब्राह्मणानां च वाक्येन सदा संशोधनं भवेत् ।
अदुष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ।
एवमापदि संशुद्धिरेवं शौचं विधीयते ।

उमा ।

आहारशुद्धिस्तु कथं तन्मे वद महाप्रभो ।

महेश्वरः ।

अमांसमद्यमक्लेद्यमपर्युषितमेव च ।
अतिकट्वम्ललवणैर्हीनं च शुभगन्धि च ।
कृमिकीटमलैर्हीनं संभृतं शुद्धभाजने ।
एवंविधं सदाहारं देवब्राह्मणसत्कृतम् ।
शुद्धमित्येव विज्ञेयमन्यथा त्वशुभं भवेत् ।
ग्राम्यादारण्यकैः सिद्धं शुद्धमित्यवधारय ।
अतिमात्रगृहीतात्तु अल्पदत्तं भवेच्छुचि ।
यज्ञशेषं हविःशेषं पितृशेषं च निर्मलम् ।
इति ते कथितं देवि भूयः श्रोतुं किमिच्छसि ।

Colophon.

उमा ।

भक्षयन्त्यपरे मांसं वर्जयन्त्यपरे भुवि ।
तन्मे वद महादेव भक्ष्याभक्ष्यस्य कारणम् ।

महेश्वरः ।

मांसस्य भक्षणे दोषो यश्चास्याभक्षणे गुणः ।
तदहं कीर्तयिष्यामि तन्निबोध यथातथम् ।
इष्टं दत्तमधीतं च क्रतवश्च सदक्षिणाः ।
अमांसभक्षणस्यैते कलां नार्हन्ति षोडशीम् ।
आत्मार्थं यः परप्राणान्हिंस्यात्स्वादुफलेप्सया ।
व्यालगृध्रसृगालैश्च राक्षसैश्च समस्तु सः ।
यो वृथानित्यमांसाशी स पुमानधमो भवेत् ।
ततः कष्टतरं नास्ति स्वयमाहृत्य भक्षणात् ।
स्वमांसं परमांसेन यो वर्धयितुमिच्छति ।
उद्विग्नवासं लभते यत्र यत्रोपजायते ।
संछेदनं स्वमांसस्य यथा संजनयेद्रुजम् ।
तथैव परमांसेऽपि वेदितव्यं विजानता ।
यस्तु सर्वाणि मांसानि यावज्जीवं न भक्षयेत् ।
स स्वर्गे विपुलं स्थानं लभते नात्र संशयः ।
यस्तु वर्षशतं पूर्णं तप्यते परमं तपः ।
यश्चापि वर्जयेन्मांसं सममेतन्न वा समम् ।
न हि प्राणैः प्रियतमं लोके किंचन विद्यते ।
तस्मात्प्राणिदया कार्या यथात्मनि तथा परे ।
सर्वे यज्ञा न तत्कुर्युः सर्वे वेदाश्च भामिनि ।

पि). — (L. 2964) D_{10} T G त्रिस्त्रि(G_4 °भि)राचमनं श्रेष्ठं (for the prior half). T_1 निर्णिक्तैर् ; $G_{1.3}$ नियतं (for निष्फेनैर्). M_4 om. (hapl.) from the post. half of line 2965 up to the prior half of line 2966. — (L. 2966) D_{10} $T_{2.3}$ G तथैव ; T_1 तदेव (for तदैव). T_1 M_4 यथा शुद्धं ; $G_{1.3}$ यथा शुद्धि ; M_{1-3} यदा शुद्धं (for यत्संशुद्धं). — (L. 2967) D_{10} $T_{2.3}$ $G_{1.3.4}$ स्मृतं ; T_1 भवेत् ; G_2 कृतं (for स्मृता). — (L. 2968) T_3 कर्षणं (for घ°). — (L. 2969) M_4 शुद्धिकारणं (for कृच्छ्रधा°). — (L. 2974) D_{10} T G देवदेव (T_1 तन्मे वद) महेश्वर (for the post. half). — T_1 महेशः (for °श्वरः). — (L. 2976) D_{10} T G -लवण- (for °णैर्). M_4 अकटुक्षारलवणैर् (for the prior half). — (L. 2977) D_{10} T G -केश- (for -कीट-). T_3 -दर्शनं (for -भाजनम्). D_{10} T_2 G संवृ($G_{1.3}$ °हृ- ; G_4 °भृ)तं शुद्धदर्शनं ; T_1 संभृतं शुचि भोजनं (for the post. half). — (L. 2978) D_{10} $T_{2.3}$ M सदाहार्यं (for सदाहारं). T_1 G देवब्राह्मणसात्कृतं (for the post. half). — (L. 2979) T_3 श्रेष्ठम् (for शुद्धम्). D_{10} $T_{1.3}$ G तज् (for वि-). T_2 शुद्धिश्चत्रमितीत्येवम् (for the prior half). D_{10} T G अन्यथा मन्यतेऽशुभं (for the post. half). — (L. 2980) G_1 शुद्धं (for सिद्धं). D_{10} T G M_4 श्रेष्ठम् (for शुद्धम्). — T_1 om. line 2981. — (L. 2981) M_4 -गृहीतं (for °तात्). M_4 यच्च जग्धं भवेच्छुचिः (for the post. half). — G_2 om. line 2983. — (L. 2983) $T_{1.3}$ किं भूयः (T_3 भूयः किं) श्रोतुमिच्छसि (for the post. half). — Colophon. — *Adhy. name* : D_{10} $T_{2.3}$ M उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} T_3 $G_{2.4}$ 215 ; T_1 208 ; T_2 214 ; $G_{1.3}$ M_1 209 ; $M_{2.3}$ 210 ; M_4 207. — (L. 2984) D_{10} $T_{2.3}$ G विभो ; T_1 [ऽ]पि च (for भुवि). — (L. 2985) D_{10} T_3 G भक्ष्याभक्ष्यविनिर्णयं ; T_2 M °स्यकारणं (M_4 °णात्) (for the post. half). — T_1 महेशः (for °श्वरः). — (L. 2987) T_4 तदहं संप्रवक्ष्यामि (for the prior half). G_1 यथातथा (for यथातथम्). — (L. 2988) T_1 [आ]प्तदक्षिणाः (for सद°). — (L. 2989) D_{10} T_3 G [ए]व (for [ए]ते). — (L. 2990) T_1 -परीप्सया (for -फले°). — (L. 2991) T_1 स्मृतः ; M_4 ततः (for तु सः). — (L. 2992) M_4 भूतो (for वृथा-). — (L. 2995) T_1 उद्विग्नतां स लभते (for the prior half). — (L. 2996) T_1 संखादनं ; T_3 यच्छेदनं ; M_4 संछेदनात् (for °दनं). D_{10} $T_{2.3}$ G रुजां (for रुजम्).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

यन्मांसरसमास्वाद्य पुनर्मांसानि वर्जयेत् ।
धर्म्यं यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत् ।
इत्येवं मुनयः प्राहुर्मांसस्याभक्षणे गुणान् ।
एवं बहुगुणं देवि नृणां मांसविवर्जनम् ।
न शक्नुयाद्यदा जीवंस्त्यक्तुं मांसं कथंचन ।
त्रिपुण्यमासमात्रं वा वर्जनीयं विशेषतः ।
न शक्नुयादपि तथा कौमुदीमासमेव च ।
जन्मनक्षत्रतिथिषु सदा पर्वसु रात्रिषु ।
वर्जनीयं तथा मांसं परत्र हितमिच्छता ।
अशक्तः कारणान्मर्त्यो भोक्तुमिच्छेद्विधिं शृणु ।
अनेन विधिना खादन्कल्मषेण न लिप्यते ।
सूनायां च गतप्राणं क्रीत्वा न्यायेन भामिनि ।
ब्राह्मणातिथिपूजार्थं भोक्तव्यं हितमिच्छता ।
भैषज्यकारणाद्व्याधौ खादन्पापैर्न लिप्यते ।
पितृशेषं तथैवाश्नन्मांसं नाशुभमृच्छति ।

उमा ।

गुरुपूजा कथं देव क्रियते धर्मकाङ्क्षिभिः ।

महेश्वरः ।

गुरुपूजां प्रवक्ष्यामि यथावत्तव शोभने ।
कृतज्ञानां परो धर्म इति वेदानुशासनम् ।
तस्मात्स्वगुरवः पूज्यास्ते हि पूर्वोपकारिणः ।
गुरूणां च गरीयांसस्त्रयो लोकेषु पूजिताः ।
उपाध्यायः पिता माता संपूज्यास्ते विशेषतः ।
ये पितृभ्रातरो ज्येष्ठा ये च तस्यानुजास्तथा ।
पितुः पिता च सर्वे ते पूजनीया यथा पिता ।
मातुर्या भगिनी ज्येष्ठा मातुर्या च यवीयसी ।
मातामही च धात्री च सर्वास्ता मातरः स्मृताः ।
उपाध्यायस्य यः पुत्रो यश्च तस्य भवेद्गुरुः ।
ऋत्विग्गुरुः पिता चेति गुरवः परिकीर्तिताः ।
ज्येष्ठो भ्राता नरेन्द्रश्च मातुलः श्वशुरस्तथा ।
भयत्राता च भर्ता च गुरवस्ते प्रकीर्तिताः ।
इत्येष कथितः स्वर्ग्यो गुरूणां सर्वसंग्रहः ।
अनुवृत्तिं च पूजां च तेषामपि निबोध मे ।
अवध्यौ मातृपितरौ उपाध्यायस्तथैव च ।
कथंचिन्नावमन्तव्या नरेण हितमिच्छता ।
येन प्रीणाति च पिता तेन प्रीतः प्रजापतिः ।
येन प्रीणाति चेन्माता प्रीताः स्युर्देवमातरः ।
येन प्रीणात्युपाध्यायो ब्रह्मा तेनाभिपूजितः ।
अप्रीतेषु पुनस्तेषु नरो नरकमेति हि ।
गुरूणां वैरनिर्बन्धो न कर्तव्यः कथंचन ।
नरकं स गुरुप्रीत्या मनसापि न गच्छति ।
न ब्रूयाद्विप्रियं तेषामनिष्टे न प्रवर्तयेत् ।
विगृह्य न वदेत्तेषां समीपे स्पर्धया क्वचित् ।
यद्यदिच्छन्ति ते कर्तुमस्वतन्त्रस्तदाचरेत् ।

— (L. 3000) D_{10} $T_{2.3}$ $G_{1.3.4}$ यत्र् (for यस्). $M_{1.3}$ विपुलं (for परमं) — (L. 3001) D_{10} T_3 G यच्चापि; T_1 M_{1-3} यच्चात्र; M_4 यश्चात्र (for °पि). — (L. 3002) $M_{1.2}$ किंचिन्न (for किंचन). — (L. 3004) $M_{2.3}$ सर्व- (for सर्वे). D_{10} T_3 G_2 देवाश् (for वेदाश्). — (L. 3005) D_{10} T G M_4 यो (for यन्). D_{10} T_3 G_2 मांसं वि-; T_2 $G_{1.3.4}$ मांसं न (G_1 च) (for मांसानि). M_{1-3} पुनर्मांसस्य वर्जनं (for the post. half). — After line 3005, M_4 ins. :

सत्रेण यजते नित्यं सदा दानं प्रयच्छति ।
तदा तपस्वी भवति मधुमांसस्य वर्जनात् ।

— D_{10} T G om. line 3006. T_1 om. line 3009. — (L. 3009) D_{10} T_2 G [अ]तीव (for जीवंस्). — (L. 3010) D_{10} $T_{2.3}$ G पुण्यं तन्मांसमात्रं वा (for the prior half). — T_1 om. line 3011. — (L. 3012) T_1 $G_{1.3.4}$ तथा (for सदा). — (L. 3013) T_2 वर्जितव्यं (for वर्जनीयं). D_{10} T_3 G तदा; $T_{1.2}$ सदा (for तथा). — (L. 3015) D_{10} $T_{2.3}$ G अनेन खादन्विधिना (for the prior half). D_{10} T G कलुषेण (for कल्म°). — T_2 om. (hapl.) lines 3016–3018. — (L. 3016) T_1 वि- (for च). — For line 3016, M_4 subst. :

स्वधायां च गतप्राणान्क्रीडन्त्या येन भामिनि ।

— (L. 3018) D_{10} $T_{1.3}$ G $M_{2.3}$ -करणाद् (for -का°).
G_4 वाथ (for व्याधौ). — (L. 3019) D_{10} $G_{2.4}$
[अ]न्न (for [अ]श्नन्). — (L. 3020) M_4 कर्म- (for
धर्म-). D_{10} T G -चारिभिः (for -काङ्क्षिभिः). — T_1
महेशः (for °श्वरः). — (L. 3022) G_2 देवानु- (for
वेदानु-). — (L. 3023) M_4 ते (for स्व-). — (L.
3026) T_1 च स्युर; $T_{2.3}$ $G_{1.3.4}$ पितुर् (for पितृ-).
T_1 om. from the post. half up to the prior half
of line 3027. — (L. 3027) D_{10} $T_{1.2}$ G M_4 पिता
यथा (by transp.); T_3 पिता तथा. — (L. 3028) D_{10}
T G transp. मातुर and या च. — (L. 3031) D_{10} T
G M_4 संप्र- (for परि-). — (L. 3032) D_{10} G_4 ज्येष्ठ- (for
ज्येष्ठो). — T_1 om. lines 3034–3035. — (L. 3034)
D_{10} G_4 सार्धं; T_3 सार्थं (for स्वर्ग्यो). T_2 इत्येते कथिताः
सर्वे; $G_{1.3}$ गुरुरित्येव कथितो (for the prior half).
— (L. 3036) D_{10} $T_{2.3}$ G आराध्यौ मातापितरौ (for the
prior half). — (L. 3038) D_{10} T G M_4 पितरस् (for
च पिता). — (L. 3039) G_4 तेन (for प्रीताः). $G_{2.4}$
स्याद् (for स्युर्). — (L. 3040) T_1 तेन ब्रह्मा प्रजापतिः
(for the post. half). — T_1 om. line 3043. — (L.
3043) D_{10} G नरः स्वगुरुमप्रीत्या (for the prior half).
— (L. 3044) D_{10} T_1 $G_{2.4}$ अनिष्टं; $T_{2.3}$ $G_{1.3}$ अरिष्टं

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वेदानुशासनसमं गुरुशासनमिष्यते ।
कलहांश्च विवादांश्च गुरुभिः सह वर्जयेत् ।
कैतवं परिहासांश्च मन्युकामाश्रयाः कथाः ।
गुरूणां योऽनहंवादी करोत्याज्ञामतन्द्रितः ।
न तस्मात्सर्वमर्त्येषु विद्यते पुण्यकृत्तमः ।
असूयामपवादांश्च गुरूणां परिवर्जयेत् ।
तेषां प्रियहितान्वेषी भूत्वा परिचरेत्सदा ।
न तद्यज्ञफलं कुर्यात्तपो वाचरितं महत् ।
यत्कुर्यात्पुरुषस्येह गुरुपूजा सदा कृता ।
अनुवृत्तेर्विना धर्मो नास्ति सर्वाश्रमेष्वपि ।
तस्मात्समादृतः काले गुरुवृत्तिं समाचरेत् ।
स्वमर्थं स्वशरीरं च गुर्वर्थे संत्यजेद्बुधः ।
विवादं धनहेतोर्वा मोहाद्वा तैर्न रोचयेत् ।
ब्रह्मचर्यमहिंसा च दानानि विविधानि च ।
गुरुभिः प्रतिषिद्धस्य सर्वमेतदपार्थकम् ।
उपाध्यायं पितरं मातरं च
येऽभिद्रुह्युर्मनसा कर्मणा वा ।
तेषां पापं भ्रूणहत्याविशिष्टं
तेभ्यो नान्यः पापकृदस्ति लोके ।

उमा ।

उपवासविधिं तत्र तन्मे शंसितुमर्हसि ।

महेश्वरः ।

शरीरमलकार्श्यार्थमिन्द्रियोच्छोषणाय च ।
एकभुक्तोपवासैस्तु धारयन्ते व्रतं नराः ।
लभन्ते विपुलं धर्मं तथाहारपरिक्षयात् ।
बहूनामुपरोधं तु न कुर्यादात्मकारणात् ।
जीवोपघातं च तथा धान्यं संजीव्यमिष्यते ।
तस्मात्पुण्यं लभेन्मर्त्यः स्वयमाहारकर्शनात् ।
तद्गृहस्थैर्यथाशक्ति कर्तव्यमिति निश्चयः ।
उपवासार्दिते काय आपदर्थं पयो जलम् ।
भुञ्जन्व्रतघाती स्याद्ब्राह्मणाननुमान्य च ।

उमा ।

ब्रह्मचर्यं कथं देव रक्षितव्यं विजानता ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि शृणु देवि समाहिता ।
ब्रह्मचर्यं परं शौचं ब्रह्मचर्यं परं तपः ।
केवलं ब्रह्मचर्येण प्राप्यते परमं पदम् ।
संकल्पाद्दर्शनाच्चैव तद्युक्तवचनादपि ।
संस्पर्शादथ संयोगात्पञ्चधा रक्षितं परम् ।
व्रतवद्धारितं चैव ब्रह्मचर्यमकल्मषम् ।
नित्यसंरक्षणं तस्य नैष्ठिकानां विधीयते ।
तदिष्यते गृहस्थानां कालमुद्दिश्य कारणम् ।
जन्मनक्षत्रयोगेषु पुण्यवासेषु पर्वसु ।
देवताधर्मकार्येषु ब्रह्मचर्यव्रतं चरेत् ।
ब्रह्मचर्यव्रतफलं लभेद्दारव्रती सदा ।
शौचमायुस्तथारोग्यं लभ्यते ब्रह्मचारिभिः ।

उमा ।

तीर्थचर्या कथं देव क्रियते धर्मकाङ्क्षिभिः ।
कानि तीर्थानि लोकेश तन्मे शंसितुमर्हसि ।

महेश्वरः ।

हन्त ते कथयिष्यामि तीर्थस्नानविधिं प्रिये ।
पावनार्थं च शौचार्थं ब्रह्मणा निर्मिताः पुरा ।
यास्तु लोके महानद्यस्ताः सर्वास्तीर्थसंज्ञिताः ।
तासां प्राक्स्रोतसः श्रेष्ठाः संगमश्च परस्परम् ।

(for अनिष्टे). — T_1 om. line 3046. — (L. 3046) T_2 स्वयं तदपि चाचरेत् (for the post. half). — (L. 3047) G_4 वेदानुशासनमिमं (for the prior half). — T_1 om. line 3049. T_3 reads lines 3049–3052 twice. — (L. 3049) D_{10} G_2 तथा (for कथाः). T_3 (both times) G_4 मन्युकामाश्रयांस्तथा (for the post. half). — (L. 3052) D_{10} $T_{2,3}$ (both times) G अपवादं ; T_1 °राधं (for °वादांश्). T_3 (both times) गुरुभिः सह वर्जयेत् (for the post. half). — T_1 om. line 3055. — (L. 3057) D_{10} T_3 $G_{2,4}$ क्षमाव्रतः ; T_1 क्षमायुतः ; $G_{1,3}$ क्षमावृतः (for समादृतः). — (L. 3058) $M_{1,4}$ समर्थं (for स्व°). M च (for स्व-). $G_{1,3}$ गुर्वर्थे संप्रवर्तयेत् (for the post. half). — (L. 3059) T_2 तैर्विवादं (for मोहाद्वा तैर्). — (L. 3061) T_1 निरर्थकं (for अपा°). — (L. 3065) T_1 ततो (for तेभ्यो). — T_1 महेशः (for °श्वरः). — (L. 3067) D_{10} T_3 G -शांत्यर्थम् ; T_1 -हान्य° (for -कार्श्या°). T_2 शरीरं लाभशांत्यर्थम् (for the prior half). — (L. 3068) T_1 G_4 धारयंति (for °यन्ते). — (L. 3071) M_4 जीवघातिनिवृत्त्यर्थं (for the prior half). D_{10} $T_{1,3}$ G सजीवं धान्यमिष्य(T_1 °मुच्य)ते ; T_2 स जीवं धारयिष्यते (for the post. half). — (L. 3072) G_2 -दर्शनात् (for -क°). — (L. 3074) G_2 काल (for काय). T_1 उपवासार्दितः काल (for the prior half). — (L. 3075) D_{10} $T_{2,3}$ G प्रातिघाती (for व्रत°). — T_1 महेशः (for °श्वरः). — T_1 om. (hapl.) line 3077. — (L. 3077) G_4 सर्व (for देवि). — (L. 3081) T_1 G_4 अपि (for अथ). D_{10} $T_{2,3}$ G व्रतं ; T_1 ह तत् (for परम्). — (L. 3083) D_{10} $T_{2,3}$ G नित्यं संरक्षितं तस्य (for the prior half). — (L. 3085) D_{10} G_2 -चारेषु ; M_2 (*inf. lin.*) -मासेषु (for -वा°). — (L. 3089) D_{10} $T_{2,3}$ व्रतं (for वर्थं). G_1 कर्म- (for धर्म-). T_1 वर्तते ब्रह्मचारिभिः (for the post. half.). — (L. 3090) D_{10} $T_{2,3}$ G M_2 लोकेषु (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तासां सागरसंयोगो वरिष्ठश्चेति विद्यते ।
तासामुभयतः कूलं यत्र तत्र महर्षिभिः ।
देवैर्वा सेवितं देवि तत्तीर्थं परमं स्मृतम् ।
समुद्रश्च महातीर्थं पावनं परमं शुभम् ।
तस्य कूलगतास्तीर्था महद्भिश्च समाप्लुताः ।
स्रोतसां पर्वतानां च जोषितानां महर्षिभिः ।
अपि कूपतटाकं वा मुनिभिः सेवितं प्रिये ।
तत्तु तीर्थमिति ज्ञेयं प्रभावात्तु तपस्विनाम् ।
तदाप्रभृति तीर्थत्वं लेभे लोकहिताय वै ।
एवं तीर्थोद्भवं विद्धि तस्य स्नानविधिं शृणु ।
तन्मना व्रतभूयिष्ठो गत्वा तीर्थाभिकाङ्क्षया ।
उपवासत्रयं कुर्यादेकं वा नियमान्वितः ।
पुण्यमासयुते काले पौर्णमास्यां यथाविधि ।
बहिरेव शुचिर्भूत्वा तत्तीर्थं तन्मनाविशेत् ।
त्रिराप्लुत्य जलाभ्याशे दत्त्वा ब्राह्मणदक्षिणाम् ।
अभ्यर्च्य देवायतनं ततः प्रायाद्यथागतम् ।
एतद्विधानं सर्वेषां तीर्थं तीर्थं प्रति प्रिये ।
समीपतीर्थस्नानात्तु दूरतीर्थं सुपूजितम् ।
आदिप्रभृति शुद्धस्य तीर्थस्नानं शुभं भवेत् ।
तपोर्थं पापनाशार्थं शौचार्थं तीर्थगाहनम् ।
एवं पुण्येषु मासेषु तीर्थस्नानं शुभं भवेत् ।
एतन्नैयमिकं सर्वं सुकृतं कथितं तव ।

Colophon.

महेश्वरः ।

दानानि देवपूजां च पितृपूजां तथैव च ।
अन्यानि धर्मकार्याणि सुकृतं सोपसाधनम् ।
तत्सर्वं शृणु कल्याणि प्रजानां हितकाम्यया ।
चेतनाचेतनैर्युक्तं यल्लोके विद्यते धनम् ।
एतदर्थमवाप्नोति नरः प्रेत्य शुभेक्षणे ।

उमा ।

लोकस्थिदं तु यद्द्रव्यं सर्वसाधारणं भवेत् ।
तद्दत्त्वसर्वसामान्यं कथं धर्मं लभेन्नरः ।
एवं साधारणे द्रव्ये कस्य स्वत्वं कथं भवेत् ।

महेश्वरः ।

लोके भूतमयं द्रव्यं सर्वसाधारणं तथा ।
यथैव तद्दन्मर्त्यो भवेत्पुण्यं हि तच्छृणु ।
दाता प्रतिग्रहीता च देयं सोपक्रमं तथा ।
देशकालौ च यत्त्वेतद्दानं षड्गुणमुच्यते ।
तेषां संपद्विशेषांश्च कीर्त्यमानान्निबोध मे ।
आदिप्रभृति यः शुद्धो मनोवाक्कायकर्मभिः ।
सत्यवादी जितक्रोधस्त्वलुब्धो नानसूयकः ।
श्रद्धावानास्तिकश्चैव एवं दाता प्रशस्यते ।

°श). T_1 नानातीर्थानि देवेश (for the prior half). — T_1 महेशः (for °श्वरः). — (L. 3092) D_{10} $T_{1,2}$ G निर्मितं (for °ताः). — (L. 3093) T_3 -संज्ञकाः ; G_1 -संज्ञिकाः (for -संज्ञिताः). — (L. 3095) T_1 विशिष्ट इति कीर्त्यते (for the post. half). — (L. 3096) T_1 om. from the post. half up to the prior half of line 3101. D_{10} $T_{2,3}$ G तत्र (for यत्र). — D_{10} reads lines 3097–3100 twice. — (L. 3097) M तत्र (M_4 °त्तु) तीर्थं परं स्मृतं (for the post. half). — (L. 3099) T_3 तीर- (for कूल-). — (L. 3101) D_{10} G_2 कूलं ; T_3 $G_{1,3}$ $M_{1,4}$ कूपं ; G_4 कूल- (for कूप-). D_{10} $T_{2,3}$ $G_{2,4}$ सेवितं मुनिभिः प्रिये (for the post. half). — (L. 3103) M_{1-3} भवेत् (for लेभे). — (L. 3104) M देवि (for विद्धि). D_{10} $T_{2,3}$ G एवं तीर्थं भवेद्देवि (for the prior half). T_1 तत्र (for तस्य). — (L. 3105) D_{10} $G_{2,4}$ जन्मना (for तन्मना). T_1 शुचि- (for व्रत-). D_{10} T_3 $G_{2,4}$ तीर्थानि (for °भि-). — (L. 3107) D_{10} G M_4 -माने ; T_3 -मार्ग- (sic) (for -मास-). — (L. 3108) D_{10} G_4 मन्मना ; $G_{1,3}$ मनसा (for तन्मना). G_2 तत्तीर्थं मलनाशवित् (for the post. half). — (L. 3109) G_2 पुराप्लुत्य (for त्रि°). — (L. 3110) T_1 गच्छेद् (for प्रायाद्). — (L. 3111) D_{10} $T_{2,3}$ G M_1 इति (for प्रति). T_1 तीर्थानामुत्तमं प्रिये (for the post. half). — (L. 3114) T_2 $G_{1,3}$ सर्वतीर्थ- (T_2 तीर्थं ती)र्थावगाहनं (for the post. half). — (L. 3115) $T_{1,2}$ तीर्थेषु (for मासेषु). —Colophon. — *Adhy. name* : D_{10} $T_{2,3}$ G_2 M उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} T_2 $G_{2,4}$ 216 ; T_1 209 ; T_3 215 ; $G_{1,3}$ M_1 210 ; $M_{2,3}$ 211 ; M_4 208. — After the ref., M ins. :

तृतीयं सोपकरणं क्रियते गृहवासिभिः ।

— D_{10} $T_{2,3}$ G om. lines 3117–3120. — (L. 3117) M देवपूजा (for °पूजां). M पितृपूजा (for °पूजां). — (L. 3121) D_{10} एतमर्थम् (for एतदर्थम्). T_1 M तद्वद्धर्ममाप्नोति (for the prior half). — (L. 3122) T_1 तथा (for भवेत्). — (L. 3124) D_{10} T G तस्य (for कस्य). — (L. 3125) G_2 भवेत् (for तथा). — (L. 3126) T_3 G_2 तथा (for यथा). D_{10} $T_{2,3}$ G M_4 लभेत् (for भवेत्). T_3 स (for हि). T_1 लभेत्पुण्यफलं शृणु (for the post. half). — T_1 om. lines 3127–3132. — (L. 3128) M_2 -कालेन (for -कालौ च). — D_{10} om. lines 3131–3198. — (L. 3132) G_3 M_1 एतद्दाता (for एवं दाता). — (L. 3133) T_3 G तथा (T_2 °दा) दीन- (for तथोदित-). T_1 त्वलुब्धो नाभ्यसूयकः (for the post. half). — (L. 3134) T_1 पंचयज्ञपरायणः (for the post. half). — After line 3134, T_1 reads lines 3189–3190, repeating them in their proper

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शुद्धो दान्तो जितक्रोधस्तथोदितकुलोद्भवः ।
श्रुतचारित्रसंपन्नस्तथा बहुकलत्रवान् ।
पञ्चयज्ञपरो नित्यं निर्विकारशरीरवान् ।
एतान्पात्रगुणान्विद्धि तादृक्पात्रं प्रशस्यते ।
पितृदेवाग्निकार्येषु तस्य दत्तं महत्फलम् ।
यद्यदर्हति यो लोके पात्रं तस्य भवेच्च सः ।
मुच्येतापदमापन्नो येन पात्रं स तस्य तु ।
अन्नस्य क्षुधितः पात्रं तृषितस्तु जलस्य वै ।
एवं पात्रेषु नानात्वमिष्यते पुरुषं प्रति ।
जारश्चोरश्च षण्डश्च हिंस्रः समयभेदकः ।
लोकविघ्नकराश्चान्ये वर्जिताः सर्वशः प्रिये ।
परोपघाताद्यद्द्रव्यं चौर्याद्वा लभ्यते नृभिः ।
निन्दया लभ्यते यच्च धूर्तभावेन वा तथा ।
अधर्मादथ मोहाद्वा बहूनामुपरोधनात् ।
लभ्यते यद्धनं देवि तदन्यद्वा हृतं भवेत् ।
तादृशेन कृतं धर्मं निष्फलं विद्धि भामिनि ।
तस्मान्न्यायागतेनैव दातव्यं शुभमिच्छता ।
यद्यदात्मप्रियं नित्यं तत्तद्देयमिति स्थितिः ।
उपक्रममिमं विद्धि दातॄणां परमं हितम् ।
पात्रभूतं तु दूरस्थमभिगम्य प्रसाद्य च ।
दाता दानं तथा दद्याद्यथा तुष्येत तेन सः ।
एष दानविधिः श्रेष्ठः समाहूय तु मध्यमः ।
पूर्वं च पात्रतां ज्ञात्वा समाहूय निवेद्य च ।
शौचार्चनसमायुक्तं दातव्यं श्रद्धया प्रिये ।
याचितॄणां तु परममाभिमुख्यपुरस्कृतम् ।
संमानपूर्वं संगृह्य दातव्यं देशकालयोः ।
अपात्रेभ्योऽपि चान्येभ्यो दातव्यं भूतिमिच्छता ।
पात्राणि संपरीक्ष्यैव दाता वै दानमात्रयोः ।
अतिशक्त्या परं दानं यथाशक्ति तु मध्यमम् ।
तृतीयं चापरं दानं नानुरूपमिवात्मनः ।
यथासंभावितं पूर्वं दातव्यं तत्तथैव च ।
पुण्यक्षेत्रेषु यद्दत्तं पुण्यकालेषु वा तथा ।
तच्छोभनतरं विद्धि गौरवाद्देशकालयोः ।

उमा ।

यश्च पुण्यतमो देशस्तथा कालश्च शंस मे ।

महेश्वरः ।

कुरुक्षेत्रं महानद्यो यच्च देवर्षिसेवितम् ।
गिरिर्वरश्च तीर्थानि देशभागेन पूजिताः ।
ग्रहीतुरीप्सितो यश्च तत्र दत्तं महत्फलम् ।
शरद्वसन्तकालश्च पुण्यमासस्तथैव च ।
शुक्लपक्षश्च पक्षाणां पौर्णमासी च पर्वसु ।
पितृदैवतनक्षत्रं निर्मला दिवसास्तथा ।
तच्छोभनतरं विद्धि चन्द्रसूर्यग्रहं तथा ।
प्रतिग्रहीतुर्यः कालो मनसा कीर्तितः शुभे ।
एवमादिषु कालेषु दत्तं दानं महद्भवेत् ।
दाता देयं च पात्रं च उपक्रमयुता क्रिया ।
देशः कालश्च इत्येषां संपच्छुद्धिः प्रकीर्तिता ।

---

place. — T_1 om. lines 3135–3141. — (L. 3135) T_3 $G_{1,3,4}$ -यज्ञकरो (for °परो). — (L. 3137) G_1 -कार्ये तु (for -कार्येषु). — (L. 3139) $T_{2,3}$ G M_4 मुच्येद् (for मुच्येत). — (L. 3140) M_4 क्षुधितं (for °तः). T_2 तृषितं तु; G_3 °तस्य (for °तस्तु). $G_{1,3}$ M_4 तृषितं सलिलस्य वै (for the post. half). — (L. 3141) T_3 नानार्थम् (for °त्वम्). — (L. 3145) T_2 G निर्दयाद् (for निन्दया). — (L. 3147) G_2 यल्लभ्यते (by transp.). $T_{2,3}$ G तदत्यंतवि(T_2 °तं वि)गर्हितं; M_4 तदन्यायाहृतं भवेत् (for the post. half). — (L 3148) G_2 तु तं (for कृतं). — (L. 3.49) T_3 न्यायागमेन (for °तेन). T_1 अफलाकाङ्क्षिणा नित्यं (for the prior half). T_2 भूतिम् (for शुभम्). — T_1 om. line 3151. — (L. 3151) T_3 G M_{1-3} इदं (for इमं). — (L. 3154) T_1 स एष विधिवच्छ्रेष्ठः (for the prior half). — After line 3154, T_1 ins.:

यद्द्रव्यं न्यायतः प्राप्तं तदेव स्वमिति स्मृतम् ।

— (L. 3155) T निवेदयेत् (for °द्य च). — (L. 3156) $T_{2,3}$ G शौचाचमनसंयुक्तं (G_4 °स्कारात्) (for the prior half). G_4 वर्तव्यं (for दातव्यं). — (L. 3157) M_{1-3} चरमम् (for प°). M_{1-3} -पुरस्कृतः (for °तम्). — (L. 3158) T G संग्राह्यं (for संगृह्य). — G_2 reads lines 3159-3165 twice. — (L. 3160) $T_{2,3}$ $G_{1,3}$ (both times), $_{3,4}$ -मात्रया (for °योः). — (L. 3161) T_3 -शक्त्या (for -शक्ति). — T_1 om. lines 3162–3163. — (L. 3162) T_3 परं (for [अ]परं). — (L. 3163) $G_{1,3}$ (both times), $_3$ M -संभावितं (for °वितं). G_2 (both times) दानं तत् (for दातव्यं). — (L. 3165) T_2 शोभनकरं (for °तरं). — T_1 महेशः (for °श्वरः). — (L. 3168) T_1 $G_{1,3}$ M वनं (for वरश्). $T_{1,2}$ -भागेषु (for °न). T_3 G देशभागेषु पूजितः (for the post. half). — (L. 3169) $T_{2,3}$ $G_{1,2}$ यत्र (for यश्च). T_1 ग्रहीतुरिष्टं स्याद्यत्र; $G_{3,4}$ M_4 ग्रहीतुमीप्सितो यत्र (for the prior half). $T_{2,3}$ G महा (for महत्). — (L. 3171) $G_{1,3}$ -पक्षे (for -पक्षश्). — (L. 3172) T_3 G निर्मलो दिवसस्तथा (for the post. half). — (L. 3173) T G M_4 -ग्रहे (for -ग्रहं). — T_1 om. line 3174. — (L. 3174) M तर्कितः (for कीर्तितः). — (L. 3175) M_3 om. कालेषु. $T_{1,2}$ महत्फलं (for °द्भवेत्). — (L. 3176) T_1 दानस्य (for देयं च).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

यत्रैव युगपत्संपत्तत्र शुद्धिर्महद्भवेत् ।
अत्यल्पमपि यद्दानमेभिः षड्भिर्गुणैर्युतम् ।
भूत्वानन्तं नयेत्स्वर्गं दातारं दोषवर्जितम् ।
सुमहद्वापि यद्दानं गुणैरेभिर्विनाकृतम् ।
अत्यल्पफलनिर्योगमफलं वा भवेद्धि तत् ।

उमा ।

एवं गुणयुतं दानं दत्तं त्वफलतां व्रजेत् ।
तदस्ति चेन्महादेव तन्मे शंसितुमर्हसि ।

महेश्वरः ।

तदप्यस्ति महाभागे नराणां भवदोषतः ।
कृत्वा तु धर्मं विधिवत्पश्चात्तापं करोति चेत् ।
श्लाघया वा यदि ब्रूयाद्वृथा संसदि यत्कृतम् ।
प्रकल्पयेच्च मनसा तत्फलं प्रेत्यभावतः ।
धर्मकार्यं कृतं यच्च सततं फलकाङ्क्षया ।
एवं कृतं वा दत्तं वा परत्र विफलं भवेत् ।
एते दोषा विवर्ज्याश्च दातृभिः पुण्यकाङ्क्षिभिः ।
सनातनमिदं वृत्तं सद्भिराचरितं तथा ।
अनुग्रहः परेषां तु गृहस्थानामृणं हि तत् ।
इत्येवं मन आवेश्य दातव्यं सततं बुधैः ।
एवमेव कृतं नित्यं सुकृतं तद्भवेन्महत् ।
सर्वसाधारणं द्रव्यमेवं दत्त्वा महत्फलम् ।

Colophon.

उमा ।

भगवन्कानि देयानि धर्ममुद्दिश्य मानवैः ।
तान्यहं श्रोतुमिच्छामि तन्मे शंसितुमर्हसि ।

महेश्वरः ।

अजस्रं धर्मकार्यं च तथा नैमित्तिकं प्रिये ।
अन्नं प्रतिश्रयो दीपः पानीयं तृणमिन्धनम् ।
स्नेहो गन्धश्च भैषज्यं तिलाश्च लवणं तथा ।
एवमादि तथान्यच्च दानमाजस्रमुच्यते ।
अजस्रदानात्सततमाजस्रमिति निश्चितम् ।
सामान्यं सर्ववर्णानां दानं शृणु समाहिता ।
अन्नं प्राणा मनुष्याणामन्नदः प्राणदो भवेत् ।
तस्मादन्नं विशेषेण दातुमिच्छन्ति मानवाः ।
ब्राह्मणायाभिरूपाय यो दद्यादन्नमीप्सितम् ।
निदधाति निधिं श्रेष्ठं सोऽनन्तं पारलौकिकम् ।
श्रान्तमध्वपरिश्रान्तमतिथिं गृहमागतम् ।
अर्चयीत प्रयत्नेन स हि यज्ञो वरः स्मृतः ।
कृत्वा तु पापकं कर्म यो दद्यादन्नमर्थिनाम् ।
ब्राह्मणानां विशेषेण सोऽपहन्ति स्वकं तमः ।
पितरस्तस्य नन्दन्ति सुवृष्ट्या कर्षका इव ।
पुत्रो वा यस्य पौत्रो वा श्रोत्रियान्भोजयिष्यति ।
अपि चण्डालशूद्राणामन्नदानाच्च गर्ह्यते ।
तस्मात्सर्वप्रयत्नेन दद्यादन्नममत्सरः ।

T_3 $G_{1,3}$ M -युताः क्रियाः (for -युना क्रिया). — (L. 3177) M_4 देशकालं (for देशः कालश्च). T_1 तथा ह्येषा (for च इत्येषां). $T_{2,3}$ G देशकाल तथान्ये(T_3 G_2 °न्ये)षा (for the prior half). G_2 सत्त्व- (for संपच्च). — T_1 om. line 3178. — (L. 3178) $T_{2,3}$ G यथा (for यत्र). $T_{2,3}$ G M_4 दानं (for शुद्धिर्). — G_1 om. (hapl.) lines 3179–3181. — (L. 3182) T_2 G_4 फलोद्य(G_4 °त्थि)तं (for भवेद्धि तत्). — (L. 3183) T_1 तत्फलतां ; G च फ(G_4 चाफ)लतां (for त्वफ°). — (L. 3184) T_3 G महद्देयं (for महादेव). T_2 तत्रास्ति चेन्महद्दानं (for the prior half). — T_1 महेशः (for °श्वरः). — (L. 3186) $T_{2,3}$ G धर्मं तु (by transp.). G_2 कृत्वा पापं (for पश्चात्तापं). — (L. 3187) T_1 श्लाघनाय ; G_2 श्लाघन्वाचा (for °या वा). G_4 श्लाघां वा यदि वा ब्रूयाद् (for the prior half). M_4 तत् (for यत्). T_1 कृत्वा संसदि वै नरः (for the post. half). — T_1 om. line 3188. — (L. 3189) T_3 G कर्म धर्म- (for धर्मकार्यं). T_1 (first time) एतेन यत्कृतं कर्म ; T_2 कर्म धर्मकृता यत्नेन (for the prior half). — (L. 3190) G M एतत् (for एवं). T_1 (first time) दत्तं वापि हुतं वापि (for the prior half). — (L. 3191) T_1 वर्जनीया (for विवर्ज्याश्च). — (L. 3192) T_1 सदा (for तथा). — (L. 3193) $T_{2,3}$ G अनुग्रहात् (for °ग्रहः). — (L. 3194) T_1 निश्चित्य मनसैत्येवं (for the prior half). — T_1 om. line 3195. — (L. 3195) T_2 भवेन् (for कृतं). — (L. 3196) T_1 दत्तं ; G_4 कृत्वा (for दत्त्वा). — Colophon om. in D_{10}. — *Sub-parvan* : M_{1-3} दानधर्म. — *Adhy. name* : T_2 G_2 उमामहेश्वरसंवादे दानविधिः ; T_3 M उमामहेश्वरसंवादः. — *Adhy. no.* : T_1 210 ; T_2 $G_{2,4}$ 217 ; T_3 216 ; $G_{1,3}$ M_1 211 ; $M_{2,3}$ 212 ; M_4 209. — D_{10} om. the ref. — T_1 महेशः (for °श्वरः). — (L. 3199) T_1 तत् (for च). — (L. 3201) $G_{3,4}$ M_1 गंधं (for गन्धश्च). — (L. 3204) T_3 समासतः (for °हिता). — (L. 3205) D_{10} T_2 $G_{2,4}$ प्राणो (for प्राणा). — (L. 3206) D_{10} $T_{2,3}$ $G_{2,4}$ दातुमिच्छति मानवः (for the post. half). — T_1 M_4 om. (hapl.) lines 3208–3211. — (L. 3208) T_2 श्रद्धयाद्ध- (for श्रान्त- धनं (for निधिं). — (L 3209) T_2 श्रद्धयाध्व- (for श्रान्तमध्व-). D_{10} परिक्लांतम् (for °श्रान्तम्). — (L. 3210) D_{10} T_2 G M_4 वरप्रदः ; T_1 क्रतुप्रदः (for वरः स्मृतः). — (L. 3211) D_{10} T_2 G पातकं (for पापकं). — (L. 3214) D_{10} T_1 G यस्य तु (for वा यस्य). D_{10} T_3 G M_4 श्रोत्रियं (for °यान्). — (L. 3215) D_{10} $T_{1,3}$ G M_4 अन्नदानं (for °नात्). T_1 गर्हति ; T_2 (also as above) लभ्यते ; G_3 गृह्यते (for गर्ह्यते). — (L. 3217) D_{10} G_3

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कलत्रं पीडयित्वापि पोषयेदतिथीन्सदा ।
जन्मापि मानुषे लोके तदर्थं हि विधीयते ।
अन्नदानाच्च ये लोकास्तान्प्रवक्ष्याम्यनिन्दिते ।
भवनानि प्रकाशन्ते दिवि तेषां महात्मनाम् ।
अनेकशतभौमानि सान्तर्जलवनानि च ।
वैडूर्यार्चिःप्रकाशानि रुक्मरूप्यनिभानि च ।
नानासंस्थानरूपाणि नानारत्नमयानि च ।
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ।
यथेष्टभक्ष्यभोज्यानि शयनासनवन्ति च ।
सर्वकामफलाश्चात्र वृक्षा भवनसंस्थिताः ।
वाप्यो बह्व्यश्च कूपाश्च दीर्घिकाश्च सहस्रशः ।
अरुजानि विशोकानि नित्यानि विविधानि च ।
भवनानि विविक्तानि प्राणदानां त्रिविष्टपे ।
विवस्वतश्च सोमस्य ब्रह्मणश्च प्रजापतेः ।
विशन्ति लोकांस्ते नित्यं जगत्यन्नोदकप्रदाः ।
तत्र ते सुचिरं कालं विहृत्याप्सरसां गणैः ।
जायन्ते मानुषे लोके सर्वकल्याणसंयुताः ।
बलसंहननोपेता नीरोगाश्चिरजीविनः ।
कुलीना मतिमन्तश्च भवन्त्यन्नप्रदा नराः ।
तस्मादन्नं विशेषेण दातव्यं भूतिमिच्छता ।
सर्वकालं च सर्वस्य सर्वत्र च सदैव च ।
सुवर्णदानं परमं स्वर्ग्यं स्वस्त्ययनं महत् ।
तस्मात्तद्वर्णयिष्यामि यथावदनुपूर्वशः ।
अपि पापं कृतं क्रूरं दत्तं रुक्मं प्रणाशयेत् ।
सुवर्णं ये प्रयच्छन्ति श्रोत्रियेभ्यः सुचेतसः ।
देवतास्ते तर्पयन्ति समस्ता इति वैदिकम् ।
अग्निर्हि देवताः सर्वाः सुवर्णं चाग्निरुच्यते ।
तस्मात्सुवर्णदानेन दत्ताः स्युः सर्वदेवताः ।
अग्न्यभावे तु कुर्वन्ति वह्निस्थानेषु काञ्चनम् ।
तस्मात्सुवर्णदातारः सर्वान्कामानवाप्नुयुः ।
आदित्यस्य हुताशस्य लोकान्नानाविधाञ्शुभान् ।
काञ्चनं संप्रदायाशु प्रविशन्ति न संशयः ।
अलंकारकृतं चापि केवलात्प्रविशिष्यते ।
सौवर्णैर्ब्राह्मणान्काले तैरलंकृत्य भोजयेत् ।
एतत्परमकं दानं दत्त्वासौ वर्णमद्भुतम् ।
द्युतिं मेधां वपुः कीर्तिं पुनर्जाते लभेद्ध्रुवम् ।
तस्मात्स्वशक्त्या दातव्यं काञ्चनं भुवि मानवैः ।
न ह्येतस्मात्परं लोकेष्वन्यत्पावनमुच्यते ।
अत ऊर्ध्वं प्रवक्ष्यामि गवां दानमनिन्दिते ।
न हि गोभ्यः परं दानं विद्यते जगति प्रिये ।
लोकान्सिसृक्षुणा पूर्वं गावः सृष्टाः स्वयंभुवा ।
वृत्त्यर्थं सर्वभूतानां तस्मात्ता मातरः स्मृताः ।
लोकज्येष्ठा लोकवृत्त्यां प्रवृत्ता
मय्यायत्ताः सोमविष्यन्दभूताः ।
सौम्याः पुण्याः कामदाः प्राणदाश्च
तस्मात्पूज्याः पुण्यकामैर्मनुष्यैः ।
धेनुं हि दत्त्वा निभृतामरोगां
कल्याणवत्सां च पयस्विनीं च ।
यावन्ति लोमानि भवन्ति तस्या-

तोषयेद्; T_1 पूज°; T_8 भोज° (for पोष°). — (L. 3218) T_8 जन्मना (for जन्मापि). — (L. 3219) $T_{2.3}$ लोकांस्तान् (for ये लोकास्). D_{10} T_1 G अन्नदानां च लोकां(T_1 °का)स्तान् (for the prior half). D_{10} $T_{2.3}$ G सं° (for तान्). — T_1 om. (hapl.) line 3221. — (L. 3222) T_1 रुक्मरूपशतानि च (for the post. half). — (L. 3223) D_{10} $G_{2.4}$ नानारूपाणि सं(D_{10} सु)स्थानि (for the prior half). — T_1 om. (hapl.) line 3224. — (L. 3227) D_{10} $T_{2.3}$ $G_{2.4}$ -काल- (for -काम-). T_1 वृक्षा (for चात्र). T_1 भवनेषु च संस्थिताः (for the post half). — (L. 3228) T_1 नद्यश् (for बह्व्यश्). — (L. 3229) $G_{1.3.4}$ निरुजानि (for अरु°). — (L. 3230) D_{10} T G विचित्राणि (for विविक्तानि). G_2 प्राणदानि (for °दानां). T_1 अन्नदानां विशिष्यते (for the post. half). — (L. 3234) T_1 जायंते मानुषं लोकं (for the prior half). T_1 om. from the post. half up to the prior half of line 3235. — T_1 om. lines 3236, 3238 and 3240. — (L. 3240) D_{10} $T_{2.3}$ $G_{2.4}$ ते (for तद्). — (L. 3241) T_1 रुक्मे दत्तं (for दत्तं रुक्मं). — (L. 3243) T_2 देवतास्तर्पयंति स्म; G_2 °स्तेन तृप्यंति; M_2 (*sup. lin.* as above). $_3$ °स्ते प्रयच्छंति (for the prior half). — (L. 3245) T_2 $G_{1.3.4}$ तृप्ताः (for दत्ताः). — T_1 om. lines 3246–3247 and 3250–3251. — (L. 3250) D_{10} T_8 $G_{2.4}$ अलंकारं (for अलंकार-). — (L 3251) D_{10} T_8 G_{1-3} M ब्राह्मणं (for °णान्). — (L. 3252) D_{10} $T_{2.3}$ G य ए(G_2 यदे)तत्परमं दानं (for the prior half). — (L. 3253) T_1 धृतिं (for द्युतिं). T_1 G_4 $M_{1.2}$ पुनर्जातो (for °र्जाते). T_8 $G_{1.3}$ M_4 पुनर्जातो भवेद्ध्रुवं (for the post. half). — (L. 3254) T_1 सर्व- (for भुवि). — T_1 om. line 3255. — (L. 3255) D_{10} $T_{2.3}$ G [अ]न्यत्पापात्प्रमुच्यते (for the post. half). — (L. 3256) T_1 अनुत्तमं (for अनिन्दिते). — (L. 3259) T_1 प्रीत्यर्थं (for वृत्त्यर्थं). — (L. 3260) T_1 लोकवृत्तौ (for °वृत्त्यां). $T_{2.3}$ प्रवृत्त्या (for °त्ता). — (L. 3261) D_{10} T G M_4 -निष्यंदभूताः (for -विष्यन्द°). — (L. 3262) T_1 G_1 प्राणदाः कामदाश् (by transp.).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

स्तावत्समाः स्वर्गफलानि भुङ्क्ते ।
प्रयच्छते यः कपिलां सचेलां
कांस्योपदोहां कनकाग्रशृङ्गीम् ।
पुत्रांश्च पौत्रांश्च कुलं च सर्व-
मासप्तमं तारयते परत्र ।
अन्तर्जाताः क्रीतका द्यूतलब्धाः
प्राणक्रीताः सोदकाश्चौजसा वा ।
कृच्छ्रोत्सृष्टाः पोषणार्थागताश्च
द्वारैरेतैस्ताः प्रलब्धाः प्रदद्यात् ।
कृशाय बहुपुत्राय श्रोत्रियायाहिताग्नये ।
प्रदाय नीरुजां धेनुं लोकान्प्राप्नोत्यनुत्तमान् ।
नृशंसस्य कृतघ्नस्य लुब्धस्यानृतवादिनः ।
हव्यकव्यव्यपेतस्य न दद्याद्गाः कथंचन ।
समानवत्सां यो दद्याद्धेनुं विप्रे पयस्विनीम् ।
सुवस्त्रां वस्त्रसंदानां सोमलोके महीयते ।
समानवत्सां यो धेनुं कृष्णां दद्यात्पयस्विनीम् ।
सुवृत्तां वस्त्रसंदानां लोकान्प्राप्नोत्यपां पतेः ।
समानवत्सां यो धेनुं दद्याद्गौरीं पयस्विनीम् ।
सुवृत्तां वस्त्रसंदानामग्निलोके महीयते ।
हिरण्यवर्णां पिङ्गाक्षीं सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंदानां याति कौबेरसद्म सः ।
वायुरेणुसवर्णां तु सवत्सां कांस्यदोहनाम् ।
प्रदाय वस्त्रसंदानां वायुलोके महीयते ।
युवानं बलिनं श्यामं शतेन सह यूथपम् ।
गवेन्द्रं ब्राह्मणेन्द्राय भूरिशृङ्गमलंकृतम् ।
ऋषभं ये प्रयच्छन्ति श्रोत्रियाणां महात्मनाम् ।
ऐश्वर्यमभिजायन्ते जायमानाः पुनः पुनः ।
गवां मूत्रपुरीषाणि नोद्विजेत कदाचन ।
न चासां मांसमश्नीयाद्गोषु भक्तः सदा भवेत् ।
ग्रासमुष्टिं परगवे दद्यात्संवत्सरं शुचिः ।
अकृत्वा स्वयमाहारं व्रतं तत्सार्वकामिकम् ।
गवामुभयतःकाले नित्यं स्वस्त्ययनं वदेत् ।
न चासां चिन्तयेत्पापमिति धर्मविदो विदुः ।
गावः पवित्रं परमं गोषु लोकाः प्रतिष्ठिताः ।
कथंचिन्नावमन्तव्या गावो लोकस्य मातरः ।
तस्मादेव गवां दानं विशिष्टमिति कथ्यते ।
गोषु पूजा च भक्तिश्च नरस्यायुष्यमावहेत् ।
अतः परं प्रवक्ष्यामि भूमिदानं महाफलम् ।
भूमिदानसमं दानं न किलास्तीति निश्चयः ।
गृहयुक्क्षेत्रयुग्वापि भूमिभागः प्रदीयते ।
सुखभोग्यं निराक्रोशं वास्तुपूर्वं प्रकल्प्य च ।
ग्रहीतारमलंकृत्य वस्त्रपुष्पानुलेपनैः ।
सभृत्यं सपरीवारं भोजयित्वा यथेष्टतः ।
यो दद्याद्दक्षिणाकाले त्रिरद्भिर्गृह्यतामिति ।
एवं भूम्यां प्रदत्तायां श्रद्धया वीतमत्सरैः ।
यावत्तिष्ठति सा भूमिस्तावत्तस्य फलं विदुः ।
भूमिदः स्वर्गमारुह्य रमते शाश्वतीः समाः ।
अचला ह्यक्षया भूमिः सर्वान्कामान्दुधुक्षति ।

— (L. 3264) $G_{1,3}$ सुभृतां (for नि°). D_{10} T_3 G सुशीलां (for अरोगां). — (L. 3266) T_1 M_4 तस्यां (for तस्यास्). — (L. 3269) D_{10} T_3 G सवांस्यदोहां (for कांस्योप°). — T_1 om. lines 3272–3275. — (L. 3273) $G_{1,3}$ सोमकाश् (for सोद°). — (L. 3277) T_1 विरुजां (for नी°). — (L. 3279) $G_{1,3}$ गां; G_4 तां (for गाः). — (L. 3280) $G_{1,3}$ धेनुं; M_{1-3} श्वेतां (for दद्याद्). D_{10} om. (hapl.) from the post. half up to the prior half of line 3282. $G_{1,3}$ दद्याद् (for धेनुं). M दद्यात (for विप्रे). — (L. 3281) T G M_4 सुवृत्तां (for सुवस्त्रां). $T_{1,3}$ $G_{1,3,4}$ -संछन्नां; T_2 -संपन्नां (for -संदानां). — M_4 om. (hapl.) lines 3282–3283. — (L. 3282) T_3 G दद्यात (for धेनुं). D_{10} T_3 G धेनुं (for दद्यात). — (L. 3283) $T_{2,3}$ $G_{1,3,4}$ -संछन्नां (for -संदानां). T_1 कृष्णवस्त्रेण संछन्नां (for the prior half). — M_4 om. (hapl.) lines 3286–3289. — (L. 3287) D_{10} T_1 $G_{3,4}$ -संछन्नां; $T_{2,3}$ $G_{1,2}$ -संपन्नां (for -संदानां). D_{10} reads from the post. half up to the prior of line 3289 twice. — (L.

3288) T_1 वात- (for वायु-). — (L. 3289) D_{10} (both times) $T_{2,3}$ $G_{1,2}$ -संपन्नां; T_1 $G_{3,4}$ -संछन्नां (for -संदानां). — (L. 3292) T_1 वृषभं (for ऋ°). — (L. 3293) T_3 ऐश्वर्याणि (for °र्यम्). — (L. 3297) D_{10} अभुक्त्वा (for अकृत्वा). $G_{1,3}$ वृत्तं (for व्रतं). $G_{1,3}$ M_4 -कालिकं (for -कामिकम्). — (L. 3298) G_2 महत् (for वदेत्). — T_1 om. line 3303. — (L. 3303) D_{10} G_{2-4} नरस्यायुष्यतां वहेत्; T_2 °तां महत्; T_3 °तां व्रजेत्; G_1 °तां भवेत् (for the post. half). — (L. 3304) T_1 महत्फलं; G_2 फलं महत् (for महाफलम्). — (L. 3305) T_1 भूमिदानात्परं दानं (for the prior half). D_{10} T $G_{2,3,4}$ लोके नास्ति; G_2 नास्ति लोके (for न किलास्ति). — After line 3306, M_{1-3} ins.:

उभयासंयुतं दानं शून्यं तत्र विशिष्यते ।

— (L. 3307) D_{10} $T_{2,3}$ G M_4 — T_1 om. line 3307. — (L. 3309) $G_{1,3}$ सापत्यं (for -भोगं (for -भोग्यं). — (L. 3309) $G_{1,3}$ सापत्यं (for सभृत्यं). — (L. 3310) D_{10} T G दक्षिणां; M_4 °णे (for दक्षिणा-). T_2 भूरद्भिर् (for त्रि°). $G_{1,3}$ भूमिरद्भिः प्रगृह्यतां (for the post. half). — T_1 om. 3314. — (L.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

यच्च कुरुते पापं पुरुषो वृत्तिकर्शितः ।
अपि गोकर्णमात्रेण भूमिदानेन मुच्यते ।
सुवर्णरजतं वस्त्रं मणिमुक्तावसूनि च ।
सर्वमेतन्महाप्राज्ञे भूमिदाने प्रतिष्ठितम् ।
भर्तुर्निःश्रेयसे युक्तास्त्यक्तात्मानो रणे हताः ।
ब्रह्मलोकाय संसिद्धा नातिक्रामन्ति भूमिदम् ।
हलकृष्टां महीं दद्याद्यः सबीजफलान्विताम् ।
सकूपशरणां वापि सा भवेत्सर्वकामदा ।
निष्पन्नसस्यां पृथिवीं यो ददाति द्विजन्मनाम् ।
विमुक्तः कलुषैः सर्वैः शक्रलोकं स गच्छति ।
यथा जनित्री क्षीरेण स्वपुत्रमभिवर्धयेत् ।
एवं सर्वफलैर्भूमिर्दातारमभिवर्धयेत् ।
ब्राह्मणं वृत्तसंपन्नमाहिताग्निं शुचिव्रतम् ।
ग्राहयित्वा निजां भूमिं न याति यमसादनम् ।
यथा चन्द्रमसो वृद्धिरहन्यहनि दृश्यते ।
तथा भूमिकृतं दानं सस्ये सस्ये विवर्धते ।
यथा बीजानि रोहन्ति प्रकीर्णानि महीतले ।
तथा कामाः प्ररोहन्ति भूमिदानगुणार्जिताः ।
पितरः पितृलोकस्था देवताश्च दिवि स्थिताः ।
संतर्पयन्ति भोगैस्तं यो ददाति वसुंधराम् ।
दीर्घायुष्ट्वमरोगत्वं स्फीतां च श्रियमुत्तमाम् ।
परत्र लभते मर्त्यः संप्रदाय वसुंधराम् ।
एतत्सर्वं मयोद्दिष्टं भूमिदानस्य यत्फलम् ।
श्रद्दधानैर्नरैर्नित्यं श्राव्यमेतत्सनातनम् ।
अतः परं प्रवक्ष्यामि कन्यादानं यथाविधि ।
कन्या देया तथा देवि परेषामात्मनोऽपि वा ।
कन्यां शुद्धव्रताचारां कुलरूपसमन्विताम् ।
यस्मै दित्सति पात्राय तेनापि भृशकामिताम् ।
प्रथमं तत्समाकल्प्य बन्धुभिः कृतनिश्चयम् ।
कारयित्वा गृहं पूर्वं दासीदासपरिच्छदैः ।
गृहोपकरणं चैव शुद्धधान्येन संयुतम् ।
दारार्थिने तदर्हाय कन्यां तां समलंकृताम् ।
सविवाहं यथान्यायं प्रयच्छेदग्निसाक्षिकम् ।
वृत्त्यायतिं तथा कृत्वा सद्गृहे तौ निवेशयेत् ।
एवं कृत्वा वधूदानं तस्य दानस्य गौरवात् ।
प्रेत्यभावे महीयेत स्वर्गलोके यथासुखम् ।
पुनर्जातौ च सौभाग्यं कुलवृद्धिं तथाप्नुयात् ।
विद्यादानं तथा देवि पात्रभूताय वै ददत् ।
प्रेत्यभावे लभेन्मर्त्यो मेधां वृद्धिं धृतिं स्मृतिम् ।
अनुरूपाय शिष्याय स्वां विद्यां यः प्रयच्छति ।
यथोक्तस्य दानस्य फलमानन्त्यमुच्यते ।
दापनं त्वथ विद्यानां दरिद्रेभ्योऽर्थवेतनैः ।
स्वयंदत्तेन तुल्यं स्यादिति विद्धि शुभानने ।
एवं ते कथितान्येव महादानानि भामिनि ।
त्वत्प्रियार्थं महादेवि भूयः श्रोतुं किमिच्छसि ।

Colophon.

3315) D_{10} $T_{2.3}$ G M यत्किंचित् (for यच्च). — (L. 3316) $G_{1.3}$ गोचर्म- (for गोकर्ण-). — (L. 3318) D_{10} $T_{2.3}$ G महाभागे (for °प्राज्ञे). — (L. 3322) M_4 वापीं (for वापि). — (L. 3324) M_1 कल्मपैः (for कलुषैः). — T_1 om. lines 3325–3326. — (L. 3327) T_1 प्रशांतं नियतव्रतं (for the post. half). — T_1 om. (hapl.) line 3330. — (L. 3330) D_{10} $T_{2.3}$ G भूमेः (for भूमि-). G_2 विवर्धनं (for °र्धते). — (L. 3332) G_2 -गुणान्विताः (for °र्जिताः). T_1 भूमिदस्य गुणान्विते (for the post. half). — M_3 reads line 3333 twice. — (L. 3335) T_1 $G_{1.3}$ M_4 दीर्घायुष्यम् (for °ष्ट्वम्). D_{10} $T_{2.3}$ $G_{2.4}$ दीर्घायुष्यं वरांगत्वं (for the prior half). — (L. 3340) D_{10} T G महादेवि (for तथा देवि). — After line 3341, T_1 ins. :

यो ददाति सुपात्राय ब्रह्मलोकं स गच्छति ।

— T_1 om. (hapl.) line 3342. — (L. 3343) T_1 समालोच्य (for °कल्प्य). — (L. 3344) T_3 ग्राहयित्वा (for कार°). — (L. 3345) D_{10} $T_{1.2}$ $G_{1.3.4}$ गृहोपकरणैश्चैव (for the prior half). D_{10} $T_{2.3}$ G M_4 पशुधान्येन संयुतां ; T_1 पशुधान्यैः समन्वितां (for the post. half). — (L. 3346) D_{10} $T_{2.3}$ G M_4 तदर्थिने (for दारा°). T_1 वराय च यथार्हाय (for the prior half). — T_1 om. line 3348. — (L. 3348) T_2 प्रत्यायतिं ; T_3 वृत्ता° (for वृत्त्या°). — For line 3348, M_1 subst. :

वृत्त्यायतिं तां कृत्वा सन्गृहे तेन निवेशितः ।

— (L. 3351) $T_{1.2}$ $G_{1.3.4}$ जातश् (for जातौ). — After line 3351, T_1 ins. :

अतः परं प्रवक्ष्यामि विद्यादानमनुत्तमम् ।

— T_1 reads lines 3352–3353 after line 3358. — (L. 3354) M_4 अनुकूलाय (for °रूपाय). D_{10} $T_{2.3}$ $G_{2.4}$ यश्च विद्यां ; $G_{1.3}$ यस्य विद्यां (for स्वां विद्यां यः). — (L. 3355) D_{10} $T_{2.3}$ $G_{1.3.4}$ यथोक्तस्य प्रदानस्य ; G_2 °क्तस्यैव दानस्य (for the prior half). D_{10} T G अश्नुते (for उच्यते). — (L. 3356) T_1 दापयित्वा (for दापनं तु). T_1 तु शोभने (for ऽर्थवेतनैः). — (L. 3358) D_{10} $T_{2.3}$ G मानिनि ; T_1 शोभने (for भामिनि). — (L. 3359) D_{10} T_2 G मया (for महा-). T_1 $G_{1.3}$ किं भूयः श्रोतुमिच्छसि (for the post. half). — Colophon. — *Adhy. name* : D_{10} उमामहेश्वरसंवादे गोभूहिरण्यकन्यासरस्वतीदाननिरूपणं ; T_2 G_2 M उमामहेश्वरसंवादः ; T_3 उमामहेश्वरसंवादे दानविधिः. — *Adhy. no.* : D_{10} T_2 $G_{2.4}$ 218 ; T_1 211 ;

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उमा ।
भगवन्देवदेवेश कथं देयं तिलान्वितम् ।
तस्य तस्य फलं ब्रूहि दत्तस्य च कृतस्य च ।
महेश्वरः ।
तिलकल्पविधिं देवि त्वं मे शृणु समाहिता ।
समृद्धैरसमृद्धैर्वा तिला देया विशेषतः ।
तिलाः पवित्राः पापघ्नाः सुपुण्या इति संस्मृताः ।
न्यायतस्तु तिलाञ्शुद्धान्संभृत्याथ स्वशक्तितः ।
तिलराशिं पुनः कुर्यात्पर्वताभं सरत्नकम् ।
महान्तं यदि वा स्तोकं नानाद्रव्यसमायुतम् ।
सुवर्णरजताभ्यां च मणिमुक्ताप्रवालकैः ।
अलंकृत्य यथायोगं सपताकं सवेदिकम् ।
सभूषणं सवस्त्रं च शयनासनसंयुतम् ।
प्रायशः कौमुदीमासे पौर्णमास्यां विशेषतः ।
भोजयित्वा च विधिवद्ब्राह्मणानर्हतो बहून् ।
स्वयं कृत्वोपवासं च वृत्तशौचसमन्वितः ।
दद्यात्प्रदक्षिणीकृत्य तिलराशिं सदक्षिणम् ।
एकस्य वा बहूनां वा दातव्यं भूतिमिच्छता ।
तस्य दानफलं देवि अग्निष्टोमेन संमितम् ।
केवलं वा तिलैरेव भूमौ कृत्वा गवाकृतिम् ।
सरत्नकं सवस्त्रं च पुंसा गोदानकाङ्क्षिणा ।
तदर्हाय प्रदातव्यं तस्य गोदानवत्फलम् ।
शरावांस्तिलसंपूर्णान्सहिरण्यान्सचम्पकान् ।
जलैर्दद्द्ब्राह्मणाय स पुण्यफलभाग्भवेत् ।
एवं तिलमयं देयं नरेण हितमिच्छता ।
नानादानफलं भूयः शृणु देवि समाहिता ।
बलमायुष्यमारोग्यमन्नदानाल्लभेन्नरः ।
पानीयदस्तु सौभाग्यं रसज्ञानं लभेन्नरः ।
वस्त्रदानाद्वपुःशोभामलंकारं लभेन्नरः ।
दीपदो बुद्धिवैमल्यं द्युतिं शोभां लभेत्पुनः ।
राजपीडाविमोक्षं तच्छत्रदो लभते फलम् ।
दासीदासप्रदानात्तु भवेत्कर्मान्तभाङ्नरः ।
दासीदासं च विविधं लभेत्प्रेत्य गुणान्वितम् ।
यानानि वाहनं चैव तदर्हाय ददन्नरः ।
पादरोगपरिक्लेशान्मुक्तश्चोत्साहवान्भवेत् ।
विचित्रं रमणीयं च लभते यानवाहनम् ।
प्रतिश्रयप्रदानाच्च तदर्हाय तदिच्छते ।
वर्षकाले तु रात्रौ च लभेत्पक्षबलं शुभम् ।
सेतुकूपतटाकानां कर्ता तु लभते नरः ।
दीर्घायुष्ट्वं च सौभाग्यं तथा प्रेत्यायतीं शुभाम् ।
वृक्षपङ्क्तिकरो यस्तु च्छायापुष्पफलप्रदः ।
प्रेत्यभावे लभेत्पुण्यमभिगम्यो भवेन्नरः ।

T_3 217; $G_{1.3}$ M_1 212; $M_{2.3}$ 213; M_4 210. —(L. 3361) T_1 दान- (for the second तस्य). T_1 श्रोतुं कौतूहलं मम (for the post. half). — T_1 महेशः (for °श्वरः). — T_1 om. line 3362. —(L. 3362) D_{10} $T_{2.3}$ G तन् (for त्वं). G_2 om. from the post. half of line 3363 up to the prior half of line 3366 —(L. 3364) T_1 च (for सं-). — T_1 om. line 3365. —(L. 3365) D_{10} T_3 $G_{1.3.4}$ संहृत्य; T_2 संगृह्य (for संभृत्य). —(L. 3366) T_1 प्रकुर्वीत; $G_{1.3}$ पुरस्कुर्यात् (for पुनः कु°). T_2 सुरत्नकं; T_3 सरत्निकं (for सरत्नकम्). —(L. 3067) D_{10} T G -समन्वितं (for -समायुतम्). —(L. 3370) $T_{2.3}$ G -संमितं (for -संयुतम्). — T_1 om. lines 3371–3373. —(L. 3372) M तदर्हान्ब्राह्मणान्बहून् (for the post. half). —(L. 3373) D_{10} $T_{2.3}$ G M_4 कृतोपवासश्च (for कृत्वोपवासं). T_2 व्रत- (for वृत्त-). —(L. 3374) $G_{1.3}$ तस्मात् (for दद्यात्). —(L. 3375) D_{10} $T_{2.3}$ G [अ]पि (for the first वा). —(L. 3376) T G M_{1-3} संयुतं (for संमितम्). —(L. 3377) $G_{1.3.4}$ भूमिं (for भूमौ). — T_1 om. line 3378. —(L. 3378) D_{10} $T_{2.3}$ G सवस्त्रकं सरत्नं (G_2 °कं) च (for the prior half). —(L. 3379) D_{10} $T_{1.2}$ G M गोदानतः (for °वत्). —(L. 3380) $G_{1.3}$ सवस्त्रकान् (for सचम्प°). —(L. 3381) D_{10} $T_{2.3}$ G नृपो (for जलैर्). $G_{1.3.4}$

दद्याद् (for ददद्). T_1 यो दद्याद्विप्रवर्येभ्यः (for the prior half). —(L. 3383) T_3 देवि (for भूयः). T_3 भूयः (for देवि). —(L. 3384) G_1 फलम् (for बलम्). —(L. 3386) —(L. 3385) T_1 शुद्धं (for रस-). — D_{10} om. (hapl.) line T_1 आयुर्वृद्धिं (for अलंकारं). — D_{10} om. (hapl.) line 3387. —(L. 3387) T G -वैशद्यं (for -वैमल्यं). T G_{2-4} नरः (for पुनः). — T_3 om. (hapl.) lines 3388–3391. —(L. 3388) D_{10} $T_{1.2}$ G M_4 तु (for तच्). G_{1-3} छत्रतो (for °दो). — T_1 om. (hapl.) line 3389. —(L. 3391) T_1 दासीदासप्रजा नरः (for the post. half). — T_1 om. line 3392. —(L. 3392) D_{10} T_2 G M_4 मुक्तश्वसनवाहवान् (for the post. half). —(L. 3393) T_1 छत्रोपानहदानाच्च (for the prior half). —(L. 3394) D_{10} $T_{2.3}$ G -प्रदानं (for °नाच्च). T_1 लभते चोत्तमं गृहं (for the post. half). — T_1 om. line 3395. —(L. 3395) T_3 G वर्षां- (for वर्ष-). T_2 $G_{1.3}$ वा (for च). —(L. 3397) D_{10} $T_{2.3}$ G $M_{3.4}$ दीर्घायुष्यं; T_1 दीर्घमायुश्च (for दीर्घायुष्ट्वं). D_{10} T G प्रेत्य गतिं (for प्रेत्यायतीं). — T_1 om. lines 3398–3405. —(L. 3398) D_{10} $T_{2.3}$ G $G_{1.3.4}$ M_3 -संरोपको (for -पङ्क्तिकरो). —(L. 3399) $G_{1.3}$ M नरैः (for नरः). —(L. वहेत् (for लभेद्).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

यस्तु संक्रमकृल्लोके नदीषु जलतारिणाम् ।
लभेत्पुण्यफलं प्रेत्य व्यसनेभ्यो विमोक्षणम् ।
मार्गकृत्सततं मर्त्यो भवेत्संतानवान्पुनः ।
कायदोषविमुक्तस्तु तीर्थकृत्सततं भवेत् ।
औषधानां प्रदाता च सततं कृपयान्वितः ।
भवेद्व्याधिविहीनश्च दीर्घायुश्च विशेषतः ।
अनाथान्पोषयेद्यस्तु कृपणान्धकपङ्गुकान् ।
स तु पुण्यफलं प्रेत्य लभते कृच्छ्रमोक्षणम् ।
देवगोष्ठान्सभाः शाला भिक्षूणां च प्रतिश्रयम् ।
यः कुर्याल्लभते नित्यं नरः प्रेत्य फलं शुभम् ।
प्रासादवासं विविधं पक्षशोभां लभेन्नरः ।
विविधं विविधाकारं भक्ष्यभोज्यगुणान्वितम् ।
रम्यं सदैव गोवाटं यः कुर्याल्लभते नरः ।
प्रेत्यभावे शुभां जातिं व्याधिमोक्षं तथैव च ।
एवं नानाविधं द्रव्यं दाता कर्ता लभेत्फलम् ।

उमा ।

कृतं दत्तं यथा यावत्तस्य यल्लभते फलम् ।
एतन्मे वद देवेश तत्र कौतूहलं महत् ।

महेश्वरः ।

प्रेत्यभावे शृणु फलं दत्तस्य च कृतस्य च ।
दानं वा षड्गुणयुतं तदर्हाय यथाविधि ।
यथाविभवतो दानं दातव्यमिति मानवैः ।
बुद्धिमायुष्यमारोग्यं कुलं भाग्यं तथागमम् ।
रूपेण सप्तधा भूत्वा मानुष्यं फलति ध्रुवम् ।
इदं दत्तमिदं मे स्यादित्येवं फलकाङ्क्षया ।
यद्दत्तं तत्तदेव स्यान्न तु किंचन लभ्यते ।
ध्रुवं देव्युत्तमे दाने मध्यमे त्वधमे फलम् ।

Colophon.

उमा ।

भगवन्देवदेवेश विशिष्टं यज्ञमुच्यते ।
लौकिकं वैदिकं चैव तन्मे शंसितुमर्हसि ।

महेश्वरः ।

देवतानां च संपूजा यज्ञेष्वेव समाहिता ।
यज्ञा वेदेष्वधीनाश्च वेदा ब्राह्मणसंयुताः ।
इदं तु सकलं द्रव्यं दिवि वा भुवि वा प्रिये ।
यज्ञार्थं विद्धि तत्सृष्टं लोकानां हितकाम्यया ।
एवं विज्ञाय तत्कर्ता सदारः सततं द्विजः ।
प्रेत्यभावे लभेल्लोकान्ब्रह्मकर्मसमाधिना ।
ब्राह्मणेष्वपि तद्ब्रह्म नित्यं देवि समाहितम् ।
तस्माद्विप्रैर्यथाशास्त्रं विधिदृष्टेन कर्मणा ।
यज्ञकर्म कृतं सर्वं देवता अभितर्पयेत् ।
ब्राह्मणाः क्षत्रियाश्चैव यज्ञार्हाः प्रायशः स्मृताः ।
अग्निष्टोमादिभिर्यज्ञैर्वेदेषु परिकल्पितैः ।
सुशुद्धैर्यजमानैश्च ऋत्विग्भिश्च यथाविधि ।
शुद्धैर्द्रव्योपकरणैर्यष्टव्यमिति निश्चयः ।
तथा कृतेषु यज्ञेषु देवानां तोषणं भवेत् ।

3400) D_{10} $T_{2,3}$ G -हारिणां (for -ता°). — (L. 3401) T_2 विमोक्षितः (for °क्षणम्). — (L. 3402) $G_{1,3,4}$ M_4 नरः (for पुनः). — (L. 3404) D_{10} $T_{2,3}$ $M_{1,4}$ प्रदानात्तु (for °ता च). — (L. 3407) T_1 प्राप्य (for प्रेत्य). — (L. 3410) D_{10} T G पुनः (for नरः). — T_1 om. line 3411. — (L. 3414) D_{10} $T_{2,3}$ G दान-; T_1 दानात् (for दाता). — (L. 3415) G कथं (for कृतं). G_4 तावत् (for या°). D_{10} T G M_4 तल् (for यल्). — (L. 3416) D_{10} T_3 $G_{2,4}$ देव-; T_2 शंस (for वद). T_2 G_4 हि मे (for महत्). — T_1 महेशः (for °श्वरः). — (L. 3418) D_{10} T G दानं षड्गुणयुक्तं तु (T_2 G_4 °संयुक्तं) (for the prior half). — (L. 3420) D_{10} T_2 बलं (for कुलं). D_{10} यथागमं; T_2 तथाकृतं (for °गमम्). — (L. 3421) T_1 चोत्तमो (for सप्तधा). T_2 M_4 मानुष्ये; $G_{1,3}$ M_{1-3} मनुष्ये (for मानुष्यं). T_1 लभते (for फलति). — (L. 3422) D_{10} $T_{2,3}$ G देयम् (for मे स्याद्). — (L. 3423) G_4 तु दत्तं (for दत्तं तत्). T_2 यत्र दत्तं सदा येन (for the prior half). T_2 तत् (for तु). — (L. 3424) D_{10} $G_{2,4}$ तेपि (for देवि). T_2 [ऽ]प्युक्तं (for दाने). — Colophon. — *Adhy. name* : D_{10} $T_{2,3}$ M_4 उमामहेश्वरसंवादः; M_{1-3} उमामहेश्वरसंवादे नानादानफलोपदेशः. — *Adhy. no.* : D_{10} T_2 $G_{2,4}$ 219; T_1 212; T_3 218; $G_{1,3}$ M_1 213; $M_{2,3}$ 214; M_4 211. — T_1 महेशः (for °श्वरः). — (L. 3427) D_{10} $T_{1,2}$ $G_{1,3,4}$ पूजाया ($G_{1,3,4}$ °यां); G_2 पूजाथ (for संपूजा). T_1 यज्ञ इत्युच्यते बुधैः (for the post. half). — G_2 om. lines 3428–3432. — (L. 3428) D_{10} T $G_{1,3,4}$ M_4 [अ]धीताश्च (for °नाश्च). — (L. 3432) T_3 भवेल् (for लभेल्). — (L. 3433) D_{10} $T_{2,3}$ G [ए]व (for [अ]पि). G_3 ब्रह्मन् (for ब्रह्म). T_1 ब्राह्मणेनापि तत्कर्म; M_4 °णेष्वेव तान्ब्रह्मन् (for the prior half). — (L. 3436) D_{10} T_3 G यज्ञार्थं (for °र्हाः). T_1 om. from the post. half of line 3437 up to the prior half of line 3438. — (L. 3438) $G_{3,4}$ ऋत्विग्भ्यश्च (for °ग्भिश्च). — (L. 3439) $G_{3,4}$ M_4 शुद्धैर्यज्ञोपकरणैर् (for the prior half). — (L. 3440) G_4 पोषणं (for तो°). — M_3 om. lines 3441–3442. — (L. 3441) D_{10} T_3 $G_{2,4}$ सर्वदेवेषु; $G_{1,3}$ देवि देवेषु; $M_{1,2}$ देवसत्त्वेषु (for °संघेषु). T_2 $G_{1,3}$ $M_{1,2}$ यष्टा (for यज्ञा). — G_3 reads line 3442 twice. — G_1 ins. after line 3442 ; G_3 after the first occurrence of line

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तुष्टेषु देवसंघेषु यज्वा यज्ञफलं लभेत् ।
देवाः संतोषिता यज्ञैर्लोकान्संवर्धयन्त्युत ।
उभयोर्लोकयोर्भूतिर्देवि यज्ञैः प्रदृश्यते ।
तस्माद्यज्वा दिवं गत्वा अमरैः सह मोदते ।
नास्ति यज्ञसमं दानं नास्ति यज्ञसमो निधिः ।
सर्वधर्मसमुद्देशो देवि यज्ञे समाहितः ।
एषा यज्ञकृता पूजा लौकिकीमपरां शृणु ।
देवसत्कारमुद्दिश्य क्रियन्ते लौकिकोत्सवाः ।
देवगोष्ठान्हि संस्कृत्य चोत्सवं यः करोति वै ।
यागान्देवोपहारांश्च शुचिर्भूत्वा यथाविधि ।
देवान्संतोषयित्वा स देवि धर्ममवाप्नुयात् ।
गन्धमाल्यैश्च विविधैः परमान्नेन धूपनैः ।
बहुभिः स्तुतिभिश्चैव स्तुवन्तः प्रयता नराः ।
नृत्तैर्वाद्यैश्च गान्धर्वैरन्यैर्दृष्टिविलोभनैः ।
देवसत्कारमुद्दिश्य कुर्वते ये नरा भुवि ।
तेषां भक्तिकृतेनैव सत्कारेणाभिपूजिताः ।
तथैव तोषं संयान्ति देवि देवास्त्रिविष्टपे ।
मानुषैरपरैर्वापि शुचिभिस्तत्परायणैः ।
ब्रह्मचर्यपरैरेतत्कृतं धर्मफलं भवेत् ।
केवलैः स्तुतिभिर्देवि गन्धमाल्यसमायुतैः ।
प्रयतैः शुद्धगात्रैस्तु शुद्धदेशे सुपूजिताः ।
संतोषं यान्ति वै देवा भक्तैः संपूजितास्तथा ।
देवान्संतोषयित्वैव देवि धर्ममवाप्नुयात् ।

उमा ।

त्रिविष्टपस्था वै देवा भूमौ मानुषचेष्टितम् ।
कथं ज्ञास्यन्ति विविधं तन्मे शंसितुमर्हसि ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि यथा तैर्विद्यते प्रिये ।
प्राणिनां तु शरीरेषु अन्तरात्मा व्यवस्थितः ।
आत्मानं परमं देवमिति विद्धि शुभेक्षणे ।
आत्मा मनोव्यवस्थानात्सर्वं वेत्ति शुभाशुभम् ।
आत्मैव देवास्तद्विद्धुरव्यग्रमनसः कृतम् ।
सतां मनोव्यवस्थानाच्छुभं भवति वै नृणाम् ।
तस्माद्देवाभिसंपूजा पितृपूजा तथैव च ।
यज्ञाश्च धर्मकार्याणि गुरुपूजाश्च शोभने ।
शुद्धगात्रैर्वृत्तयुक्तैस्तन्मयैस्तत्परायणैः ।
एवं व्यवस्थितैर्नित्यं कर्तव्यमिति निश्चयः ।
एवं कृत्वा शुभाकाङ्क्षी परत्रेह च मोदते ।

3442 :

आयुष्कामो द्विजो देवि भूतिकामोऽथ वा पुनः ।
सर्वदा धारयेद्ब्रह्म मोक्षकामी च यो नरः ।

[(L. 2) G_1 ध्यान- (for मोक्ष-).]

— (L. 3443) D_{10} $T_{2.3}$ $G_{2.4}$ प्रीतिर् (for भूतिर्). D_{10} $T_{2.3}$ $G_{1.3.4}$ यज्ञे (for यज्ञैः). T_1 देवि यज्ञे प्रतिष्ठिता (for the post. half). — T_1 om. lines 3444–3446. — (L. 3444) $G_{1.3}$ यागाद् (for यज्वा). — (L. 3445) T_3 $G_{1.3}$ M_4 विधिः (for निधिः). — (L. 3448) D_{10} $T_{2.3}$ क्रियते लौकिकोत्सवः (for the post. half). — (L. 3449) D_{10} $T_{2.3}$ $G_{2.4}$ -गोष्ठेषि-; M_2 (*inf. lin.* as above). $_4$ -गोष्ठानि (for -गोष्ठान्हि). M_1 संस्तुत्य (for संस्कृत्य). T_1 देवायतनमुद्दिश्य; $G_{1.3}$ देवदेहांश्च संस्थाप्य (for the prior half). $G_{1.3}$ हि (for च). G_3 यः; G_4 च (for वै). — (L. 3450) T_1 कुर्वन्; T_3 M_{1-3} योगान्; $G_{1.3}$ यागं (for यागान्). — (L 3451) T_1 [अ]पि; G_2 [अ]थ (for स). T_2 देवधर्मं समाप्नुयात् (for the post. half). — (L. 3453) D_{10} T_2 G बह्वीभिः (for बहुभिः). D_{10} $T_{2.3}$ G स्तुवद्भिः प्रयतैर्नरैः; T_1 लौकिकैश्च तथापरैः (for the post. half). — (L. 3455) T_1 नराः कुर्वन्ति ये भुवि (for the post. half). — (L. 3456) D_{10} T G [ए]व (for [अ]भि-). T_1 -पूजया (for -पूजिताः). — T_1 om. line 3457. — (L. 3457) D_{10} $T_{2.3}$ G तेन (for तथा). T_3 दिवि; G_1 देव- (for देवि). — (L. 3458) T_1 च (for वा). D_{10} $T_{2.3}$ G मानुषैश्चो($G_{1.3}$ °रु)पका(T_3 $G_{1.3}$ °चा)रैर्वा (for the prior half). T_1 स्तुतिभिस्तु (for शुचि°). — After line 3458, T_1 ins. :

देवास्तोषं यथा यान्ति ब्रह्मलोकं ददत्यपि ।

— T_1 om. line 3459. — (L. 3459) D_{10} T_3 G M_4 लभेत् (for भवेत्). — (L. 3460) D_{10} $T_{2.3}$ G_3 -समाहितैः; T_1 -समन्वितैः (for -समायुतैः). — (L. 3461) T_3 सुपूजितैः (for °जिताः). — (L. 3462) G_4 प्राप्य (for यान्ति). D_{10} $T_{2.3}$ G ते (for वै). T_1 देवि (for देवा). T_1 सदा (for तथा). — (L. 3464) D_{10} $T_{2.3}$ G भूमौ देवा (T_3 °व) (by transp.). — (L. 3465) D_{10} $T_{2.3}$ G विधिवत्; T_1 वै देव (for विविधं). — T_1 महेशः (for °श्वरः). — T_1 om. line 3466. — (L. 3466) D_{10} ते; G_3 वै (for तद्). T_3 ज्ञायते (for विद्यते). — (L. 3467) T_1 शरीरेस्मिन् (for °रेषु). — (L. 3468) T_1 तमेव परमात्मानम् (for the prior half). — (L. 3470) G_4 ते (for तद्). T_1 देवताश्च शरीरस्था (for the prior half). D_{10} $T_{1.3}$ G -मनसा (for °सः). — After line 3470, T_1 ins :

ज्ञास्यन्ति सकलं धर्ममिति विद्धि शुभेक्षणे ।

— (L. 3472) D_{10} T_3 $G_{1.3.4}$ -संपूज्या (for °जा). D_{10} T G ब्राह्मणानां (for पितृपूजा). — After line 3472, T_1 ins. :

ब्राह्मणे पूजिते चैव प्रीताः स्युः सर्वदेवताः ।

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अन्यथा मन आवेश्य कृतं न फलति प्रिये ।
ऋतेऽपि तु मनो देवि अशुभं फलति ध्रुवम् ।
Colophon.

उमा ।

पितृमेधः कथं देव तन्मे शंसितुमर्हसि ।
सर्वेषां पितरः पूज्याः सर्वसंपत्प्रदायिनः ।

महेश्वरः ।

पितृमेधं प्रवक्ष्यामि यथावत्तन्मनाः शृणु ।
देशकालौ विधानं च तत्क्रियायाः शुभाशुभम् ।
लोकेषु पितरः पूज्या देवतानां च देवताः ।
शुचयो निर्मलाः पुण्या दक्षिणां दिशमाश्रिताः ।
यथा वृष्टिं प्रतीक्षन्ते भूमिष्ठाः सर्वजन्तवः ।
पितरश्च तथा लोके पितृमेधं शुभेक्षणे ।
तस्य देशाः कुरुक्षेत्रं गया गङ्गा सरस्वती ।
प्रभासं पुष्करं चेति तेषु दत्तं महाफलम् ।
तीर्थानि सरितः पुण्या विविक्तानि वनानि च ।
नदीनां पुलिनानीति देशाः श्राद्धस्य पूजिताः ।
मघाप्रोष्ठपदौ मासौ श्राद्धकर्मणि पूजितौ ।
पक्षयोः कृष्णपक्षश्च पूर्वपक्षात्प्रशस्यते ।
अमावास्यां त्रयोदश्यां नवम्यां प्रतिपत्सु च ।
तिथिष्वेतासु तुष्यन्ति दत्तेनेह पितामहाः ।
पूर्वाह्णे शुक्लपक्षे वा रात्रौ जन्मदिनेषु वा ।
युग्मेष्वहःसु च श्राद्धं न च कुर्वीत पण्डितः ।
एष कालो मया प्रोक्तः पितृमेधस्य पूजितः ।
यस्मिन्वा ब्राह्मणं पात्रं पश्येत्कालः स च स्मृतः ।
अपाङ्क्त्या द्विजा वर्ज्या ग्राह्यास्ते पङ्क्तिपावनाः ।
पूजयेद्यदि पापिष्ठाञ्श्राद्धेषु नरकं व्रजेत् ।
वृत्तश्रुतकुलोपेतान्सकलत्रान्गुणान्वितान् ।
तदहर्न्श्रोत्रियान्विद्धि ब्राह्मणाननुजः शुभे ।
एतान्निमन्त्रयेद्विद्वान्पूर्वेद्युः प्रातरेव वा ।
तत्र श्राद्धक्रियां पश्चादारभेत यथाविधि ।
त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः ।
त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् ।
कुतपस्य च लोमानि कुशा दर्भास्तिला मधु ।
नीलशाकं गजच्छाया पवित्रं श्राद्धकर्मसु ।
तिलानवकिरेत्तत्र नानावर्णान्समन्ततः ।
अशुद्धं पितृयज्ञेषु तिलैः शुध्यति शोभने ।
नीलकाषायवस्त्रं च भिन्नकर्णं नवव्रणम् ।
हीनाङ्गमशुचिं वापि वर्जयेत्तत्र दूरतः ।
कुक्कुटांश्च वराहांश्च नग्नं क्लीबं रजस्वलाम् ।
आयसं त्रपु सीसं च श्राद्धकर्मणि वर्जयेत् ।
मांसैः प्रीणन्ति पितरो मुद्गमाषयवैरिह ।
शशरौरवमांसेन षण्मासं तृप्तिरिष्यते ।
संवत्सरं च गव्येन हविषा पायसेन च ।
वार्ध्राणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ।
आनन्त्याय भवेद्दत्तं खड्गमांसं पितृक्षये ।
पायसं सतिलं क्षौद्रं खड्गमांसेन संमितम् ।
महाशफरिणो मत्स्याश्छागो वा सर्वलोहितः ।

— (L. 3473) D_{10} $T_{2.3}$ $G_{1.2}$ M -पूजा (for -पूज्याश्). — (L. 3474) D_{10} $T_{2.3}$ G M_4 व्रतयुतैस् (for वृत्तयुक्तैस्). — (L. 3476) T_1 स (for [इ]ह). — (L. 3477) G_4 अंजसा (for अन्यथा). — (L. 3478) T_3 कर्म नो (for तु मनो). D_{10} T_2 भवति (for फलति). — Colophon. — *Adhy. name*: D_{10} $T_{2.3}$ G_2 M उमामहेश्वरसंवादः. — *Adhy. no.*: D_{10} T_2 $G_{2.4}$ 220; T_1 213; T_3 219; $G_{1.3}$ M_1 214; $M_{2.3}$ 215; M_4 212. — After the ref., T_3 ins.:

देवदेव जगन्नाथ भगवन्प्राणनायक ।

— (L. 3480) M_{1-3} मर्वे (for सर्वे-). — T_1 महेशः (for °श्वरः). — (L. 3482) T_3 M_3 देशकालं; $G_{2.4}$ °काल- (for °कालौ). — T_1 om. (hapl.) line 3484. — (L. 3485) M_4 वृत्तं (for वृष्टिं). — (L. 3488) G_2 [ए]व (for [इ]ति). $T_{1.2}$ $G_{1.3.4}$ महत्फलं (for महाफलम्). — (L. 3490) T_2 वेदाः; M_1 देवाः; M_2 देवि (for देशाः). — (L. 2491) D_{10} $T_{1.3}$ G M_4 माघ- (for मघा-). — (L. 3493) G_3 दशम्यां (for नवम्यां). — (L. 3495) G_3 -दिनेपि (for -दिनेषु). — T_1 om. lines 3499-3500. — (L. 3500) D_{10} $T_{2.3}$ G भोजयेद् (for पू°). M_4 पापिष्ठं (for °ष्ठाञ्). — (L. 3501) T_1 -गुणोपेतान् (for -कुलो°). T_1 द्विजोत्तमान् (for गुणान्वितान्). — T_1 om. line 3502. — (L. 3504) T_1 श्राद्धविधिं (for क्रिया°). — (L. 3507) D_{10} T_2 G कुतपं (T_2 °पः) खड्गपात्रं च; T_1 कालशाकं गजच्छाया (for the prior half). T_3 तिलं (for तिला). — (L. 3508) D_{10} T_2 G काल- (for नील-). — For line 3508, T_1 subst.:

एतानि सुपवित्राणि श्राद्धकर्मसु शोभने ।

— (L. 3510) $G_{1.3}$ -यज्ञं च (for -यज्ञेषु). D_{10} G_4 अशुद्धमपितृकं च; T_2 G_2 °मपवित्रं च; T_3 °द्धं पितृकश्चैव (for the prior half). — (L. 3511) D_{10} $T_{2.3}$ G भिन्नवर्णं; T_1 हीनवर्णं (for भिन्नकर्णं). — (L. 3515) T_1 अपि (for इह). — (L. 3517) T_2 सर्पिषा (for हविषा). — (L. 3518) D_{10} G वाभ्राणसस्य; T_1 वार्धा°; T_3 वाभ्रायणस्य (for वार्ध्राणसस्य). — (L. 3519) T_1 अनंताय भवंत्वतु (for the prior half). — T_1 om. line 3521. — (L. 3521) D_{10} $T_{2.3}$ G M_4 -शकलिनो (for -शफरिणो). — (L. 3522) T_2 G_{1-3} कालशाकमितीत्येव; G_4 कालस्य शाकमित्येतत् (for the prior half). D_{10} $T_{2.3}$ G प्रकल्पितं (for प्रकीर्तितम्). — (L. 3523) T_3 परि- (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कालशाककमित्येव तदानन्त्यं प्रकीर्तितम् ।
सापूपं सामिषं स्निग्धमाहारमुपकल्पयेत् ।
उपकल्प्य तदाहारं ब्राह्मणानर्चयेत्ततः ।
श्मश्रुकर्मशिरःस्नातान्समारोप्यासनं क्रमात् ।
सुगन्धमाल्याभरणैः स्रग्भिरेतान्विभूषयेत् ।
अलंकृतोपविष्टांस्तान्पिण्डावापं निवेदयेत् ।
ततः प्रस्तीर्य दर्भाणां प्रस्तरं दक्षिणामुखः ।
तत्समीपेऽग्निमिद्ध्वा च स्वधां च जुहुयात्ततः ।
समीपे त्वग्नीषोमाभ्यां पितृभ्यो जुहुयात्तथा ।
ततो दर्भेषु पिण्डांस्त्रीन्निर्वपेद्दक्षिणामुखम् ।
अपसव्यमपाङ्गुष्ठं नामधेयपुरस्कृतम् ।
एतेन विधिना दत्तं पितॄणामक्षयं भवेत् ।
ततो विप्रान्यथाकामं पूजयेन्नियतः शुचिः ।
सदक्षिणं ससंभारं यथा तुष्यन्ति ते द्विजाः ।
यत्र तत्क्रियते कर्म पैतृकं ब्राह्मणान्प्रति ।
तत्सर्वमखिलं कुर्याद्वैश्वदेवस्य पूर्वकम् ।
अश्रूञ्च पातयेत्तत्र न जल्पेन्न जपेन्मिथः ।
नियम्य वाचं देहं च श्राद्धकर्म समारभेत् ।
ततो निर्वपणे वृत्ते तान्पिण्डांस्तदनन्तरम् ।
ब्राह्मणोऽग्निरजो गौर्वा भक्षयेदप्सु वा क्षिपेत् ।
पत्नीं वा मध्यमं पिण्डं पुत्रकामो हि प्राशयेत् ।
आधत्त पितरो गर्भं कुमारं पुष्करस्रजम् ।
तृप्तानुत्थाप्य तान्विप्रानन्नशेषं निवेदयेत् ।
तच्छेषं बहुभिः पश्चात्सभृत्यो भक्षयेन्नरः ।
एष प्रोक्तः समासेन पितृयज्ञः सनातनः ।
पितरस्तेन तुष्यन्ति कर्ता च फलमाप्नुयात् ।
अहन्यहनि वा कुर्यान्मासे मासेऽथ वा पुनः ।
संवत्सरस्य द्विः कुर्याच्चतुर्वापि च शक्तितः ।
दीर्घायुश्च भवेत्स्वस्थः पितृमेधेन मानवः ।
सपुत्रो बहुभृत्यश्च प्रभूतधनधान्यवान् ।
श्राद्धदः स्वर्गमाप्नोति निर्मलं विविधाद्भुतम् ।
अप्सरोगणसंघुष्टं विरजस्कमनन्तकम् ।
श्राद्धानि पुष्टिकामा ये प्रकुर्वन्ति च पण्डिताः ।
तेषां पुष्टिं प्रजाश्चैव दास्यन्ति पितरः सदा ।
धन्यं यशस्यमायुष्यं स्वर्ग्यं शत्रुविनाशनम् ।
कुलसंधारणं चेति श्राद्धमाहुर्मनीषिणः ।
उमा ।
भगवन्देवदेवेश मृतास्ते भुवि जन्तवः ।
नानाजातिषु जायन्ते शीघ्रं कर्मवशात्पुनः ।
पितरस्त्विति ते तत्र कथं तिष्ठन्ति देववत् ।
पितॄणां कतमो देशः पिण्डानश्नन्ति ते कथम् ।
अन्ने दत्ते मृतानां तु कथमाप्यायनं भवेत् ।
एवं मया संशयितं भगवञ्छेत्तुमर्हसि ।
नारदः ।
एतद्विरुद्धं रुद्राण्यां पृच्छन्त्यां परिषद्भृशम् ।
बभूव सर्वा मुदिता श्रोतुं परमकं हि तत् ।

उप-). — T_1 om. line 3525. — (L. 3526) G_2 सु- (for वि-). — T_1 om. (hapl.) line 3527. — (L. 3527) G_2 पिंडात्रापान् (for °पं). — (L. 3528) T_1 प्रकीर्य (for प्रस्तीर्य). D_{10} T G प्रस्तरं दाक्षिण मुखं (for the post. half). — (L. 3529) G_2 स्वाहां (for स्वधां). — After line 3529, T_2 M_4 read line 3531 repeating it in its proper place. — T_1 om. (hapl.) line 3530. — (L. 3530) $T_{2.3}$ G_3 M_3 अग्निषोमाभ्यां (for त्वग्नी°). G_3 पैतृकं (for पितृभ्यो). — (L. 3531) D_{10} T_2 (second time) G तथा ; T_3 तदा (for ततो). T_1 विस्तीर्णं (for पिण्डांस्त्रीन्). $T_{1.2}$ (both times).$_3$ $G_{1.3}$ $M_{1-3.4}$ (both times) निव(T_1 M_3 °र्वे- ; T_3 °क्षि)पेद्दक्षिणामुखः (for the post. half). — (L. 3532) T_1 अपां मुष्टिं (for अपाङ्गुष्ठं). — (L. 3534) D_{10} T G M_4 यथाशक्ति (for °कामं). — (L. 3536) D_{10} T G M_4 तत्र (for (for कर्म). D_{10} T G M_4 om. (hapl.) from the post. half up to the prior half of line 3538. — (L. 3538) D_{10} $T_{1.3}$ G $M_{1.2}$ जल्पं (for जल्पेन्). M_{1-3} हसेन् (for जपेन्). — (L. 3539) T_1 M_4 समाचरेत् (for °रभेत्). — (L. 3540) T_1 ततो दर्भेषु निस्तीर्णांस् (for the prior half). — (L. 3542) $T_{1.3}$ पुत्र-

कामा (for °कामो). D_{10} T_3 G [ऽ]पि- (for हि). — (L. 3547) T_1 तृप्यंति (for तुष्यन्ति). — (L. 3548) T_1 [ऽ]पि वा ; M_3 यथा (for ऽथ वा). — (L. 3549) T_2 D_{10} $G_{3.4}$ संवत्सरं द्विः कुर्याच्च ; T_1 °त्सरं तथा कुर्याच् ; T_3 °त्सरेऽथ वा कुर्याच् ; $G_{1.3}$ °त्सरं द्विजः कुर्याच् (for the prior half). T_1 चातुर्मास्ये (for चतुर्वापि). D_{10} $T_{2.3}$ G स्व- (for च). — (L. 3550) T_1 -यज्ञेन (for -मेधेन). G_4 वा पुनः (for मानवः). — (L. 3551) T सुपुत्रो (for स°). — (L. 3552) G_{1-3} M $T_{2.3}$ बहुपुत्रश् (for °भृत्यश्). D_{10} T G M_4 निर्मलं विविधात्मकं श्राद्धकृत् (for °दः). D_{10} T G M_4 निर्मलं विविधात्मकं (for the post. half). — T_1 om. (hapl.) line 3553. — (L. 3553) D_{10} T_3 G M_1 अनंतरं (for अनन्तकम्). — (L. 3554) D_{10} $T_{2.3}$ $G_{2.4}$ -कामा वै ; $G_{1.3}$ -कारणि (for -कामा ये). D_{10} $T_{2.3}$ G ये (G_2 यैः) प्रकुर्वंति पंडिताः (for the post. half). — (L. 3555) $T_{1.3}$ G प्रजां (for प्रजाश्). — (L. 3557) D_{10} T_3 G -संधारकं (for °रणं). M_4 — (L. 3560) D_{10} $T_{2.3}$ G स्वस्ति (for त्विति). पुनरस्त्विति ते तत्र (for the prior half). — (L. 3561) T_1 दातॄणां (for पि°). — (L. 3563) G_4 एतन् (for एवं). T_1 एतं मे सदयं देव (for the prior half). D_{10} $T_{2.3}$ G M_4 वक्तुम् (for छेत्तुम्). — T_1 om. the ref.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

महेश्वरः ।

स्थाने संशयितं देवि शृणु कल्याणि तत्त्वतः ।
गुह्यानां परमं गुह्यं खिलानां परमं खिलम् ।
यथा देवगणा देवि तथा पितृगणाः प्रिये ।
दक्षिणस्यां दिशि शुभे सर्वे पितृगणाः स्थिताः ।
प्रेतानुद्दिश्य या पूजा क्रियते मानुषैरिह ।
तेन तुष्यन्ति पितरो न प्रेताः पितरः स्मृताः ।
उत्तरस्यां यथा देवा रमन्ते यज्ञकर्मभिः ।
दक्षिणस्यां तथा ते च तुष्यन्ति विविधैर्मखैः ।
द्विविधं क्रियते कर्म हव्यकव्यसमाश्रितम् ।
तयोर्हव्यक्रिया देवान्कव्यमाप्याययेत्पितॄन् ।
प्रसव्यं मङ्गलैर्द्रव्यैर्हव्यकर्म विधीयते ।
अपसव्यममङ्गल्यैः कव्यं चापि विधीयते ।
सदेवासुरगन्धर्वाः पितॄनभ्यर्चयन्ति च ।
आप्यायिताश्च ते श्राद्धैः पुनराप्याययन्ति तान् ।
अनिष्ट्वा च पितॄन्पूर्वं यः क्रियां प्रकरोति चेत् ।
रक्षांसि च पिशाचाश्च फलं भोक्ष्यन्ति तस्य तत् ।
हव्यकव्यक्रिया तस्मात्कर्तव्या भुवि मानवैः ।
कर्मक्षेत्रं हि मानुष्यं तदन्यत्र न विद्यते ।
कव्येन संततिर्दृष्टा हव्ये भूतिः पृथग्विधा ।
इति ते कथितं देवि देवगुह्यं सनातनम् ।

Colophon.

उमा ।

एवं कृतस्य धर्मस्य श्रोतुमिच्छाम्यहं प्रभो ।
प्रमाणं फलमानानां तन्मे शंसितुमर्हसि ।

महेश्वरः ।

प्रमाणकल्पनां देवि दानस्य शृणु भामिनि ।
यत्सारस्तु नरो लोके तद्दानं चोत्तमं स्मृतम् ।
सर्वदानविधिं प्राहुस्तदेव भुवि शोभने ।
प्रस्थं सारं दरिद्रस्य शतं कोटिधनस्य च ।
प्रस्थसारस्तु तत्प्रस्थं ददन्महदवाप्नुयात् ।
कोटिसारस्तु तां कोटिं ददन्महदवाप्नुयात् ।
उभयं तन्महत्तच्च फलेनैव समं स्मृतम् ।
धर्मार्थकामभोगेषु शक्त्यभावं तु मध्यमम् ।
स्वद्रव्यादतिहीनं तु तद्दानमधमं स्मृतम् ।
शृणु दत्तस्य वै देवि पञ्चधा फलकल्पनम् ।
आनन्त्यं च महच्चैव समं हीनं च पातकम् ।
तेषां विशेषान्वक्ष्यामि शृणु देवि समाहिता ।
दुस्त्यजस्य च वै दानं पात्र आनन्त्यमुच्यते ।
दानं षड्गुणयुक्तं तु महदित्यभिधीयते ।
यथाश्रद्धं तु वै दानं यथार्हं सममुच्यते ।
गुणतस्तु तथा हीनं दानं हीनमिति स्मृतम् ।
दानं पातकमित्याहुः षड्गुणानां विपर्यये ।
देवलोके महत्कालमानन्त्यस्य फलं विदुः ।

— T_1 om. lines 3564–3574. — (L. 3564) D_{10} $T_{2.3}$ G पृच्छंत्यां रुद्राण्यां (by transp.). M_4 पुरुषं (for परिषद्). — (L. 3565) D_{10} $T_{2.3}$ $G_{2.4}$ श्रोतुं हि (T_3 वै) परमं हितं ; $G_{1.3}$ श्रोतुं तत्परमं हि यत् (for the post. half). — (L. 3567) D_{10} $T_{2.3}$ G हितानां परमं हितं (for the post. half). — (L. 3570) G_2 यत्पूतं (for या पूजा). — (L. 3573) D_{10} $T_{2.3}$ G M_4 देवि (for ते च). — (L. 3574) $G_{1.3}$ हव्यकव्यं समाहितं (for the post. half). — (L. 3575) D_{10} T G आप्यायते (for °ययेत्). — (L. 3576) M असव्यं (for प्र°). T_1 दिव्यैर् (for द्रव्यैर्). T_1 हव्यं कव्यं ; T_3 हव्यं कर्म (for हव्यकर्म). — $T_{1.3}$ om. (hapl.) line 3577. — (L. 3578) G_2 पितॄनभ्यर्चयंस्तथा (for the post. half). — (L. 3579) D_{10} G_{1-3} आप्यायं(G_1 °य)ते (for °यिताश्च). T_1 ये (for ते). $T_{2.3}$ G_4 आप्यायंते च तैः श्राद्धैः (for the prior half). — (L. 3580) M_4 अग्निष्वात्त- (for अनिष्ट्वा च). T_1 पूर्वान् (for पूर्वं). M_{1-3} यां (for यः). — (L. 3581) T_1 वै (for तत्). — (L. 3582) D_{10} T G -क्रियास् (for -क्रिया). D_{10} T $G_{2.4}$ मानुषैः (for मानवैः). — (L. 3583) T_1 कर्मक्षेत्रे (for °क्षेत्रं). — (L. 3584) T_2 M_3 हव्यैर् (for हव्ये). — Colophon. — *Sub-parvan :* $M_{2.3}$ दानधर्म. — *Adhy. name :* D_{10} G_{1-3} उमामहेश्वरसंवादे हव्यकव्यमाहात्म्यकथनं ; T_2 M_4 उमामहेश्वरसंवादः. — *Adhy. no. :* D_{10} T_2 $G_{2.4}$ 221 ; T_1 214 ; T_3 223 ; $G_{1.3}$ M_1 215 ; $M_{2.3}$ 216 ; M_4 213. — (L. 3587) T_1 प्रमाणं फलदानानां ; M_4 प्रमाणं फलदानं तत् (for the prior half). — T_1 महेशः (for °श्वरः). — (L. 3588) D_{10} $T_{2.3}$ G प्रमाणक(D_{10} °णं क)ल्पना देवि (for the prior half). — (L 3589) T_3 यत्सारं (for यत्सारस्). — (L 3591) G_2 प्रस्थ- (for प्रस्थं). G_2 शत- (for शतं). — (L 3592) T_3 -सारं (for -सारस्). G_2 सर्वं (for प्रस्थं). — D_{10} T_1 om. (hapl.) line 3593. — (L. 3594) T_1 शतदानस्य तस्यैव (for the prior half). — T_1 om. line 3595. G_2 om. (hapl.) lines 3595–3596. T_2 om line 3596. — (L. 3596) T_3 धर्मतः (for अधमं). — (L. 3599) D_{10} $T_{2.3}$ G विशेषं (for °षान्). — (L. 3600) $T_{2.3}$ G_2 पात्रम् (for पात्र). T_1 चानंत्यम् (for आ°). — (L 3601) M_4 तद्गुण- (for षड्गुण-). — (L. 3602) T_1 दानार्हे (for यथार्हं). — (L. 3605) T_2 महत्कार्यम (for °लम्). — (L. 3606) $G_{1.3}$ यथा (for तथा). D_{10} $T_{2.3}$ G M_{1-3} कालं (for दानं). — (L. 3607) D_{10} $T_{2.3}$ G M_4 तदा ; T_1 यथा (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

महतस्तु तथा दानं स्वर्गलोके तु पूज्यते ।
समस्य तु तथा दानं मानुषं भोगमावहेत् ।
दानं निष्फलमित्याहुर्विहीनं क्रियया शुभे ।
अथ वा म्लेच्छदेशेषु तत्र तत्फलतां व्रजेत् ।
नरकं प्रेत्य तिर्यक्षु गच्छेदशुभदानतः ।

उमा ।

अशुभस्यापि दानस्य शुभं स्याच्च फलं कथम् ।

महेश्वरः ।

मनसा तत्त्वतः शुद्धमनृशंसपुरःसरम् ।
प्रीत्या तु सर्वदानानि दत्त्वा फलमवाप्नुयात् ।
रहस्यं सर्वदानानामेतद्विद्धि शुभेक्षणे ।
अन्यानि सर्वकार्याणि शृणु सद्भिः कृतानि च ।
आरामं देवगोष्ठानि संक्रमाः कूप एव च ।
गोवाटं च तटाकं च सभाः शालाश्च सर्वशः ।
भिक्षुकावसथाश्चैव पानीयं गोतृणानि च ।
व्याधितानां च भैषज्यमनाथानां च भोजनम् ।
अनाथशवसंस्कारस्तीर्थमार्गविशोधनम् ।
व्यसनाभ्यवपत्तिश्च सर्वेषां च स्वशक्तितः ।
एतत्सर्वं समासेन धर्मकार्यमिति स्मृतम् ।
तत्कर्तव्यं मनुष्येण स्वशक्त्या श्रद्धया शुभे ।
प्रेत्यभावे लभेत्पुण्यं नास्ति तत्र विचारणा ।
रूपं सौभाग्यमारोग्यं बलं सौख्यं लभेन्नरः ।
स्वर्गे वा मानुषे वापि तैस्तैराप्यायते हि सः ।

उमा ।

भगवँल्लोकपालेश धर्मस्तु कतिभेदकः ।
दृश्यते चरितः सद्भिस्तन्मे शंसितुमर्हसि ।

महेश्वरः ।

शृणु देवि समुद्देशाद्यानात्वं धर्मसंकटे ।
धर्मा बहुविधा लोके श्रुता वेदमुखोद्भवाः ।
स्मृतिधर्मश्च बहुधा सद्भिराचार इष्यते ।
देशधर्माश्च दृश्यन्ते कुलधर्मास्तथैव च ।
जातिधर्माश्च वै धर्मा गणधर्माश्च शोभने ।
शरीरकालवैषम्यादापद्धर्मश्च दृश्यते ।
एतद्धर्मस्य नानात्वं क्रियते लोकवासिभिः ।
कारणात्तत्र तत्रैव फलं धर्मस्य चेष्यते ।
तत्कारणसमायोगे लभेत्कुर्वन्फलं नरः ।
अन्यथा न लभेत्पुण्यमतदर्हः समादिशन् ।
एवं धर्मस्य नानात्वं फलं कुर्वँल्लभेन्नरः ।
श्रौतः स्मार्तस्तु धर्माणां प्राकृतो धर्म उच्यते ।
इति ते कथितं सर्वं भूयः श्रोतुं किमिच्छसि ।

Colophon.

उमा ।

भगवन्सर्वभूतेश त्रिपुरार्दन शंकर ।
श्रुतं पापकृतं दुःखं यमलोके वरप्रद ।
श्रोतुमिच्छाम्यहं देव नृणां सुकृतकर्मणाम् ।
कथं ते भुञ्जते लोकान्स्वर्गलोके महेश्वर ।

तथा). D_{10} $T_{2.3}$ G मानुष्यं (for °षं). — (L. 3611) T_1 शुभस्य (for शुभं स्याच्). T_3 G_2 transp. फलं and कथं. — T_1 महेशः (for °श्वरः). — (L. 3612) D_{10} $T_{2.3}$ G आनृशंस्य- (T_2 °स्यं) (for अनृशंस-). — (L. 3613) T_1 दत्त्वा तत्फलमाप्नुयात् (for the post. half). — (L. 3614) $G_{1.3.4}$ शुभानने (for शुभेक्षणे). — (L. 3615) D_{10} T G धर्म- (for सर्व-). — G_2 M_4 om. (hapl.) lines 3616–3618. — (L. 3616) D_{10} T $G_{1.3.4}$ आराम- (for °मं). — (L. 3617) D_{10} T $G_{1.3.4}$ गोवाटश्च तटाकश्च (for the prior half). — (L. 3618) D_{10} T $G_{1.3.4}$ पाषंडावसथश्चैव (for the prior half). — (L. 3619) D_{10} T G M_4 पोषणं (for भोजनम्). — (L. 3620) T_1 तीर्थानां मार्गशोधनं (for the post. half). — (L. 3621) T_1 निवारो व्यसनस्यापि (for the prior half). — (L. 3627) $G_{1.3}$ भगवन्देवदेवेश (for the prior half). — (L. 3628) D_{10} $T_{2.3}$ G परितः; T_1 कथितः (for चरितः). — T_1 महेशः (for °श्वरः). — T_1 om. line 3629. — (L. 3630) D_{10} T G M_4 श्रुतिभेद- (for श्रुता वेद-). — (L. 3631) T_1 श्रुति- (for स्मृति-). — (L. 3633) M_4 राज- (for जाति-). — (L. 3634) $G_{1.3}$ -लय- (for

-काल-). T_1 वैधर्म्याद् (for वैषम्याद्). — G_4 om. (hapl.) from the post. half of line 3636 up to the prior half of line 3639. — (L. 3637) T_1 एतत्कारणसंयोगं (for the prior half). — (L. 3638) $G_{1.3}$ भवेत् (for लभेत्). D_{10} $T_{2.3}$ G_{1-3} समाविशेत्; M_{1-3} °विशन्; M_4 °दिशेत् (for °दिशन्). T_1 विहीनः शास्त्रदृष्टितः (for the post. half). — T_1 om. lines 3639–3640. — (L. 3641) D_{10} T_3 देवि (for सर्वं). T_1 $G_{1.3.4}$ M_2 किं भूयः श्रोतुमिच्छसि (for the post. half). — Colophon. — *Sub-parvan* : M_{1-3} दानधर्म. — *Adhy. name* : D_{10} T_3 G_2 उमामहेश्वरसंवादे धर्मसमुच्चयं; T_3 उमामहेश्वरसंवादे हव्यकव्यमाहात्म्यं; M उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} 200; T_1 215; T_2 $G_{2.4}$ 222; T_3 221; $G_{1.3}$ M_1 216; $M_{2.3}$ 217; M_4 214. — (L. 3642) T_1 -लोकेश (for -भूतेश). $G_{2.4}$ भगवन्देवदेवेश (for the prior half). T_1 om. from the post. half up to the prior half of line 3644. D_{10} $T_{2.3}$ G पुरमर्दन शंकर (for the post. half). — (L. 3643) D_{10} $T_{2.3}$ G पापकृतां (for °तं). — (L. 3644) G_3 -कारिणां (for -कर्मणाम्). T_1 नराः सुकृतकर्मिणः (for the post.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कथिताः कीदृशा लोका नृणां सुकृतकारिणाम्।
एतन्मे वद देवेश श्रोतुं कौतूहलं हि मे ।
महेश्वरः ।
शृणु कल्याणि तत्सर्वं यत्त्वमिच्छसि भामिनि ।
विविधाः पुण्यलोकास्ते कर्माकर्मण्यतां गताः ।
मेरुं हि कनकात्मानं परितः सर्वतोदिशम् ।
भद्राश्वः केतुमालश्च उत्तराः कुरवस्तथा ।
जम्बूवनादयः स्वर्गा इत्येते कर्मवर्जिताः ।
तेषु भोगाः स्वयंभूताः प्रदृश्यन्ते यतस्ततः ।
योजनानां सहस्रं तु एकैकं मानमात्रया ।
नित्यपुष्पफलोपेतास्तत्र वृक्षाः समन्ततः ।
आसक्तवस्त्राभरणाः सर्वे कनकसंनिभाः ।
द्विरेफाश्चाण्डजास्तत्र प्रवालमणिसंनिभाः ।
विचित्राश्च मनोज्ञाश्च कूजितैः शोभयन्ति तान् ।
कुशेशयवनैश्छन्ना नलिन्यश्च मनोरमाः ।
तत्र वान्त्यनिला नित्यं दिव्यगन्धाः सुखावहाः ।
सर्वे चाम्लानमाल्याश्च विरजोम्बरसंवृताः ।
एवं बहुविधा देवि दिवि भोगाः सुखावहाः ।
स्त्रियश्च पुरुषाश्चैव सर्वे सुकृतकारिणः ।
रमन्ते तत्र चान्योन्यं कामरागसमन्विताः ।
दिव्यभूषणसंयुक्ता दिव्यगन्धसमन्विताः ।
मनोरमा महाभागाः सर्वे ललितकुण्डलाः ।
एवं तत्रगता मर्त्याः प्रमदाः प्रियदर्शनाः ।
नानाभावसमायुक्ता यौवनस्थाः सदैव तु ।
कमनीयाः कामयुताः कामज्ञा ललितास्तथा ।
मनोनुकूला मधुरा भोगिनामुपकल्पिताः ।
प्रमदाश्चोद्भवन्त्येव स्वर्गलोके यथा तथा ।
एवंविधाः स्त्रियश्चात्र पुरुषाश्च परस्परम् ।
रमन्ते चेन्द्रियैः स्वस्थैः शरीरैर्भोगसंस्कृतैः ।
कामहर्षौ गुणावास्तां नान्ये क्रोधादयः प्रिये ।
क्षुत्पिपासा न चास्त्यत्र गात्रक्लेशाश्च शोभने ।
सर्वतो रमणीयश्च सर्वर्तुकुसुमान्वितम् ।
यावत्पुण्यफलं तावद्रमन्ते तत्र संगताः ।
निरन्तरं भोगयुता रमन्ते स्वर्गवासिनः ।
तत्र भोगान्यथायोगं भुक्त्वा पुण्यक्षयात्पुनः ।
नश्यन्ति जायमानास्ते शरीरैः सहसा प्रिये ।
स्वर्गलोकात्परिभ्रष्टा जायन्ते मानुषे पुनः ।
पूर्वपुण्यावशेषेण विशिष्टाः संभवन्ति ते ।
एषा स्वर्गगतिः प्रोक्ता पृच्छन्त्यास्तव भामिनि ।
अत ऊर्ध्वं पदान्यष्टौ कर्मण्यानि शृणु प्रिये ।
भोगयुक्तानि पुण्यानि उच्छ्रितानि परस्परम् ।
विद्याधराः किंपुरुषा यक्षगन्धर्वकिंनराः ।
अप्सरो दानवा देवा यथाक्रममुदाहृताः ।
तेषु स्थानेषु जायन्ते प्राणिनः पुण्यकर्मिणः ।

---

half). — D_{10} G_{3} om. (hapl.) lines 3645–3646. — (L. 3645) M भोगान् (for लोकान्). — (L. 3646) T_{1} कति ते (for कथिताः). M_{4} लोके (for लोका). — T_{1} महेशः (for °श्वरः). — (L. 3648) D_{10} $T_{2,3}$ G शोभने (for भामिनि). — T_{1} om. line 3649. — (L. 3652) T_{1} चैव (for स्वर्गा). T_{1} उच्यंते (for इत्येते). — T_{1} om. (hapl.) line 3653. — (L. 3653) D_{10} $T_{2,3}$ $G_{2,4}$ भूत्वा; $G_{1,3}$ M_{4} भूताः (for भोगाः). — (L. 3655) T_{1} transp. the prior half and the post. half. D_{10} $T_{2,3}$ G_{1-3} नित्यं (for नित्य-). — (L. 3659) D_{10} $T_{2,3}$ G -वन- (for -वनैश्). — (L. 3660) D_{10} $T_{2,3}$ $G_{2,4}$ वात्यनिलो (for वान्त्यनिला). D_{10} T G दिव्यगंधसु(T_{3} °धः सु)खावहः (for the post. half). — G_{4} om. (hapl.) lines 3661–3662. — (L. 3662) $G_{1,3}$ M_{4} दिव्यभोग- (for दिवि भोगाः). T_{1} देवभोगाः समंततः (for the post. half). — (L. 3664) T_{1} एवं ते (for रमन्ते). — D_{10} T G om. (hapl.) line 3665. — (L. 3666) D_{10} मनोहरा (for °रमा). — G_{3} reads line 3667 twice. — (L. 3667) D_{10} $T_{2,3}$ G स्थिता (for -गता). — (L. 3668) G_{1-3} ताः (for तु). — (L. 3669) D_{10} $T_{2,3}$ G युवत्यः कल्पितास्तत्र (for the prior half). G_{1-3} मनोज्ञा; G_{4} कालज्ञा (for काम°). T_{1} कामजा ललनास्तथा (for the post. half). — T_{1} om. (hapl.) lines 3670–3671. — (L. 3672) M_{1-3} तत्र (for चात्र). — (L. 3674) T_{1} -हर्ष- (for -हर्षौ). D_{10} $T_{2,3}$ G कामहर्ष(T_{2} °क्रोध)गुणाभ्यस्ता (for the prior half). — (L. 3675) T_{2} च नास्त्यत्र; M_{1-3} -परिक्लेशा; M_{4} न संत्यत्र (for न चास्त्यत्र). T_{1} क्षुत्पिपासे न संत्यत्र (for the prior half). T_{1} M_{4} परि- (for गात्र-). M_{1-3} न संत्यत्र शुभानने (for the post. half). — (L. 3676) D_{10} $T_{1,2}$ G_{2} रमणीयं (for °यश्). D_{10} T G_{3} M_{4} सर्वत्र (for सर्वर्तु-). $G_{1,3}$ सर्वत्र कुसुमावृतः (for the post. half). — (L. 3677) G_{1-3} बहु (for तत्र). D_{10} T_{2} G_{4} दृश्यं(G_{4} दीव्यं)ते तेषु संगताः (for the post. half). — (L. 3679) D_{10} G_{2} भूतान् (for भोगान्). — (L. 3680) T_{3} शरीरैः सह भोगिनः (for the post. half). — (L. 3683) G_{1-3} एषां तु स्वर्गतिः प्रोक्ता (for the prior half). — (L. 3684) T_{1} प्रवक्ष्यामि (for पदान्यष्टौ). D_{10} T_{2} G सुकर्माणि (for कर्मण्यानि). — (L. 3685) G_{2} पुरःसरं (for परस्परम्). — (L. 3687) T_{1} om. from the post. half up to the prior half of line 3692. T_{2} $G_{1,3}$ [illegible]मम्; T_{3} -क्रतुम् (for -क्रमम्).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तेषामपि च ये लोकाः स्वर्गलोकोपमाः स्मृताः ।
स्वर्गवत्तत्र ते भोगान्भुञ्जते च रमन्ति च ।
रूपसत्त्वबलोपेताः सर्वे दीर्घायुषस्तथा ।
तेषां सर्वक्रियारम्भो मानुषेष्वेव दृश्यते ।
अतिमानुषमाश्चर्यमस्त्रमायाबलाऽऽकृतम् ।
जराप्रसूतिमरणं तेषु स्थानेषु दृश्यते ।
गुणदोषाश्च सन्त्यत्र आकाशगमनं तथा ।
अन्तर्धानं बलं सर्वमायुश्च चिरजीवनम् ।
तपोविशेषाज्जायन्ते तेषां कर्माणि भामिनि ।
देवलोकप्रवृत्तिस्तु तेषामेव विधीयते ।
न तथा देवलोको हि तद्विशिष्टाः सुराः स्मृताः ।
तत्र भोगमनिर्देश्यममृतत्वं च विद्यते ।
विमानगमनं नित्यमप्सरोगणसेवितम् ।
एवमन्यच्च तत्कर्म दैवतेभ्यो विशिष्यते ।
प्रत्यक्षं तव तत्सर्वं देवलोकप्रवर्तनम् ।
तस्मान्न वर्णये देवि विदितं हि त्वया शुभे ।
तत्सर्वं सुकृतेनैव प्राप्यते चोत्तमं पदम् ।

Colophon.

उमा ।

मानुषेष्वेव जीवत्सु गतिर्विज्ञायते न वा ।
अयं शुभगतिर्जीवन्नसौ त्वशुभभागिति ।
एतदिच्छाम्यहं श्रोतुं तन्मे शंसितुमर्हसि ।

महेश्वरः ।

तदहं ते प्रवक्ष्यामि जीवतां विद्यते यथा ।
द्विविधाः प्राणिनो लोके दैवासुरसमाश्रिताः ।
मनसा कर्मणा वाचा प्रतिकूला भवन्ति ये ।
तादृशानासुरान्विद्धि मर्त्यास्ते नरकालयाः ।
रागद्वेषयुता ये तु निर्लज्जा निरपत्रपाः ।
दर्पाहंकारसंयुक्ता नरा नरकगामिनः ।
नास्तिकाश्च शठा घोराः परेषामुपतापिनः ।
यथेष्टवृत्तयश्चैव नरा नरकगामिनः ।
दुष्प्रतीतमना यस्तु चलचित्तो निराकृतिः ।
शिश्नोदररतिर्मूढो निरयं याति सोऽधमः ।
मांसपानप्रिया नित्यं कठोरा नीचवृत्तयः ।
तादृशानासुरान्विद्धि सर्वे ते नरकालयाः ।
हिंसाविहारा ये नित्यं निर्दयाः प्राणिनाशने ।
स्वधर्मविमुखाश्चैव परस्वेष्वभिकाङ्क्षिणः ।
युद्धमात्सर्यसंयुक्ता ग्राम्यभोगपरायणाः ।
तादृशानासुरान्विद्धि नरान्नरकगामिनः ।
दर्पोत्सेकसमायुक्ता मूर्खास्तत्त्वबहिष्कृताः ।
श्रुतिविद्वेषिणो नित्यं ते नरा नरकालयाः ।
नित्यं वदन्ति ये मोहादनृतं कटुकं वचः ।
कृतघ्नाः पिशुना घोरा भवन्ति नरकालयाः ।
हिंस्राश्चोराश्च धूर्ताश्च परदाराभिमर्शिनः ।
नीचकर्मकरा ये च शौचमङ्गलवर्जिताः ।
श्रुतिविद्वेषिणः पापा लोकचारित्रदूषकाः ।
एवंयुक्तसमाचारा जीवन्तो नरकालयाः ।
लोकोद्वेगकराश्चान्ये पशवश्च सरीसृपाः ।
वृक्षाः कण्टकिनो रूक्षास्तादृशान्विद्धि चासुरान् ।
अपरान्देवपक्षांस्तु शृणु देवि समाहिता ।
मनोवाक्कर्मभिर्नित्यमनुकूला भवन्ति ये ।
तादृशानमरान्विद्धि ते नराः स्वर्गगामिनः ।
शौचार्जवपराधीनाः परार्थं न हरन्ति ये ।
ये समाः सर्वभूतेषु ते नराः स्वर्गगामिनः ।
भयाद्वा वृत्तिहेतोर्वा अनृतं न ब्रुवन्ति ये ।

— (L. 3690) T_2 लोकान् (for भोगान्). — (L. 3693) D_{10} $T_{2.3}$ G M_4 ऐश्वर्यम् (for आश्चर्यम्). D_{10} $T_{2.3}$ G M_4 मत्र; T_1 मंत्र- (for अस्त्र-). — (L. 3696) M सत्त्वम् (for सर्वम्). D_{10} $T_{2.3}$ G अंतर्धानबलं सत्त्व(T_3 G_1 °त्य)म् (for the prior half). D_{10} $T_{2.3}$ G_4 -जीविता; T_1 °विनः; G_{1-3} -जीविनं; M_4 -जीविनां (for -जीवनम्). — T_1 om. line 3697. — (L. 3697) D_{10} $T_{2.3}$ G यथा (for तेषां). — (L. 3698) D_{10} T_3 G देवलोके (for °लोक-). — T_1 om. line 3699. — (L. 3701) M_{1-3} -सेवनं (for -सेवितम्). — (L. 3703) T_1 चैव (for तव). D_{10} -लोके (for -लोक-). — (L. 3705) D_{10} T G सुकृतैरेव (for °तेनैव). T_1 मानुषेष्वेव दृश्यते (for the post. half). — Colophon om. in T_1. — *Sub-parvan* : M_{1-3} दानधर्म. — *Adhy. name* : D_{10} $T_{2.3}$ G_2 उमामहेश्वरसंवादे पुण्यलोकप्रशंसा (G_2 °सनं); M_{1-3} उमामहेश्वरसंवादे सुकृतिकर्मफलं; M_4 उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} $T_{2.3}$ $G_{2.4}$ 223; $G_{1.3}$ M_1 217; $M_{2.3}$ 218; M_4 215. — (L. 3707) D_{10} $T_{2.3}$ G यथा (for अयं). D_{10} T_2 $G_{1.3.4}$ नासौ; T_1 त्वसौ; G_2 न हि (for असौ). — T_1 महेश्वरः (for °श्वरः). — (L. 3709) D_{10} $T_{2.3}$ G M_4 जीवितं (for जीवतां). — (L. 3710) D_{10} T_2 दे(T_3 दै)वासुरसुसमाश्रिताः; T_1 G_{1-3} M दैवमासु- रमा°; G_4 दैवासुरमया° (for the post. half). — D_{10} $T_{1.3}$ $G_{1.3.4}$ M_3 om. (hapl.) lines 3713–3728. T_2 G_2 om. (hapl.) lines 3729–3732. — (L. 3729) D_{10} $T_{1.3}$ $G_{1.3.4}$ M_4 -मर्शकाः (for -मर्शिनः). — (L. 3730) D_{10} $T_{1.3}$ $G_{1.3.4}$ -कर्मरता (for °करा). — (L. 3731) D_{10} T_3 $G_{1.3.4}$ M_4 शुचि-; M_{1-3} गुरु- (for श्रुति-). — (L. 3737) T_1 सत्यं वदंति सततं (for the prior half). — T_3 om. (hapl.) lines 3738–3741. — (L. 3738) D_{10} T_1 G_{1-3}

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

सत्यं वदन्ति सततं ते नराः स्वर्गगामिनः ।
धार्मिकाः शौचसंपन्नाः शुक्ला मधुरभाषिणः ।
नाकार्यं मनसेच्छन्ति ते नराः स्वर्गगामिनः ।
दरिद्रा अपि ये केचिद्याचिताः प्रीतिपूर्वकम् ।
ददत्येव च यत्किंचित्ते नराः स्वर्गगामिनः ।
आस्तिका मङ्गलपराः सततं वृद्धसेविनः ।
पुण्यकर्मपरा नित्यं ते नराः स्वर्गगामिनः ।
स्वदुःखमिव मन्यन्ते परेषां दुःखवेदनाम् ।
शक्त्या चाभ्यवपद्यन्ते ते नराः स्वर्गगामिनः ।
व्रतिनो दानशीलाश्च सुखशीलाश्च मानवाः ।
ऋजवो मृदवो नित्यं ते नराः स्वर्गगामिनः ।
गुरुशुश्रूषणपरा देवब्राह्मणपूजकाः ।
कृतज्ञाः कृतविद्याश्च ते नराः स्वर्गगामिनः ।
जितेन्द्रिया जितक्रोधा जितमानमदस्पृहाः ।
लोभमात्सर्यहीना ये ते नराः स्वर्गगामिनः ।
निर्ममा निरहंकाराः स्वानुक्रोशाः स्वबन्धुषु ।
दीनानुकम्पिनो नित्यं ते नराः स्वर्गगामिनः ।
ऐहिकेन तु वृत्तेन पारत्रमनुमीयते ।
एवंविधा नरा लोके जीवन्तः स्वर्गगामिनः ।
यदन्यच्च शुभं लोके प्रजानुग्रहकारि च ।
पशवश्चैव वृक्षाश्च प्रजानां हितकारिणः ।
तादृशान्देवपक्षस्थानिति विद्धि शुभानने ।
शुभाशुभमयं लोके सर्वं स्थावरजङ्गमम् ।
दैवं शुभमिति प्राहुरासुरं ह्यशुभं प्रिये ।

Colophon.

उमा ।

भगवन्मानुषाः केचित्कालधर्ममुपस्थिताः ।
प्राणमोक्षं कथं कृत्वा परत्र हितमाप्नुयुः ।

महेश्वरः ।

हन्त ते कथयिष्यामि शृणु देवि समाहिता ।
द्विविधं मरणं लोके स्वभावाद्यत्नतस्तथा ।
तयोः स्वभावं नोपायं यत्नजं कारणोद्भवम् ।
एतयोरुभयोर्देवि विधानं शृणु शोभने ।
कल्याकल्यशरीरस्य यत्नजं द्विविधं स्मृतम् ।
यत्नजं नाम मरणमात्मत्यागो मुमूर्षया ।
तत्राकल्यशरीरस्य जरा व्याधिश्च कारणम् ।
महाप्रस्थानगमनं तथा प्रायोपवेशनम् ।
जलावगाहनं चैव अग्निचित्याप्रवेशनम् ।
एवं चतुर्विधः प्रोक्त आत्मत्यागो मुमूर्षताम् ।
एतेषां क्रमयोगेन विधानं शृणु शोभने ।
स्वधर्मयुक्तं गार्हस्थ्यं चिरमूढ्वा विधानतः ।
तत्रानृण्यं च संप्राप्य वृद्धो वा व्याधितोऽपि वा ।
दर्शयित्वा स्वदौर्बल्यं सर्वानेवानुमान्य च ।
संविधाय स्वबन्धूंश्च कर्मणां भरणं तथा ।
दानानि विधिवत्कृत्वा धर्मकार्यार्थमात्मनः ।
अनुज्ञाप्य जनं सर्वं वाचा मधुरया ब्रुवन् ।
अहतं वस्त्रमाच्छाद्य बद्ध्वा तत्कुशरज्जुना ।
उपस्पृश्य प्रतिज्ञाय व्यवसायपुरःसरम् ।
परित्यज्य ततो ग्रामं पश्चात्कुर्याद्यथेप्सितम् ।

M_4 -परा धीराः (for -पराधीनाः). G_4 परार्थान् (for °र्थं). D_{10} T_2 G नाह्वरंति (for न ह्°). — (L. 3739) T_1 G_{1-3} $M_{1,2,4}$ समाः सर्वेषु भूतेषु (for the prior half). — G_4 om. (hapl.) lines 3740-3743. — (L. 3740) D_{10} T_2 G_{1-3} वदंति (for ब्रुवन्ति). — T_1 om. (hapl.) lines 3742–3747. — (L. 3742) D_{10} $T_{2,3}$ G -वादिनः (for -भाषिणः). — (L. 3744) T_2 केचित्तु; G_2 ते केचिद् (for ये के°). — G_2 om. (hapl.) lines 3746–3755. —(L. 3746) M_3 नास्तिका (for आ°). M_1 नास्तिका मंगलाचाराः (for the prior half). After line 3747, T_2 reads line 3757. — $G_{1,3}$ om. (hapl.) lines 3748–3749. —(L. 3748) D_{10} T_1 G_4 -वेदनं (for °नाम्). — D_{10} G_4 M_3 om. line 3749. T_1 om. (hapl.) lines 3750–3757. — (L. 3750) $T_{2,3}$ $G_{1,3,4}$ धर्म- (for सुख-). — (L. 3752) T_3 -पूजिताः (for -पूजकाः). — T_2 G_4 om. (hapl.) lines 3754-3755. — (L. 3754) D_{10} T_3 $G_{1,3}$ -मदाः स्मृताः (for -मदस्पृहाः). — (L. 3755) T_3 -रहिताश्च (for -हीना ये). — (L. 3758) T_1 विहितेन (for ऐहिकेन). T_1 साधुस्वम् ; $T_{2,3}$ परत्रम् (for पा°). — (L. 3760) G_2 यदन्यच् (for अन्यच्च). — (L. 3761) T_3 -कारणं (for -कारिणः). — (L. 3762) G_2 $M_{2,3}$ तादृशा (for °शान्). M -पक्षस्था (for °स्थान्). — (L. 3763) $T_{1,3}$ G_2 शुभाशुभमये (T_3 °मया ; G_2 °तमं) लोके (for the prior half). — Colophon om. in T_3. — *Sub-parvan* : M_{1-3} दानधर्म. — *Adhy. name* : D_{10} T_2 G_{1-3} उमामहेश्वरसंवादे स्वर्गगमनं ; M_{1-3} शुभाशुभमयत्वप्रातिपादनं ; M_4 उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} T_2 $G_{2,4}$ 224 ; T_1 M_4 216 ; $G_{1,3}$ M_1 218 ; $M_{2,3}$ 219. — (L. 3765) G_2 बभूवुर् (for भगवन्). — T_1 महेशः (for °श्वरः). — (L. 3769) T_2 स्वभावान् (for °वं). $T_{1,2}$ G_2 यत्नतः (for °जं). D_{10} T_3 $G_{1,3,4}$ यत्नतः कारणोद्भवः (for the post. half). T_1 om. from the post. half of line 3770 up to the prior half of line 3771. — T_1 om. line 3773. T_3 om. (hapl.) lines 3773–3776. — (L. 3775) G_4 जलावगाहगमनम् (for the prior half). D_{10} T_2 $G_{1,3,4}$ -चित्यां (for -चित्या-). — (L. 3776) D_{10} G_3 प्रोक्तम् (for प्रोक्त). $T_{1,2}$ $G_{1,3,4}$ M_4 एवं चतुर्विधं प्रोक्तम् (for the prior half). T_1 प्राणत्यागो मुमूर्षया (for the post.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

महाप्रस्थानमिच्छेच्चेत्प्रतिष्ठेतोत्तरां दिशम् ।
भूत्वा तावन्निराहारो यावत्प्राणविमोक्षणम् ।
चेष्टाहानौ शयित्वापि तन्मनाः प्राणमुत्सृजेत् ।
एवं पुण्यकृतां लोकानमलान्प्रतिपद्यते ।
प्रायोपवेशनं चेच्छेत्तेनैव विधिना नरः ।
देशे पुण्यतमे श्रेष्ठे निराहारस्तु संविशेत् ।
आप्राणान्तं शुचिर्भूत्वा कुर्वन्दानं स्वशक्तितः ।
हरिं स्मरंस्त्यजेत्प्राणानेष धर्मः सनातनः ।
एवं कलेवरं त्यक्त्वा स्वर्गलोके महीयते ।
अग्निप्रवेशनं चेच्छेत्तेनैव विधिना शुभे ।
कृत्वा काष्ठमयं चित्यं पुण्यक्षेत्रे नदीषु वा ।
दैवतेभ्यो नमस्कृत्य कृत्वा चाग्निं प्रदक्षिणम् ।
भूत्वा शुचिर्व्यवसितः प्रविशेदग्निसंस्तरम् ।
सोऽपि लोकान्यथान्यायं प्राप्नुयात्पुण्यकर्मणाम् ।
जलावगाहनं चेच्छेत्तेनैव विधिना शुभे ।
ख्याते पुण्यतमे तीर्थे निमज्जेत्स्वकृतं स्मरन् ।
सोऽपि पुण्यकृतां लोकान्निसर्गात्प्रतिपद्यते ।
ततः कल्यशरीरस्य संत्यागं शृणु तत्त्वतः ।
रक्षार्थं क्षत्रियस्येष्टः प्रजापालनकारणात् ।
योधानां भर्तृपिण्डार्थं गुर्वर्थं ब्रह्मचारिणाम् ।
गोब्राह्मणार्थं ग्रामार्थं सर्वेषां च विधीयते ।
स्वराष्ट्ररक्षणार्थं वा कुनृपैः पीडिताः प्रजाः ।
मोक्तुकामस्त्यजेत्प्राणान्युद्धमार्गे यथाविधि ।
सुसंनद्धो व्यवसितः संप्रविश्यापराङ्मुखः ।
एवं राजा मृतः सद्यः स्वर्गलोके महीयते ।
तादृशी सुगतिर्नास्ति क्षत्रियस्य विशेषतः ।
भृत्यो वा भर्तृपिण्डार्थं भर्तृकर्मण्युपस्थिते ।
कुर्वंस्तत्र तु साहाय्यमात्मप्राणानपेक्षया ।
स्वाम्यर्थं संत्यजेत्प्राणान्पुण्याँल्लोकान्स गच्छति ।
स्पृहणीयः सुरगणैस्तत्र नास्ति विचारणा ।
एवं गोब्राह्मणार्थं वा दीनार्थं वा त्यजेत्तनुम् ।
सोऽपि पुण्यमवाप्नोति आनृशंस्यव्यपेक्षया ।
इत्येते जीवितत्यागे मार्गास्ते समुदाहृताः ।
कामात्क्रोधाद्भयान्मोहाद्यदि चेत्संत्यजेत्तनुम् ।
सोऽनन्तं नरकं याति आत्महन्तृत्वकारणात् ।
स्वभावमरणं नाम न तु चात्मेच्छया भवेत् ।
तथा मृतानां यत्कार्यं तन्मे शृणु यथाविधि ।
तत्रापि बोधसंत्यागान्मूढत्यागो विशिष्यते ।
भूमौ संवेशयेद्देहं नरस्य विनशिष्यतः ।
निर्जीवं वृणुयात्सद्यो वाससा तु कलेवरम् ।
माल्यगन्धैरलंकृत्य सुवर्णेन च भामिनि ।
श्मशाने दक्षिणे देशे चिताग्नौ प्रदहेन्मृतम् ।
अथ वा निक्षिपेद्भूमौ शरीरं जीववर्जितम् ।
दिवा च शुक्लपक्षश्च उत्तरायणमेव च ।
मुमूर्षूणां प्रशस्तानि विपरीतं तु गर्हितम् ।
औदकं चाष्टकाश्राद्धं बहुभिर्बहुशः कृतम् ।
आप्यायनं मृतानां तत्परलोके भवेच्छुभम् ।
एतत्सर्वं मया प्रोक्तं मानुषाणां हिताय च ।

Colophon.

---

half). — (L. 3778) T_1 आत्म- (for ऊढ्वा). — (L. 3781) D_{10} $T_{2.3}$ G सर्वान्विज्ञाय बंधूंश्च (for the prior half). — (L. 3784) T_1 आवार्य (for आच्छाद्य). — (L. 3785) M_{1-3} -पुरःसरः (for °रम्). — T_1 om. line 3786. — (L. 3786) D_{10} $T_{2.3}$ $G_{3.4}$ धर्मं (for पश्चात्). $G_{1.2}$ सुखं पश्चाद्यथेप्सितं (for the post. half). — (L. 3790) $T_{1.2}$ $G_{1.3}$ $M_{1.2.4}$ -कृतान् (for -कृतां). G अनंतान् (for अमलान्). — (L. 3791) T_1 ततः (for नरः). — (L. 3794) D_{10} $T_{1.2}$ G M_4 पुण्यं प(T_1 °ण्यान्प)रि-; T_3 पुण्यं स्मरंस् (for हरिं स्मरंस्). — (L. 3798) D_{10} T $G_{1.3.4}$ नमस्कृत्वा (for °त्य). G_2 [अ]पि (for [अ]ग्निं). — (L. 3799) After the prior half, T_3 ins. :

स्मरन्नारायणं हरिम् ।
ब्राह्मणेभ्यो नमस्कृत्वा-

— (L. 3802) G_{1-3} M_4 लोके (for ख्याते). T_3 केशवं (for स्वकृतं). — (L. 3803) D_{10} T_3 G पुण्यतमाल्लँ (for °कृतां). T_1 अमलान् (for निसर्गात्). — (L. 3804) G_{1-3} परं (for ततः). — (L. 3806) T_1 त्यजेच्च (for योधानां). — (L. 3807) D_{10} $T_{2.3}$ G सर्वेषां (for ग्रामार्थं). D_{10} T_3 प्राणत्यागो ; T_2 G आत्मत्यागो (for सर्वेषां च). T_1 स्त्रीणामर्थे महात्मना (for the post. half). — (L. 3808) T_2 -राज्य- (for -राष्ट्र-). D_{10} G कुजनैः ; T_3 कौलीनैः (for कुनृपैः). — (L. 3809) $G_{1.3}$ M_4 मोक्ष- कामस् (for मोक्तु°). — (L. 3813) T_1 युद्ध- (for the second भर्तृ-). — (L. 3815) T_1 समर्थः (for स्वाम्यर्थं). — T_1 om. lines 3816-3824. — (L. 3820) D_{10} काम- (for कामात्). D_{10} $T_{2.3}$ G वापि (for मोहाद्). — (L. 3822) T_3 जन्मेच्छया (for चात्मे°). — (L. 3823) D_{10} $T_{2.3}$ G M_1 यथा (for तथा). G_4 तद् (for यद्). — (L. 3824) D_{10} $T_{2.3}$ G M_4 तत्रापि मरणं त्यागो (for the prior half). D_{10} $T_{2.3}$ G M_4 -त्यागाद् (for -त्यागो). — (L. 3825) T_1 यथा कल्यशरीरस्य (for the prior half). — (L. 3826) M_4 निर्जिनं (for निर्जीवं). T_1 om. from the post. half of line 3827 up to the prior half of line 3828. — (L. 3828) T_1 चिताग्नौ विधिवो

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उमा ।

देवदेव नमस्तेऽस्तु कालसूदन शंकर ।
लोकेषु विविधा धर्मास्त्वत्प्रसादान्मया श्रुताः ।
विशिष्टं सर्वधर्मेभ्यः शाश्वतं ध्रुवमव्ययम् ।
श्रोतुमिच्छाम्यहं धर्मं तत्र मुह्यति मे मनः ।
केचिन्मोक्षं प्रशंसन्ति केचिद्यज्ञफलं द्विजाः ।
वानप्रस्थं पुनः केचिद्गार्हस्थ्यं केचिदाश्रमम् ।
राजधर्माश्रयं केचित्केचित्स्वाध्यायमेव च ।
ब्रह्मचर्याश्रमं केचित्केचिद्वाक्संयमाश्रयम् ।
मातरं पितरं केचित्सेवमाना दिवं गताः ।
अहिंसयापरः स्वर्गं सत्येन च महीयते ।
आहवेऽभिमुखाः केचिन्निहतास्त्रिदिवं गताः ।
केचिदुञ्छव्रते सिद्धाः स्वर्गमार्गं समाश्रिताः ।
आर्जवेनापरे युक्ता हताश्चानार्जवैर्जनैः ।
ऋजवो नाकपृष्ठे तु शुद्धात्मानः प्रतिष्ठिताः ।
एवं बहुविधैर्लोके धर्मद्वारैः सुसंवृतैः ।
ममापि मतिराविद्धा मेघलेखेव वायुना ।
एतस्मिन्संशयस्थाने संशयच्छेदकारि यत् ।
वचनं ब्रूहि देवेश निश्चयज्ञानसंज्ञितम् ।

नारदः ।

एवं पृष्टः स्वयं देव्या महादेवः पिनाकधृक् ।
प्रोवाच मधुरं वाक्यं सूक्ष्ममध्यात्मसंज्ञितम् ।

महेश्वरः ।

न्यायतस्त्वं महाभागे श्रोतुकामासि निश्चयम् ।
एतदेव विशिष्टं ते यत्त्वं पृच्छसि मां प्रिये ।
सर्वत्र विहितो धर्मः स्वर्गलोकफलाश्रितः ।
बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया ।
यस्मिन्यस्मिंश्च विषये यो यो याति विनिश्चयम् ।
तं तमेवाभिजानाति नान्यं धर्मं शुचिस्मिते ।
शृणु देवि समासेन मोक्षज्ञानमनुत्तमम् ।
एतद्धि सर्वधर्माणां विशिष्टं गुह्यमव्ययम् ।
नास्ति मोक्षात्परं देवि मोक्ष एव परा गतिः ।
सुखमात्यन्तिकं श्रेष्ठमनिवर्ति च तद्विदुः ।
नात्र देवि जरामृत्यू शोको वा दुःखमेव वा ।
अनुत्तममचिन्त्यं च तद्देवि परमं सुखम् ।
ज्ञानानामुत्तमं ज्ञानं मोक्षज्ञानं विदुर्बुधाः ।
ऋषिभिर्देवसंघैश्च प्रोच्यते परमं पदम् ।
नित्यमक्षरमक्षोभ्यमजरं शाश्वतं शिवम् ।
उशन्ति तत्पदं प्राज्ञाः स्पृहणीयं सुरासुरैः ।
दुःखादि च दुरन्तं च संक्षयं च विरोधि च ।
मिथः सततकार्यं च त्रिवर्गं सुखमुच्यते ।
तस्मान्मोक्षः प्रधानस्तु त्रिवर्गाच्च विशेषतः ।

दहेत् (for the post. half). — (L. 3831) T_1 प्रशस्तं हि (for °स्तानि). — (L. 3832) D_{10} $T_{2.3}$ M_4 बहुभिः ; T_1 °धा (for °शः). — (L. 3834) D_{10} $T_{2.3}$ G हितं वचः ; T_1 हिताय वै (for °य च). — Colophon. — *Sub-parvan* : M_1 दानधर्म. — *Adhy. name* : D_{10} $T_{2.3}$ उमामहेश्वरसंवादे मरणलोकप्रदर्शनं (T_2 °लोककथनं) ; G_2 उमामहेश्वरसंवादे मरणलोकं ; M_1 प्राणत्यागक्रमः ; $M_{2.3}$ उमामहेश्वरसंवादे प्राणत्यागक्रमः ; M_4 उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} $T_{3.4}$ $G_{2.4}$ 225 ; T_1 M_4 217 ; $G_{1.3}$ M_1 219 ; $M_{2.3}$ 220. — (L. 3838) D_{10} T_2 G M_3 सर्वमत्र (for धर्मं तत्र). M_1 om. from the post. half of line 3840 up to the post. half of line 3842. M_3 om (hapl.) from the post. half of line 3840 up to the prior half of line 3843 — T_1 om. (hapl.) lines 3841-3842. — (L. 3841) D_{10} G_4 -धर्माश्रयाः (for °श्रयं). — (L. 3842) T_3 केपि (for केचिद्). T_2 केचिद्विद्वत्समाश्रयं (for the post. half). — (L. 3844) T_1 गताः स्वर्गं (for [अ]-परः स्वर्गं). T_3 अहिंसायाः परं स्वर्गं (for the prior half). T_1 सत्येनैव तु केचन (for the post. half). — (L. 3846) D_{10} $T_{1.2}$ G_{1-3} M_4 -जनैः (for -जनैः). T_1 द्विजाश्रिताः (for समा°). — (L. 3847) D_{10} T G M_4 महतां पूजने रताः (for the post. half). — (L. 3849) T_2 धर्माचारैः (for धर्मद्वारैः). T_1 $M_{1.3}$ असंवृतैः (for सु°). — For line 3851, T_1 subst. :

एतं मे संशयं देव संप्रति च्छेतुमर्हसि ।

— T_1 om. line 3852. — (L. 3852) T_2 निर्णय- (for निश्चय-). D_{10} T_3 G_{1-3} M_{1-3} -संश्रितं ; G_4 -संमितं (for -संज्ञितम्). — G_1 om. the ref. — (L. 3853) D_{10} तथा (for स्वयं). D_{10} पिनाकधृत् (for °धृक्). — (L. 3854) D_{10} $T_{1.3}$ G -संश्रितं (for -संज्ञितम्). — T_1 महेशः (for °श्वरः). — (L. 3855) G_1 वि- (for [अ]सि). T_1 भामिनि (for निश्चयम्). — T_1 om. line 3856. — Lines 3857-3860 = (var.) 12. 340. 2-3. — (L. 3857) T_1 -समाश्रितः ; G_3 -फलं श्रितः (for -फलाश्रितः). — (L. 3859) T_1 यस्मिंस्तु विषये लोके (for the prior half). — (L. 3861) D_{10} $T_{2.3}$ G M_3 -द्वारम् ; T_1 -धर्मम् (for -ज्ञानम्). — (L. 3862) D_{10} T_3 G शुभम् (for गुह्यम्). — (L. 3863) D_{10} $T_{2.3}$ G_4 नास्ति मोक्षात्परा गतिः ; G_3 मोक्षणं परमा गतिः (for the post. half). — (L. 3864) D_{10} अनिमित्तं ; T_2 °वृत्तिं ; T_3 इति वृत्तं ; G अनिवृत्तं ; M_4 °वृत्ति (for °वर्ति). — (L. 3865) T_3 नास्ति (for नात्र). D_{10} T G $M_{1.4}$ मृत्युः (for -मृत्यू). — (L. 3867) T_1 क्षेत्र- (for मोक्ष-). — (L. 3869) T_1 $G_{1.3}$ अक्षयम् (for °रम्). D_{10} $T_{2.3}$ G M_4 अजेयं (for अजरं). — (L. 3870) D_{10} G_{1-3} विशंति (for उ°). T_1 तद्विदः (for तत्पदं). G_4 स्पृहणीयाः (for °णीयं). — T_1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

मोक्षस्य तस्य मार्गोऽयं श्रूयतां शुभलक्षणे ।
ब्रह्मादिस्थावरान्तश्च संसारोऽयं प्रवर्तते ।
शोकव्याधिजरादोषैर्मरणेन च संयुतः ।
यथा ज्योतिर्गणा व्योम्नि निवर्तन्ते पुनः पुनः ।
संसारे प्राणिनः सर्वे निवर्तन्ते तथा पुनः ।
तत्र संसारचक्रस्य मोक्षो ज्ञानेन दृश्यते ।
अध्यात्मतत्त्वविज्ञानं ज्ञानमित्यभिधीयते ।
ज्ञानस्य ग्रहणोपायमाचारं ज्ञानिनस्तथा ।
यथावत्संप्रवक्ष्यामि तत्त्वमेकमनाः शृणु ।
ब्राह्मणः क्षत्रियो वापि भूत्वा पूर्वं गृहे स्थितः ।
आनृण्यं सर्वतः प्राप्य ततस्तान्संत्यजेद्गृहान् ।
ततः संत्यज्य गार्हस्थ्यं निश्चितो वनमाश्रयेत् ।
वने गुरुसमाज्ञातो दीक्षेत विधिपूर्वकम् ।
दीक्षां प्राप्य यथान्यायं स्ववृत्तं परिपालयेत् ।
गृह्णीयादप्युपाध्यायान्मोक्षज्ञानमतन्द्रितः ।
द्विविधश्च पुनर्मोक्षः सांख्यो योग इति स्मृतः ।
पञ्चविंशतिविज्ञानं सांख्यमित्यभिधीयते ।
ऐश्वर्यं देवसायुज्यं योगशास्त्रस्य निर्णये ।
तयोरन्यतरं ज्ञानं शृणुयाच्छिष्यतां गतः ।
नामुण्डो नाप्यकाषायी नाप्यसंवत्सरोषितः ।
सांख्ययोगौ न च श्राव्यौ गुरुणा स्नेहपूर्वकम् ।
समः शीतोष्णहर्षादीन्विषहेत सदा मुनिः ।
अधृष्यः क्षुत्पिपासाभ्यां भवेज्ज्ञानसमाधिना ।
न कुर्वीतान्यमारम्भमनिवेद्य स्वकं गुरुम् ।
छायाभूतोऽपरित्यागी नित्यमेव भवेद्गुरौ ।
इन्द्रियाणीन्द्रियार्थेभ्य उचितेभ्यो निवर्तयेत् ।
त्यजेत्संकल्पजान्ग्रन्थीन्सदा ध्यानपरो भवेत् ।
कुण्डिकां चर्म संशिक्यं छत्रं यष्टिमुपानहौ ।
चैलमित्येव नैतेषु स्थापयेत्स्वाम्यमात्मनः ।
गुरोः पूर्वं समुत्तिष्ठेज्जघन्यं तस्य संविशेत् ।
नाननुज्ञाप्य भर्तारमावश्यकमपि व्रजेत् ।
द्विरह्नः स्नानशाटेन संध्ययोरभिषेचनम् ।
एककालाशनं चास्य विहितं यतिभिः पुरा ।
भैक्षं सर्वत्र गृह्णीयाच्चिन्तयेत्सततं निशि ।
कारणे चापि संप्राप्ते न कुप्येत कदाचन ।
ब्रह्मचर्यं वने वासः शौचमिन्द्रियसंयमः ।
दया च सर्वभूतेषु तस्य धर्मः सनातनः ।
विमुक्तः सर्वपापेभ्यो लघ्वाहारो जितेन्द्रियः ।
आत्मयुक्तः परां बुद्धिं लभते पापनाशिनीम् ।
यदा भावं न कुरुते सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा ।
अनीर्ष्युरनहंकारो विमुक्तः सर्वबन्धनैः ।
ब्राह्मं पदमवाप्नोति यत्प्राप्य न निवर्तते ।
उभे सत्यानृते त्यक्त्वा शोकानन्दौ भयाभये ।
प्रियाप्रिये परित्यज्य ब्रह्मभूयाय कल्पते ।
निर्ममो निरहंकारो निर्द्वंद्वो वीतमत्सरः ।
वीतशोकभयाबाधः पदं प्राप्नोत्यनुत्तमम् ।
तुल्यनिन्दास्तुतिर्मौनी समलोष्टाश्मकाञ्चनः ।

---

om. lines 3871-3874. — (L. 3871) M_4 दुरंतश्च (for दुरन्तं). D_{10} G दुःखादिश्च दुरंतश्च (for the prior half). D_{10} $T_{2.3}$ G संसारो यः प्रकीर्तितः (for the post. half). — After line 3871, D_{10} $T_{2.3}$ $G_{2.4}$ read lines 3876-3877. D_{10} $T_{2.3}$ G_4 om. lines 3872-3873. G_{1-3} om. lines 3872-3875. — (L. 3874) D_{10} $T_{2.3}$ G_4 तस्य मोक्षस्य मार्गोयं (for the prior half). — (L. 3875) $T_{1.2}$ G_4 -स्थावरांतं (for °रान्तश्च). D_{10} $T_{2.3}$ G_4 संसारो यः प्रकीर्तितः (for the post. half). — After line 3875, T_1 ins. :

ज्ञानान्मोक्षमवाप्नोति तच्च सद्गुरुसेवया ।

— After line 3877, D_{10} T_2 G_2 ins. :

एवं जीवा अमी लोके विवर्तन्ते पुनः पुनः ।

— T_1 om. lines 3878-3880. G_2 om. (hapl.) 3878. — (L. 3883) T_1 पूर्वं भूत्वा (by transp.); M_4 भूत्वा सर्वं. — (L. 3886) D_{10} $T_{2.3}$ G वने गुरुं समाज्ञाय (for the prior half). D_{10} T G दीक्षितो (for दीक्षेत). — (L. 3889) D_{10} $T_{2.3}$ G M_4 द्विविधं च पुनर्मोक्षं सांख्ययो(T_3 °ख्यं यो)गमिति स्मृतिः. — (L. 3891) D_{10} $T_{2.3}$ G M_4 -सारूप्यं (for -सायुज्यं). D_{10} T G निर्णयः (for °ये). — (L. 3892) T_1 प्रेष्यतां (for शि°). — (L. 3893) D_{10} $T_{2.3}$ G M_4 नाकालो (for नामुण्डो). T_1 नाकार्यो नाप्यकाषायो (for the prior half). — (L. 3894) D_{10} T_3 G नामां(D_{10} न M_{1-3} नरः (for न च). D_{10} T_3 G नामां(D_{10} न सां ख्ययं गो नाश्राद्धं; T_2 नामांख्ययोगौ नाश्राद्धौ (for the prior half). T_2 गुरुभ्यः; T_2 $G_{1.3.4}$ गुरूणां (for गुरुणा). — T_1 om. lines 3895-3896. — (L. 3895) D_{10} $T_{2.3}$ G सदैव (for सदा). D_{10} $T_{2.3}$ G M om. from the post. half of line 3896 up to the prior half of line 3899. — (L. 3901) G_3 सव्यं (for छत्रं). — (L. 3904) D_{10} T G M_4 नैवाविज्ञाप्य भर्तारम् (T_1 च गुरुम्) (for the prior half). — (L. 3905) D_{10} T G द्विरह्नि (for °ह्नः). T_1 -कालेन (for -शाटेन). — T_1 om. line 3906. — (L. 3908) G_{1-3} कालेन (for कारणे). — (L. 3909) $G_{1.3}$ -निग्रहः (for -संयमः). — (L. 3915) D_{10} T G M_4 अनिष्ठुरो (for अनीर्ष्युर्). D_{10} T G M_4 om. (hapl.) from the post. half up to the prior half of line 3919. — (L. 3919) M_{1-3} निर्द्वंद्वो निष्परिग्रहः (for the post. half). — (L. 3920) G_{1-3} -भयाबाधं (for °बाधः). T_3 परं (for पदं). — (L. 3921) M_{1-3} तुल्य- (for सम-).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

समः शत्रौ च मित्रे च निर्वाणमधिगच्छति ।
एवंयुक्तसमाचारस्तत्परोऽध्यात्मचिन्तकः ।
ज्ञानाभ्यासेन तेनैव प्राप्नोति परमां गतिम् ।

Colophon.

महेश्वरः ।

अनुद्विग्नमतेर्जन्तोरस्मिन्संसारमण्डले ।
शोकव्याधिजरादुःखे निर्वाणं नोपपद्यते ।
तस्मादुद्वेगजननं मनोवस्थापनं तथा ।
ज्ञानं ते संप्रवक्ष्यामि तन्मूलममृतं हि वै ।
शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ।
नष्टे धने वा दारे वा पुत्रे पितरि वा मृते ।
अहो दुःखमिति ध्यायञ्शोकस्य पदमाव्रजेत् ।
द्रव्येषु समतीतेषु ये गुणास्तान्न चिन्तयेत् ।
ताननाद्रियमाणस्य शोकबन्धः प्रणश्यति ।
संप्रयोगादनिष्टस्य विप्रयोगात्प्रियस्य च ।
मानुषा मानसैर्दुःखैः संयुज्यन्तेऽल्पबुद्धयः ।
मृतं वा यदि वा नष्टं योऽतीतमनुशोचति ।
संतापेन च युज्येत तच्चास्य न निवर्तते ।
उत्पन्ने त्विह मानुष्ये गर्भप्रभृति मानवम् ।
विविधान्युपवर्तन्ते दुःखानि च सुखानि च ।
तयोरेकतरो मार्गो यद्येनमभिसंनमेत् ।
सुखं प्राप्य न संहृष्येद्दुःखं प्राप्य न संज्वरेत् ।
दोषदर्शी भवेत्तत्र यत्र स्नेहः प्रवर्तते ।
अनिष्टेनान्वितं पश्येद्यथा क्षिप्रं विरज्यते ।
यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वज्ज्ञातिसमागमः ।
अदर्शनादापतिताः पुनश्चादर्शनं गताः ।
स्नेहस्तत्र न कर्तव्यो विप्रयोगो हि तैर्ध्रुवम् ।
कुटुम्बं पुत्रदारं च शरीरं धनसंचयः ।
पारक्यमध्रुवं सर्वं किं स्वं सुकृतदुष्कृते ।
पुत्रदारकुटुम्बेषु सक्ताः सीदन्ति जन्तवः ।
सरःपङ्कार्णवे मग्ना जीर्णा इव महागजाः ।
मातापितृसहस्राणि पुत्रदारशतानि च ।
असंख्येयान्यतीतानि तथैवानागतानि च ।
न तेषां च मया कार्यं न कार्यं मम तैरपि ।
अतीतमनतीतं तदिति पश्यन्न मुह्यति ।
दुःखोपघाते शारीरे मानसे वा समुत्थिते ।
यस्मिन्न शक्यते कर्तुं यत्नात्तन्नानुचिन्तयेत् ।
यन्निमित्तं भवेच्छोकस्त्रासो वा दुःखमेव वा ।
आयासो वा यतोमूलस्तदेकाङ्गमपि त्यजेत् ।
अनित्यं यौवनं रूपं जीवितं रत्नसंचयः ।
ऐश्वर्यं स्वस्थता चेति न मुह्येत्तत्र पण्डितः ।
सुखमेकान्ततो नास्ति शक्रस्यापि त्रिविष्टपे ।
तत्रापि सुमहद्दुःखं सुखमल्पतरं भवेत् ।
न नित्यं लभते दुःखं न नित्यं लभते सुखम् ।
सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम् ।
क्षयान्ता निचयाः सर्वे पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ।
उच्छ्रयान्विनिपातांश्च दृष्ट्वा प्रत्यक्षतः स्वयम् ।
अनित्यमसुखं चेति व्यवस्येत्सर्वमेव च ।
अर्थानामार्जने दुःखमार्जितानां च रक्षणे ।
नाशे दुःखं व्यये दुःखं धिगर्थं दुःखभाजनम् ।
अर्थवन्तं नरं नित्यं पञ्च निघ्नन्ति शत्रवः ।

— Colophon. — *Sub-parvan* : D_{10} M_{1-3} दानधर्म. — *Adhy. name* : D_{10} T_{3} G_{2} उमामहेश्वरसंवादे आश्रमलक्षणं ; T_{2} आश्रमलक्षणं ; M_{4} उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} $T_{2.3}$ $G_{2.4}$ 226 ; T_{1} M_{4} 218 ; $G_{1.3}$ M_{1} 220 ; $M_{2.3}$ 221. — (L. 3929) T_{1} -गतानि (for -शतानि). — T_{1} om. lines 3933–3936. — (L. 3933) G_{2} शोकेषु (for द्रव्येषु). D_{10} $T_{2.3}$ G शुभास् (for गुणास्). — After line 3937, M_{4} ins. :

दुःखाच्च दुःखं भवति पापानर्थौ प्रपद्यते ।
नार्थो न धर्मो न यशो योऽतीतमनुशोचति ।

— (L. 3939) D_{10} T_{1} G_{4} उत्पन्नमिह ; T_{3} उत्पन्नमिव ; $G_{1.3}$ °न्नानिह ; G_{2} °न्नानीह (for उत्पन्ने त्विह). $G_{1.3}$ मानवान् (for °वम्). — T_{1} repeats line 3940 after line 3948. — (L. 3941) T_{1} -संनयेत् (for °मेत्). — (L. 3942) T_{2} G_{2} सुखं (for न सं·). T_{1} $G_{1.3}$ M न सुखं प्राप्य संहृष्येद् (for the prior half). D_{10} $T_{1.2}$ $G_{1.2}$ M न दुःखं प्राप्य संज्वरेत् (for the post. half). — (L. 3948) $G_{1.3}$ M_{1-3} ध्रुवः (for ध्रुवम्). — (L. 3949) D_{10} T_{3} $G_{3.4}$ -दाराश् (for -दारं). T_{1} कुटुम्बभरणं चापि (for the prior half). D_{10} $T_{2.3}$ G $M_{1.4}$ -संचयं (for °यः). — D_{10} T G M_{4} om. (hapl.) lines 3950–3961. — (L. 3952) Kumbh ed. and Madras ed. जीवा (for जीर्णा). — (L. 3964) M_{1-3} स्वल्पतरं (for अल्प°). — Line 3966 = 3. 48. 45^{ab} ; 12. 26. 23^{ab} ; 149. 84^{ab} ; 186. 18^{ef} ; 14. 44. 14^{cd}. — T_{3} om. lines 3966–3967. — Lines 3967–3968 = (var.) 11. 2. 3 ; 12. 27. 29 ; 317. 20 ; 14. 44. 18 ; Rām. 2. 105. 16 ; 7. 52. 11 ; Gobhilasmṛti 3 43 ; Kathāsaritsāgara 51. 26^{cd}–27^{ab}. — G_{2} om. (hapl.) lines 3971–3974. — (L. 3972) T_{1} नित्यशो ; M_{3} धिगित्थं (for धिगर्थं). — (L. 3973) D_{10} T_{3} $G_{1.3.4}$ M_{4} [अ]भि- (for नि-). — (L. 3974) T_{2} दाराश्चोराश्च दायादा ; T_{3} $G_{1.3.4}$ राजा चोरश्च दा° (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

राजतस्करदायादा भूतानि क्षय एव च ।
अर्थ एव ह्यनर्थस्य मूलमित्यवधारय ।
न ह्यनर्थाः प्रबाधन्ते नरमर्थविवर्जितम् ।
अर्थप्राप्तिमिह दुःखमाकिंचन्यं परं सुखम् ।
उपद्रवेषु चार्थानां दुःखं हि नियतं भवेत् ।
धनलाभेन तृष्णाया न तृप्तिरुपलभ्यते ।
लब्ध्वा भूयो विवर्धेत समिद्धिरिव पावकः ।
जित्वापि पृथिवीं कृत्स्नां चतुःसागरमेखलाम् ।
सागराणां पुनः पारं जेतुमिच्छत्यसंशयम् ।
अलं परिग्रहेणेह दोषवान्हि परिग्रहः ।
कोशकारः कृमिर्देवि बध्यते हि परिग्रहात् ।
य एकां पृथिवीं कृत्स्नामेकच्छत्रां प्रशास्ति च ।
एकस्मिन्नेव राष्ट्रे तु स चापि निवसेन्नृपः ।
तस्मिन्राष्ट्रेऽपि नगरमेकमेवाधितिष्ठति ।
नगरेऽपि गृहं चैकं भवेत्तस्य निवेशनम् ।
एक एव प्रतिष्ठा स्यादावासं तद्गृहेऽपि च ।
आवासे शयनं चैकं निशि यत्र प्रलीयते ।
शयनस्यार्धमेवास्य स्त्रियास्त्वर्धं विधीयते ।
तदनेन प्रसङ्गेन स्वल्पेनैव हि युज्यते ।
सर्वं ममेति संमूढो जनः पश्यति बालिशः ।
एवं सर्वोपभोगेषु स्वल्पमस्य प्रयोजनम् ।
तण्डुलप्रस्थमात्रेण यात्रा स्यात्सर्वदेहिनाम् ।
ततो भूयस्तरो भागो दुःखाय पतनाय च ।
नास्ति तृष्णासमं दुःखं नास्ति त्यागसमं सुखम् ।
सर्वान्कामान्परित्यज्य ब्रह्मभूयाय कल्पते ।
या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम् ।
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ।
अलाभेनेह कामानां कामांस्त्यजति पण्डितः ।
आयासविकटस्तीव्रः कामाग्निस्तर्षणारणिः ।
इन्द्रियार्थेषु संमोहात्पचत्यकुशलं जनम् ।
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य पर्याप्तमिति पश्यन्न मुह्यति ।
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम् ।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम् ।
इन्द्रियाणीन्द्रियार्थेषु नैव धीरो नियोजयेत् ।
मनःषष्ठानि संयम्य नित्यमात्मनि योजयेत् ।
इन्द्रियाणां विसर्गेण दोषमृच्छत्यसंशयम् ।
संनियम्य तु तान्येव ततः सिद्धिमवाप्नुयात् ।
षण्णामात्मनि युक्तानामैश्वर्यं योऽधिगच्छति ।
न स पापैर्न चानर्थैः संयुज्येत विचक्षणः ।
अप्रमत्तः सदा रक्षेदिन्द्रियाणि विचक्षणः ।
अरक्षितेषु तेष्वाशु नरो नरकमेति हि ।
हृदि काममयश्चित्रो मोहसंचयसंभवः ।
अज्ञानरूढमूलस्तु विधित्सापरिषेचनः ।

---

the prior half). —(L. 3976) $M_{1.3}$ [अ]र्थाः प्रति- (for [अ]नर्थाः प्र-). — G_2 om. lines 3977–3984. —(L. 3977) $G_{1.3}$ M_4 महादुःखम्. —(L. 3979) $G_{1.3.4}$ -लोभेन (for -लाभेन). D_{10} येन लोभेन तृष्णाया (for the prior half). —(L. 3980) D_{10} $T_{2.3}$ $G_{1.3.4}$ लब्धा- श्रयो (for लब्ध्वा भूयो). D_{10} $T_{2.3}$ $G_{1.3.4}$ समिद्ध (for °द्धिर्). —(L. 3982) T_1 परं (for पुनः). $G_{1.3}$ om. from the post. half up to the prior half of line 3985. — T_1 om. (hapl.) line 3984. —(L. 3985) D_{10} T_2 एकोपि; T_3 G_4 एको हि; G_2 जित्वापि; M य एतां (for य एकां). —(L. 3987) T_1 तस्मिन्राष्ट्रे तु नगरे (for the prior half). G एक (for एकम्). M_4 [अ]पि (for [अ]धि-). —(L. 3989) D_{10} G_2 प्रविष्टः; T_1 गृहस्थः; T_2 $G_{1.3.4}$ प्रदिष्टः (for प्रतिष्ठा). D_{10} T G M_4 आवासस् (for °सं). —(L. 3991) T_1 शयनं च (for °नस्य). T_2 [अ]त्र (for [अ]स्य). T_1 G_4 स्त्रियाश्चार्धं; $G_{1.3}$ स्त्रिया सार्धं; M_4 स्त्रिया स्वर्धं (for स्त्रियास्त्वर्धं). —(L. 3992) G_4 स्वल्पेनेह (for तदनेन). G_4 तदनेन (for स्वल्पे- नैव). D_{10} T G [इ]ह (for हि). — G_2 om. lines 3993–3995. —(L. 3993) M_4 एव (for मम). D_{10} $T_{2.3}$ $G_{1.3.4}$ M_4 बलं (for जनः). T_1 जनं पश्यसि बालिशः

(for the post. half). —(L. 3994) D_{10} $T_{2.3}$ $G_{1.3.4}$ एवं सर्वोपयोगेषु (for the prior half). T_1 अस्ति (for अस्य). —(L. 3996) D_{10} $T_{2.3}$ $G_{1.3}$ तयोर् (for ततो) —(L. 3997) T_2 तृष्णापरं (for °समं). — Lines 3999– 4000 = 1, 840*, lines 5–6; 3. 2. 354; 12. 268. 12; 13. 7. 21; Harivaṁśa B. 1. 30. 42. = (var.) Bhāg. P. 9. 19. 16; Vāyu P. II. 31. 91. — Lines 4001–4002 = 1, 840* lines 1–2. —(L. 4003) M_4 अलब्धेन (for अलाभेन). D_{10} T G [ए]व (for [इ]ह). —(L. 4004) D_{10} D_{10} T G M_4 शोकं (for कामांस्). —(L. 4004) D_{10} $T_{2.3}$ G M_4 -विटपस्; T_1 -प्रभवस् (for -विकटस्). D_{10} T_2 G M_3 कामाग्निः कर्षणारणिः (for the post. half). T_2 इंद्रियार्थेन —(L. 4005) T_1 संमोहः (for °हात्). T_2 इंद्रियार्थैन संमोह्य; G_{1-3} °र्थैश्च संमोह्य; G_4 M_4 °र्थैस्संमोह्य (for the संमोहा; G_{1-3} °र्थैश्च संमोह्य; G_4 M_4 दहति (for पचति). —(L. prior half). D_{10} T G M_4 दहति (for पचति). —(L. 4009) $T_{2.3}$ कलां नार्हति षोडशीं) for the post. half). —(L. 4012) T_2 वियोगेन (for विसर्गेण). T_1 $G_{1.3.4}$ —(L. 4012) T_2 वियोगेन (for विसर्गेण). —(L. 4015) D_{10} T G च M_4 [अ]संशयः (for °यन्). — D_{10} T_2 om. (hapl.) (for स). T_2 न (for सं-). line 4016. —(L. 4016) M_{1-3} विदितः (for विचक्षणः). — T_1 om. lines 4019–4027. —(L. 4019) T_3 G_1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रोषलोभमहास्कन्धः पुरादुष्कृतसारवान् ।
आयासविटपस्तीव्रः शोकपुष्पो भयाङ्कुरः ।
नानासंकल्पपत्राढ्यः प्रमादपरिवर्धितः ।
महतीभिः पिपासाभिः समन्तात्परिवर्धितः ।
संरोहत्यकृतप्रज्ञः पादपः कामसंभवः ।
नैव रोहति तत्त्वज्ञे रूढो वा छिद्यते पुनः ।
कृच्छ्रोपायेष्वनित्येषु निःसारेषु चलेषु च ।
दुःखादिषु दुरन्तेषु कामभोगेषु का रतिः ।
येन संवत्सरो दृष्टः सकृत्कामश्च सेवितः ।
तेन सर्वमिदं दृष्टं पुनरावर्तकं जगत् ।
भोगा भुक्ता मनुष्येण स्वप्ना इव भवन्ति ते ।
स्वप्नोपभोगतुल्येषु कामभोगेषु का रतिः ।
इन्द्रियेषु च जीर्यत्सु छिद्यमाने तथायुषि ।
पुरस्ताच्च स्थिते मृत्यौ किं सुखं पश्यतः शुभे ।
व्याधिभिः पीड्यमानस्य नित्यं शारीरमानसैः ।
नरस्याकृतकृत्यस्य किं सुखं भवति प्रिये ।
संचिन्वानकमेवार्थं कामानामवितृप्तकम् ।
व्याघ्रः पशुमिवारण्ये मृत्युरादाय गच्छति ।
जन्ममृत्युजरादुःखैः सततं समभिद्रुतः ।
संसारे पच्यमानस्तु पापान्नोद्विजते जनः ।

उमा ।

केनोपायेन मर्त्यानां निवर्तेते जरान्तकौ ।
यद्यस्ति भगवन्मह्यमेतदाचक्ष्व माचिरम् ।
तपसा वा सुमहता कर्मणा वा श्रुतेन वा ।
रसायनप्रयोगैर्वा केनात्येति जरान्तकौ ।

महेश्वरः ।

नैतदस्ति महाभागे जरामृत्युनिवर्तनम् ।
सर्वलोकेषु जानीहि मोक्षादन्यत्र भामिनि ।
न धनेन न राज्येन नोग्रेण तपसापि वा ।
मरणं नातिवर्तन्ते विना मुक्त्या शरीरिणः ।
अश्वमेधसहस्रेण वाजपेयशतेन च ।
न तरन्ति जरामृत्यू निर्वाणाधिगमाद्विना ।
ऐश्वर्यं धनधान्यं च विद्या लाभस्तपस्तथा ।
रसायनप्रयोगश्च न तरन्ति जरान्तकौ ।
दानयज्ञतपःशीला रसायनविदोऽपि वा ।
स्वाध्यायनिरता वापि न तरन्ति जरान्तकौ ।
देवदानवगन्धर्वकिंनरोरगराक्षसान् ।
स्ववशे कुरुते कालो न कालस्यास्त्यगोचरः ।
न ह्यहानि निवर्तन्ते न मासा न पुनः क्षपाः ।
सोऽयं प्रपद्यतेऽध्वानमजस्रं ध्रुवमव्ययम् ।
स्रवन्ति न निवर्तन्ते स्रोतांसि सरितामिव ।
आयुरादाय मर्त्यानामहोरात्राणि संततम् ।
जीवितं सर्वभूतानामक्षयः क्षपयन्नसौ ।
आदित्यो ह्यस्तमभ्येति पुनः पुनरुदेति च ।
यस्यां रात्र्यां व्यतीतायामायुरल्पतरं भवेत् ।
गाधोदके मत्स्य इव किं नु तस्य कुमारता ।
मरणं हि शरीरस्य नियतं ध्रुवमेव च ।
तिष्ठन्नेव क्षणं सर्वः कालस्यैति वशं पुनः ।
न म्रियेरन्न जीर्येरन्यदि स्युः सर्वदेहिनः ।
न चानिष्टं प्रवर्तेत शोको वा प्राणिनां क्वचित् ।

M विविरत्सा- (for विधित्सा-). $G_{2.4}$ विविरत्सा परिपेचनं (for the post. half). — (L. 4020) D_{10} लोभरोष- (for रोषलोभ-). — (L. 4021) D_{10} T_2 G_2 भवांकुरः (for भयाङ्कुरः). — (L. 4022) D_{10} $T_{2.3}$ G M_4 प्रमादाद्व (for °द-). — (L. 4023) D_{10} $T_{2.3}$ G_{1-3}. M -वेष्टितः (for -वर्धितः). — (L. 4024) D_{10} कृतप्रज्ञे ; $T_{2.3}$ G M [अ]कृतप्रज्ञे (for °प्रज्ञः). — (L. 4026) D_{10} $T_{2.3}$ निस्येषु (for [अ]नित्येषु). D_{10} $T_{2.3}$ G फलेषु (for चलेषु). — (L. 4027) D_{10} $T_{2.3}$ G M_4 -योगेषु (for -भोगेषु). — D_{10} T G M_4 om. (hapl.) lines 4028–4031. — (L. 4032) T_1 भिद्यमाने (for छिद्य°). — (L. 4033) T_1 कः क्षेमः (for किं सुखं). — (L. 4035) D_{10} T G M_4 किं सुखं (T_1 कृतं) मरणे सति (for the post. half). — (L. 4036) D_{10} T $G_{1.3.4}$ संचिन्वानं तमेवार्थं (for the prior half). — (L. 4039) $G_{1.3}$ संसारे पच्यमानस्य (for the prior half). $G_{1.3}$ मनः ; M_4 पुनः (for जनः). — (L. 4041) T_1 तत्त्वतः (for माचिरम्). — (L. 4043) T_1 तथौषध- (for रसायन-). — (L. 4047) $T_{2.3}$ $G_{1.3.4}$ -तरते (for -वर्तन्ते). — (L. 4048) $T_{2.3}$ G_1 -सहस्राणि (for -सहस्रेण). D_{10} T_2 $G_{2.4}$ -शतानि (for -शतेन). — (L. 4049) T_3 जरामृत्युं. T_1 द्विजाः (for विना). T_2 निर्वाणाधिगमार्थिना (for the post. half). — (L. 4050) T_1 तथैव च (for तपस्तथा). — (L. 4051) D_{10} T G -प्रयोगाद्यै ; M_4 °गाद्यैर् (for °गश्च). — (L. 4056) T_2 सुखानि (for ह्यहानि). D_{10} T_3 मनसा ; T_1 तथैव (for न मासा). — (L. 4057) T_3 G_4 ध्यानम् (for ऽध्वानम्). — (L. 4059) $G_{1.3}$ आयुरारोग्यमैश्वर्यम् (for the prior half). $T_{2.3}$ G_4 -रात्रेषु ; $G_{1.3}$ -रात्रिषु (for -रात्राणि). — (L. 4060) T_3 सततं (for जीवितं). — Lines 4062–4063 = (var.) 13. 169. 11[abcd]. — (L. 4063) M_{1-3} कुमारिका (for °रता). — (L. 4064) T_1 उच्यते (for एव च). — (L. 4065) T_1 [ए]व (for [ए]ति). — T_1 om. lines 4066–4067. — (L. 4066) G_2 न म्रियेयुर्न जीर्येयुर् (for the prior half). G_2 न दस्युः (sic) (for यदि स्युः). — (L. 4067) $G_{1.3}$ [अ]स्थिरं (for [अ]निष्टं). — Line 4070 = 12. 169. 14[ab] ;

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अप्रमत्तः प्रमत्तेषु कालो भूतेषु तिष्ठति ।
अप्रमत्तस्य कालस्य क्षयं प्राप्तो न मुच्यते ।
श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।
को हि तद्वेद यत्रासौ मृत्युना नाभिवीक्षितः ।
वर्षास्विदं करिष्यामि इदं ग्रीष्मवसन्तयोः ।
इति बालश्चिन्तयति अन्तरायं न बुध्यते ।
इदं मे स्यादिदं मे स्यादित्येवंमनसो नराः ।
अनवाप्तेषु कामेषु ह्रियन्ते मरणं प्रति ।
कालपाशेन बद्धानामहन्यहनि जीर्यताम् ।
का श्रद्धा प्राणिनां मार्गे विषमे भ्रमतां सदा ।
युवैव धर्मशीलः स्यादनिमित्तं हि जीवितम् ।
फलानामिव पक्वानां सदा हि पतनाद्भयम् ।
मर्त्यस्य किमु तैर्दारैः पुत्रैर्भोगैः प्रियैरपि ।
एकाह्ना सर्वमुत्सृज्य मृत्योर्हि वशमेयिवान् ।
जायमानांश्च संप्रेक्ष्य म्रियमाणांस्तथैव च ।
न संवेगोऽस्ति चेत्पुंसः काष्ठलोष्टसमो हि सः ।
विनाशिनो ह्यध्रुवजीवितस्य
किं बन्धुभिर्मित्रपरिग्रहैश्च ।
विहाय यद्गच्छति सर्वमेव
क्षणेन गत्वा न निवर्तते च ।
एवं चिन्तयतो नित्यं सर्वार्थानामनित्यताम् ।
उद्वेगो जायते नित्यं निर्वाणस्य पुरःसरः ।
तेनोद्वेगेन चाप्यस्य विमर्शो जायते पुनः ।
विमर्शेनाथ वैराग्यं सर्वत्रास्योपजायते ।
वैराग्येण परां शान्तिं लभन्ते मानवाः शुभे ।
मोक्षस्योपनिषद्देवि वैराग्यमिति कीर्तितम् ।
एतत्ते कथितं देवि वैराग्योत्पादनं वचः ।
एतत्सर्वं हि संचिन्त्य मुच्यन्ते हि मुमुक्षवः ।

Colophon.

महेश्वरः ।
सांख्यज्ञानं प्रवक्ष्यामि यथावत्ते शुचिस्मिते ।
यज्ज्ञात्वा न पुनर्मर्त्यः संसारेषु प्रवर्तते ।
ज्ञानेनैव विमुक्तास्ते सांख्याः संन्यासकोविदाः ।
शारीरं तु तपो घोरं सांख्याः प्राहुर्निरर्थकम् ।
पञ्चविंशतिकं ज्ञानं तेषां ज्ञानमिति स्मृतम् ।
मूलप्रकृतिरव्यक्तमव्यक्ताज्जायते महान् ।
महतोऽभूदहंकारस्तस्मात्तन्मात्रपञ्चकम् ।
इन्द्रियाणि दशैकं च तन्मात्रेभ्यो भवन्त्युत ।
तेभ्यो भूतानि पञ्च स्युरिति क्षेत्रसमुच्चयः ।
अस्य क्षेत्रस्य संक्षेपश्चतुर्विंशतिरिष्यते ।
पञ्चविंशतिरित्याहुः पुरुषेणेह संख्यया ।
सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
तैः सृजत्यखिलं लोकं प्रकृतिः स्वात्मजैर्गुणैः ।
इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।

---

309. 72^{ab}; Vṛddhaśātātapa Smṛti 65. —Line 4071 = (var.) 12. 169. 14^{ef}; 309. 72^{cd}. —(L. 4071) D10 T2. 3 G1–3 कोपि; G4 सोपि (for को हि). T3 G1. 3 मृत्युर्येन (for मृत्युना न). G2 सोभि- (for नाभि-). M मृत्युसेनाभिवीक्षते (M4 °क्षितः) (for the post. half). —(L. 4072) T1 इदं ग्रीष्मे च संगतं (for the post. half). —(L. 4073) T G2 इति बालाश्चिन्तयंति (for the prior half). G1. 3 बुध्यति (for °ते). —(L. 4074) D10 T -मनसा (for °सो). —(L. 4076) G1. 3 -पाशाव- (for -पाशेन). —(L. 4079) G2. 4 अभि- (for इव). G1 [अ]भि- (for हि). —(L. 4080) G1–3 किं धनैर् (for किमु तैर्). —(L. 4081) D10 T G मृत्योस्तु वशमन्वि(T2 °मामु)यात् (for the post. half). —(L. 4083) G2 संयोगो (for संवेगो). T1 न संत्यागो भवेत्पुंसः; T2 न संयोगो न चेत्पुंसः (for the prior half). —(L. 4086) D10 T G1–3 एवं (for एव). —(L. 4087) D10 स (for न). —(L. 4089) D10 T G M4 शीघ्रं (for नित्यं). D10 T3 G4 परस्परं (for पुरःसरः). —(L. 4090) M3 विवशो (for विमर्शो). (L. 4091) T2. 3 G विमर्शो नाम वै(G2 दानवै)राग्यं (for the prior half). T1 [अ]पि (for [अ]स्य). D10 T2. 3 G सर्वद्रव्येषु जायते (for the post. half). —(L. 4092) G2 वैराग्येषु परां शांतिं (for the prior half). D10 T G2. 4 लभते (for लभन्ते). T1 मुनि; G3 शुभैः (for शुभे). G1. 3 लभते मानवः शुभां (for the post. half) —(L. 4093) D10 T2. 3 G दिव्यं (for देवि). D10 T2. 3 G निश्चितं (for कीर्तितम्). —(L. 4095) D10 T2. 3 G संचित्य (for सर्वं हि). T1 एतत्संचिंत्य वचनं (for the prior half). T3 transp. संचिन्त्य and मुच्यन्ते. — Colophon. — *Sub-parvan* : D10 M1–3 दानधर्मं. — *Adhy. name* : D10 T2. 3 G1. 2 उमामहेश्वरसंवादे वैराग्यलक्षणं; M उमामहेश्वरसंवादः. — *Adhy. no.* : D10 T2. 3 G2. 4 227; T1 M4 219; G1. 3 M1 221; M2. 3 222. — G3 om. from the post. half of line 4099 up to the prior half of line 4102. —(L. 4100) M2. 3 -विंशतिवि- (for °तिकं). —(L. 4102) T3 त्वपि (for स्मृत). — T3 om. lines 4104–4105. —(L. 4104) D10 T1. 3 G M4 पंचस्य (for पञ्च स्युर्). D10 T1. 3 G M4 शारीरं यैः (T3 यः) प्रवर्तते (for the post. half). —(L. 4105) D10 T1. 3 G M4 इति (for अस्य). —(L. 4107) D10 T G M4 चेति (for इति). —(L. 4108) G2 स्वात्मकैर् (for °जैर्). —(L. 4109) G4 संसारश्च (for संघातश्च). —(L. 4110) T1. 3 G1–3 चैव (for चेते). T1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

विकाराः प्रकृतेश्चैते वेदितव्या मनीषिभिः ।
लक्षणं चापि सर्वेषां विकल्पं चादितः पृथक् ।
विस्तरेण प्रवक्ष्यामि तस्य व्याख्यामिमां शृणु ।
नित्यमेकमणु व्यापि क्रियाहीनमहेतुकम् ।
अग्राह्यमिन्द्रियैः सर्वैरेतदव्यक्तलक्षणम् ।
अव्यक्तं प्रकृतिर्मूलं प्रधानं योनिरव्ययम् ।
अव्यक्तस्यैव नामानि शब्दैः पर्यायवाचकैः ।
तत्सूक्ष्मत्वादनिर्देश्यं तत्सदित्यभिधीयते ।
तन्मूलं च जगत्सर्वं तन्मूला सृष्टिरिष्यते ।
सत्त्वादयः प्रकृतिजा गुणास्तान्प्रब्रवीम्यहम् ।
सुखं तुष्टिः प्रकाशश्च त्रयस्ते सात्त्विका गुणाः ।
रागद्वेषौ सुखं दुःखं स्तम्भश्च रजसो गुणाः ।
अप्रकाशो भयं मोहस्तन्द्री च तमसो गुणाः ।
श्रद्धा प्रहर्षो विज्ञानमसंमोहो दया धृतिः ।
सत्त्वे प्रवृद्धे वर्धन्ते विपरीते विपर्ययः ।
कामः क्रोधो मनस्तापो द्रोहो लोभस्तथा तृषा ।
प्रवृद्धे परिवर्धन्ते रजस्येतानि नित्यशः ।
विषादः संशयो मोहस्तन्द्री निद्रा भयं तथा ।
तमस्येतानि वर्धन्ते प्रवृद्धे हेत्वहेतुभिः ।
एवमन्योन्यमेतानि वर्धन्ते च पुनः पुनः ।
हीयन्ते च तथा नित्यमभिभूतानि भूरिभिः ।
तत्र यत्प्रीतिसंयुक्तं काये मनसि वा भवेत् ।
वर्तते सात्त्विको भाव इत्युपेक्षेत तत्तथा ।
यदा संतापसंयुक्तं चित्तक्षोभकरं भवेत् ।
वर्तते रज इत्येवं तदा तदभिचिन्तयेत् ।
यदा संमोहसंयुक्तं यद्विषादकरं भवेत् ।
अप्रतर्क्यमविज्ञेयं तमस्तदुपधारयेत् ।
समासात्सात्त्विको धर्मः समासाद्राजसं धनम् ।
समासात्तामसः कामस्त्रिवर्गे त्रिगुणक्रमात् ।
ब्रह्मादिदेवसृष्टिर्या सात्त्विकीति प्रकीर्त्यते ।
राजसी मानुषी सृष्टिस्तिर्यग्योनिस्तु तामसी ।
ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ।
देवमानुषतिर्यक्षु यद्भूतं सचराचरम् ।
आदिप्रभृति संयुक्तं व्याप्तमेभिस्त्रिभिर्गुणैः ।
अतः परं प्रवक्ष्यामि महदादीनि लिङ्गतः ।
विज्ञानं च विवेकश्च महतो लक्षणं भवेत् ।
महान्बुद्धिर्मतिः प्रज्ञा नामानि महतो विदुः ।
महदादिक्रियायोगे महत्त्वं चोपजायते ।
अभिमानः पुनस्तत्र महतो वैकृताद्भवेत् ।
अहंकारः स विज्ञेयो लक्षणेन समासतः ।
अहंकारेण भूतानां सर्वेषां प्रभवाप्ययौ ।
अहंकारनिवृत्तिर्हि निर्वाणायोपपद्यते ।
खं वायुरग्निः सलिलं पृथिवी चेति पञ्चमी ।
महाभूतानि भूतानां सर्वेषां प्रभवाप्ययौ ।
शब्दः श्रोत्रं तथा खानि त्रयमाकाशसंभवम् ।
स्पर्शस्त्वक्प्राणिनां चेष्टा पवनस्य गुणाः स्मृताः ।
रूपं पाकोऽक्षिणी ज्योतिश्चत्वारस्तेजसो गुणाः ।
रसः स्नेहस्तथा जिह्वा शैत्यं च जलजा गुणाः ।
गन्धो घ्राणं शरीरं च पृथिव्यास्ते गुणास्त्रयः ।
इति सर्वगुणा देवि व्याख्याताः पाञ्चभौतिकाः ।
गुणान्पूर्वस्य पूर्वस्य प्राप्नुवन्त्युत्तराणि तु ।
तस्मान्नैकगुणाश्चेह दृश्यन्ते भूतसृष्टयः ।
उपलभ्याप्सु ये गन्धं केचिद्ब्रूयुरनैपुणाः ।

मनीषिणः (for °षिभिः). — (L. 4111) T_2 विकल्पस्तु (for °ल्पं च). — (L. 4112) D_{10} T [ए]व (for प्र-). D_{10} $T_{1, 2}$ $G_{1, 3, 4}$ अहं (for इमां). T_3 G_2 तस्य व्याख्या- (G_2 वक्ष्या)म्यहं शृणु (for the post. half). — (L. 4113) D_{10} T_3 शृणु; T_2 गुण- (for अणु). — (L. 4118) D_{10} मूलत्वं (for तन्मूलं). — T_2 om. (hapl.) line 4122. — (L. 4123) D_{10} $T_{1, 2}$ G_{1-3} M -प्रहर्षौ (for प्रहर्षो). — (L. 4124) D_{10} $T_{1, 2}$ G प्रवृत्ते (for प्रवृद्धे). — (L. 4125) D_{10} T G M_3 कामक्रोधौ (for कामः क्रोधो). T_1 मोहस् (for लोभस्). — (L. 4126) T_1 विवृद्धे; $G_{1, 3}$ प्रवृत्ते (for प्रवृद्धे). T_3 G_2 -वर्तते (for -वर्धन्ते). D_{10} $T_{2, 3}$ G सर्वशः (for नित्यशः). — (L. 4128) D_{10} $T_{2, 3}$ G प्रवृद्धे हेत्वहेतुकः (for the post. half). — (L. 4129) T_1 विवर्धते (for वर्धन्ते च). — (L. 4130) D_{10} G_4 ह्रसंते (for हीयन्ते). T_2 [अ]न्योन्यम् (for नित्यम्). D_{10} T $G_{1, 3, 4}$ भूरिशः (for °भिः). — (L. 4131) T_1 यथा तु प्रियसंयुक्तं (for the prior half). D_{10} T $G_{1, 2, 4}$ M_4 कायेन मनसापि वा; G_3 यद्विषादकरं भवेत् (for the post. half). — G_3 om. line 4132. T_1 om. (hapl.) lines 4134-4135; T_3 om. (hapl.) lines 4134-4136. — (L. 4134) D_{10} T_2 G M_4 इत्येव. — T_1 om. lines 4137-4138. — (L. 4137) T_2 सात्त्विकं (for राजसं). — (L. 4138) D_{10} T_2 त्रिगुणाः (for °ण-). — (L. 4139) G_2 प्रकीर्तिता (for °र्त्यते). — (L. 4140) T_2 तामसी; $G_{1, 3}$ मानवी (for मानुषी). — (L. 4144) M_3 (also as above) संसक्तं (for संयुक्तं). — (L. 4146) G विवेकं (for °कश्). — D_{10} om. lines 4148-4150. T G M_4 om. lines 4148-4149. — (L. 4156) $T_{2, 3}$ $G_{1, 3, 4}$ स्पर्शवत्; G_2 शब्दवत् (for स्पर्शस्त्वक्). T_1 स्पर्शस्त्वक्चैव संसारः पवनान्निर्गताः स्मृताः. — (L. 4160) D_{10} T_2 G विख्याताः (for व्या°). — T_1 om. line 4162. — (L. 4163) T_2 उपविश्य (for °लभ्य). — (L. 4165) T_1 M_4 पृथिव्याम्. — (L. 4166) T_3 संस्पृष्टं (for संस्थितम्). — T_3 om. (hapl.) lines 4167-4169. — (L.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अपां गन्धगुणं प्राज्ञ नेच्छन्ति कमलेक्षणे ।
तद्गन्धत्वमपां नास्ति पृथिव्या एव तद्गुणः ।
भूमेर्गन्धो रसे स्नेहो ज्योतिश्चक्षुषि संस्थितम् ।
प्राणापानाश्रयो वायुः खेष्वाकाशः शरीरिणाम् ।
केशास्थिनखदन्तत्वक्पाणिपादशिरांसि च ।
पृष्ठोदरकटिग्रीवाः सर्वं भूम्यात्मकं स्मृतम् ।
यत्किंचिदपि कायेऽस्मिन्धातुदोषमलाश्रितम् ।
तत्सर्वं भौतिकं विद्धि देहे नैवास्त्यभौतिकम् ।
बुद्धीन्द्रियाणि कर्णस्त्वगक्षि जिह्वाथ नासिका ।
कर्मेन्द्रियाणि वाक्पाणिः पादो मेढ्रं गुदं तथा ।
शब्दः स्पर्शश्च रूपं च रसो गन्धश्च पञ्चमः ।
बुद्धीन्द्रियार्थाञ्जानीयाद्भूतेभ्यस्त्वभिनिःसृतान् ।
वाक्यं क्रिया गतिः प्रीतिरुत्सर्गश्चेति पञ्चधा ।
कर्मेन्द्रियार्थाञ्जानीयात्ते च भूतोद्भवा मताः ।
इन्द्रियाणां तु सर्वेषामीश्वरं मन उच्यते ।
प्रार्थनालक्षणं तच्च इन्द्रियं तु मनः स्मृतम् ।
नियुङ्क्ते च सदा तानि भूतात्मा मनसा सह ।
नियमे च विसर्गे च मनसः कारणं प्रभुः ।
इन्द्रियाणीन्द्रियार्थाश्च स्वभावश्चेतना धृतिः ।
भूताभूतविकारश्च शरीरमिति संज्ञितम् ।
शरीराच्च परो देही शरीरं च व्यपाश्रितः ।
शरीरिणः शरीरस्य योऽन्तरं वेत्ति वै मुनिः ।
अरसस्पर्शगन्धं च रूपशब्दविवर्जितम् ।
अशरीरं शरीरेषु दिदृक्षेत निरिन्द्रियम् ।
अव्यक्तं सर्वदेहेषु मर्त्येष्वमरमाश्रितम् ।
यः पश्येत्परमात्मानं बन्धनैः स विमुच्यते ।
नैवायं चक्षुषा ग्राह्यो नापरैरिन्द्रियैरपि ।
मनसैव प्रदीपेन महानात्मा प्रदृश्यते ।
स हि सर्वेषु भूतेषु स्थावरेषु चरेषु च ।
वसत्येको महावीर्यो नानाभावसमन्वितः ।
नैव चोर्ध्वं न तिर्यक्च नाधस्तान्न कुतश्चन ।
इन्द्रियैरिह बुद्ध्या वा न दृश्येत कदाचन ।
नवद्वारं पुरं गत्वा हंसोऽसौ नीयते वशम् ।
ईश्वरः सर्वभूतेषु स्थावरस्य चरस्य च ।
तमेवाहुरणुभ्योऽणुं तं महद्भ्यो महत्तरम् ।
बहुधा सर्वभूतानि व्याप्य तिष्ठति शाश्वतः ।
क्षेत्रज्ञमेकतः कृत्वा सर्वं क्षेत्रमथैकतः ।
एवं संविमृशेज्ज्ञानी संयतः सततं हृदा ।
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान् ।
अकर्तालेपको नित्यो मध्यस्थः सर्वकर्मणाम् ।
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ।
अजरोऽयमचिन्त्योऽयमव्यक्तोऽयं सनातनः ।
देहे तेजोमयो देही तिष्ठतीत्यपरे विदुः ।
ज्ञानमूष्मा च वायुश्च शरीरे जीवसंज्ञितः ।
इत्येके निश्चिता बुद्ध्या तत्र ये बुद्धिचिन्तकाः ।
अपरे सर्वलोकांश्च व्याप्य तिष्ठन्तमीश्वरम् ।
ब्रुवते केचिदत्रैव तिले तैलवदास्थितम् ।
अपरे नास्तिका मूढा हीनत्वात्सूक्ष्मलक्षणैः ।
नास्त्यात्मेति विनिश्चित्य प्राहुस्ते निरयालयाः ।

4169) M_{1-3} -ग्रीं (for -ग्रीवाः). T_1 भूतात्मकं (for भूम्यात्मकं). — (L. 4171) T_1 तस्मात्त्वं (for तत्सर्वं). T_1 देही नैव तु भौतिकः (for the post. half). — (L. 4172) T_1 श्रोत्रं (for कर्णस्). D_{10} $T_{2,3}$ G चक्षुर् (for अक्षि). — (L. 4173) D_{10} T G M_4 पाणि- (for पाणिः). $T_{2,3}$ G_4 गुदम् (for गुदं). T_1 पादमेढ्रगुदास्तथा (for the post. half). — (L. 4176) $G_{2,3}$ पंचमः (for पञ्चधा). — (L. 4178) G_4 चरमं (for ईश्वरं). — T_1 om. lines 4180–4181. — (L. 4183) T_1 $G_{1,3}$ M_{1-3} -विकाराश्च (for °रश्च). D_{10} $T_{2,3}$ G संस्थितं (for संज्ञितम्). — (L. 4184) T_1 शरीरं समुपास्थितः (for the post. half). — (L. 4185) T_1 शरीरिणं शरीरं च (for the prior half). D_{10} T_2 G सो (for यो). T_3 वेद (for वेत्ति). — (L. 4186) T_1 -रूपं (for -गन्धं). D_{10} $T_{2,3}$ G M_4 रसः स्पर्शश्च गंधश्च (for the prior half). — (L. 4187) T_1 निरीक्षेत; G_3 निरीक्षेत्तत् (for दिदृक्षेत). — (L. 4188) T_1 मर्त्येष्वमरतां गतं (for the post. half). — (L. 4190) T_1 सर्वैर् (for [अ]परैर्). — (L. 4191) D_{10} T G M_4 [ए]व (for [ए]व). T_2 G_3 प्रदीप्तेन (for °पेन). — (L. 4194) D_{10} T G M_4 कदाचन (for कुतश्चन). — (L. 4195) T_1 वेद; G_3 एव (for इह). — (L. 4196) M_{1-3} बुद्ध्वा (for गत्वा). T_1 वशे; M_4 वशी (for वशम्). D_{10} $T_{2,3}$ G सततं ($G_{1,3}$ ततोसौ; G_2 स्थितोसौ) नियतो वशी (for the post. half). — (L. 4197) D_{10} $T_{2,3}$ G M_4 -लोकेषु; T_1 -लोकस्य (for -भूतेषु). — (L. 4198) $M_{1,3}$ [अ]णुर् (for [आ]हुर्). — (L. 4199) $T_{2,3}$ G_4 शाश्वतं (for °तः). — (L. 4200) T_1 सर्वक्षेत्रे तथैकतः (for the post. half). — (L. 4201) T_1 संविमृशञ्; $G_{1,2,4}$ स विमृशञ् (for संवि°). D_{10} T_2 G हृदि (for हृदा). — After line 4201, T_1 ins.:

तमेव परमात्मानं मुच्यते सर्वकिल्बिषैः ।

M_1 अचरो (for अजरो). — (L. 4205) T_1 अक्षरो; T_2 देहे (for देही). — (L. 4207) T_2 देही (for देहे). T -संज्ञिकः (for -संज्ञितः). — (L. 4208) D_{10} G -तेजकः; T_1 [ए]वं (for [ए]व). — (L. 4209) D_{10} $T_{2,3}$ G [ए]ते; T_1 वर्धतश्चात्मचिंतकाः (for वे). D_{10} $T_{2,3}$ G [ए]ते (for के).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

एवं नानाविधानेन विमृशन्ति महेश्वरम् ।
ऊहवान्ब्राह्मणो लोके नित्यमव्ययमक्षरम् ।
अस्त्यात्मा सर्वदेहेषु हेतुस्तत्र सुदुर्गमः ।
ऋषिभिश्चापि देवैश्च व्यक्तमेष तु दृश्यते ।
दृष्ट्वाततं महात्मानं पुनस्तत्र निवर्तते ।
तस्मात्तद्दर्शनादेव विन्दते परमां गतिम् ।
इति ते कथितो देवि सांख्यधर्मः सनातनः ।
कपिलादिभिराचार्यैः सेवितः परमर्षिभिः ।

Colophon.

महेश्वरः ।

सांख्यज्ञानेन युक्तानां तदेतत्कीर्तितं मया ।
योगधर्मं पुनः कृत्स्नं कीर्तयिष्यामि मे शृणु ।
स च योगो द्विधा भिन्नो ब्रह्मदेवर्षिसेवितः ।
समानमुभयत्रापि वृत्तं शास्त्रप्रचोदितम् ।
स चाष्टगुणमैश्वर्यमधिकृत्य विधीयते ।
सायुज्यं सर्वदेवानां योगधर्मः परः स्मृतः ।
ज्ञानं सर्वस्य योगस्य मूलमित्यवधारय ।
व्रतोपवासनियमैस्तैस्तैस्तत्परिबृंहयेत् ।
ऐकात्म्यं बुद्धिमनसोरिन्द्रियाणां च सर्वशः ।
आत्मन्यव्ययिनि प्राज्ञे ज्ञानमेतत्तु योगिनाम् ।
अर्चयेद्ब्राह्मणानग्नीन्देवतायतनानि च ।
वर्जयेदशिवां वाचं भवेत्सत्त्वमुपाश्रितः ।
दानमध्ययनं श्रद्धा व्रतानि नियमास्तथा ।
सम्यगाहारशुद्धिश्च शौचमिन्द्रियनिग्रहः ।
एतैस्तु वर्धते तेजः पापं चाप्यवधूयते ।
धूतपाप्मा च तेजस्वी लघ्वाहारो जितेन्द्रियः ।
निःशोको निर्मलो दान्तः पश्चाद्योगं समाचरेत् ।
अवदध्यान्मनः पूर्वं मत्स्यघात इवामिषम् ।
एकान्ते विजने देशे सर्वतः संवृते शुचौ ।
कल्पयेदासनं तत्र स्वास्तीर्णं मृदुभिः कुशैः ।
उपविश्यासने तस्मिन्नृजुकायशिरोधरः ।
अव्यग्रः सुखमासीनः स्वाङ्गानि न विकम्पयेत् ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ।
भ्रुवोर्मध्ये मनः कृत्वा चिन्तयित्वा शरीरिणम् ।
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ।
मनोवस्थापनं देवि योगस्योपनिषद्भवेत् ।
तस्मात्सर्वप्रयत्नेन मनोऽवस्थापयेत्सदा ।
त्वक्श्रोत्रं च ततो जिह्वां घ्राणं चक्षुश्च संहरेत् ।
पञ्चेन्द्रियाणि संधाय मनसि स्थापयेद्बुधः ।
सर्वं चापोह्य संकल्पमात्मनि स्थापयेन्मनः ।
यदैतान्यवतिष्ठन्ते मनःषष्ठानि चात्मनि ।

(for the post. half). — (L. 4212) T_3 G_1 भिन्नत्वात् (for हीन°). — (L. 4213) D_{10} $T_{2.3}$ G M_4 प्रजास्ते; T_1 स्थास्यंति (for प्राहुस्ते). — (L. 4214) T_1 -विधं देव; T_3 -विधेनैव (for -विधानेन). T_1 परात्परं (for महेश्वरम्). — (L. 4215) T_1 ऊचुश्च; G_1 (also as above). $_3$ भगवन् (for ऊहवान्). T_2 नित्यमक्षरमव्ययं (for the post. half). — (L. 4216) G -भूतेषु; M_{1-3} -लोकेषु (for -देहेषु). — (L. 4217) T_1 ऋषिभिर्दैवतैश्चापि (for the prior half). T_1 M_1 एव (for एष). D_{10} T G M_4 न (for तु). — (L. 4218) D_{10} T G M_4 दृष्ट्वा तु तं (G_2 कृतं) (for दृष्ट्वाततं). T_1 G_{1-3} M तु (for तन्). — (L. 4219) T_1 देवि (for एव). — (L. 4220) M_4 सांख्यैर् (for सांख्य-). — Colophon. — *Sub-parvan*: D_{10} दानधर्म. — *Adhy. name*: D_{10} उमामहेश्वरसंवादे सांख्ययोगः; T_2 उमामहेश्वरसंवादे सांख्यज्ञानं; T_3 M_4 उमामहेश्वरसंवादः; G_2 सांख्ययोगविधिः; M_{1-3} उमामहेश्वरसंवादे मोक्षाधिकारे सांख्यज्ञानकथनं. — *Adhy. no.*: D_{10} $T_{2.3}$ $G_{2.4}$ 228; T_1 M_4 220; $G_{1.3}$ M_1 222; $M_{2.3}$ 223. — (L. 4222) D_{10} $T_{1.3}$ G M_2 -ज्ञाने नि-; T_2 -योगे नि- (for -ज्ञानेन). D_{10} $T_{2.3}$ G यथावत् (for तदेतत्). — (L. 4223) D_{10} T_3 G ते; T_1 [अ]हं (for मे). — (L. 4324) D_{10} T_2 $G_{1.2.4}$ -संमतः; G_3 -संमितः (for -सेवितः). — (L. 4227) D_{10} G योगधर्मं परं श्रिताः; T_3 योगधर्माः पराश्रिताः (for the post. half). — (L. 4228) T_3 लोकस्य (for योगस्य). — (L. 4229) D_{10} $T_{2.3}$ G तत्सर्वं; T_1 तं पुनः (for तैस्तैस्तत्). $T_{2.3}$ चापि (for परि-). — (L. 4230) T_1 ऐकाग्र्यं (for °त्म्यं). — (L. 4231) D_{10} $T_{1.3}$ $G_{1.3}$ M_4 आत्मनो व्यथितः प्राज्ञे (for the prior half). — (L. 4233) D_{10} T G [अ]शिवं भावं (T_1 पापं) (for °वां वाचं). D_{10} T_3 G सर्व- (for भवेत्). D_{10} T_3 -तत्त्वम्; T_2 तत्त्वम् (for सत्त्वम्). — (L. 4235) D_{10} $T_{2.3}$ G M_4 सत्यम् (for सम्यग्). T_1 सत्यमाचारशुद्धिश्च (for the prior half). — (L. 4236) T_3 चास्य (for चापि). — (L. 4237) D_{10} $T_{2.3}$ G निर्धूतपापस्तेजस्वी (for the prior half). — (L. 4238) D_{10} T_2 G_2 अमोघो; T_1 विशोको; T_3 अशोको (for निःशोको). — T_1 om. line 4239. — (L. 4239) M_4 मत्स्यघातम्. T_3 [अ]निशं (for [आ]मिषम्). — (L. 4240) T_1 शुभे (for शुचौ). — (L. 4241) T_1 शुभैः (for कुशैः). — (L. 4243) T_3 स्वयम् (for सुखम्). — D_{10} T G M_4 om. lines 4245–4247. — (L. 4246) M_{1-3} निःसरति (for निश्चरति). — T_1 om. (hapl.?) lines 4249–4250. — (L. 4250) T_3 तथा (for ततो). — (L. 4252) T_1 मनश्चापि ह्यसंकल्पम् (for the prior half). T_1 बुधः (for मनः). — After line 4252, T_1 reads line 4258 repeating it in its proper place. — T_1

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

प्राणापानौ तदा तस्य युगपत्तिष्ठतो वशे ।
प्राणे हि वशमापन्ने योगसिद्धिर्ध्रुवा भवेत् ।
शरीरं चिन्तयेत्सर्वं विपाद्य च समीपतः ।
अन्तर्देहगतिं चापि प्राणानां परिचिन्तयेत् ।
ततो मूर्धानमग्निं च शारीरं परिपालयन् ।
प्राणो मूर्धनि चाग्नौ च वर्तमानो विचेष्टते ।
स जन्तुः सर्वभूतात्मा पुरुषः स सनातनः ।
मनो बुद्धिरहंकारो भूतानि विषयांश्च सः ।
बस्तिमूलं गुदं चैव पावकं च समाश्रितः ।
वहन्मूत्रं पुरीषं चाप्यपानः परिवर्तते ।
अधःप्रवृत्तिर्देहेषु कर्मापानस्य तन्मतम् ।
उदीरयन्सर्वधातूनत ऊर्ध्वं प्रवर्तते ।
उदान इति तं विद्युरध्यात्मकुशला जनाः ।
संधौ संधौ संनिविष्टः सर्वचेष्टाप्रवर्तकः ।
शरीरेषु मनुष्याणां व्यान इत्युपदिश्यते ।
धातुष्वग्नौ च विततः समानोऽग्निः समीरणः ।
स एव सर्वचेष्टानामन्तकाले निवर्तकः ।
प्राणानां संनिपातेषु संसर्गाद्यः प्रजायते ।
ऊष्मा सोऽग्निरिति ज्ञेयः सोऽन्नं पचति देहिनाम् ।
अपानप्राणयोर्मध्ये प्राणापानसमाहितः ।
समन्वितः समानेन सम्यक्पचति पावकः ।
अधस्त्वग्निरपानेन प्राणेन परिपाल्यते ।
पृष्ठतस्तु समानेन स्वां स्वां गतिमुपाश्रितः ।
शरीरमध्ये नाभिः स्यान्नाभ्यामग्निः प्रतिष्ठितः ।
अग्नौ प्राणाश्च संसक्ताः प्राणेष्वात्मा व्यवस्थितः ।
पक्वाशयस्त्वधो नाभेरूर्ध्वमामाशयः स्मृतः ।
नाभिर्मध्ये शरीरस्य सर्वप्राणास्तमाश्रिताः ।
स्थिताः प्राणादयः सर्वे तिर्यगूर्ध्वमधश्चराः ।
वहन्त्यन्नरसान्नाड्यो दश प्राणप्रचोदिताः ।
योगिनामेष मार्गस्तु पञ्चस्वेतेषु तिष्ठति ।
जितश्रमः समासीनो मूर्धन्यात्मानमादधेत् ।
मूर्धन्यात्मानमाधाय भ्रुवोर्मध्ये मनस्तथा ।
संनिरुध्य ततः प्राणानात्मानं चिन्तयेत्परम् ।
प्राणे त्वपानं युञ्जीत प्राणांश्चापानकर्मणि ।
प्राणापानगती रुद्ध्वा प्राणायामपरो भवेत् ।
एवमन्तः प्रयुञ्जीत पञ्च प्राणान्परस्परम् ।
विजने संमिताहारो मुनिस्तूष्णीं निरुच्छ्वसन् ।
अश्रान्तश्चिन्तयेद्योगमुत्थाय च पुनः पुनः ।
तिष्ठन्गच्छन्स्वपन्वापि युञ्जीतैवमतन्द्रितः ।
एवं नियुञ्जतस्तस्य योगिनो युक्तचेतसः ।
प्रसीदति मनः क्षिप्रं प्रसन्ने दृश्यते परः ।
विधूम इव दीप्तोऽग्निरादित्य इव रश्मिमान् ।
वैद्युतोऽग्निरिवाकाशे दृश्यते पुरुषोऽव्ययः ।
दृष्ट्वा तदात्मनो ज्योतिरैश्वर्याष्टगुणैर्युतम् ।
प्राप्नोति परमं स्थानं स्पृहणीयं सुरैरपि ।
इमान्योगस्य दोषांश्च दशैव परिचक्षते ।
दोषैर्विघ्नो वरारोहे योगिनां कविभिः स्मृतः ।
कामं क्रोधं भयं स्वप्नं स्नेहमत्यशनं तथा ।
वैचित्यं व्याधिमालस्यं लोभं च दशमं स्मृतम् ।
एतैस्तेषां भवेद्विघ्नो दशभिर्दैवकारितैः ।
तस्मादेतानपास्यादौ युञ्जीत चपलं मनः ।
इमानपि गुणानष्टौ योगस्य परिचक्षते ।

om. (hapl. ?) lines 4256-4257. — (L. 4257) G3 M4 अंतर्देहे गतं (for °देंहगतिं). — (L. 4258) D10 T1 (both times). 2. 3 G M4 -पालयेत् (for °यन्). — T1 om. lines 4259–4279. — (L. 4259) M4 मूर्ध्नि च (for मूर्धनि). D10 T2 G2. 4 च श्वासो ; T3 चापाने ; G1. 3 M4 चाश्वासो (for चाग्नौ च). D10 G2. 4 [ऽ]पि (for वि-). — (L. 4260) T2 स च (for सर्व-). — (L. 4263) D10 T2. 3 G M4 सदापानः प्रवर्तते (for the post. half). — (L. 4264) D10 T2 G संमितं ; T3 M1 संमतं (for तन्मतम्). — (L. 4266) G1. 3 उदानम् (for उदान). D10 G2. 4 उदितं (for इति तं). — (L. 4267) D10 T2 G स निविष्टः ; T3 च निविष्टः (for संनिविष्टः). — G2 om. (hapl.) lines 4268–4270. — (L. 4269) T2 विदितः (for विततः). — (L. 4273) D10 G1. 3. 4 M1 व्यानोदा(M1 प्राणापा)नावुपाश्रितौ ; T2 व्यानोदानौ व्यपाश्रितौ ; T3 व्यानोदाना उपाश्रितौ ; G2 प्राणव्यानादुपाश्रितः (for the post. half). — M4 om. (hapl.) lines 4274–4276. D10 T2. 3 G1 om. lines 4275–4276 — (L. 4278) D10 T2. 3 G संयुक्ताः (for संसक्ताः). T2 प्रतिष्ठितः (for व्यवस्थितः). — (L. 4279) D10 T2. 3 G M1 तथा (for स्मृतः). — (L. 4280) T1 M4 च संस्थिताः ; T2. 3 G1. 3. 4 च संश्रिताः (for समाश्रिताः). — T1 — (L. 4282) D10 T M4 प्राणाग्नि- (for प्राणप्र-). — (L. 4286) T3 om. lines 4284 and 4286–4318. — (L. 4287) M4 प्राणेषु (for तास्यां तच् (for आत्मानं). — (L. 4291) प्राणे तु). M1. 3 प्राणं (for प्राणांश्च). — (L. 4291) M1 परस्परं (for पुनः D10 T2. 3 G योगी (for योगम्). M4 एवं नियुञ्जमानस्य (for the पुनः). — (L. 4293) M4 एवं नियुञ्जमानस्य (for the prior half). — (L. 4294) D10 T2. 3 G M4 परं (for परः). G2 om. from the post. half of line 4295 up to the prior half of line 4298. — (L. 4298) G2 स्पृह- णीयः (for °णीयं). — (L. 4300) G1. 3. 4 स्मृताः (for स्मृतः). — (L. 4301) G1. 3 M4 कामः क्रोधो. — (L. 4304) T3 अपोह्य (for अपास्य). D10 T2 G M4 च परं; T3 परमं (for चपलं). — G2 om. lines 4305–4308.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

गुणैस्तैरष्टभिर्द्रव्यमैश्वर्यमधिगम्यते ।
अणिमा महिमा चैव प्राप्तिः प्राकाश्यलाघवे ।
ईशित्वं च वशित्वं च यत्रकामावसायिता ।
एतानष्टौ गुणान्प्राप्य कथंचिद्योगिनां वराः ।
ईशाः सर्वस्य लोकस्य देवानप्यतिशेरते ।
योगोऽस्ति नैवात्यशिनो न चैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य नातिजागरतस्तथा ।
युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ।
अनेनैव विधानेन सायुज्येऽपि प्रकल्पते ।
सायुज्यं देवसात्कृत्य प्रयुञ्जीतात्मभक्तितः ।
अनन्यमनसा देवि नित्यं तद्गतचेतसा ।
सायुज्यं प्राप्यते देवैर्यत्नेन महता चिरात् ।
हविर्भिरर्चनैर्होमैः प्रणामैर्नित्यचिन्तया ।
अर्चयित्वा यथाशक्ति स्वकं देवं विशन्ति ते ।
सायुज्यानां विशिष्टे द्वे मामकं वैष्णवं तथा ।
मां प्राप्य न निवर्तन्ते विष्णुं वा शुभलोचने ।
इति ते कथितो देवि योगधर्मः सनातनः ।
न शक्यं प्रष्टुमप्यन्यैर्योगधर्मस्त्वया विना ।

Colophon.

उमा ।

त्रियक्ष त्रिदशश्रेष्ठ त्र्यम्बक त्रिदशाधिप ।
त्रिपुरान्तक कामाङ्गहर त्रिपथगाधर ।
दक्षयज्ञप्रमथन शूलपाणेऽरिसूदन ।
नमस्ते लोकपालेश लोकपाल वरप्रद ।
नैकशाखमपर्यन्तमध्यात्मज्ञानमुत्तमम् ।
अप्रतर्क्यमनिर्देश्यं सांख्ययोगसमन्वितम् ।
भवता परितुष्टेन शृण्वन्त्या मम भाषितम् ।
इदानीं श्रोतुमिच्छामि सायुज्यं त्वद्गतं विभो ।
कथं परिचरन्त्येते भक्तास्त्वां परमेष्ठिनम् ।
आचारः कीदृशस्तेषां केन तुष्टो भवेद्भवान् ।
वर्ण्यमानं त्वया साक्षात्प्रीणयत्यधिकं हि माम् ।

महेश्वरः ।

हन्त ते कथयिष्यामि मम सायुज्यमद्भुतम् ।
येन तेन निवर्तन्ते युक्ताः परमयोगिनः ।
अव्यक्तोऽहमचिन्त्योऽहं पूर्वैरपि महर्षिभिः ।
सांख्ययोगौ मया सृष्टौ सर्वं चापि चराचरम् ।
अर्चनीयोऽहमीशोऽहमव्ययोऽहं सनातनः ।
अहं प्रसन्नो भक्तानां ददाम्यमरतामपि ।
न मां विदुः सुरगणा मुनयश्च तपोधनाः ।
त्वत्प्रियार्थमहं देवि मद्विभूतिं ब्रवीमि ते ।
आश्रमेभ्यश्चतुर्भ्योऽहं चतुरो ब्राह्मणाञ्शुभे ।
मद्भक्तान्निर्मलान्पुण्यान्समानीय तपस्विनः ।
व्याचख्येऽहं तदा देवि योगं पाशुपतं महत् ।
गृहीतं तच्च तैः सर्वं मुखाच्च मम दक्षिणात् ।
श्रुत्वा च त्रिषु लोकेषु स्थापितं चापि तैः पुनः ।

—(L. 4306) M_{1-3} दिव्यम् (for द्रव्यम्). —(L. 4307) D_{10} $T_{2.3}$ G प्राप्तिः प्राकाम्यमेव हि (for the post. half). —(L. 4310) D_{10} T_2 G_4 ईशः (for ईशाः). D_{10} -शोभते (for -शेरते). — T_2 repeats line 4311 after line 4315. —(L. 4312) T_3 नास्य (for नाति-). —(L. 4314) T_3 युक्तस्वप्नप्रबोधस्य (for the prior half). —(L. 4315) D_{10} $T_{2.3}$ G M_4 सायुज्यं तत्प्रक(D_{10} G_2 तत्र क)ल्प्यते (for the post. half). —(L. 4316) D_{10} $T_{2.3}$ G M_4 कृत्वा (for -कृत्य). M_4 -शक्तितः (for -भक्तितः). —(L. 4318) $G_{1.3}$ आप्यते (for प्रा°). —(L. 4319) T_3. G_2 प्रणमेन् (for प्रणामैर्). —(L. 4320) T_2 देवा ; T_3 $G_{1.3.4}$ $M_{2.4}$ देशं (for देवं). T_1 विष्णुं वा मां तथैव च (for the post. half). —(L. 4321) D_{10} T_2 $G_{2.4}$ विशिष्टं च ; $G_{1.3}$ विशिष्टैर्वै (for °ष्टे द्वे). $G_{1.3}$ मामका वैष्णवास्तथा (for the post. half). T_1 सायुज्यमामुवंत्येव योगधर्मव्यपाश्रयाः. — T_1 om. line 4322. —(L. 4322) T_2 (also as above) -लक्षणे (for -लोचने). —(L. 4323) D_{10} T G M_4 कथितं (for °तो). —(L. 4324) D_{10} T_3 G_4 अन्यैर्यो ; G_{1-3} अन्येन (for अप्यन्यैर्). — Colophon. — *Sub-parvan :* M दानधर्म. — *Adhy. name :* D_{10} उमामहेश्वरसंवादे योगविधिः ; T_2 उमामहेश्वरसंवादे योगधर्मलक्षणं ; T_3 $G_{1.3}$ M_4 उमामहेश्वरसंवादः ; M_{1-3} उमामहेश्वरसंवादे मोक्षाधिकारे योगाधिकारः. — *Adhy. no. :* D_{10} $T_{2.3}$ 229 ; T_1 G_4 M_4 221 ; $G_{1.3}$ M_1 223 ; G_2 231 ; $M_{2.3}$ 224. —(L. 4325) T_2 G_2 M_{2-4} त्र्यक्ष (submetric) ; M_1 त्र्यम्बक्ष (for त्रियक्ष). D_{10} -ज्येष्ठ (for -श्रेष्ठ). T_1 om. from the post half up to the prior half of line 4328. —(L. 4330) D_{10} $T_{2.3}$ G अविज्ञेयं (for अनिर्देश्यं). — T_1 om. (hapl.) line 4331. —(L. 4331) D_{10} $T_{2.3}$ G -तुष्टेन (for -तु°). — T_2 reads line 4335 twice. —(L. 4335) T_3 (first time) पश्यमानं (for वर्ण्य°). —(L. 4336) T_1 उत्तमं (for अद्भुतम्). T_1 om. (hapl) from the post. half of line 4338 up to the prior half of line 4340. —(L. 4338) D_{10} T_3 G_4 मुमुक्षुभिः (for महर्षिभिः). G_{1-3} अविकार्योयमुच्यते (for the post. half). —(L. 4341) $G_{3.4}$ देवानां (for भक्तानां). — T_1 om. lines 4342 and 4344. —(L. 4344) T_2 चतुर्थो (for चतुर्भ्यो). —(L. 4345) T_1 मद्भक्ता निर्मलाः पुण्या (for the prior half). T_1 गुणवंतस् (for समानीय). —(L. 4347) T_3 सर्वैर् (for सर्वं). —(L. 4348) D_{10} T G M_4 तत् (for the first च). — T_1 om. lines 4349–4356. M_3 om. lines 4349–4351. D_{10} $T_{2.3}$ G om. the post.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

इदानीं च त्वया पृष्टस्त्वत्प्रियार्थमनिन्दिते ।
तत्सर्वं कथयिष्यामि तत्त्वमेकमनाः शृणु ।
अहं पशुपतिर्नाम मद्भक्ता ये च मानवाः ।
सर्वे पाशुपता ज्ञेया भस्मदिग्धतनूरुहाः ।
रक्षार्थं मङ्गलार्थं च पवित्रार्थं च भामिनि ।
लिङ्गार्थं चैव भक्तानां भस्म दत्तं मया पुरा ।
तेन संदिग्धसर्वाङ्गा भस्मना ब्रह्मचारिणः ।
जटिला मुण्डिता वापि नानाकृतशिखण्डिनः ।
विकृताः पिङ्गलाभाश्च नग्ना नानाप्रहारिणः ।
भैक्षं चरन्तः सर्वत्र निःस्पृहा निष्परिग्रहाः ।
कपालहस्ता मद्भक्ता मन्निवेशितबुद्धयः ।
चरन्तो निखिलं लोकं मम हर्षविवर्धनाः ।
मम पाशुपतं दिव्यं योगशास्त्रमनुत्तमम् ।
सूक्ष्मं सर्वेषु लोकेषु विमृशन्तश्चरन्ति ते ।
एवं नित्याभियुक्तानां मद्भक्तानां तपस्विनाम् ।
उपायं चिन्तयाम्याशु येन मामुपयान्ति ते ।
स्थापितं त्रिषु लोकेषु शिवलिङ्गं मया प्रिये ।
नमस्कारेण वा तस्य मुच्यते सर्वकिल्बिषैः ।
इष्टं दत्तमधीतं च यज्ञाश्च सहदक्षिणाः ।
शिवलिङ्गप्रणामस्य कलां नार्हन्ति षोडशीम् ।
अर्चया शिवलिङ्गस्य परितुष्याम्यहं प्रिये ।
शिवलिङ्गार्चनायां तु विधानमपि मे शृणु ।
गोक्षीरनवनीताभ्यामर्चयेद्यः शिवं मम ।
इष्टस्य हयमेधस्य यत्फलं तस्य तद्भवेत् ।
घृतमण्डेन यो नित्यमर्चयेद्धि शिवं मम ।
स फलं प्राप्नुयान्मर्त्यो ब्राह्मणस्याग्निहोत्रिणः ।
केवलेनापि तोयेन स्नापयेद्यः शिवं मम ।
स चापि लभते पुण्यं मत्प्रियश्च भवेन्नरः ।
सघृतं गुग्गुलुं सम्यग्धूपयेद्यः शिवान्तिके ।
गोसवस्य तु यज्ञस्य यत्फलं तस्य तद्भवेत् ।
यस्तु गुग्गुलुपिण्डेन केवलेनापि धूपयेत् ।
तस्य रुक्मप्रदानस्य यत्फलं तस्य तद्भवेत् ।
यस्तु नानाविधैः पुष्पैर्मम लिङ्गं समर्चयेत् ।
स हि धेनुसहस्रस्य दत्तस्य फलमाप्नुयात् ।
यस्तु देशान्तरं गत्वा शिवलिङ्गं समर्चयेत् ।
तस्मात्सर्वमनुष्येषु नास्ति मे प्रियकृत्तमः ।
एवं नानाविधैर्द्रव्यैः शिवलिङ्गं समर्चयेत् ।
मत्प्रसादान्मनुष्येषु न पुनर्जायते नरः ।
अर्चनाभिर्नमस्कारैरुपहारैः स्तवैरपि ।
भक्तो मामर्चयेन्नित्यं शिवलिङ्गेष्वतन्द्रितः ।
पलाशबिल्वपत्राणि राजवृक्षस्रजस्तथा ।
अर्कपुष्पाणि मेध्यानि मत्प्रियाणि विशेषतः ।
फलं वा यदि वा शाकं पुष्पं वा यदि वा जलम् ।
दत्तं संप्रीणयेद्देवि मद्भक्तैर्मद्गतमानसैः ।
ममाभिपरितुष्टस्य नास्ति लोके सुदुर्लभम् ।
तस्मात्ते सततं भक्ता मामेवाभ्यर्चयन्त्युत ।
मद्भक्ता न विनश्यन्ति मद्भक्ता वीतकल्मषाः ।
मद्भक्ताः सर्वलोकेषु पूजनीया विशेषतः ।
मद्द्वेषिणश्च ये मर्त्या मद्भक्तद्वेषिणस्तथा ।
यान्ति ते नरकं क्षिप्रमिष्ट्वा क्रतुशतैरपि ।
एतत्ते सर्वमाख्यातं योगं पाशुपतं मम ।
मद्भक्तैर्मनुजैर्देवि श्राव्यमेतद्दिने दिने ।

---

half of line 4349 and the prior half of line 4350. — (L. 4350) D_{10} $T_{2.3}$ G वदामि (for तत्त्वम्). — G_2 om. lines 4352–4357. — (L. 4356) D_{10} T_2 G_3 नानाकार-; $G_{1.4}$ °काराः (for °कृत-). — (L. 4357) D_{10} $T_{2.3}$ $G_{1.3.4}$ -प्रकारिणः (for -प्रहा°). (L. 4358) T_2 चरंति (for चरन्तः). T_1 निःस्पृहा निष्प्रतिग्रहाः (for the post. half). — (L. 4359) D_{10} T_3 मृत्पात्र- (for कपाल-). — (L. 4360) T_1 विविधं; M_3 अखिलं (for नि°). — $M_{1.3}$ om. (hapl.) from the post. half of line 4362 up to the prior half of line 4365. — (L. 4365) D_{10} T G M_4 मम (for प्रिये). — (L. 4367) D_{10} $T_{1.2}$ G M_4 इदं (for इष्टं). D_{10} T G M_4 बहु- (for सह-). — (L. 4369) T_1 -तुष्टोसि (for -तुष्यामि). — (L. 4372) $T_{2.3}$ G_{1-3} तत्फलं (for तस्य तद्). D_{10} G_4 यत्फलं तत्फलं लभेत (for the post. half). — (L. 4373) T_1 -पिंडेन (for -मण्डेन). T G M_4 यः (for हि). D_{10} शिवलिंगं समर्चयेत् (for the post. half). — T_1 om. lines 4374–4378. — (L. 4376) D_{10} $T_{2.3}$ G प्रियं च लभते नरः (for the post. half). — G_4 om. (hapl.) lines 4379–4380; T_1 reads the same after line 4382. — (L. 4380) $G_{1.3}$ M_2 तत्र (for तस्य). T_1 तत्र वै (for तस्य तद्). — D_{10} om. line 4382. G_2 om. lines 4382–4384. T_1 om. lines 4383–4386. — (L. 4386) D_{10} $T_{2.3}$ G मत्समानो (for मत्प्रसादान्). — (L. 4390) G_2 तत्पुष्पाणि च मेध्यानि (for the prior half). — (L. 4392) T_1 मद्भक्तैर्युक्तमानसैः (for the post. half). — T_1 om. lines 4393–4394. — (L. 4393) $T_{2.3}$ ममापि; $G_{1.3}$ मया हि; G_2 मयाभि- (for ममाभि-). D_{10} T_2 G_{1-3} M लोकेषु (for लोके सु-). — (L. 4397) D_{10} T_1 $G_{1.2.4}$ M च वा; G_3 विष्णुविद्वेषिणश्च T_2 [ऽ]पि वा; T_3 च ये (for तथा). — (L. 4398) D_{10} T G M_4 वा (for the post. half). — (L. 4399) D_{10} $T_{2.3}$ G महत् (for घोरम् (for क्षिप्रम्). — T_1 om. line 4401. — (L. 4401) D_{10} $T_{2.3}$ मम).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

शृणुयाद्यः पठेद्वापि ममैतं धर्मनिश्चयम् ।
स्वर्गं कीर्तिं धनं धान्यं लभेत स नरोत्तमः ।

Colophon.

नारदः ।

एवमुक्त्वा महादेवः श्रोतुकामः स्वयं प्रभुः ।
अनुकूलां प्रियां भार्यां पार्श्वस्थां समभाषत ।

महेश्वरः ।

परावरज्ञे धर्माणां तपोवननिवासिनाम् ।
दीक्षादमशमोपेते सततं व्रतचारिणि ।
पृच्छामि त्वा वरारोहे पृष्टा वद ममेप्सितम् ।
सावित्री ब्रह्मणः पत्नी कौशिकस्य शची शुभा ।
लक्ष्मीर्विष्णोः प्रियतमा धृतिर्भार्या यमस्य तु ।
मार्कण्डेयस्य धूमोर्णा ऋद्धिर्वैश्रवणस्य तु ।
वरुणस्य तथा गौरी सवितुश्च सुवर्चला ।
रोहिणी शशिनो भार्या स्वाहा वह्नेरनिन्दिता ।
कश्यपस्यादितिश्चैव वसिष्ठस्याप्यरुन्धती ।
एताश्चान्याश्च देव्यस्तु सर्वास्ताः पतिदेवताः ।
श्रूयन्ते लोकविख्यातास्त्वया चैव सहोषिताः ।
तासिश्च पूजिता सा त्वमनुवृत्त्यानुभाषणैः ।
तस्मात्वां परिपृच्छामि धर्मज्ञे लोकसंमते ।
स्त्रीधर्मं श्रोतुमिच्छामि त्वयैव समुदाहृतम् ।
सधर्मचारिणी मे त्वं समानव्रतचारिणी ।
समानसारा वीर्येण मयैव त्वं शुभानने ।
ममैवार्धाच्छरीरस्य निर्मितासि पुरा शुभे ।
सुरकार्यं करोषि त्वं लोकसंधारणी तथा ।
अयं हि स्त्रीगणस्त्वां तु अनुयाति न मुञ्चति ।
त्वत्प्रसादादिदं श्रोतुं स्त्रीवृत्तं शुभलक्षणे ।
त्वया चोक्तं विशेषेण गुरुभूतं हि तिष्ठति ।
स्त्रिय एव सदा लोके स्त्रीगणस्य गतिः प्रिये ।
शश्वद्गौरीषु गच्छेत नान्यत्र रमते मनः ।
एवं लोकगतिर्देवि आदिप्रभृति वर्तते ।
प्रमदोक्तं तु यत्किंचित्तत्स्त्रीषु बहु मन्यते ।
न तथा मन्यते स्त्रीषु पुरुषोक्तमनिन्दिते ।
त्वयैव विदितो ह्यर्थः स्त्रीणां धर्मः सनातनः ।
तस्मात्त्वा परिपृच्छामि पृष्टा वद ममेप्सितम् ।

नारदः ।

एवमुक्ता तदा देवी महादेवेन शोभना ।
सोद्वेगा च सलज्जा च नावदत्तत्र किंचन ।
पुनः पुनस्तदा देवो देवीं किमिति चाब्रवीत् ।
बहुशश्चोदिता देवी सव्रीडा चेदमब्रवीत् ।

उमा ।

भगवन्देवदेवेश सुरासुरनमस्कृत ।
त्वदन्तिके मया वक्तुं स्त्रीणां धर्मं कथं भवेत् ।

महेश्वरः ।

मन्नियोगादवश्यं तु वक्तव्यं हि मम प्रिये ।

उमा ।

इमा नद्यो महादेव सर्वतीर्थोदकान्विताः ।
उपस्पर्शनहेतोस्त्वां न त्यजन्ति समीपतः ।
एताभिः सह संमन्त्र्य प्रवक्ष्यामि तवेप्सितम् ।
अयुक्तं सत्सु तज्ज्ञेषु तानतिक्रम्य भाषितुम् ।
मया संमानिताश्चैव भविष्यन्ति सरिद्वराः ।

नारदः ।

इति मत्वा महादेवी नदीर्देवीः समाह्वयत् ।

M_4 [इ]मं ; G [इ]दं (for [ए]तं). — (L. 4402) T_2 स्वर्ग्यं कीर्तिकरं धन्यं सर्वसंपत्करं नृणां. — Colophon. — *Subparvan :* M_{1-3} दानधर्म. — *Adhy. name :* D_{10} $T_{2.3}$ G_2 उमामहेश्वरसंवादे शिवभक्तिलक्षणं ; G_4 शिवभक्तिलक्षणं ; M_{1-3} उमामहेश्वरसंवादे पाशुपतयोगकथनं मोक्षाधिकारः ; M_4 उमामहेश्वरसंवादः. — *Adhy. no. :* D_{10} $T_{2.3}$ $G_{2.4}$ 230 ; T_1 M_4 222 ; $G_{1.3}$ M_1 224 ; $M_{2.3}$ 225. — (L. 4403) M_{1-3} एतद् (for एवम्). — (L. 4404) D_{10} G_4 पार्श्वस्थामभ्यभाषत (for the post. half). — (L. 4405) T_1 भूतानां (for धर्माणां). — T_1 om. 4406. — (L. 4406) D_{10} $T_{2.3}$ $G_{2.4}$ दीक्षाविधि- (for °दम-). $G_{1.3}$ शिक्षाविधिदमोपेते (for the prior half). — T_1 om. line 4408. — (L. 4409) D_{10} T G प्रिया भार्या (for प्रियतमा). T_3 om. (hapl.) from the post. half up to the prior half of line 4412. T_1 मनस्विनः (for यमस्य तु). — (L. 4410) T_1 वैवस्वतस्य धूमोर्णा (for the prior half). — (L. 4411) G_2 प्रिया (for तथा). — (L. 4412) D_{10} $T_{2.3}$ G चाग्नेर् (for वह्नेर्). — (L. 4415) T_1 स्वयं (for त्वया). — (L. 4416) T_1 $G_{1.3}$ M [अ]सि (for सा). $G_{1.3}$ अनुसत्य तु भाषणैः ; M_4 °सत्यानुभाषणैः (for the post. half). — (L. 4417) D_{10} $T_{2.3}$ G तु (for त्वां). T_1 om. (hapl.) the post. half and the prior half of line 4418. D_{10} T G M_4 om. (hapl.) from the post. half of line 4419 up to the prior half of line 4422. — (L. 4423) T_1 समंततः (for न मुञ्चति). — T_1 om. (hapl. ?) lines 4424–4435. — (L. 4424) $T_{2.3}$ G -लक्षणं (for °णे). — (L. 4425) D_{10} $T_{2.3}$ G_{1-3} M_4 गुणभूतं (for गुरु°). — T_1 om. line 4427. — (L. 4427) D_{10} T_3 G_4 नरः (for मनः). — T_1 om. line 4430. — (L. 4431) D_{10} $T_{2.3}$ G M_4 [ए]ष (for [ए]व). — (L. 4433) T_1 तथा ; G_4 महा- (for तदा). — D_{10} T G M_4 om. (hapl.) line 4436.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

विपाशां च वितस्तां च चन्द्रभागां सरस्वतीम् ।
शतद्रुं देविकां सिन्धुं गोमतीं कौशिकीं तथा ।
यमुनां नर्मदां चैव कावेरीमथ निम्नगाम् ।
तथा देवनदीं गङ्गां प्राप्तां त्रिपथगां शुभाम् ।
सर्वतीर्थोदकवहां सर्वपापविनाशनीम् ।
एता नदीः समाहूय समुद्वीक्ष्येदमब्रवीत् ।

उमा ।

हे हे पुण्याः सरिच्छ्रेष्ठाः सर्वपापविनोदकाः ।
ज्ञानविज्ञानसंपन्नाः शृणुध्वं वचनं मम ।
अयं भगवता प्रश्न उक्तः स्त्रीधर्ममाश्रितः ।
न चैकया मया साध्यस्तस्माद्वस्त्वानयाम्यहम् ।
युष्माभिस्तद्विचार्यैव वक्तुमिच्छामि शोभनाः ।
तत्कथं देवदेवाय वाच्यः स्त्रीधर्म उत्तमः ।

नारदः ।

इति पृष्टास्तया देव्या देवनद्यश्चकम्पिरे ।
तासां श्रेष्ठतमा गङ्गा वचनं चेदमब्रवीत् ।
धन्याश्चानुगृहीताः स्म अनेन वचनेन ते ।
या त्वं सुरासुरैर्मान्या नदीर्मानयसेऽनघे ।
तवैवार्हन्ति कल्याणि एवं सान्त्वप्रसादनम् ।
अशक्यमपि ये मूर्खाः स्वात्मसंभावनायुताः ।
वाक्यं वदन्ति संसत्सु स्वयमेव यथेष्टतः ।
यः शक्तश्चानहंवादी सुदुर्लभतमो मतः ।
त्वं हि शक्ता सती देवी वक्तुं प्रश्नमशेषतः ।
व्याहर्तुं नेच्छसि स्त्रीत्वात्संपूजयसि नस्तथा ।
त्वं हि देवसमा देवि ऊहापोहविशारदा ।
दिव्यज्ञानयुता देवि दिव्यज्ञानेन्धनेधिता ।
त्वमेवार्हसि तद्वक्तुं स्त्रीणां धर्मं शुभाशुभम् ।
याचामहे वयं श्रोतुममृतं त्वन्मुखोद्गतम् ।
कुरु देवि प्रियं देवि वद स्त्रीधर्ममुत्तमम् ।

नारदः ।

एवं प्रसादिता देवी गङ्गया लोकपूजिता ।
प्राह सर्वमशेषेण स्त्रीधर्मं सुरसुन्दरी ।

उमा ।

भगवन्देवदेवेश सुरेश्वर महेश्वर ।
त्वत्प्रसादात्सुरश्रेष्ठ तवैव प्रियकाम्यया ।
तमहं कीर्तयिष्यामि यथावच्छ्रोतुमर्हसि ।

Colophon.

नारदः ।

एवं ब्रुवन्त्यां स्त्रीधर्मं देव्यां देवस्य शासनात् ।
ऋषिगन्धर्वयक्षाणां योषितश्चाप्सरोगणाः ।
नागभूतस्त्रियश्चैव नद्यश्चैव समागताः ।
श्रोतुकामाः परं वाक्यं सर्वाः पर्यवतस्थिरे ।
उमा देवी मुदा युक्ता पूज्यमानाङ्गनागणैः ।
आनृशंस्यपरा देवी सततं स्त्रीगणं प्रति ।
स्त्रीगणस्य हितार्थाय भवप्रियचिकीर्षया ।
वक्तुं वचनमारेभे स्त्रीणां धर्माश्रितं हितम् ।

— (L. 4438) T G1. 3. 4 धर्मः (for धर्मं). — T1 om. lines 4439–4469. — (L. 4440) G1–3 सर्वांस् (for सर्व-). — (L. 4447) D10 T2. 3 G शतद्रूं. T3 G3. 4 M4 कौशिकां. — (L. 4449) D10 T2. 3 G M4 श्रेष्ठां (for प्राप्तां). G4 शिवां (for शुभाम्). — (L. 4450) T2. 3 G1–3 M3. 4 -विनाशिनीं; G4 -प्रणाशिनीं (for -विनाशनीम्). — T3 om. the ref. — (L. 4452) D10 T2. 3 G M4 हे पुण्याः सरितः श्रेष्ठाः (for the prior half). D10 T2. 3 G M4 -विनाश(M4 °शि)काः (for -विनोदकाः). — (L. 4455) D10 T2. 3 G1. 3. 4 M4 साध्यं (for साध्यस्). — T3 om. the ref. — (L. 4458) D10 T2. 3 G2 महा- (for देव-). — After the prior half of line 4459, T3 ins. :

विष्णुपादोद्भवा सती ।
सम्यग्विचार्य मनसा·

— (L. 4460) T2 स (for च). M4 च (for स). — (L. 4461) G1. 3. 4 आद्रियसे (for मानयसे). — (L. 4462) D10 T2. 3 G M4 [अ]र्हति (for [अ]र्हन्ति). — (L. 4465) D10 T2. 3 G transp. यः and शक्तः. — (L. 4466) T3 शक्ता च (for हि शक्ता). T3 G2 om. (hapl.) from the post. half up to the prior half of line 4268. — (L. 4467) T2 यथा (for स्त्रीत्वात्). — (L. 4468) D10 T2 G1. 3 त्वं हि देवि महादेवी (for the prior half). — (L. 4469) D10 T2. 3 G1. 3 M2. 4 दिव्यज्ञानेंधने स्थिता (for the post. half). — (L. 4470) D10 T2. 3 G M4 वृत्तं; T1 चैव (for धर्मं). — (L. 4473) G1–3 देव्या (for देवी). D10 T2 G -पूज्यया; T1 -कांतया (for -पूजिता). T3 गंगया देवपूज्यया (for the post. half). — (L. 4474) D10 T3 G M4 धर्मम् (for सर्वम्). T1 अशेषशः (for °षेण). — (L. 4477) T1 G4 तद् (for तम्). — Colophon. — *Sub-parvan* : M1–3 दानधर्म. — *Adhy. name* : D10 T2 उमामहेश्वरसंवादे स्त्रीधर्मप्रश्नः; T3 M4 उमामहेश्वरसंवादः; G3 धर्मप्रशंसनं; M1–3 उमामहेश्वरसंवादे स्त्रीधर्मकथनप्रेरणं. — *Adhy. no.* : D10 T2. 3 G4 231; T1 M4 223; G1. 3 M1 225; M2. 3 226. — (L. 4480) T3 नागवत्सः (for °भूत-). — T1 om. lines 4482–4483. — (L. 4484) T1 देव- (for भव-). — (L. 4485) D10 T3 G M4 स्त्रीणां धर्माश्रितान्वि(G1–3 M4 °श्रि)तं; T1 स्त्रीणां धर्मं हितं शुभं; T2 स्त्रीणां धर्माश्रमान्वितं (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

उमा ।
भगवन्सर्वधर्मज्ञ श्रूयतां वचनं मम ।
ऋतुप्राप्ता सुशुद्धा या कन्या सेत्यभिधीयते ।
तां तु कन्यां पिता माता भ्राता मातुल एव वा ।
पितृव्यश्चेति पञ्चैते दातुं प्रभवतां गताः ।
विवाहाश्च तथा पञ्च तासां धर्मार्थकारणात् ।
कामतश्च मिथो दानं भयाच्च प्रसभात्तथा ।
दत्ता यस्य भवेद्भार्या एतेषां येन केनचित् ।
दातारः संविमृश्यैव दातुमर्हन्ति नान्यथा ।
उत्तमानां तु वर्णानां मन्त्रवत्पाणिसंग्रहः ।
विवाहकरणं चाहुः शूद्राणां संप्रयोगतः ।
यदा दत्ता भवेत्कन्या तस्मै भार्यार्थिने स्वकैः ।
तदाप्रभृति सा नारी दशरात्रं विवर्ज्य च ।
मनसा कर्मणा वाचा ह्यनुकूला च सा भवेत् ।
इति भर्तृव्रतं कुर्यात्पतिमुद्दिश्य शोभना ।
तदाप्रभृति सा नारी तत्तत्कुर्यात्पतिप्रियम् ।
यद्यदिच्छति वै भर्ता धर्मकामार्थकारणात् ।
तदैवानुप्रिया भूत्वा तथैवोपचरेत्पतिम् ।
पतिव्रतात्वं नारीणामेतदेव समासतः ।
तादृशा सा भवेन्नित्यं यादृशस्तु भवेत्पतिः ।
शुभाशुभसमाचारे एतद्वृत्तं समासतः ।
दैवतं सततं साध्वी भर्तारं यानुपश्यति ।
दैवमेव भवेत्तस्याः पतिरित्यवगम्यते ।
एतस्मिन्कारणे देव पौराणी श्रूयते श्रुतिः ।
कथयामि प्रसादात्ते शृणु देव समाहितः ।
कस्यचित्त्वथ विप्रस्य भार्ये हि द्वे बभूवतुः ।
तयोरेका धर्मकामा देवानुद्दिश्य भक्तितः ।
भर्तारमवमत्यैव देवतासु समाहिता ।
चकार विपुलं धर्मं पूजनार्चनयान्वितम् ।
अपरा धर्मकामा च पतिमुद्दिश्य शोभना ।
भर्तारं दैवतं कृत्वा चकार किल तत्प्रियम् ।
एवं संवर्तमाने तु युगपन्मरणेऽध्वनि ।
गते किल महादेव तत्रैका या पतिव्रता ।
देवप्रियायां तिष्ठन्त्यां पुण्यलोकं जगाम सा ।
देवप्रिया च तिष्ठन्ती विललाप सुदुःखिता ।
तां यमो लोकपालस्तु बभाषे पुष्कलं वचः ।
मा शोचीस्त्वं निवर्तस्व न लोकाः सन्ति ते शुभे ।
स्वधर्मविमुखासि त्वं तस्माल्लोका न सन्ति ते ।
दैवतं हि पतिर्नार्याः स्थापितं सर्वदैवतैः ।
अवमत्य शुभे तं त्वं कथं लोकान्गमिष्यसि ।
मोहेन त्वं वरारोहे न जानीषे स्वदैवतम् ।
पतिमत्या स्त्रिया कार्यो धर्मः पत्यर्पितस्त्विति ।
तस्मात्त्वं हि निवर्तस्व कुरु पत्याश्रितं हितम् ।
तदा गन्तासि लोकांस्तान्यान्गच्छन्ति पतिव्रताः ।

---

the post. half). — T_1 om. line 4486. — (L. 4487) T_3 सुगंधा (for सुशुद्धा). T_1 transp. कन्या and सा. — (L. 4488) M_4 कन्याः (for कन्यां). T_1 transp. माता and भ्राता. — (L. 4489) D_{10} T G चैव (for चेति). G_2 प्रदातुं (for दातुं प्र-). — (L. 4490) $G_{1,3,4}$ विवाहश्च. T_2 विद्यारार्थं विवाहार्थं (for the prior half). — (L. 4491) D_{10} T G M_4 इतरेतरकाम्यया (for the post. half). — (L. 4493) D_{10} $T_{2,3}$ G M_4 सु- (for सं-). T_1 दातारस्तु विमृश्यैव (for the prior half). — (L. 4495) D_{10} T_1 G $M_{2,4}$ -कारणं (for -क°). T_1 प्राहुः (for चाहुः). — (L. 4496) T_1 यथा (for यदा). D_{10} T G तस्माद् (for तस्मै). — T_1 om. lines 4497–4499. — (L. 4497) D_{10} T_2 G विलज्जया; T_3 विलोक्य या (for विवर्ज्य च). — (L. 4498) $G_{1,2}$ [अ]प्यनुकूला; $G_{3,4}$ अनु° (for ह्यनु°). — (L. 4500) T_1 प्रतिश्रयं (for पतिप्रियम्). D_{10} T_2 G न कुर्यात्पत्यु(T_2 °र्भर्तुं)रप्रियं (for the post. half). — (L. 4501) T_1 भर्ता च (for वै भर्ता). — (L. 4502) D_{10} $T_{2,3}$ $G_{2,4}$ तथैव; T_1 G_1 $M_{3,4}$ तद्देव (for तदैव). T_1 सदैव (for तथैव). — (L. 4503) T_3 -व्रतार्थं (for -व्रतात्वं). D_{10} T_2 G सनातनं (for समासतः). — (L. 4504) $G_{1,3}$ पतिर्भवेत् (by transp.). — T_1 om. line 4505. — (L. 4505) D_{10} -समाचार; T_3 G -समाचारा (for -समाचारे). — (L. 4506) T_1 G_4 या तु; $G_{1,3}$ सानु- (for यानु-). — (L. 4507) T_1 पतिस् (for भवेत्). G_4 [ए]व (for [अ]व-). — (L. 4508) D_{10} T_2 G_4 M_3 कारणं; T_3 कारणाद् (for कारणे). T_1 G_{1-3} एतस्मात्कारणा- देव (for the prior half). T_1 पत्नीति; G_1 पुराणी (for पौ°). T_1 श्रुतौ (for श्रुतिः). — (L. 4509) D_{10} T G M_1 समासतः (for °हितः). — (L. 4510) D_{10} $T_{1,3}$ $G_{2,4}$ द्वे हि (by transp.); T_2 द्वे तु. — (L. 4513) D_{10} पूजयानार्चयान्वितं; T_1 देवतार्चनतत्परा; $T_{2,3}$ G M_{1-3} पूजयार्चनयान्वितं (for the post. half). — (L. 4515) T_1 सुमहत् (for किल तत्). — (L. 4516) T $G_{1,3}$ वि-; $G_{2,4}$ हि (for सं-). — (L. 4517) T_3 [अ]थ (for या). — (L. 4518) D_{10} T_3 -प्रियां च (for -प्रियायां). D_{10} पुण्यलोकान्. G_2 ह (for सा). — M_4 om. lines 4519–4522. — (L. 4521) T G_4 शुचस्त्वं; $G_{1,3}$ शुचः सन् (sic) (for शोचीस्त्वं). — (L. 4522) D_{10} $T_{2,3}$ G सा (for [अ]सि). — (L. 4523) D_{10} T_3 G_3 देवता (for दैवतं). D_{10} T_3 G_2 स्थापिता (for °तं). T_3 G_1 -देवतैः; $G_{3,4}$ -दैवतं (for -दैवतैः). — (L. 4524) T_1 अवाप्स्यसि (for गमिष्यसि). — (L. 4525) $M_{1,3}$ पुरारोहे (for वरा°). G_3 जानीषे स च दैवतं (for the post.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

नान्यथा शक्यते प्राप्तुं पत्नीनां लोक उत्तमः ।
यमेनैवंविधं चोक्त्वा निवृत्य पुनरेव सा ।
बभूव पतिमालम्ब्य पतिप्रियपरायणा ।
एवमेतन्महादेव दैवतं हि पतिः स्त्रियः ।
तस्मात्पतिपरा भूत्वा पतिं परिचरेदिति ।

Colophon.

उमा ।

पतिमत्या दिवारात्रं वृत्तान्तः श्रूयतां शुभः ।
पत्युः पूर्वं समुत्थाय प्रातःकर्म समादिशेत् ।
पत्युर्भावं विदित्वा तु पश्चात्संबोधयेत्पतिम् ।
ततः पौर्वाह्णिकं कार्यं स्वयं कुर्याद्यथाविधि ।
निवेद्य च तथाहारं यथा संपद्यतामिति ।
तथैव कुर्यात्तत्सर्वं यथा पत्युः प्रियं भवेत् ।
यथा पत्युस्तथा भर्तुर्गुरूणां प्रतिपद्यते ।
शुश्रूषापोषणविधौ पतिप्रियचिकीर्षया ।
भर्तुर्निष्क्रमणे कार्यं संस्मरेदप्रमादतः ।
आगतं तु पतिं दृष्ट्वा सहसा परिचारकैः ।
स्वयं कुर्वीत संप्रीत्या कायश्रमहरं परम् ।
पाद्यासनाभ्यां शयनैर्वाक्यैश्च हृदयप्रियैः ।
अतिथीनामागमने प्रीतियुक्ता सदा भवेत् ।
कर्मणा वचनेनापि तोषयेदतिथीन्सदा ।

मङ्गल्यं गृहशौचं च सर्वोपकरणानि च ।
सर्वकालमवेक्षेत कारयन्ती च कुर्वती ।
धर्मकार्ये तु संप्राप्ते तद्धर्मपरा भवेत् ।
अर्थकार्ये पुनर्भर्तुः प्रमादालस्यवर्जिता ।
सा यत्नं परमं कुर्यात्तस्य साहाय्यकारणात् ।
युगंधरा भवेत्साध्वी पत्युर्धर्मार्थयोः सदा ।
विहारकाले वै भर्तुर्ज्ञात्वा भावं हृदि स्थितम् ।
अलंकृत्य यथायोगं हावभावसमन्विता ।
वाक्यैर्मधुरसंयुक्तैः स्मयन्ती तोषयेत्पतिम् ।
येन येन यथा तुष्येत्तथा सा तोषयेत्पतिम् ।
कठोराणि न वाच्यानि अन्यदा प्रमदान्तरे ।
यस्यां कामी भवेद्भर्ता तस्याः प्रीतिकरा भवेत् ।
अप्रमादं पुरस्कृत्य मनसा जोषयेत्पतिम् ।
अनन्तरं तथान्येषां भोजनावेक्षणं चरेत् ।
दासीदासबलीवर्दांश्चण्डालांश्च शुनस्तथा ।
अनाथान्कृपणांश्चैव भिक्षुकांश्च तथैव च ।
पूजयेद्बलिभैक्षेण पत्युर्धर्मविवृद्धये ।
कुपितं वार्थहीनं वा श्रान्तं वोपचरेत्पतिम् ।
यथा स तुष्टः स्वस्थश्च भवेत्संतोषयेत्पतिम् ।
तथा कुटुम्बचिन्तायां विवादे चार्थसंशये ।
आहूता च सहायार्थं तदा प्रियहितं वदेत् ।

---

half). — (L. 4526) D_{10} T_3 $G_{1.2}$ प्रत्यर्पणस्; T_1 आत्मार्पणस्; $G_{3.4}$ पत्यर्पणस्; M_4 प्रत्यर्पणं (for पत्यर्पितस्). —(L. 4527) M_1 तदा (for हिनन्). —(L. 4528) T_3 G_2 पतिव्रता (for °ताः). $G_{1.3.4}$ यानुगच्छेत्पतिव्रता (for the post. half). —(L. 4529) T_1 अन्यथा (for ना°). D_{10} T G M_4 पत्नीनां लोकमुत्तमं (for the post. half). — (L. 4530) D_{10} $T_{2.3}$ G M_4 चोक्ता (for चोक्त्वा). T_1 एवंविधं यमेनोक्ता (for the prior half). D_{10} T_3 G निवृत्ता (for °त्य). — (L. 4531) T_1 -व्रत- (for -प्रिय-). — (L. 4532) D_{10} T G M_4 स्त्रियाः पतिः (for पतिः स्त्रियः). — (L. 4533) G_4 पतिप्रिया (for °परा). D_{10} T G M_4 पतीनुपचरेदिति (for the post. half). — Colophon. — *Sub-parvan* : M_{1-3} दानधर्म. — *Adhy. name* : D_{10} $T_{2.3}$ उमामहेश्वरसंवादे पतिव्रतामाहात्म्यं; G_2 पातिव्रत्यमाहात्म्यं; M_{1-3} उमामहेश्वरसंवादे पातिव्रत्यप्रशंसनं; M_4 उमामहेश्वरसंवादः. — *Adhy. no.* : D_{10} $T_{2.3}$ $G_{2.4}$ 232; T_1 M_4 224; $G_{1.3}$ M_1 226; $M_{2.3}$ 227. — T_1 om. lines 4534–4706. — (L. 4534) D_{10} $T_{2.3}$ G M_4 वृत्तांतं श्रूयतां शुभं (D_{10} कथां) (for the post. half). —(L. 4536) D_{10} $T_{2.3}$ G M_4 तु तं (for पतिम्). —(L. 4537) D_{10} $T_{2.3}$ G नित्यं (for ततः). — (L. 4538) D_{10} $T_{2.3}$ G M_4 संपाद्यताम् (for संप°). — (L.

4539) D_{10} G_3 पत्युः प्रियतमं भवेत् (for the post. half). — (L. 4540) D_{10} $T_{2.3}$ G M_4 यथा भर्ता तथा नारी (for the prior half). G_2 गुरूणां प्रतिपद्यतां (for the post. half). — (L. 4543) D_{10} $T_{2.3}$ G M_4 सहसा परिचारणं (for the post. half). — (L. 4544) G_2 संप्रेत्य (for संप्रीत्या). — (L. 4546) D_{10} $T_{2.3}$ G M_4 आगमेन (for °मने). — (L. 4548) D_{10} G_3 मंगळं; $T_{2.3}$ $G_{1.3.4}$ M_4 मंगलं (for मङ्गल्यं). — (L. 4550) D_{10} -कार्ये (for -कार्ये). — (L. 4552) D_{10} G_3 अपरं (for परमं). — (L. 4553) D_{10} $T_{2.3}$ G M_4 भर्तुः (for साध्वी). Kumbh. ed. धुरंधरा भवेद्भर्तुः (for the prior half). D_{10} $T_{2.3}$ G M_4 साध्वी (for पत्युर्). — (L. 4555) D_{10} Madras ed. उपहार(D_{10} अपहास)समन्वितं; D_{10} $T_{2.3}$ G M_4 मंदहाससमन्वितं (for the post. half). G_3 om. $T_{2.3}$ $G_{1.3.4}$ M_4 om. (hapl.) line 4557. — (L. 4558) $T_{2.3}$ $G_{1.3.4}$ (hapl.) lines 4557–4565. — (L. 4559) D_{10} $T_{2.3}$ G_1. M_4 अन्यथा (for °दा). — (L. 4560) D_{10} $T_{2.3}$. 4 M_4 प्रीतिकरी (for °करा). — (L. 4561) D_{10} $G_{1.3.4}$ M_4 तोषयेद् (for जो°). — (L. 4562) D_{10} $T_{2.3}$ $T_{2.3}$ $G_{1.3.4}$ अथ (for तथा). — (L. 4564) $G_{1.3.4}$ M_4 चंडालं (for चण्डालांश्च). — (L. 4564) $G_{1.3.4}$ M_4 पत्युर्धर्मे विवर्धयेत् (for the post. D_{10} $T_{2.3}$ $G_{1.3.4}$ M_4 पत्युर्धर्मे विवर्धयेत् (for the post.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अप्रियं वा हितं ब्रूयात्तस्य कामार्थकाङ्क्षया ।
एकान्तचर्याकथनं कलहं वर्जयेत्परैः ।
बहिरालोकनं चैव मोहं व्रीडां च पैशुनम् ।
बह्वाशित्वं दिवास्वप्नमेवमादीनि वर्जयेत् ।
रहस्येकासनं साध्वी न कुर्यादात्मजैरपि ।
यद्यद्द्याद्विधत्स्वेति न्यासवत्परिपालयेत् ।
विस्मृतं वा पतिद्रव्यं प्रतिदद्यात्स्वशौचतः ।
यत्किंचित्पतिना दत्तं तल्लब्ध्वा सुसुखी भवेत् ।
अतियाच्ञामतीर्ष्यां च दूरतः परिवर्जयेत् ।
बालवद्वृद्धवन्नार्याः सदैवातुरवत्पतिः ।
भार्यया व्रतमित्येव भर्तव्यः सततं विभो ।
एतत्पतिव्रतावृत्तमुक्तं देव समासतः ।
न च भोगे न चैश्वर्ये न धने न सुखे तथा ।
स्पृहा यस्या यथा पत्यौ सा नारीणां पतिव्रता ।
पतिर्हि दैवतं स्त्रीणां पतिर्बन्धुः पतिर्गतिः ।
नान्यां गतिमहं पश्ये प्रमदानां यथा पतिः ।
जातिष्वपि च वै स्त्रीत्वं विशिष्टमिति मे मतिः ।
कायक्लेशेन महता पुरुषः प्राप्नुयात्फलम् ।
तत्सर्वं लभते नारी सेवन्तीन्द्रियगोचरान् ।
यथासुखं पतिमती सर्वं पत्यनुकूलतः ।
ईदृशं धर्मसौकर्यं पश्यध्वं प्रमदाः प्रति ।
एतद्विस्मृत्य वर्तन्ते कुस्त्रियः पापमोहिताः ।
तपश्चर्या च दानं च पत्यौ तस्याः समर्पितौ ।
रूपं कुलं यशः स्वर्गः सर्वं तस्मिन्प्रतिष्ठितम् ।
एवंवृत्तसमाचारा स्ववृत्तेनैव शोभना ।
पतिना च समं गच्छेत्पुण्यलोकान्स्वकर्मणा ।
वृद्धो विरूपो बीभत्सुर्धनवान्निर्धनोऽपि वा ।
एवंभूतोऽपि भर्ता वै स्त्रीणां भूषणमुत्तमम् ।
आढ्यं वा रूपयुक्तं वा विरूपं धनवर्जितम् ।
या पतिं तोषयेत्साध्वी सा नारीणां पतिव्रता ।
दरिद्रांश्च विरूपांश्च प्रमूढान्कुष्ठसंयुतान् ।
एवंविधान्पतीन्देव तोषयित्वा पतिव्रता ।
उपर्युपरि ताँल्लोकान्पत्यैव सह गच्छति ।
एवं प्रवर्तमानायाः पतिः पूर्वं म्रियेत चेत् ।
तदानुमरणं गच्छेत्पुनर्धर्मं चरेत वा ।
एतदेवं मया प्रोक्तं स्त्रीणां धर्माश्रितं हितम् ।

Colophon.

उमा ।

एवमेतन्मया प्रोक्तं स्त्रियस्तु बहुधा स्मृताः ।
देवतानागगन्धर्वमनुष्या इति नैकधा ।

---

— *Sub-parvan :* V_1 B_{1-4} Dn $D_{1.2.5-9}$ दानधर्म. — *Adhy. name :* V_1 B Dn $D_{1.2.4-9}$ उमामहेश्वरसंवादः. — *Adhy. no.:* V_1 146; Dn_1 145.

17

— (L. 1) T_1 G_1 M_4 परप्राप्तौ (for व°). D_{10} $T_{2.3}$ G_{2-4} कृपया परया प्रोक्तः (for the prior half). — (L. 2) T_1 परमस्य; $M_{2.3}$ च वरस्य (for च परस्य). — (L. 3) T $G_{1.3.4}$ M_4 पर- (for वर-). — (L. 4) D_{10} T G [अ]नु- (for तु). T_2 स्मृतिः (for स्तुतिः). $G_{1.3}$ यजनं परमं स्तुतिः (for the post. half). — (L. 5) T_1 द्विजानां (for विद्वत्सं-). — (L. 6) D_{10} T विद्वच्छुश्रूषणं प्रीतिर्; $G_{1.3}$ विप्रशुश्रूषणप्रीतिर्; M_{1-3} विद्वत्संरक्षण° (for the prior half). — (L. 7) D_{10} T_2 G_2 $M_{1.3}$ स ध्यानेन; T_1 ध्यानेन च; T_3 समानेन (for संध्यानेन). — (L. 8) T_1 M_4 च द्विविधः (for चतुर्विधः). — (L. 10) D_{10} T G M_4 विद्वच्छुश्रूषया ज्ञानं (for the prior half). — (L. 11) D_{10} T G M_4 त्वया द्विजाः (by transp.). — (L. 15) D_{10} T_2 G वै(D_{10} G_2 वे)श्या त्वमतिलोभोयं; T_3 वैश्या त्वमासि लाभोयं; M_2 (*inf. lin.*).$_4$ वैश्या त्वमतिलाभोयं (for the prior half). T_1 वेश्या त्वमासि लोकोयं प्रविशन्नेति सांप्रतं. — (L. 16) D_{10} T G M_4 [उ]क्त्वा (for [उ]क्ता). D_{10} T_3 G [इ]यं (for [ए]वं). — (L. 17) T_1 ब्रवीतु (for °हि). — T_1 om. line 20. — (L. 20) $T_{2.3}$ G_{2-4} M_4 [उ]क्त्वाष्टाक्षर-; G_1 [उ]क्त्वा शंकर- (for [उ]क्ताष्टाक्षर-). $G_{1.3.4}$ युता (for तु सा). — (L. 21) T_3 -लोके (for -लोक-). — (L. 22) D_{10} T_1 G_3 -तत्परो भूर्महीपते; T_2 °रोहं महीपते; T_3 $G_{1.3.4}$ M_4 °रोभूत्महीपते (for the post. half). — (L. 23) D_{10} T G M_4 सद्यः (for तुष्टः). — Colophon. — *Sub-parvan :* M_{1-3} दानधर्म. — *Adhy. name :* D_{10} $T_{2.3}$ G_1 सुव्रताख्यानं. — *Adhy. no. :* D_{10} $T_{2.3}$ $G_{2.4}$ 234; T_1 M_4 226; $G_{1.3}$ 228; $M_{1.2}$ 229; M_3 230.

18

(L. 3) B_3 Dn_3 प्रवासे (for प्रवेशे). — (L. 4) V_1 B_6 धर्म- (for कर्म-). — (L. 8) B_2 -प्रमोचनं; Dn_3 -विमोक्षणं; Bom. ed. -विनाशनं (for -विमोचनम्). — (L. 11) B_3 जपन् (for येन). — (L. 12) V_1 ते तु (for तत्ते). — (L. 13) D_5 यः (for यं). D_4 पार्थिवात्मजः.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

पुरुषस्तु सुसिद्धार्थः प्रेत्य चेह च मोदते ।
सेवितं सततं राजन्पुरा राजर्षिसत्तमैः ।
क्षत्रधर्मपरैर्नित्यं सत्यव्रतपरायणैः ।
इदमाह्निकमव्यग्रं कुर्वद्भिर्नियतैः सदा ।
नृपैर्भरतशार्दूल प्राप्यते श्रीरनुत्तमा ।
नमो वसिष्ठाय महाव्रताय
पराशरं वेदनिधिं प्रणम्य ।
नमोऽस्त्वनन्ताय महोरगाय
नमोऽस्तु सिद्धेभ्य इहाक्षयेभ्यः ।
नमोऽस्त्वृषिभ्यः परमं परेषां
देवेषु देवं वरदं वराणाम् ।
सहस्रशीर्षाय नमः शिवाय
सहस्रनामाय जनार्दनाय ।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।
ऋतश्च पितृरूपश्च त्र्यम्बकश्च महेश्वरः ।
वृषाकपिश्च शंभुश्च हवनोऽथेश्वरस्तथा ।
एकादशैते प्रथिता रुद्रास्त्रिभुवनेश्वराः ।
शतमेतत्समाख्यातं शतरुद्रे महात्मनाम् ।
अंशो भगश्च मित्रश्च वरुणश्च जलेश्वरः ।
तथा धातार्यमा चैव जयन्तो भास्करस्तथा ।
त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ।
इत्येते द्वादशादित्याः काश्यपेया इति श्रुतिः ।
धरो ध्रुवश्च सोमश्च सावित्रोऽथानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।
नासत्यश्चापि दस्रश्च स्मृतौ द्वावश्विनावपि ।
मार्तण्डस्यात्मजावेतौ संज्ञानासाविनिर्गतौ ।
अतः परं प्रवक्ष्यामि लोकानां कर्मसाक्षिणः ।
अपि यज्ञस्य वेत्तारो दत्तस्य सुकृतस्य च ।
अदृश्याः सर्वभूतेषु पश्यन्ति त्रिदशेश्वराः ।
शुभाशुभानि कर्माणि मृत्युः कालश्च सर्वशः ।
विश्वेदेवाः पितृगणा मूर्तिमन्तस्तपोधनाः ।
मुनयश्चैव सिद्धाश्च तपोमोक्षपरायणाः ।
शुचिस्मिताः कीर्तयतां प्रयच्छन्ति शुभं नृणाम् ।
प्रजापतिकृतानेताँल्लोकान्दिव्येन तेजसा ।
वसन्ति सर्वलोकेषु प्रयताः सर्वकर्मसु ।
प्राणानामीश्वरानेतान्कीर्तयन्प्रयतो नरः ।
धर्मार्थकामैर्विपुलैर्युज्यते स हि नित्यशः ।
लोकांश्च लभते पुण्यान्विश्वेश्वरकृताञ्शुभान् ।
एते देवास्त्रयस्त्रिंशत्सर्वभूतगणेश्वराः ।
नन्दीश्वरो महाकायो ग्रामणीर्वृषभध्वजः ।
ईश्वराः सर्वलोकानां गणेश्वरविनायकाः ।
सौम्या रौद्रगणाश्चैव योगभूतगणास्तथा ।
ज्योतींषि सरितो व्योम सुपर्णः पतगेश्वरः ।
पृथिव्यां तपसा सिद्धाः स्थावराश्च चराश्च ह ।
हिमवान्गिरयश्चैव चत्वारश्च महार्णवाः ।
भवस्यानुचराः सर्वे हरतुल्यपराक्रमाः ।
विष्णुर्देवोऽथ जिष्णुश्च स्कन्दश्चाम्बिकया सह ।
कीर्तयन्प्रयतः सर्वान्सर्वपापैः प्रमुच्यते ।
अत ऊर्ध्वं प्रवक्ष्यामि मानवानृषिसत्तमान् ।
यवक्रीतश्च रैभ्यश्च अर्वावसुपरावसू ।
औशिजश्चैव कक्षीवान्बलश्चाङ्गिरसः सुतः ।
ऋषिर्मेधातिथेः पुत्रः कण्वो बर्हिषदस्तथा ।
ब्रह्मतेजोमयाः सर्वे कीर्तिता लोकभावनाः ।
लभन्ते हि शुभं सर्वे रुद्रानलवसुप्रभाः ।
भुवि कृत्वा शुभं कर्म मोदन्ते दिवि दैवतैः ।
महेन्द्रगुरवः सप्त प्राचीं वै दिशमाश्रिताः ।
प्रयतः कीर्तयन्नेताञ्शक्रलोके महीयते ।
उन्मुचुः प्रमुचुश्चैव स्वस्त्यात्रेयश्च वीर्यवान् ।
दृढव्यश्चोर्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा ।
मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान् ।
धर्मराजर्त्विजः सप्त दक्षिणां दिशमाश्रिताः ।
दृढेयुश्च ऋतेयुश्च परिव्याधश्च कीर्तिमान् ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसंनिभाः ।
अत्रेः पुत्रश्च धर्मात्मा ऋषिः सारस्वतस्तथा ।
वरुणस्यर्त्विजः सप्त पश्चिमां दिशमाश्रिताः ।
अत्रिर्वसिष्ठो भगवान्कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ।
ऋचीकतनयश्चोग्रो जमदग्निः प्रतापवान् ।

—(L. 14) D5 स (for सु-). —(L. 15) D4 देवर्षि- (for राजर्षि-). D5 सेवितं तं पुरा सर्वैर्देवैर्देवर्षिसत्तमैः. —(L. 20) V1 Dn3 नमस्ये (for प्रणम्य). —(L. 23) B5 (marg. as above) पवित्रं (for परेषां). —(L. 31) Dn2 समानीतं (for °ख्यातं). —(L. 36) D5 ध्रुवो धारश्च (for धरो ध्रुवश्च). D4.5 transp. अनिलः and अनलः. —(L. 38) B3 चेति (for चापि). —(L. 42) Dn2 पश्यंति त्रिदिवेश्वराः (for the post. half). —(L. 47) B1 चक्षुषा (for तेजसा). — D3 om. lines 49-54. —(L. 51) D5 विश्वेदेव- (for °श्वर-). —(L. 53) V1 B (except B3) Dn1 महाकालो (for °कायो). —(L. 55) D3 प्राणाश्चैव योगगणा (for the prior half). —(L. 56) Dn2 पन्नगेश्वरः (for पत°). —(L. 61) V1 B1.2 (marg. as above).4.5 Dn3 सम्यक् (for सर्वान्). —(L. 64) B1.2.4.5 नलश्च; D4 नळश्च (for बलश्च). —(L. 65) D4.5.8 मेधातिथिः. — D5 om. (hapl.) lines 70-74. —(L. 74)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

धनेश्वरस्य गुरवः सप्तैते उत्तरां श्रिताः ।
अपरे मुनयः सप्त दिक्षु सर्वासु धिष्ठिताः ।
कीर्तिस्वस्तिकरा नृणां कीर्तिता लोकभावनाः ।
धर्मः कामश्च कालश्च वसुर्वासुकिरेव च ।
अनन्तः कपिलश्चैव सप्तैते धरणीधराः ।
रामो व्यासस्तथा द्रौणिरश्वत्थामा च लोमशः ।
इत्येते मुनयो दिव्या एकैकः सप्तसप्तधा ।
शान्तिस्वस्तिकरा लोके दिशां पालाः प्रकीर्तिताः ।
यस्यां यस्यां दिशि ह्येते तन्मुखः शरणं व्रजेत् ।
स्रष्टारः सर्वभूतानां कीर्तिता लोकपावनाः ।
संवर्तो मेरुसावर्णो मार्कण्डेयश्च धार्मिकः ।
सांख्ययोगौ नारदश्च दुर्वासाश्च महानृषिः ।
अत्यन्ततपसो दान्तास्त्रिपु लोकेषु विश्रुताः ।
अपरे रुद्रसंकाशाः कीर्तिता ब्रह्मलौकिकाः ।
अपुत्रो लभते पुत्रं दरिद्रो लभते धनम् ।
तथा धर्मार्थकामेषु सिद्धिं च लभते नरः ।
पृथुं वैन्यं नृपवरं पृथ्वी यस्याभवत्सुता ।
प्रजापतिं सार्वभौमं कीर्तयेद्वसुधाधिपम् ।
आदित्यवंशप्रभवं महेन्द्रसमविक्रमम् ।
पुरूरवसमैलं च त्रिषु लोकेषु विश्रुतम् ।
बुधस्य दयितं पुत्रं कीर्तयेद्वसुधाधिपम् ।
त्रिलोकविश्रुतं वीरं भरतं च प्रकीर्तयेत् ।
गवामयेन यज्ञेन येनेष्टं वै कृते युगे ।
रन्तिदेवं महादेवं कीर्तयेत्परमद्युतिम् ।
विश्वजित्तपसोपेतं लक्षण्यं कामलक्षणम् ।
तथा श्वेतं च राजर्षिं कीर्तयेत्परमद्युतिम् ।
स्थाणुः प्रसादितो येन यस्यार्थे ह्यन्धको हतः ।
महादेवप्रसादेन येन गङ्गावतारिता ।
भगीरथं दुराधर्षं कीर्तयेत्परमद्युतिम् ।
सगरस्यात्मजा येन प्लावितास्तारितास्तथा ।
हुताशनसमानेतान्महारूपान्महौजसः ।
उग्रकोपान्महासत्त्वान्कीर्तयेत्कीर्तिवर्धनान् ।
देवानृषिगणांश्चैव नृपांश्च जगतीश्वरान् ।
सांख्यं योगं च परमं हव्यं कव्यं तथैव च ।
कीर्तितं परमं ब्रह्म सर्वश्रुतिपरायणम् ।
मङ्गल्यं सर्वभूतानां पवित्रं बहुकीर्तितम् ।
व्याधिप्रशमनं श्रेष्ठं पौष्टिकं सर्वकर्मणाम् ।
प्रयतः कीर्तयेच्चैतान्कल्यं सायं च भारत ।
एते वै यान्ति वर्षन्ति भान्ति वान्ति सृजन्ति च ।
एते विनायकाः श्रेष्ठा दक्षाः क्षान्ता जितेन्द्रियाः ।
नराणामशुभं सर्वे व्यपोहन्ति प्रकीर्तिताः ।
साक्षिभूता महात्मानः पापस्य सुकृतस्य च ।
एतान्वै कल्यमुत्थाय कीर्तयञ्शुभमश्नुते ।
नाग्निचोरभयं तत्र न मार्गप्रतिरोधनम् ।
एतान्कीर्तयतां नित्यं दुःस्वप्नो नश्यते नृणाम् ।
मुच्यते सर्वपापेभ्यः स्वस्तिमांश्च गृहान्व्रजेत् ।
दीक्षाकालेषु सर्वेषु यः पठेन्नियतो द्विजः ।
न्यायवानात्मनिरतः क्षान्तो दान्तोऽनसूयकः ।
रोगार्तो वाभियुक्तो वा पठन्पापात्प्रमुच्यते ।
वास्तुमध्ये तु पठतः कुलस्वस्त्ययनं भवेत् ।
क्षेत्रमध्ये तु पठतः सर्वं सस्यं प्ररोहति ।
गच्छतः क्षेममध्वानं ग्रामान्तरगतः पठन् ।
आत्मनश्च सुतानां च दाराणां च धनस्य च ।
बीजानामोषधीनां च रक्षामेतां प्रयोजयेत् ।
एतान्संग्रामकाले तु पठतः क्षत्रियस्य तु ।
व्रजन्ति रिपवो नाशं क्षेमं च विनिवर्तते ।
एतान्दैवे च पित्र्ये च पठतः पुरुषस्य हि ।
भुञ्जते पितरो हव्यं कव्यं च त्रिदिवौकसः ।

B5 श्रीमान् (for सप्त). — (L. 75) D5 वीर्यवान् (for कीर्तिमान्). — B3 om. (hapl.) lines 79–82. — (L. 83) V1 B2 विष्ठिताः ; B3 [अ]धिष्ठिताः (for धि°). — (L. 85) B6 धर्मः कालश्च कामश्च (for the prior half). — (L. 86) Dn3 अंतकः (for अनन्तः). — (L. 90) Dn2 तन्मुखं ; Dn3 उन्मुखः (for तन्मुखः). — (L. 92) B1 -सावर्णिर् (for °र्णो). — Dn3 D3. 5 om. (hapl.) lines 100–102. — (L. 102) B4. 6 ध्रुवस्य (for बुधस्य). — (L. 103) B1 त्रिलोके ; D5 त्रैलोक्य- (for त्रिलोक-). — (L. 105) D6 महाभागं (for °देवं). — (L. 106) Dn1 D4. 5 लक्षण्यं लोकपूजितं ; Dn2 D8 °ण्यं लोकमंगलं (for the post. half). — After line 107, Dn1 reads line 111. B1 D8 om. (hapl.) lines 108–110. Dn1 om. line 108. — (L. 108) D4 विदितो येन यस्यार्थो ह्यंधको दानवो हतः. — (L. 109) D4 transp. येन and गङ्गा. — (L. 110) V1 B2–5 Dn1. n3 D4. 5 च राजर्षिं (for दुराधर्षं). D5 om. (hapl.) from the post. half up to the prior half of line 113. — (L. 116) D6 कीर्तयेच्च परं ब्रह्म (for the prior half). — (L. 117) Dn3 पवित्रं कीर्तिवर्धनं (for the post. half). — (L. 120) B1. 2. 4. 5 पांति ; Dn1 D3 भांति (for यान्ति). — (L. 122) V1 B Dn D4. 5 सर्वं (for सर्वे). — (L. 125) B3 Dn1. n2 D8 तस्य (for तत्र). — (L. 127) B2 (marg. as above) वसेत् (for व्रजेत्). — (L. 129) D6 ऽजितेंद्रियः (for ऽनसूयकः). — (L. 131) D5 कुले (for कुल-). — (L. 137) V1 B1–4 Dn D4. 5. 8 क्षेमी (for क्षेमं). Dn1. n2 D6. 8 परि- (for विनि-). — (L. 139) B6 transp. हव्यं and कव्यं. D5 हव्यं चापि (for

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

न व्याधिश्चापदभयं न द्विपान्न हि तस्करात् ।
कश्मलं लघुतां याति पाप्मना च प्रमुच्यते ।
यानपात्रे च याने च प्रवासे राजवेश्मनि ।
परां सिद्धिमवाप्नोति सावित्रीं ह्युत्तमां पठन् ।
न च राजभयं तेषां न पिशाचान्न राक्षसात् ।
नाग्न्यम्बुपवनव्यालाद्भयं तस्योपजायते ।
चतुर्णामपि वर्णानामाश्रमस्य विशेषतः ।
करोति सततं शान्तिं सावित्रीमुत्तमां पठन् ।
नाग्निर्दहति काष्ठानि सावित्री यत्र पठ्यते ।
न तत्र बालो म्रियते न च तिष्ठन्ति पन्नगाः ।
न तेषां विद्यते दुःखं गच्छन्ति परमां गतिम् ।
ये शृण्वन्ति महद्ब्रह्म सावित्रीगुणकीर्तनम् ।
गवां मध्ये तु पठतो गावोऽस्य बहुवत्सलाः ।
प्रस्थाने वा प्रवेशे वा सर्वावस्थागतः पठेत् ।
जपतां जुह्वतां चैव नित्यं च प्रयतात्मनाम् ।
ऋषीणां परमं जप्यं गुह्यमेतन्नराधिप ।
याथातथ्येन संगम्य इतिहासं पुरातनम् ।
पराशरमतं दिव्यं शक्राय कथितं पुरा ।
तदेतत्ते समाख्यातं तथ्यं ब्रह्म सनातनम् ।
हृदयं सर्वभूतानां श्रुतिरेषा पुरातनी ।
सोमादित्यान्वयाः सर्वे राघवाः कुरवस्तथा ।
पठन्ति शुचयो नित्यं सावित्रीं प्राणिनां गतिम् ।
अभ्याशे नित्यं देवानां सप्तर्षीणां ध्रुवस्य च ।
मोक्षणं सर्वकृच्छ्राणां मोचयत्यशुभात्सदा ।
वृद्धैः काश्यपगौतमप्रभृतिभिर्भृग्वङ्गिरोत्र्यादिभिः
शुक्रागस्त्यबृहस्पतिप्रभृतिभिर्ब्रह्मर्षिभिः सेवितम् ।
भारद्वाजमतं ऋचीकतनयैः प्राप्तं वसिष्ठात्पुनः
सावित्रीमधिगम्य शक्रवसुभिः कृत्स्ना जिता दानवाः ।
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे च बहुश्रुताय ।
दिव्यां च भारतकथां कथयेच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव ।
धर्मो विवर्धति भृगोः परिकीर्तनेन
वीर्यं विवर्धति वसिष्ठनमोनतेन ।
संग्रामजिद्भवति चैव रघुं नमस्य-
न्स्यादश्विनौ च परिकीर्तयतो न रोगः ।
एषा ते कथिता राजन्सावित्री ब्रह्म शाश्वती ।
विवक्षुरसि यच्चान्यत्तत्ते वक्ष्यामि भारत ।

Colophon.

19

After 13. 148, D_{4-9} ins.:

युधिष्ठिरः ।

मानसानीह तीर्थानि प्रशंसन्ति महर्षयः ।
तानि मे कुरुशार्दूल यथावद्वक्तुमर्हसि ।

भीष्मः ।

शृणु तीर्थानि गदतो मानसानीह मानद ।
येषु सम्यङ् नरः स्नात्वा प्रयाति परमां गतिम् ।
सत्यं तीर्थं क्षमा तीर्थं सत्यमिन्द्रियनिग्रहः ।
सर्वभूतदया तीर्थं तीर्थमार्जवमेव च ।
दानं तीर्थं दमस्तीर्थं संतोषस्तीर्थमुत्तमम् ।
ब्रह्मचर्यं परं तीर्थं तीर्थं च प्रियवादिता ।
ज्ञानं तीर्थं तपस्तीर्थं धृतिस्तीर्थमुदाहृतम् ।
तीर्थानामपि यत्तीर्थं विशुद्धिर्मनसः परा ।
नोदकक्लिन्नगात्रो हि स्नात इत्यभिधीयते ।
स स्नातो यो दमस्नातः सुविशुद्धमनोमलः ।
यो लुब्धः पिशुनः क्रूरो दाम्भिको विषयात्मकः ।
सर्वतीर्थेष्वपि स्नातः पापो मलिन एव सः ।
न च गच्छन्ति ते स्वर्गमविशुद्धमनोमलाः ।

कव्यं च त्रि-). —(L. 140) B_1 द्विषो नापि (for द्विपान्न हि). —(L. 142) D_5 यानपात्रे प्रवासे च जन्मवेश्मनि भारत. —(L. 144) $D_{n1.n2}$ D_5 रोग- (for राज-). B_8 न पिशाचोरगरक्षसां (for the post. half). —(L. 145) D_4 प्र- (for [उ]प-). —(L. 146) D_5 आश्रमाणां (for °मस्य). —(L. 153) $B_{1.4.5}$ D_{n3} $D_{4.5}$ प्रवासे (for प्रवेशे). —(L. 155) D_5 transp. जप्यं and गुह्यम्. —(L. 159) D_{n1} सनातनी (for पुरा°). —(L. 160) D_{n1} D_5 सोमादित्यनृपाः सर्वे (for the prior half). —(L. 162) D_{n8} अभीष्टे (for अभ्याशे). —(L. 166) V_1 वासिष्ठादिभिः; $B_{1.3-5}$ D_{n1} D_8 वशिष्ठात्पुनः. — D_{n3} reads line 169 twice. —(L. 169) V_1 $B_{1.2.4}$ सु- (for च). —(L. 170) B पुण्यां (for दिव्यां). B शृणुयाच्च (for कथयेच्च). —(L. 173) B_1 वशिष्ठमुनेः स्मृतेन (for वसिष्ठनमोनतेन). — Colophon. — *Parvan name:* B_{1-4} शांति. — *Sub-parvan:* V_1 $B_{4.5}$ V_1 B D_n $D_{5.8}$ दानधर्म. — *Adhy. name:* V_1 $B_{4.5}$ सावित्री; B_1 सावित्रीमाहिमाकथनं; B_2 D_n सावित्रीव्रतं; B_3 सावित्र्याख्यानं; $D_{5.8}$ सावित्रीकथनं. — *Adhy. no.:* V_1 148; D_{n1} 147.

19

D_5 om. lines 1–7. —(L. 5) $D_{4.5.8}$ -निग्रहं (for -निग्रहः). — D_7 om. (hapl.) lines 7–8. —(L. 9) $D_{5.7}$ दानं (for ज्ञानं). D_7 दमस् (for तपस्). —(L. 10) D_4 वृत्तं (for तीर्थं). —(L. 12) D_4 विशुद्धिश्च; D_5 शुचिः शुद्ध- (for सुविशुद्ध-).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

विषयेष्वपि संरागो मानसो मल उच्यते ।
तेष्वेव च विरागोऽस्य निर्मलत्वमुदाहृतम् ।
चित्तमन्तर्गतं दुष्टं तीर्थस्नानैर्न शुध्यति ।
शतशोऽपि जले धौतं सुराभाण्डमिवाशुचि ।
निगृहीतेन्द्रियग्रामो यत्रैव निवसेन्नरः ।
तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्करं गया ।
ज्ञानह्रदे सत्यजले रागद्वेषमलापहे ।
यः स्नातो मानसे तीर्थे स याति परमां गतिम् ।

Colophon.

युधिष्ठिरः ।

पापस्य किमधिष्ठानं का प्रसूतिश्च भारत ।
किं चास्य कारणं प्रोक्तं तन्मे ब्रूहि पितामह ।

भीष्मः ।

लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च ।
अत्र ते संशयो मा भूल्लोभः पापस्य कारणम् ।
लोभात्क्रोधः प्रभवति लोभाद्द्रोहः प्रवर्तते ।
लोभान्मोहश्च माया च मानान्मात्सर्यमेव च ।
नार्थैः पूरयितुं शक्यो लोभो बहुविधैरपि ।
नित्यं गम्भीरतोयाभिरापगाभिरिवार्णवः ।
सर्वभूतेष्वविश्वासः सर्वभूतेष्वनिर्दयः ।
सर्वभूतेष्वजिह्मश्च लोभाद्भवति भारत ।
सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः ।
छेत्तारः संशयानां च लोभग्रस्ताः प्रयान्त्यधः ।
लोभक्षये क्षयं यान्ति सर्वपापानि देहिनाम् ।
लोभवृद्धौ च वर्धन्ते नृपते नात्र संशयः ।
तस्मात्सर्वप्रयत्नेन त्यज लोभं युधिष्ठिर ।
यदीच्छसि महाराज शाश्वतीं गतिमात्मनः ।

Colophon.

20

After 13. 150, D_{4-8} ins. :

युधिष्ठिरः ।

पितामह महाबाहो सर्वधर्मभृतां वर ।
सत्यार्जवगुणोपेतं सौम्यं धर्मं वदस्व मे ।
भवतः श्रोतुमिच्छामि सत्यवाक्यमनुत्तमम् ।
यत्प्राग्बहुलया प्रोक्तं तन्मे त्वं वक्तुमर्हसि ।

भीष्मः ।

सौम्य धर्मं प्रवक्ष्यामि सत्यार्जवसमन्वितम् ।
कामरूपस्य व्याघ्रस्य धेन्वा संवादमुत्तमम् ।
माथुरे विषये रम्ये धनधान्यसमन्विते ।
नानाजनपदाकीर्णे यज्ञवाटविभूषिते ।
तत्र सा नगरी रम्या यमुनातीरमाश्रिता ।
अर्धचन्द्रप्रतीकाशा विद्वज्जनविभूषिता ।
इन्द्रयष्टिध्वजाकीर्णा गोपीभिरुपशोभिता ।
बहुद्विजसमाकीर्णा नानापण्योपशोभिता ।
सुप्रमाणा सुरम्या च स्वातिनक्षत्रनिर्मिता ।
प्राकाराट्टप्रतोलीभिर्दुर्जया परिखादिभिः ।
आम्रातककपित्थैश्च राजवृक्षैश्च शोभिता ।
देवतायतनैर्दिव्यैः कदलीखण्डमण्डिता ।
हंसमालाप्रतीकाशैर्दीप्यते धवलैर्गृहैः ।
पनसैर्बकुलैस्तालैः प्रियालैर्नागकेसरैः ।
करवीरैः कर्णिकारैः पाटलाशोकचम्पकैः ।
मल्लिकाकुन्दजातीभिः कुब्जाह्लादकुरण्टकैः ।
सुवर्णश्वेतयूथीभिः किंकिरातोत्पलादिभिः ।
पुंनागवृक्षबकुलैरुद्यानैरुपशोभिता ।
संपूर्णा धनधान्यैश्च गोधनैरुपशोभिता ।
वेदाध्ययनघोषैश्च पवित्रीकृतमङ्गला ।
वेदीशृङ्गाटकै रम्यैस्त्रिकचत्वरशोभिता ।

— (L. 17) D_{4} तदेव च विरामोस्य (for the prior half). — (L. 21) D_{8} तस्य तत्र (by transp.). — Colophon. — *Sub-parvan* : $D_{4.5}$ दानधर्मं. — *Adhy. name* : D_{4-9} मानसतीर्थं. — D_{5} om. the post. half of line 25 and the prior half of line 26. — (L. 27) D_{5} क्रोधः (for लोभः). — (L. 30) D_{4} लोके बहुविधैस्तथा (for the post. half). — D_{4} om. (hapl.) line 32. — (L. 35) $D_{5.7}$ पतंति (for प्रयान्ति). — Colophon. — *Sub-parvan* : D_{4} दानधर्मं. — *Adhy. name* : $D_{4.6.8.9}$ मानसतीर्थं ; D_{7} लोभतीर्थं.

20

This passage is substantially identical with Padma Purāṇa, I. 18. — (L. 2) D_{5} सौम्य (for सौम्यं). — (L. 3) $D_{6.8}$ भगवन् (for भवतः). — (L. 5) $D_{4.6.8}$ -गुणान्वितं (for ˚सम˚). — (L. 6) D_{4} व्याघ्रेण (for व्याघ्रस्य). — (L. 11) D_{5} परि- ; D_{7} प्रति- (for उप-). — $D_{4.6.8}$ om. (hapl.) line 12. — (L. 15) D_{4} आम्रातकैः (for ˚तक-). D_{4} शोभितैः (for ˚ता). — (L. 16) D_{4} -मंडितं (for -मण्डिता). — (L. 18) D_{8} पियालैर् (for प्रि˚). — (L. 20) D_{4} -करंटकैः (for -कु˚). — (L. 21) D_{4} किंकरातोत्पलैस्तथा ; D_{5} नीलश्वेतोत्पलादिभिः (for the post. half). — (L. 22) D_{7} अपि (for उप-). D_{4} -शोभितैः (for ˚ता). — (L. 25) $D_{4.5}$ वेदैः (for वेदी-). — (L. 26) D_{4}

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

रावणस्येव रत्नाढ्या लङ्का चैव महापुरी ।
इन्द्रसेनो नृपस्तत्र राजधर्मसमन्वितः ।
धर्मे चाभिरतो नित्यं देवतातिथिपूजकः ।
क्षत्रधर्मे रतः श्रीमान्प्रजापतिसमः क्षितौ ।
तेन सा नगरी रम्या राजसिंहेन पालिता ।
नित्योत्सवप्रमुदिता शङ्खवादित्रनादिता ।
सुसंगीतविदग्धैश्च प्रेक्षणीयैः समाकुला ।
अन्तरापणवीथीभिः सुविभक्तैश्चतुष्पथैः ।
दीर्घिकाकूपवापीभिस्तडागैरुपशोभिता ।
सभाप्रपासमाकीर्णा विवाहमखसंकुला ।
पुरी चन्द्रवती नाम दृष्टा ते यदि वा श्रुता ।
तस्यां पुर्यां पुरा वृत्तं तत्त्वं शृणु युधिष्ठिर ।
कस्यचिद्द्विजमुख्यस्य कल्याणी धेनुरुत्तमा ।
हृष्टपुष्टा सुसंतुष्टा बहुला नाम विश्रुता ।
गोधनस्य च सा मुख्या हंसवर्णा वटस्त्रवा ।
दीर्घघोणा विभक्ताङ्गी श्रेष्ठलोमतनुत्वचा ।
विस्तीर्णजघना दिव्या पीनश्रोणिपयोधरा ।
सर्वलक्षणसंपन्ना सर्वावयवसुन्दरी ।
नीलकण्ठा शुभग्रीवा घण्टाली मधुरस्वरा ।
सा च यूथस्य सर्वस्य चचाराग्रे सुनिर्भया ।
ग्रामधान्यं चरेच्छन्नं गत्वैकैव यथासुखम् ।
सान्द्रं सुपुष्पितं सुरभि अच्छिन्नं चरते तृणम् ।
रोहितो नाम तत्रान्यः पर्वतो यमुनातटे ।
अनेककन्दरदरीनिर्झरैरुपशोभितः ।
तस्य पूर्वोत्तरे भागे घोरे तृणसमाकुले ।
संकटे विषमे दुर्गे भैरवे लोमहर्षणे ।
मृगसिंहसमाकीर्णे बहुश्वापदसेविते ।
वल्लीवृक्षादिगहने शिवाशतनिनादिते ।
दुर्गेऽस्मिन्वसते रौद्रः कामरूपी भयंकरः ।
द्वीपी शोणितमांसाशी महादंष्ट्रो महाबलः ।
महापर्वतसंकाशो मेघगर्जितनिस्वनः ।
महागुहादरीवक्त्रस्तीक्ष्णदंष्ट्रो नखायुधः ।
नन्दी नाम स धर्मात्मा स च गोपहिते रतः ।
अच्छिन्नाग्रैस्तृणैर्दीर्घैर्गोधनं परिरक्षति ।
तस्य यूथपरिभ्रष्टा बहुला तृणतृष्णया ।
चरन्ती व्याघ्रपुरतः सा धेनुः समुपस्थिता ।
अभिद्रवंश्च तां व्याघ्रस्तिष्ठ तिष्ठेति चाब्रवीद् ।
त्वमद्य विहितो भक्षः स्वयं प्राप्तासि मे वनम् ।
व्याघ्रस्य वचनं श्रुत्वा निष्ठुरं लोमहर्षणम् ।
सुतं रूपान्वितं बालं चन्द्ररूपसमप्रभम् ।
वत्सं स्मरति सा धेनुः स्नेहार्ता गद्गदस्वरा ।
दह्यन्ती पुत्रशोकेन बहुला पुत्रवत्सला ।
रुदन्ती करुणं सा तु निराशा पुत्रदर्शने ।
दृष्ट्वा तु बहुलां व्याघ्रः क्रन्दमानां सुदुःखिताम् ।
उवाच वचनं घोरं बहुले किं प्ररुद्यते ।
दैवाद्यथोपपन्नासि भक्षस्त्वं मे यदृच्छया ।
न रुदन्त्या वा हसन्त्या वा तथा ते जीवितं भवेद् ।
विहितं भुज्यते लोके स्वयं प्राप्तासि धेनुके ।
मृत्युस्ते विहितोऽद्यैव वृथा किमनुशोचसि ।
पप्रच्छ च पुनर्व्याघ्रः किमर्थं रुदितं त्वया ।
कौतुकं मेऽद्य संजातमशेषं कथयस्व नः ।
व्याघ्रस्य वचनं श्रुत्वा बहुला वाक्यमब्रवीत् ।
क्षन्तुमर्हसि मे नाथ कामरूप नमोऽस्तु ते ।
त्वां समालोक्य लोकस्य परित्राणं न विद्यते ।
जीवितार्थं न शोचामि प्राप्तव्यं मरणं मया ।
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ।
देवैरपि सदा सर्वैर्मर्तव्यमवशैर्ध्रुवम् ।

रत्नानां (for °ढ्या). D5 [ए]व हि (for चैव). — (L. 29) D5 क्षात्रधर्म- (for क्षत्रधर्मे). — (L. 30) D4 -हंसेन (for -सिंहेन). — (L. 31) D5–7 -वादिता (for -ना°). — (L. 32) D8 -विदैश्चैव (for -विदग्धैश्च). D4, 5 प्रेक्ष- णीय- (for °णीयैः). — (L. 35) D4, 5 -सुख- (for -मख-). — (L. 37) D5 नराधिप (for युधिष्ठिर). — (L. 38) D8 कल्या धेनुषु चोत्तमा (for the post. half). — After line 40, D5 ins. :

सुमुखा हंसवर्णाभा पटन्यस्तामिव श्रियम् ।

— (L. 41) D5 दृढपुष्टा (for दीर्घघोणा). D7 श्रेष्ठा रोम- (for श्रेष्ठलोम-). D6 पुष्टरोमतनुच्छदा ; D8 श्रेष्ठा रोमतनूत्तमा (for the post. half). — (L. 45) D6 सुदुर्भरा (for सुनिर्भया). — (L. 47) Prior half hypermetric. D6 सुरभिम् (for सुरभि). D5 सांद्रपुष्पितसौरभ्यम् ; D8 सांद्रं सुपुष्पं सुरभिम् (for the prior half). — (L. 49) D4 अनेककंदकदली- ; D8 °दरीयुक्तो (for the prior half). — (L. 51) Some Mss. रोम- (for लोम-). — (L. 54) D4, 5 रौद्रे (for रौद्रः). — D4, 5 om. lines 55–58. — (L. 59) D5 अच्छिन्नाःस्वर्णै- दीर्घैर् (for the prior half). — (L. 63) D4, 5 वने (for वनम्). — (L. 64) Some Mss. रोम- (for लोम-). — (L. 65) D4, 5, 8 -बिंब- (for -रूप-). — (L. 68) D4, 5, 8 रुदती (for रुदन्ती). — (L. 71) D6, 8 भक्ष्यस् (for भक्षस्). — (L. 72) D5 कथं (for तथा). — (L. 74) D5 ह्येवं (for ऽद्यैव). — D4 om. (hapl.) line 79. — (L. 80) D4 जीवनार्थं (for जीवितार्थं). — Lines 81–83 = 6. 24. 27. — (L. 83) D7 मर्तव्यमविशंकया (for the post. half). D5 अवशं (for °शैर्).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तस्मात्तन्नाहमेवैकं व्याघ्र शोचामि जीवितम् ।
किं तु स्नेहवशाद्व्याघ्र दुःखेन रुदितं मया ।
अस्ति मे हृदि संतापस्तं च त्वं श्रोतुमर्हसि ।
अग्रे वयसि वर्तन्ती प्रसूताहं मृगाधिप ।
इष्टः प्रथमजातस्तु सुतश्च मम बालकः ।
क्षीरं पिबति मे वत्सस्तृणं नाद्यापि जिघ्रति ।
स च गोपकुले बद्धः क्षुधितो मामुदीक्षते ।
सुतं तमनुशोचामि कथं जीविष्यते सुतः ।
तस्येच्छामि स्तनं दातुं पुत्रस्नेहवशानुगा ।
पाययित्वा च तं वत्समवलिह्य च मूर्धनि ।
सखीनामर्पयित्वा च संदिश्य च हिताहितम् ।
पुनः प्रत्यागमिष्यामि यथेष्टं भक्षयिष्यसि ।
शीघ्राहमागमिष्यामि महाव्याघ्र तवान्तिकम् ।
बहुलाया वचः श्रुत्वा मृगेन्द्रः पुनरब्रवीत् ।
किं ते पुत्रेण कर्तव्यं मरणं किं न पश्यसि ।
त्रसन्ति सर्वभूतानि मां निरीक्ष्य म्रियन्ति च ।
त्वं पुनः कृपयाविष्टा पुत्र पुत्रेति भाषसे ।
न मन्त्रा न तपो दानं न माता न पिता सुतः ।
शक्नुवन्ति परित्रातुमागतां मत्समीपतः ।
कथं तद्गोकुलं गत्वा गोपीजनसमाकुलम् ।
वृषभैर्नादितं रम्यं बालवत्सविभूषितम् ।
भूषणं देवलोकस्य स्वर्गतुल्यं न संशयः ।
नित्यं प्रमुदितं रम्यं सर्वदैवतपूजितम् ।
पवित्रं तत्पवित्राणां मङ्गलानां च मङ्गलम् ।
यत्तीर्थं सर्वतीर्थानां रम्याणां रम्यमुत्तमम् ।
समस्तगुणसंकीर्णमीश्वरायतनं महत् ।
यत्स्थानं सर्वसिद्धानां भूमिस्वर्गमनुत्तमम् ।
गर्गरीरवशब्देन यत्र लक्ष्मीर्न हन्यते ।
यत्र वत्साश्च हुंकारं करुणं मातृकाङ्क्षया ।
यद्गोपैः पालितं शूरैर्बाहुयुद्धविशारदैः ।
प्रगीतनृत्यसंलापं वल्गुतास्फोटनादितम् ।
इतस्ततः स्थितैर्वत्सैरर्घ्यमानैः समन्ततः ।
सरोवद्भ्राजते गोष्ठं श्रीमद्भिरिव पङ्कजैः ।
तच्छ्रीनिकेतनं रम्यं मातरं भ्रातरं सुतम् ।
दृष्ट्वा सखीजनं भूयः कथं प्रत्यागमिष्यसि ।
पञ्च भूतानि मे भद्रे पिबन्तु रुधिरं तव ।
न निराशानि भूतानि वाङ्मात्रेण करोम्यहम् ।

बहुला ।

प्रथमं दृष्टवत्साहं मृगेन्द्र शृणु मे वचः ।
दृष्ट्वा सखीजनं बालं गोपांश्च परिचारकान् ।
गोपीजनं समागम्य जननीं च विशेषतः ।
शपथैरागमिष्यामि मन्यसे यदि मुञ्च माम् ।

व्याघ्रः ।

शपथाः कीदृशा भद्रे ये त्वया परिनोदिताः ।
प्रत्ययं चैवमाख्याहि बहुले मम यत्नतः ।

बहुला ।

यदि ते नास्ति विश्वासो ममोपरि मृगाधिप ।
शपथैरागमिष्यामि सत्यं ब्रूयां न संशयः ।
मा ददस्वेति यो ब्रूयाद्गुर्वग्निब्राह्मणेषु च ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
मधुमांसे च यत्पापं लाक्षाविक्रयणे तथा ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
यो वेदविक्रयी विप्रश्चत्वरे पठते तु यः ।
असंतोषी च यो विप्रो नित्यं भवति याचकः ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
मत्सरी गोत्रभावेन भूतानां गुणनाशकः ।
कौमारं चापि भर्तारं या नारी नानुमन्यते ।
परद्रव्योपयोगेन यज्ञं कुर्वन्ति ये द्विजाः ।

---

half). —(L. 84) D_8 तव (for तन्न). —(L. 85) D_5 विद्रितं (for रु°). —(86) D_4 तच्च त्वं ; D_5 क्षमस्व (for तं च त्वं). — D_5 om. lines 88–89. —(L. 91) $D_{6,8}$ स्तन्यं (for सुतं). D_4 शून्यं तु मम शोचामि (for the prior half). —(L 92) D_4 तथा दानं (for स्तनं दातुं). —(L. 94) $D_{6,7}$ सखीनां समर्पयित्वा ; D_8 अर्पयित्वा सखीनां च (for the prior half). —(L. 99) $D_{4,6-8}$ त्रस्यंति (for त्रसन्ति). —(L. 101) D_4 मंत्रो (for मन्त्रा). —(L. 102) D_5 गतां वत्ससमीपतः (for the post. half). —(L. 103) D_5 दृष्ट्वा (for गत्वा). —(L. 105) $D_{4,6,7,8}$ -लोकं (for -तुल्यं). —(L. 106) $D_{4,8}$ नित्य- (for नित्यं). —(L. 107) $D_{5,7}$ पवित्रं नित्यं विप्राणां (for the prior half). —(L. 112) D_5 स्वहुंकारैर् (for च हुंकारं). D_5 मातृहुंकारकांक्षया (for the post. half). —(L. 113) D_5 तद् (for यद्). —(L. 114) D_8 प्रगीतं (for °त-). D_5 -नृत्त- (for -नृत्य-). —(L. 115) D_7 शतैर् (for स्थितैर्). —(L. 116) D_7 राजते (for भ्रा°). —(L. 121) D_5 मद्वचः (for मे वचः). —(L. 123) D_5 जनन्या (for °नीं). —(L. 124) $D_{4,6,8}$ यदि मन्यासि मुंच मां (for the post. half). —(L. 126) D_5 प्रतीपं (for प्रत्ययं). —(L. 129) D_5 गुर्वग्निब्राह्मणादिषु (for the post. half). —(L. 130) D_5 यत्ते (for यदि). —(L. 131) D_4 -विक्रयिणस् (for °यणे). —(L. 132) D_{5-7} लिप्यामि (for लिप्येऽहं). D_5 यत्ते (for यदि). —(L. 134) D_8 पापकः (for याचकः). — D_4 repeats line 135 after line 137. —(L. 135) D_4 (first time).$_5$ लिप्यामि (for लिप्येऽहं). D_5 यत्ते (for यदि). — D_8 om. lines 136–140. —(L. 136)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
स्वपाकं च परित्यज्य परपाकरताश्च ये ।
ये सक्ता गुरुदारेषु स्वामिदारेषु ये नराः ।
ब्राह्मणो वृषलीं गत्वा न तु तीर्थानि सेवते ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
ब्राह्मणः कृतसंस्कारः शूद्रप्रेक्षणकारकः ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
अनृतं धनसंबद्धे कूटसाक्ष्यं वदन्ति ये ।
यत्पापं ब्रह्महत्यायां मातापितृवधेन च ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
यत्पापं लुब्धकानां च म्लेच्छानां गरदायिनाम् ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
पादेन स्पृशते गाश्च शिरोसिनै नमन्ति ये ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
गोष्ववज्ञां प्रकुर्वन्ति शपन्ते ताडयन्ति च ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
सकृद्दत्त्वा तु यः कन्यां द्वितीयाय प्रयच्छति ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
कथायां क्रियमाणायामन्तरायं करोति यः ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
गृहे यस्यागतो विप्रो निराशः प्रतिगच्छति ।
तेन पापेन लिप्यामि यत्तेऽहं नागमे पुनः ।
द्विभार्यः पुरुषो यस्तु एकां स्नेहेन पश्यति ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
एकाकी मृष्टमश्नाति यः कश्चित्पुरुषाधमः ।
तेन पापेन लिप्येऽहं यद्यहं नागमे पुनः ।
यश्चीन्हले बलीवर्दान्विषमं वाहयेत यः ।
तेन पापेन लिप्येऽहं यदि नायां तवान्तिकम् ।
इत्येतैः पातकैर्घोरैरागमिष्याम्यहं पुनः ।
लब्ध्वा स प्रत्ययं व्याघ्रः पुनर्वचनमब्रवीत् ।
संजातः प्रत्ययोऽस्माकं शपथैर्बहुले तव ।
कदाचिन्मन्यसे गत्वा मूर्खोऽसौ वञ्चितो मया ।
लोकेऽस्मिन्नास्तिकाः केचिन्मूर्खाः पण्डितमानिनः ।
भ्रामयन्ति च ते बुद्धिं चक्रारूढ इवेक्षणम् ।
अतथ्यान्यपि तथ्यानि दर्शयन्त्यपि पेशलाः ।
समे निम्नोन्नतानीव चित्रं कर्मविदो जनाः ।
प्रायः कृतार्थो लोकोऽयं मन्यते नोपकारिणम् ।
वत्सः क्षीरक्षयं दृष्ट्वा परित्यजति मातरम् ।
न तं पश्यामि लोकेऽस्मिन्कृते प्रतिकरोति यः ।
सर्वस्य हि कृतार्थस्य मतिरन्या प्रवर्तते ।
ऋषिदेवासुरगणैः शपथाः कार्यसिद्धये ।
कृताः परस्परं पूर्वं तच्च मन्यामहे कथम् ।
सत्येनाभिशपेद्यस्तु देवाग्निगुरुसंनिधौ ।
तस्य वैवस्वतो राजा धर्मस्यार्धं निकृन्तति ।
मा ते बुद्धिर्भवेदेवं शपथैरेव यन्त्रिता ।
तेनैवं दर्शितं पूर्वं यथेष्टं कुरु सांप्रतम् ।
बहुले गच्छ पश्य त्वं पुत्रकं पुत्रवत्सले ।
पाययित्वा च तं वत्समवलिह्य च मूर्धनि ।
मातरं भ्रातरं दृष्ट्वा सखीः स्वजनबान्धवान् ।
सत्यमेवाग्रतः कृत्वा शीघ्रमागमनं कुरु ।

भीष्मः ।

एवं सा प्रत्ययं कृत्वा बहुला सत्यवादिनी ।
अनुज्ञाता मृगेन्द्रेण प्रयाता पुत्रवत्सला ।
अश्रुपूर्णमुखी दीना वेपमाना सुदुःखिता ।
कुररी निःश्वसन्तीव पतिता शोकसागरे ।
करिणीव हि नागेन गृहीता सलिलाशये ।

D_{8} -भावे च (for -भावेन). — (L. 137) D_{8} -मोदते (for -मन्यते). — (L. 139) D_{5-7} लिप्यामि (for लिप्येऽहं). D_{5} यत्ते (for यदि). — (L. 141) D_{5} न स्व- (for गुरु-). D_{8} पर- (for स्वामि-). — (L. 143) D_{5} लिप्यामि यत्ते (for लिप्येऽहं यदि). — (L. 146) D_{4} -संबाध- ; D_{6-8} -संबंधे (for -संबद्धे). — (L. 147) $D_{4, 6-8}$ मातृपित्रोर् (for मातापितृ-). — (L. 148) D_{5} लिप्यामि (for लिप्येऽहं). D_{5} यत्ते (for यदि). — (L. 150) D_{5} लिप्यामि यत्ते (for लिप्येऽहं यदि). — D_{8} om. (hapl.) lines 151–152. — (L. 151) D_{4} गा वै ; $D_{6.7}$ गावः (for गाश्च). — (L. 152) D_{5} लिप्यामि यत्ते (for लिप्येऽहं यदि). — (L. 154) D_{5} लिप्यामि यत्ते (for लिप्येऽहं यदि). — (L. 155) D_{8} कन्यां यो (by transp.). D_{7} द्वितीयं यः (for °याय). — (L. 156) D_{5} लिप्यामि यत्ते (for लिप्येऽहं यदि). — D_{4} om. (hapl.) lines 157–162. — (L. 158) D_{5} लिप्यामि यत्ते (for लिप्येऽहं यदि). — $D_{6.8}$ om. (hapl.) lines 159–160. — (L. 162) D_{5} लिप्यामि यत्ते (for लिप्येऽहं यदि). — D_{5} om. lines 163–166. D_{4} repeats line 164 after line 167. — (L. 166) $D_{4, 6, 8}$ यद्यहं नागमे पुनः (for the post. half). — (L. 167) D_{4} आगम्य ह पुनः पुनः (for the post. half). — (L. 168) $D_{6.8}$ बध्वा (for लब्ध्वा). — (L. 170) D_{5} [ऽ]यं (for ऽसौ). — D_{8} om. lines 173–176. — (L. 174) D_{4} [इ]ह (for [इ]व). — (L. 175) D_{5} प्रायः कृतार्थो लोकेस्मिन् (for the prior half). $D_{4.5}$ सत्यं ते (for मन्यते). — (L. 178) D_{5} सर्वेष्विह (for सर्वस्य हि). D_{5} प्रजायते (for प्रवर्तते). — (L. 184) D_{4} ममैव (for तेनैवं). D_{4} संप्रति (for सांप्रतम्). — (L. 185) D_{5} स्वपुत्रं (for पुत्रकं). — (L. 187) D_{6-8} सखी- (for सखीः). — (L. 191) D_{4} -मुखा (for -मुखी). D_{4} निरानंदा (for वेप-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

अशक्तात्मपरित्राणे विलपन्ती मुहुर्मुहुः ।
सा तु गोपकुलं गत्वा बहुला हृतविक्रमा ।
श्रुत्वात्मवत्सं क्रोशन्तं पर्यधावत तन्मुखी ।
उपासर्पत तं वत्सं बाष्पपर्याकुलेक्षणा ।
स प्राप्तां मातरं वत्सः शङ्कितः परिपृच्छति ।
न ते पश्यामि सौम्यत्वं दुर्मना इव लक्ष्यसे ।
उद्विग्ना चापि ते दृष्टिर्भीतभीता च दृश्यते ।

बहुला ।

पिब पुत्र स्तनं मह्यं कारणं यदि पृच्छसि ।
आगता च तव स्नेहात्कुरु तृप्तिं यथेप्सिताम् ।
अपश्चिममिदं वत्स दुर्लभं मातृदर्शनम् ।
एकाहमथ मां पीत्वा प्रत्यूषे कस्य पास्यसि ।
मया तु पुत्र गन्तव्यं शपथैरागता ह्यहम् ।
कामरूपस्य व्याघ्रस्य दातव्यं जीवितं मया ।
बहुलाया वचः श्रुत्वा वत्सो वचनमब्रवीत् ।
अहं तत्र गमिष्यामि यत्र त्वं गन्तुमिच्छसि ।
श्लाघ्यं ममापि मरणं त्वया सह न संशयः ।
एकाकिनापि मर्तव्यं मयावश्यं त्वया विना ।
यदि मां सहितं मातर्वने व्याघ्रो हनिष्यति ।
या गतिर्मातृभक्तानां ध्रुवं सा मे भविष्यति ।
तस्मादवश्यं यास्यामि त्वया सह न संशयः ।
अथ मातश्च तिष्ठ त्वं शपथाः सन्तु ते मम ।
जनन्या विप्रयुक्तस्य जीविते किं प्रयोजनम् ।
अनाथस्य वने नित्यं को मे नाथो भविष्यति ।
नास्ति मातृसमो बन्धुर्बालानां क्षीरपायिनाम् ।
नास्ति मातृसमो नाथो नास्ति मातृसमा गतिः ।
नास्ति मातृसमः स्नेहो नास्ति मातृसमं सुखम् ।
नास्ति मातृसमो देव इहलोके परत्र च ।
एष नः परमो धर्मः प्रजापतिविनिर्मितः ।
ये तु तिष्ठन्ति सत्पुत्रास्ते यान्ति परमां गतिम् ।
ममैव विहितो मृत्युर्न त्वं पुत्र गमिष्यसि ।
न चायमन्यजीवानां मृत्युः स्यादन्यमृत्युना ।
अपश्चिममिमं पुत्र मातुः संदेशमुत्तमम् ।
अनुतिष्ठस्व मद्वाक्यं तत्र शुश्रूषणं परम् ।
वने जले च विचरन्मा प्रमादं करिष्यसि ।
प्रमादात्सर्वभूतानि विनश्यन्ति न संशयः ।
न च लोभेन वर्तव्यं विषमस्थं तृणं क्वचित् ।
लोभाद्विनाशः सर्वेषामिह लोके परत्र च ।
समुद्रमटवीं युद्धं विशन्तो लोभमोहिताः ।
लोभादकार्यमत्युग्रं विद्वानपि समाचरेत् ।
लोभात्प्रमादाद्विश्रम्भात्त्रिभिर्वै बध्यते पुमान् ।
तस्माल्लोभं न कुर्वीत न प्रमादं न विश्वसेत् ।
आत्मा च सततं पुत्र रक्षितव्यः प्रयत्नतः ।
सर्पेभ्यः श्वापदेभ्यश्च म्लेच्छचोरादिसंकटे ।
तिरश्चां पापजातीनामेकत्र वसतामपि ।
विपरीतानि चित्तानि न ज्ञायन्ते ह पुत्रक ।
नदीनां नखिनां चैव शृङ्गिणां शस्त्रपाणिनाम् ।
विश्वासो नैव कर्तव्यः स्त्रीणां वेश्याजनस्य च ।
न विश्वसेदविश्वस्ते विश्वस्तेऽपि न विश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ।
न विश्वसेत्स्वदेहेऽपि चलतो जीवचेतसः ।
तद्व्यक्तिमूढमत्यर्थं सदा सुसं विचारयेत् ।
गन्धः सर्वत्र सततमाघ्रातव्यः प्रयत्नतः ।
गावः पश्यन्ति गन्धेन वेदैः पश्यन्ति ब्राह्मणाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ।
नैकस्तिष्ठेद्वने घोरे धर्ममेकश्च चिन्तयेत् ।
न चोद्वेगस्त्वया कार्यः सर्वस्य मरणं ध्रुवम् ।
यथा हि पथिकः कश्चिच्छायामाश्रित्य विश्रमेत् ।
विश्रम्य च पुनर्गच्छेत्तद्वद्भूतसमागमः ।
यत्रानित्यं जगत्सर्वं तत्रैकः शोच्यते कथम् ।

माना). — (L. 196) D_4 स्व- (for [आ]त्म-). — (L. 198) $D_{4.5.7.8}$ सं- (for स). D_5 पर्यपृच्छत (for परि-पृच्छति). — (L. 202) $D_{6.8}$ तव च (by transp.). $D_{4.5}$ ययेप्सितं (for °ताम्). — (L. 205) D_5 पुत्राद्य (for तु पुत्र). D_8 [अ]स्मि (for ह्हि). D_6 [अ]ह्यो (for अहम्). — D_5 om. line 207. — (L. 210) $D_{4.6.8}$ च (for [अ]पि). D_5 सत्यं (for [अ]वश्यं). — (L. 214) D_5 संति (for सन्तु). — (L. 215) $D_{5.8}$ -मुक्तस्य (for -यु°). — D_5 om. (hapl.) lines 217–218. D_4 om. from the post. half of line 217 up to the prior half of line 219. — (L. 221) D_8 मे (for नः). — (L. 222) $D_{4.5}$ तेपि यांति परां गतिं (for the post. half). — (L. 223) D_5 न मेद्य (for ममैव). — (L. 225) D_5 मातृ- (for मातुः).

— (L. 226) D_5 तद्वाक्यं (for मद्वाक्यं). — D_5 om. lines 233–235. — (L. 233) $D_{4.6.7}$ वध्यते (for ब°). — (L. 234) D_8 कुर्वंति (for कुर्वीत). — (L. 238) D_5 न ज्ञायंति कदाचन (for the post. half). — (L. 239) D_5 दंष्ट्रिणां; D_8 नखीनां (for नखिनां). D_4 नदीनां च नखीनां च (for the prior half). — Lines 241–242 = (var.) 1. App. I. 81 lines 125–126. — (L. 243) $D_{4.5.7}$ [ऽ]तीव (for जीव-). — (L. 244) D_7 शक्ति- (for व्यक्ति-). — (L. 245) D_5 सर्वस्य (for °त्र). — (L. 246) D_7 वाडवाः (for ब्राह्मणाः). — (L. 248) D_5 नैको धर्मान्विचिंतयेत् (for the post. half). — D_4 om. lines 251–252. — (L. 252) D_8 शोच्यसे (for °ते). — (L. 253) D_{4-6} [अ]तः (for [अ]न्तः).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

वत्सान्तःशोकमुत्सृज्य मद्वाक्यमनुपालय ।
शिरस्याघ्राय तं वत्समवलिह्य च मूर्धनि ।
शोकेन महताविष्टा बाष्पव्याकुललोचना ।
विनिःश्वसन्ती मार्गीव व्याघ्राणां वशमागता ।
पुत्रहीना जगत्सर्वं पश्यन्त्यन्धेव साभवत् ।
महापङ्कविनिर्मग्ना तिष्ठन्त्येवात्र सीदति ।
विलप्य बहुला पुत्रमुवाचेदं पुनर्वचः ।
नास्ति पुत्रसमः स्नेहो नास्ति पुत्रसमं सुखम् ।
नास्ति पुत्रसमा प्रीतिर्नास्ति पुत्रसमा गतिः ।
अपुत्रस्य जगच्छून्यमपुत्रस्य गृहं कुतः ।
पुत्रेण जयते लोकान्पुत्रेण नरकं जयेत् ।
अनृतं वदते लोकश्चन्दनं किल शीतलम् ।
पुत्रगात्रपरिष्वङ्गश्चन्दनादपि शीतलः ।
दिगम्बरं गतव्रीडं जटिलं धूलिधूसरम् ।
पुण्यैर्विना न पश्यन्ति गङ्गाधरमिवात्मजम् ।
किं चन्दनेन पीयूषबिन्दुना किं किमिन्दुना ।
पुत्रगात्रपरिष्वङ्गपात्रं गात्रं भवेद्यदि ।
इति पुत्रगुणानुक्त्वा निरीक्ष्य च मुहुर्मुहुः ।
स्वमातरं सखीर्गोपान्क्रमात्ताननुपृच्छति ।
यूथस्याग्रे चरन्तीं मामाससाद मृगाधिपः ।
मुक्ताहं तेन शपथैः कुलं दृष्ट्वागमिष्यसि ।
साहं भवन्तं संद्रष्टुं मातरं स्वकुलं सुतम् ।
आगता सत्यवाक्येन पुनर्यास्यामि तत्र च ।
मातः क्षमस्व तत्सर्वं बालत्वे यत्कृतं मया ।
न्यासस्त्वयायं दौहित्रः किमन्यत्प्रब्रवीमि ते ।
विपुले चम्पके दामे भद्रे सुरभि मालिनि ।
वसुधारे श्रिये नन्दे महानन्दे घटस्तवे ।
अज्ञानाज्ज्ञानतो वापि यदुक्तं क्वचिदप्रियम् ।
तत्क्षमध्वं महाभागाः पश्चाद्यच्च कृतं मया ।
सर्वाः सर्वगुणोपेताः सर्वलोकस्य मातरः ।
सर्वाः सर्वप्रदा नित्यं रक्षध्वं मम बालकम् ।
अनाथमबलं दीनं सीदन्तं मम पुत्रकम् ।
मातृशोकाभिसंतप्तं भगिन्यः पालयिष्यथ ।
भगिनीनामयं पुत्रः सांप्रतं च विशेषतः ।
बालोऽबलाभिः सर्वाभिः पोष्यः पाल्यश्च पुत्रवत् ।
चरन्तं विषमे स्थाने गच्छन्तं परगोकुले ।
अकार्येषु प्रवर्तन्तं हे सख्यो वारयिष्यथ ।
परपुत्रात्मपुत्रेषु यासां चित्तं समं भवेत् ।
ता धन्यास्ताः कृतार्थाश्च ताः स्त्रियस्ताश्च मातरः ।
मोदन्ते देवलोकेषु ता गावस्ताश्च योषितः ।
याः पालयन्त्यनाथांश्च परपुत्रानात्मपुत्रवत् ।
तस्मादनाथं मत्पुत्रं पुत्रवत्पालयिष्यथ ।
रक्षध्वं च महाभागा यास्यामि सत्यसंश्रयात् ।
यतः सर्वस्य जातस्य स्थितं मरणमग्रतः ।
न चास्मद्गमने मन्युः सख्यः कार्यः कथंचन ।
श्रुत्वैतद्बहुलावाक्यं माता सख्यश्च विह्वलाः ।
विषादं परमं जग्मुरिदमूचुः सुविस्मिताः ।
अहो सुमहदाश्चर्यं यद्व्याघ्रवदनं महत् ।
प्रवेष्टुमुद्यता भीमं बहुला सत्यवाक्यतः ।
शपथैः सत्यवाक्येन वञ्चयित्वा यतो भयम् ।
नाशितव्यं प्रयत्नेन तत्कथं गम्यते पुनः ।
बहुले नैव गन्तव्यं धर्मोऽयं कतमस्तव ।
यद्बालं स्वकुलं त्यक्त्वा सत्यलोभेन गम्यते ।
अत्र गाथाः पुरा गीता ऋषिभिस्तत्त्वदर्शिभिः ।
प्राणत्यागे समुत्पन्ने शपथैर्नास्ति पातकम् ।
उक्त्वानृतं भवेद्यत्र प्राणिनां प्राणरक्षणम् ।
अनृतं तत्र वै सत्यं सत्यं चैवानृतं भवेत् ।
कामिनीषु विवाहेषु गवां कार्ये तथैव च ।
ब्राह्मणाभ्युपपत्तौ च शपथैर्नास्ति पातकम् ।

— (L. 254) D_4 शिरसा (for ॰सि). D_4 om. from the post. half up to the prior half of line 260. — (L. 255) D_5 जल-; D_7 नष्टा (for बाष्प-). — (L. 256) D_5 निःश्वसंती वेपमाना (for the prior half). D_5 व्याघ्रस्य (for व्याघ्राणां). — (L. 259) D_5 बहुधा (for बहुला). — (L. 263) $D_{4.6-8}$ त्यजेत् (for जयेत्). — (L. 264) D_5 कदलीकांडशीतलः (for the post. half). — $D_{4.6.8}$ om. lines 266–269. — (L. 267) D_7 पुण्यहीना (for पुण्यैर्विना). — (L. 270) D_4 पुत्रैर् (for पुत्र-). D_7 निरीक्षंती (for ॰क्ष्य च). — (L. 271) D_5 [ए]व (for तान्). — (L. 274) D_8 भवंतीं (for भवन्तं). — (L. 276) $D_{5.7}$ बालत्वेन (for ॰त्वे यत्). — (L. 281) $D_{4.5}$ तत्क्षमस्व महाभागे (for the prior half). $D_{4.6-8}$ तु (for च). — (L. 282) D_5 सर्वाः सर्वस्य मातरः (for the post. half). — (L. 283) D_5 सर्वथा सुप्रजा नित्यं (for the prior half). — (L. 286) D_5 एष (for अयं). — (L. 287) $D_{4-6.8}$ बालाभिः (for ऽब॰). D_4 पुत्रकः (for ॰वत्). — (L. 288) D_4 विषम- (for विषमे). — (L. 293) Post. half hypermetric. — (L. 295) D_8 यास्येहं (for यास्यामि). — (L. 296) D_8 सतः (for यतः). — (L. 297) D_7 दुःखं (for मन्युः). — (L. 300) D_5 [ऽ]त्र (for सु-). — (L. 306) D_5 -वादिभिः (for -दर्शिभिः). — (L. 308) D_8 ॰ध्यत्र (for ॰द्यत्र). — (L. 309) $D_{5.7}$ भवेत्सत्यं; D_6 ॰ध्वत्र (for ॰द्यत्र). — (L. 314) D_3 गर्भे (for गर्भे). D_8 तच्च (for तत्र).

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बहुला ।
परेषां प्राणरक्षार्थं वदाम्येवानृतं वचः ।
नात्मार्थमुत्सहे वक्तुं स्वल्पमप्यनृतं क्वचित् ।
एकः संक्लिश्यते गर्भे जायेतैको म्रियेत च ।
भुङ्क्ते चैकः सुखं दुःखं मातः सत्यं वदाम्यहम् ।
सत्ये प्रतिष्ठितो लोको धर्मः सत्ये प्रतिष्ठितः ।
उदधिः सत्यवाक्येन मर्यादां न विलङ्घति ।
विष्णवे पृथिवीं दत्त्वा बलिः पातालमाश्रितः ।
छद्मना च बलिर्बद्धः सत्यवाक्येन तिष्ठति ।
प्रवर्धमानः शैलेन्द्रः शतयोजनमुच्छ्रितः ।
सत्येन संस्थितो विन्ध्यो न प्रवृद्धः स सांप्रतम् ।
स्वर्गापवर्गनरकाः सर्वे वाचि प्रतिष्ठिताः ।
यस्तां लोपयते वाचमशेषं तेन लोपितम् ।
योऽन्यथा सन्तमात्मानमन्यथा सत्सु भाषते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ।
तस्मान्नैवाहमात्मानमसत्येन च लोपये ।
यास्यामि नरकं घोरं विलोप्यात्मानमात्मना ।
अगाधे विपुले शुद्धे सत्यतीर्थे क्षमाह्रदे ।
स्नात्वा पापविनिर्मुक्तः प्रयाति परमां गतिम् ।
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते ।
सत्यं साधु तपः श्रुतं च परमं क्लेशादिभिर्वर्जितं
स्वाधीनं च सुदुर्लभं च जगतः साधारणं भूषणम् ।
साधूनां निकषं सतां कुलधनं सर्वाश्रमाणां बलं
यन्म्लेच्छोऽपि विधाय गच्छति दिवं तत्त्यज्य तिष्ठेत्कथम् ।
सख्यः ।
बहुले त्वं नमस्कार्या सर्वैरपि सुरासुरैः ।
मा त्वं परमसत्येन प्राणांस्त्यजसि दुस्त्यजान् ।
ब्रूमः किमत्र कल्याणि या त्वं धर्मधुरंधरा ।
त्यागेनानेन यत्प्राप्यं त्रैलोक्ये कः समोऽस्ति ते ।
अधियोगं च पश्यामस्त्यागादस्मात्सुतेन ते ।
न हि कल्याणचित्तानामापदः सन्ति कुत्रचित् ।
दृष्ट्वा गोपाङ्गनं सर्वं परिक्रम्य च गोकुलम् ।
बहुला प्रस्थिता देवान्वृक्षांश्चापृच्छ्य तान्पुनः ।
क्षितिं च जलमग्निं च वायुं खार्कनिशाकरम् ।
दशदिग्देवतामद्रीन्नक्षत्राणि ग्रहांस्तथा ।
सर्वान्विज्ञापयाम्यद्य प्रणिपत्य मुहुर्मुहुः ।
स्वैः स्वैः प्रभावै रक्षध्वमनाथं मम वत्सकम् ।
करुणाहितचित्तानां न स्यात्परजनो यतः ।
तस्मात्करुणया बालमनाथं पालयिष्यथ ।
ये संश्रिता वने सिद्धाः सर्वाश्च वनदेवताः ।
वने चरन्तं मे बालं ते रक्षन्तु सुतं मम ।
चम्पकाशोकपुंनागसरलार्जुनकिंशुकाः ।
शृण्वन्तु पादपाः सर्वे संदेशं मम विक्लवम् ।
बालमेकाकिनं दीनं चरन्तं विषमे वने ।
रक्षध्वं वत्सकं बालं स्नेहात्पुत्रमिवौरसम् ।
मातापितृविनिर्मुक्तमनाथं दीनमातुरम् ।
विचरन्तमिमां भूमिं क्रन्दमानं सुदुःखितम् ।
तस्येहाक्रन्दमानस्य मत्पुत्रस्य महावने ।
मातृशोकाभिभूतस्य क्षुत्पिपासातुरस्य च ।
न्यस्तस्यैकाकिनः शून्यं जगत्सर्वं प्रपश्यतः ।
चरमाणस्य कर्तव्यं सानुक्रोशस्य रक्षणम् ।
एवं संदिश्य बहुला पुत्रस्नेहवशं गता ।
शोकाग्निनातिसंतप्ता छिन्नाशा पुत्रदर्शने ।
वियुक्ता चक्रवाकीव लतेव पतिता तरोः ।
अन्धेव यष्टिरहिता प्रस्खलन्ती पदे पदे ।
गत्वा तु सा पुनस्तत्र यत्रासौ पिशिताशनः ।
आस्ते विस्फूर्जितमुखस्तीक्ष्णदंष्ट्रो भयानकः ।
व्याघ्रं दृष्ट्वा तु सा धेनुरिदं वचनमब्रवीत् ।
आगताहं महाभाग सत्यधर्मव्यवस्थया ।

म्रियेत वा; D_8 प्रयाति च (for म्रियेत च). —(L. 316) D_5 सत्ये धर्मः (by transp.). —(L. 317) $D_{5.6.8}$ च (for वि-). —(L. 318) D_5 आस्थितः (for आश्रितः). —(L. 319) D_5 -वाक्ये प्र- (for -वाक्येन). —(L. 323) D_5 तु (for तां). —(L. 326) D_4 असतो न च लोपयेत (for the post. half). —(L. 328) $D_{4.6.8}$ अगाध- (for °धे). — Lines 330–331 = (var.) 1. 69. 22; 12. 156. 19; 13. 75. 29; Mārkaṇḍeya P. 8. 42; Rām. 2. 61. 10; Hitopadeśa IV. 129. — D_5 om. (hapl.) line 330. —(L. 331) D_8 एतद् (for एव). —(L. 334) D_4 मिषतां; D_5 अनिशं (for निकषं). —(L. 335) $D_{4.6.8}$ [ऽ]प्यवधाय (for ऽपि वि°). —(L. 339) D_6 वै (for यत्). —(L. 341) D_5 कल्याणि (for °ण-). —(L. 342) D_5 गोप- (for गोपाङ्). —(L. 343) D_5 [आ]पृच्छती (for °च्छ्य तान्). —(L. 344) D_4 परम्; D_{6-8} वरम् (for जलम्). D_{4-8} -निशाचरं (for °करम्). —(L. 345) $D_{6.8}$ दिग्देवता (for °ताम्). —(L. 346) D_5 पुनः पुनः (for मुहुर्मुहुः). —(L. 348) D_5 करुणायतचित्तानां (for the prior half). D_4 om. (hapl.) from the post. half of line 351 up to the prior half of line 355. —(L. 352) D_5 -पुंनागाः (for °ग-). —(L. 356) $D_{4.5}$ मातृपितृ-; $D_{6.8}$ पितृमातृ- (for मातापितृ-). — D_4 om. line 358. —(L. 358) D_5 [ए]व (for [इ]ह). D_7 तत्स्नेहात्क्रंदमानस्य (for the prior half). —(L. 364) D_4 तरौ (for तरोः). —(L. 365) D_5 अथ वा (for अन्धेव). —(L. 370)

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

कुरु तृप्तिं यथाकामं मम मांसेन सांप्रतम् ।
तर्पयस्व स्वभूतानि पञ्चास्य शोणितेन मे ।

व्याघ्रः ।

स्वागतं तव कल्याणि बहुले सत्यवादिनि ।
न हि सत्यवतां किंचिदशुभं विद्यते क्वचित् ।
त्वयोक्तं बहुले पूर्वं सत्यात्प्रत्यागता पुनः ।
तेन नः कौतुकं जातं प्राप्तागच्छेत्कथं पुनः ।
अन्यथा मां समासाद्य जीवन्ती यास्यसे कथम् ।
तच्च नः कौतुकं पूर्णं दृष्टं सत्यं गवां मया ।
तस्मादनेन सत्येन विमुक्तासि मयाधुना ।
सत्ये प्रतिष्ठिता लोका धर्मः सत्ये प्रतिष्ठितः ।
सत्ये प्रतिष्ठितं ज्ञानं सर्वं सत्ये प्रतिष्ठितम् ।
सत्येन देवास्तुष्यन्ति सत्येन पितरस्तथा ।
सत्येन ऋषयः सिद्धाः सर्वं सत्ये प्रतिष्ठितम् ।
धन्या गावः क्षितिर्धन्या धन्या त्वमपि धेनुके ।
धन्यः स राजा यत्र त्वं वससे सत्यवादिनि ।
धन्यः सराष्ट्रः सतृणः प्राणिवृक्षसमन्वितः ।
चचार बहुला यत्र दिष्ट्या पापविनाशिनी ।
ते धन्यास्ते कृतार्थाश्च तैरेव सुकृतं कृतम् ।
तैः प्राप्तं जन्मनः सारं ये पिबन्ति गवां पयः ।
मृगेन्द्रः प्रत्ययं गत्वा विस्मयं परमं गतः ।
प्रत्यादेशोऽयमस्माकं सर्वैर्देवैः प्रदर्शितः ।
तत्करिष्याम्यहं कर्म येन मोक्ष्यामि किल्बिषात् ।
मया जीवसहस्राणि भक्षितानि हतानि च ।
गतिं कां नु गमिष्यामि दृष्ट्वा गोसत्यमीदृशम् ।
अहं पापी दुराचारो नृशंसो जीवघातकः ।
काल्ँलोकान्हि गमिष्यामि कृत्वा कर्म सुदारुणम् ।
गमिष्ये पुण्यतीर्थानि करिष्ये कायशोधनम् ।
पतिष्ये गिरिमासाद्य विशे वापि हुताशनम् ।
बहुले यन्मया कार्यं तपः पापविशुद्धये ।
तदादेशय संक्षेपान्न कालो विस्तरस्य मे ।

बहुला ।

तपः कृते प्रशंसन्ति त्रेतायां यज्ञकर्म च ।
द्वापरे ध्यानयोगं च दानमेकं कलौ युगे ।
सर्वेषामेव दानानामिदमेवैकमुत्तमम् ।
अभयं सर्वभूतानां नास्ति दानमतः परम् ।
चराचराणां भूतानामभयं यः प्रयच्छति ।
स सर्वभयनिर्मुक्तः परं ब्रह्माधिगच्छति ।
नास्त्यहिंसापरं दानं नास्त्यहिंसापरो दमः ।
यथा हस्तिपदेनान्यत्पदं सर्वं प्रलीयते ।
सर्वे धर्मास्तथा व्याघ्र विधीयन्ते ह्यहिंसया ।
योगवृक्षस्य या छाया तापत्रयविनाशिनी ।
धर्मज्ञानसुपुष्पस्य स्वर्गमोक्षफलस्य च ।
दुःखत्रयार्कसंतप्तश्छायां योगतरोः श्रितः ।
न बध्यते पुनर्दुःखैः प्राप्य निर्वाणमुत्तमम् ।
इत्येवं परमं श्रेयः कीर्तितं ते समासतः ।
ज्ञातं चैतत्त्वया सर्वं केवलं मां हि पृच्छसि ।

व्याघ्रः ।

अहं देवैः पुरा सर्वैर्व्याघ्ररूपेण पातितः ।
तत्र प्राणिवधे घोरे अशेषं मम विस्मृतम् ।
त्वत्संपर्कोपदेशेन संजातं स्मरणं पुनः ।
मुक्तशापश्च संजातः प्रसादात्तव धेनुके ।
बहुले गच्छ तुष्टोऽस्मि पुत्रेण सहिता भव ।
त्वं चाप्यनेन सत्येन गमिष्यसि परां गतिम् ।
ततो योगं समाश्रित्य व्याघ्रस्तद्गतमानसः ।
प्राणायामैः स्वकं देहं परित्यज्य दिवं गतः ।
सर्वपापविशुद्धात्मा योगैश्वर्यसमन्वितः ।
विमाने हंससंयुक्ते महता अप्सरोगणैः ।
विमानसंस्थितं दृष्ट्वा विस्मयं परमं गतः ।
बहुला हृष्टतुष्टाङ्गी गोकुलं पुनरागता ।
आगत्य च यथावृत्तं व्याघ्रसंवादमुत्तमम् ।
सखीभ्यः कथयामास पुत्रस्य च विशेषतः ।

D_5 मया कामं ; D_8 यथान्यायं (for °कामं). — (L. 375) D_5 मे (for नः). D_8 प्रीता (for प्राप्ता). D_4 कथंचन (for कथं पुनः). — (L. 377) D_5 जातं (for पूर्णं). D_5 पूर्णं दृष्टं (for दृष्टं सत्यं). — (L. 384) D_5 देशो (for राजा). — (L. 390) D_5 प्रत्यादेशाद्यथास्माकं (for the prior half). — (L. 393) $D_{4.6.8}$ ते (for गो-). — (L. 402) D_5 इदमेकमनुत्तमं (for the post. half). — (L. 404) D_5 परावराणां भूतानाम् (for the prior half). — (L. 407) D_5 -पदेषु ; D_8 -पदे च (for -पदेन). $D_{4.6}$ वि- (for प्र-). — (L. 408) D_5 सर्व- (for सर्वे). — (L. 409) D_7 -विनाशनी (for °शिनी). — (L. 410) D_4 -सुपर्णस्य ; $D_{5.6.8}$ -सुपुण्यस्य (for °ष्पस्य). — (L. 411) D_7 -तप्तस्य (for -संतप्तश्छ्). D_5 दुःखत्रयकषायस्य (for the prior half). — (L. 412) D_{6-8} बाध्यते (for ब°). — (L. 414) D_5 [ए]व (for [ए]-). D_8 प्राप्तो (for प्राप्य). — (L. 416) D_{6-8} -वधैर्घोरैर् (for -वधे घोरे). D_5 तद्धृत- (for तद्गत-). — (L. 421) D_8 मार्गं (for योगं). D_7 हंसयुक्त- (for तव). — (L. 424) D_5 -युक्ते हि (for -संयुक्ते). D_{5-8} [अ]प्सरसो (for अप्सरो-). D_5 विमानेन (for the prior half). — (L. 425) D_8 विमाने (for विमान-). — (L. 426) $D_{7.8}$ -पुष्टांगी (for -तुष्टाङ्गी). — (L. 431) D_4 दृष्ट्वा (for सर्वाम्). — (L. 432) D_4 यथेष्टं मे महा-

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

बहुला पुत्रसंयुक्ता सुप्रीता सुनिराकुला ।
गोधनैर्वृषभैर्वत्सैर्गोपगोपीजनैर्वृता ।
विचचाराटवीं सर्वामशेषभयवर्जिता ।
यथेष्टचेष्टमभवद्गोकुलं तत्प्रभावतः ।
सराष्ट्रभृत्यराजानं सान्तःपुरपरिच्छदम् ।
सर्वान्गोपांश्च तान्दृष्ट्वा गोपीगोमण्डलानि च ।
इति संगृह्य तान्सर्वान्बहुला प्रस्थिता दिवम् ।
महाविमानैः श्रीमद्भिरसंख्यैः सर्वतोवृतम् ।
प्राप्य स्वर्गं क्रमादूर्ध्वमशेषैः सहिता पुनः ।
उपर्युपरि लोकानां गत्वा गोलोकमास्थिता ।
तत्र संभोगसंकीर्णे असंख्यातैः पुरोत्तमैः ।
क्रीडते सहिता सर्वैर्यावदाभूतसंप्लवम् ।

भीष्मः ।

इत्येतत्सत्यवाक्यस्य माहाभाग्यमुदाहृतम् ।
यः पठेच्छृणुयाद्वापि स्वर्गलोकं स गच्छति ।
बहुलाव्याघ्रसंवादं यः पठेत्सततं द्विजः ।
शृणुयादेकचित्तश्च स व्याघ्रैर्नाभिभूयते ।
वियुक्ता या सुतैर्नारी नरो वापि पठेत्सदा ।
सोऽपि पापैर्विनिर्मुक्तः पुत्रैर्भवति संगतः ।
यः पठेत्प्रातरुत्थाय चतुर्दश्यष्टमीषु च ।
सतां पुण्यकृतां लोकान्गच्छते नात्र संशयः ।
गवां गोष्ठे च पठतां गोवृद्धिर्नात्र संशयः ।
क्षेत्रमध्ये च पठतां सस्यवृद्धिः प्रजायते ।
गृहमध्ये च पठतां बालानां शान्तिवर्धनम् ।
भवेद्ग्रहाभिभूतानां रक्षामेतां च यः पठेत् ।
दुर्गेषु पठतां नित्यमटव्यायतनेषु च ।
दिवा वा यदि वा रात्रौ न भयं विद्यते क्वचित् ।
दुःस्वप्नारिष्टदुर्मित्रं श्रुत्वेदं संप्रणश्यति ।
वन्ध्यायाश्च भवेत्पुत्रः संमतश्च पतिर्भवेत् ।
कुमारी च सदा शृण्वन्वीरं पतिमवाप्नुयात् ।
नारी वा पुरुषो वापि दुर्भगः सुभगो भवेत् ।
गवां पर्वसु भक्त्या च माहात्म्यं पुरतः पठेत् ।
स गोवृद्धिमवाप्नोति गोलोकं चैव गच्छति ।

Colophon.

भागे (for the prior half). — (L. 434) D6 हृद्यान् ; D7 हृष्टान् (for दृष्ट्वा). D5 सर्वगोपाश्च तां दृष्ट्वा (for the prior half). D5 गोपीगोपकुलानि च (for the post. half). — (L. 435) D5 हृदि (for इति). — (L. 438) D5 गोकुलम् (for गोलोकम्). — (L. 439) D5 तत्र भोगसमाकीर्णे (for the prior half). — D5 om. line 441. — (L. 442) D5 इत्येतद्यः पठेद्वापि (for the prior half). — (L. 443) D5 नरः (for द्विजः). — (L. 449) D4 मध्ये (for गोष्ठे). — (L. 450) D8 सम्यग् (for सस्य-). — (L. 451) D7 -मध्येषु (for -मध्ये च). D4 गोवृद्धिर्नात्र संशयः ; D6 बालवृद्धिः प्रजायते (for the post. half). — (L. 453) D4 पठते (for °तां). — (L. 456) D5 भवेत्पतिः (by transp.). — Colophon. — *Sub-parvan* : D5, 8 दानधर्म. — *Adhy. name* : D4–8 बहुलोपाख्यानं.

CC-0. Prof. Satya Vrat Shastri Collection, New Delhi. Digitized by eGangotri

CRITICAL NOTES

☞ *Besides a few comments from the point of view of textual criticism, exegesis, grammar, epic style, etc, the Critical Notes also include corrections in the Constituted Text and the Critical Apparatus.*

A manuscript containing a commentary by an unidentified author (Cu) became available after the text of the Anuśāsanaparvan had been printed off. This manuscript was mostly identical with the manuscript (B O R I, Govt. Collection No. 61 of 1871–73) which had been already used for the constitution of the text, namely, Dn3. On closer scrutiny, however, it was discovered that the commentary given in this manuscript as also in the manuscript which became newly available was definitely not by Nīlakaṇṭha. From the many extracts which have been reproduced in the Critical Notes, it will be seen that it differs substantially from Cn. The siglum Dn3 assigned to the manuscript is thus not correct, though the manuscript certainly belongs to the D version of the N recension. The commentary by the unidentified author (Cu) is highly interesting from the point of view both of the v. l. which it mentions and the interpretations which it gives. It has, therefore, been quoted copiously in the Critical Notes.

1

2 ^{b}) शान्तिरुक्ता : This presupposes the Śāntiparvan. The present parvan, which follows and, in a sense, continues Bhīṣma's instruction to Yudhiṣṭhira embodied in the Śāntiparvan, is appropriately called *anuśāsana*. Yudhiṣṭhira had lost his peace of mind on account of the tragic consequences of the great war of which he believed himself to be the root-cause, and had not apparently regained it completely even after Bhīṣma's teachings in the Śāntiparvan. From this point of view, Yudhiṣṭhira's first question, namely, how he could hope to win peace of mind knowing that he had been mainly responsible for the great catastrophe [**Cu**: ईदृशं (in 1^{d}) वहुविधं ज्ञातिवान्धवादिवधम्], is fairly relevant. But the subsequent questions which Yudhiṣṭhira is represented in this parvan to have put to Bhīṣma are certainly not so. There also does not seem to be any logical connection between one question and another. The attempts made by Nīlakaṇṭha and other commentators to establish some kind of logical order among the various adhyāyas cannot be said to have been quite successful. Whatever topics came to the mind of the various redactors of the Epic seem to have been introduced in this parvan in the form of Yudhiṣṭhira's questions and Bhīṣma's replies which latter are often illustrated by some ancient legends. Some of the questions put into Yudhiṣṭhira's mouth are so elementary that they show that venerable king to be a naïve person; they make one wonder if Yudhiṣṭhira had not learnt even commonplace things in the course of his long and eventful life.

5 ^{a}) **Cu** : नु, प्रश्ने.

6* **Cu** : नु, भोः.

8* (Line 10) **Cu** : राजन् इति संबोधनं क्षत्रियाभिप्रायेण, जनमेजयस्येति वा.

8 ^{a}) परतन्त्रं = subject to the inexorable law of *karman*. **Cu** : परतन्त्र इति संबोधनपाठो वा (cf. D7). — ^{d}) एतद् = the working of the law of *karman*. It is subtle and beyond the ken of the senses.

